MSS No. 282 Subject Philosophy

Name of MSS जयसिंह कल्पद्रुम

Author केशव गौड़

Period 1780 सम्वत Folios 614

Script Sanskrit Source Prithi Pal Singh

Missing Folios 73A-75, 469A-479

२८२

(3)

JAI SINGH

Mool

282

Samvat 1780

Page 12a1

M

13 X 5

जयसिंह कल्पद्रुम ; अवंती पुर वासी केशव गौड़ द्वारा रविवार श्रावन कृष्णा पक्ष दशामी १७८० वि॰ लि॰

६१५ पत्रक ॥ ल॰ म॰ १॰ पं॰ प्र॰

ह॰ ल॰

1A

जयासिंहस्कृत [illegible] ासिदग्रस्मतिभ [illegible] वीताःस्वतेजसा॥ [illegible] श्री जयसिंहस्तुत्रः श्री

रामसिंहोवृ [illegible] ब्रह्म [illegible] ा त्वांमस्काभसी

कायुक्तो [illegible]

॥पितामह [illegible] श्रीपंडित [illegible] तीर्थ [illegible] च

0A

॥पुस्तकंजलं [illegible] पंडित [illegible] ॥

[illegible] ादिनमः

[illegible] हतांम [illegible]

ज॰कु
१
1

॥ ॥श्रीगणेशाय नमः॥ ॥वंदे ज्ञाननं वारुवंक्षवतं संस्त्रवत्कंडपाली मिलद्भृंगमालं। अपर्णाहुतं विघ्नदुर्गंहरं तं गणेशं सुरेशं तमाघं प्रप

द्ये॥१॥ श्रीजानकीशं शरणागतैकदुःखापहं श्रीगिरिजाधवं वा। स्तुत्वा च पूज्यौ पितरौ सुरूपश्री भ्रातरौ सुप्रेम मानरूपौ॥२॥ आसीद्ब्रह्मादि

तो यं त्रिगुणादिरहितं निष्कलं निर्विकारं यद्विन्माचं तं देवप्रलपज लनि यौ विष्णुरूपं बभूव। जातस्तन्ना[illegible]भिपद्मा हि विरामितमतिस्तत्र पोत्रोधिवसां

स्तमाद्वैवस्वतोभूत्मनुरखिलगुणास्तज्जइक्ष्वाकुनृपः॥३॥ इक्ष्वाकोस्तत्कुले गिरीशमहशो[illegible]स्तोद्धभूत्तहोत्राजततुट्ठिः सम

जानि श्रीधुंधुमारो नृपः। मांधाता तत तस्य पेत मभवत्तस्यान्वये भून्महात्राजाधर्मविवर्द्धये किल हा[illegible]उच्छोपमः॥४॥ तेहरिश्चंद्र कु

ले विशिष्टगुणायुक्तः सगरोहि जातः। भगीरथस्तत्कुलजः प्रसिद्धः श्रीजाह्नवी येन मही मनायि[illegible]सुवः ककुत्स्थ इति विख्यातः पृथिव्यां तदं

शे विप्रलयशायुरूहद्वलोभृत्। सुदेयः ककुत्स्थकुलनाशकेप्रतिम्वमित्वाकेपरमपदसमासुगामी॥[illegible]तवंशे वितते महाभ्रमत्कतुते ध्रुवे सत्तुमहां

[illegible]दतिप्रासि यमहिमा सत्तातन्नाम यस्ती॥५॥ जाक्षत्र अंबरः सम भव घसा भवत्को वरोवा[illegible]नमोष्टगोनरतरोविष्णुः कृपावा

[illegible]ः सम भवद्तत्लः प्रताहव [illegible] मित्रत्तरागान्याव[illegible] [illegible]मा नवे[illegible]

[illegible]त्ता मात्मा जा लक्ष्मी सम भव हृद मितो भारतेमत्स्यद[illegible]दभूत्त

1A

जयसिंहस्सुतस्सुतः ॥ २ ॥ येन श्रीजयसिंहेन दिल्लीन्द्रपदलिप्सवः । अभिदग्ध्मतिभ्रं पालावशंनीताः स्वतेजसा ॥ ३ ॥ राजाग्रणीः श्रीजयसिंहपुत्रः श्री
रामसिंहो वनिपालयालुः कोर्म्मेकुलेभूद्विजिताखिवर्गः श्रीरामपादाब्जविलग्नचित्तः ॥ ३ ॥ यः कृष्णवाब्रह्मपुत्रामिधनदपुलिने स्वसौख्यभूमिं विशालां सुकामाधी
कायसुकामिरिजलब्धिगरीयसाद दाद्वाउवेभ्यः दारिद्र्यपावकानां कथमपि नगतं यस्यरोकसीदा नृणां नाद्भिः भूरिभूमिद्ध विपाचितस्य गोरयोतो नास्ति लोके ॥ ४ ॥ त
सुतः कृष्णसिंहः प्रथितगुणगणः कृष्णवंशोद्भवाद्यो जातः पृथ्व्यां पृथु श्रीररिगणतिमिरध्वंसनेभानुरूपः तस्माच्छ्रीविष्णुसिंहः क्षयितरिपुगणः पाल
कः स्मरद्रूनानां राजाराजीवनेत्रः समजनि मथुरापालितायेन पूर्वं ॥ ५ ॥ तस्माच्छ्रीविष्णुसिंहात्क्षयितरिपुगणाः पालकः स्याद्राजा राजीवलोचनः जातः श्रीज
यसिंहो सौ क्षीराब्धेरिव चंद्रमाः ॥ ६ ॥ यागीन्द्राः हरपादयः स्वपतिश्चिंतामणिश्चंद्रमाः कंदर्पः कनकाचलो दिनमणिः पार्थः शिबिर्विक्रमः बुद्धाश्रीजयसिंह
भूपतिगुणौघैर्यीकृता स्वात्मगुणान्हित्वा गर्वमहं वलोकमथ ते स्वर्गंगता नाविक्रिताः ॥ ७ ॥ मेवोदिशेलसहितां कनकस्यभूमिं रम्यां विधाय महतीव रसोमवच्या
गोग्रामरत्नगजवाजिसमाविवांपत्नीर्थैकृत्स्न्दापकेषु तस्य द्विजेभ्यः ॥ ८ ॥ तीर्थेश्री पुष्करायेप्रहरमुनिमहिते नेकदं नावलानीं [illegible] तां च प्रतिदिनमपि
कं भूरिभूषायुतानां संसुद्धं हा कंयः स्वतनुपरिमितं तोलयित्वा च तस्यां सांगो वेद्रन्त्रं दत्त्वान्नदपि गणायितेमानवः शक्रुपाल ॥ ९ ॥ श्रीमद्विमानगरे गेहे हि रामसुरवस्सु
रैस्स वितेप्रमाणदेशेमायापुर्यां वगत्वा गजरथतुरगं येन भूरिप्रदत्तं यामेवैषोशनाधेरनुदिनमपि विकंप्ररयत्नपि वांछाः स्वसौमसद्देदविक्क्षो यतमदमिमनं

तोलयित्वा सवर्षे १० वेदज्ञैर्विविधैर्द्विजैः स्वनगरे सर्वाः कृतस्कारयन्स्वसैर्पौर्बहुलाश्वकारस्तुउत्ला स्नामिर्द्विजांस्तोषयन् दुर्भिक्षैः परिपीडितान्बहुजना
न्सुस्थान्करमाधीशश्चक्रोधर्मः श्रीजयसिंहराजतिलको जीयात्सहस्रं समाः ११ यस्मिन्राजनि दानतरिमाति दिनेयोमस्थशः सध्वजाः प्रासादात्यभसन्नय
हेषुग्राहिणामुत्त्रैरितिश्रूयते देवयानवत्कायक्षुरिसपुन्नः कुचापिनो दृश्यते तुरिज्यत्सालिपिर्विहायितजलैर्मुष्टेतिमन्यामहे १२ काश्यो द्विजः कांश्चन
वाडवाग्र्यान् पप्रच्छ संपन्नतरान्नक्षविधान् ॥ दानेकिमर्थं परिपूर्णकामाः रुक्मात्तपयंचहलेन पेयः ॥ अस्माकं निस्पृहाणां क्रातिशतगादितो पेपक्ष मे
श्वराणाः सर्वेषां यद्वितंसमाधुविहितव्यय यथानत्त्था कापमेव ॥ एवं संवित्यसवैर्द्विजवानिकोगेह्यतेदानमेभ्यो येनसमाद्भामिलो कोत्रिदशानिभमतावप्नंनं तः
स्तुत्वोघः प्राघश्रीमदसीमराज्याविलसाहिहंसीङसेनाचलहष्पयोधगरोङ्क्षसेनसहितान्म्लेच्छान्क्षयंयोनयन् स्वंराज्यंपरिरक्ष्य स्वबहुसान्निवोराज्ञा ग
हेसंवत्सरमासमंत्रेषु तपक्ष सहस्रकिरणोद्ये षोपयाङुःसह १३ तेनश्रीजयसिंहेन सर्वशास्त्रार्थसंविदा संप्रार्थितः तियः कल्पक्रुतोतिहसंग्रह १४ रामाद्वि
प्रवराः सकुम्भेनिरतः शांडिल्यगोत्रोद्भवः काशीस्थो द्विजदेवभट्टतनयः सम्राट्सुविद्यान्वितः मंत्रैर्दैवसंनवैर्बहुविधैः सर्वान्क्रुत्ना वरनूतनी
व्रतकल्पशालिनमस्तुनिर्माति रत्नाकरः १५ हेमाद्र्यादीन्समालोक्य ग्रंथान्नान्यान्यथेस्तुतान् तेभ्य एव समादाय पुराणेभ्यस्तथैव च १६ किंचित्किं रामः
चिद्वितन्वाते ताम्रिद्धौ समपेयेव सहभिर्जानकीशस्यप्रीत्यैक्रतवतुतेस्वयं १७ कुम्भनासाहसंधीरैर्गुणावन्निरमत्सरैः ग्रदर्श्यसुश्रुतज्ञा हंयदसम्बोधयः २

2A

नामिह ... हवो हि बुधाः संतितान्निबंधाः सहस्रशः तथाप्यस्य तु वेदगम्यं हृदि स्थं विचार्यतां ॥ २ ॥ वक्ष्यमाणा ग्रतेऽस्य कालस्यानिमित्ततादादौ कालस्व
रूपं तावत्त्रिगर्ति यस्यो च्यते। तत्र कालस्वरूपं तावत्तत्र माहात्म्यं कूर्मपुराणे। अनादिरेष भगवान्कालोऽनंतोऽजरोऽमरः इत्यादि कालेनैव तु सृज्यंते सर्व एवाग्र सृतेपु
नः। तस्मात्कालात्मकं विश्वं स एव परमेश्वरः। विष्णुधर्मोत्तरे। अनादिनिधनः कालो रुद्रः संकर्षणः स्मृतः। कलनात्सर्वभूतानां स कालः परिकीर्तितः। अ
षेनैः सर्वभूतानां सत्कं संकर्षणः स्मृतः। सर्वभूतशमित्वाच्च स रुद्रः परिकीर्तितः। अनादिनिधनत्वेन स महान्परमेश्वरः। तस्य सूक्ष्मातिसूक्ष्मस्येत्यादि।
यद्यपरिच्छिन्नसदुर्गो न सत्क्रिया नेगतेन न निरूपयितं तथापि सूर्यादिग्रहपाधिपरिच्छिन्नस्य स्वज्ञानत्वेन किंपांगत्वात निरूपयितुमुपपद्यते। त
स्य वस्तु यो दिगतिपरिच्छेदवं विष्णुधर्मोत्तरेऽभिहितं। तस्य सूक्ष्मातिसूक्ष्मस्य त्यातिमहतो द्विजाः। मानं संख्या तु वै ज्ञेया ग्रहगत्यनुसारतः। इति। सत्य स्तोपल
ष्मसाननिमेषक्रियापरिच्छेदस्य तत्रैव दर्शितः। लघ्वक्षरसमा मात्रा निमेषः परिकीर्तितः। अतः सूक्ष्मतरः कालो नोपलभ्यो भृगूत्तम। नोपलभ्याय था
ह्यनुसू सूक्ष्मपरमाणातः। द्वौ निमेषौ त्रुटिर्ज्ञेयः प्राणो दशत्रुटिः स्मृतः। नाडिका तु षट्प्राणास्तत्षष्ट्या नाडिका स्मृता। अहोरात्रं तु तत्त्रिंशद्यानि
स्मर्येव प्रकीर्तितं। त्रिंशन्मुहूर्तास्तु तथा ह्यहोरात्रे प्रकीर्तिताः। तेन पंचदशोक्ता राम नित्यं दिवाचराः। उत्तरं तु यदा काष्ठां क्रमाद्राक्रमते रविः। तथा
तथा भवेद्वृद्धिर्दिवसस्य महाभुज॥ दिवसस्य तथा राम वृद्धिं समधिगच्छति। रात्रिर्न मुहूर्तानां तथा वृद्धिः प्रकीर्तिता। दिनवृद्धिर्यथा राम दोषा

ज्योसिहक०
३
3

हानिस्तथा तथा॥ तदाश्रितमुहूर्त्तानां हानिर्ज्ञेया यथा तथा। दक्षिणाशां यदा भमक्रमादाक्रमते रविः दिवसस्य तथा हानिर्विज्ञेया तावदेव तु। क्षीयं
ते तस्य हानौ तु तन्मुहूर्त्तास्तथैव च। रात्र्याश्रिताश्च वर्द्धन्ते रात्रिवृद्धिस्तथा तथा। यदा मेषं सहस्रांशुस्तुलां वै वा प्रपद्यते। समरात्रं दिवः कालो विषुव
च्छब्दवाच्य इति॥ ननु कालो न विधातुं शक्यः विधानोपादानयोरभेदात्। कालस्यानुपादेयत्वात्। तदुच्यते। उपादानस्यानुष्ठानरूपत्वेन व्यापार
त्वाद्विधानस्य चाप्रवृत्तप्रवर्त्तनात्मकत्वेन शब्दधर्मत्वान्न विधानोपादानयोरैक्यं अतो विधेरप्राप्तविषयत्वात्प्राप्तकर्मानुवादेनाप्राप्तकालसंबंधं वि
दधदयं विधिः स्वरूपतोऽनुपादेयमपि कालं तद्विशेषणतया स्पृशतीति कालस्य विधेयत्वं ननु स्तु कालस्य विधेयत्वं कर्माङ्गत्वनिर्णयस्तु कथं। उच्य
ते प्रतिपदाधिकरणन्यायेन लाघवादेकस्मादपूर्वमिति निश्चिते तत्र कर्मणामावदेकपदस्थस्य फललक्षणाकरणत्वे निर्णीते यदेकस्मादपूर्वं तदे
तस्तदर्थमिति न्यायेन कालस्य कर्माङ्गत्वनिर्णयः। अत एव गार्ग्येणोक्तं। तिथिनक्षत्रवारादि साधनं पुण्यपापयोः। प्रधानगुणभावेन स्वातं
त्र्येण न ते क्षमाः। प्रधानगुणभावेन प्रधानकर्माङ्गत्वेन। तस्मात्कालः कर्माङ्गत्वेन निर्णेय इति सिद्धं। स च कालः संवत्सरायनर्तुमासपक्ष राम·
दिवसादिभेदादनेकविधः। तत्र संवत्सरस्याप्यनादित्वादादौ तन्निर्णयः क्रियते। स च संवत्सरः सम्यग्वसंत्यस्मिन्मासादय इति व्युत्पन्ने ३

3A

नसंवत्सरशब्देन हृद्याभिधीयमानो मासद्वादशकात्मकः कालविशेषः। द्वादश मासाः संवत्सर इति श्रुतेः। स च मासस्त्रैविध्येन चांद्रः सावनः सौर इति त्रिविध
ः तद्युक्तः संवत्सरोऽपि त्रिविधः सिद्धांते चांद्रसावनसौराणां मासानां त्रयभेदतः। चांद्रसावनसौरास्त्रयः संवत्सरा अपीति। ननु चांद्रः संवत्सरः कदाचिद धिमासे सति त्रयोदशमासा
त्मकोऽभवतीति कथं संवत्सरस्य द्वादशमासात्मकत्वमिति चेन्न। अधिमासस्य षष्टिदिनात्मकमासैकदेशत्वेन मासंसंख्याधिक्यानापादकत्वात् षष्टिदिनात्म
कत्वे च तस्योक्तं स्मृत्यंतरे। षष्ट्या तु दिवसैर्मासः कथितो बादरायणेरिति। अतो द्वादशमासत्वं ह्यविरुद्धं।। अस्ति त्रयोदशो मास इत्यादिश्रुतिस्तु त्रिं
शद्दिनात्मकमासाभिप्रायेति। केचित्तु ज्योतिःशास्त्रे संवत्सरस्य पंचविधत्वं तत्परिमाणं चोक्तं। सौरबृहस्पतिसावनशशधरनाक्षत्रिकाः क्रमेणास्यु
रिति माधवमतेऽप्युक्तः। पंचधा अब्दः पंचविधश्चांद्रो व्रताहोति लकादिके। स्वजन्मादौ व्रते सौरो गोसत्रादिषु सावनः। त्रयोप्याशाये सबृहोवि
कल्पंते निजेच्छया। आयुर्दाये तु नाक्षत्रो बार्हस्पत्यो विवत्सर इति तेनोक्तत्वात्। गुरोर्मध्यमराशिभोगेन बार्हस्पत्यः। हेमाद्रिस्तु स्वपोधर्मे शास्त्रे
च्चरूपा योगात्तिहास एव विधाख्याता। तत्र चांद्रसंवत्सरस्य तिलकव्रतादौ उपयोगोऽद्रष्टव्यः। सौरस्य तु स्वजन्मादौ व्रतादावुपयोगः। सावनस्य तु
सत्रादावुपयोगः। नाक्षत्रबार्हस्पत्ययोर्ज्योतिःशास्त्रादावुपयोगो गंतव्यः। तत्र चांद्रोऽब्दः षष्टिभेदः। प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापति

जयसिंहक ङ्गिराः श्रीमुखो भावो युवा धातोश्वरस्तथा बहुधान्यः प्रमाथी च विक्रमो वृष चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः सर्वजित्सर्वधारी च
४ विरोधी विकृतिः खरः। नंदनो विजयश्चैव जय मन्मथ दुर्मुखौ। हेमलंबो विलंबो च विकारी शार्वरी प्लवः। शुभकृत् शोभनः क्रोधी विश्वावसु पराभवौ
4 प्लवंगः कीलकः सौम्यः साधारणो विरोधकृत्॥ परिधावी प्रमादी च आनंदो राक्षसो नलः। पिंगलः कालयुक्तश्च सिद्धार्थी रौद्र दुर्मती। दुंदुभी रुधि
रोद्गारी रक्ताक्षी क्रोधनः क्षयः। इत्येते नामतः। यद्यपि ज्योतिःशास्त्रे गुरोर्मध्यमराशिभोगेन प्रभवादीनां माघादौ प्रवृत्तिः कथिता तथापि प्रभवादीनां चांद्र
त्वमप्यस्ति। चांद्राणां प्रभवादीनां पंचके पंचके युगमिति माधवेनोक्तेः। ते न चांद्राः चैत्रादिः चैत्रसिते प्रवर्त्तंते। बार्हस्पत्यास्तु माघादौ। तयोर्विनियो
गो ज्योतिर्निबंधे ब्रह्मसिद्धांते। व्यवहारे क्रमसंज्ञोयं कालः स्मृत्यादि कर्मसु। योज्यः सर्वत्र तत्रापि जैवो वा नर्मदोत्तरे। चांद्रं यथा। स्मरेत्सर्वत्र क
र्मादौ चांद्रं संवत्सरं सदा। नान्यं यस्माद्वत्सरादौ प्रवृत्तिस्तस्य कीर्त्तितेति। इति संवत्सरनिर्णयः। अथायनं। तच्च सौरं तच्च द्वयं। सौरं त्वेति तयं प्रदिष्ट
मयनमिति दीपिकोक्तेः। सौरमासमधिकृत्य विष्णुधर्मोत्तरेपि। कृतत्रयं चायनं स्यादिति अयनपदव्युत्पत्तिस्तु माधवीये अयते यात्यनेन नक्षत्रं येनार्को द रामः
क्षिणामाशामुत्तरामाशां वेत्यत्र। तत्र यं मयनं तत्पादवाज्ञसनेयिनः पंचराशिविधायां दक्षिणोत्तरमार्गयोः समामनंति याम्यरामा सौम्या दक्षिणा दित्यसति ५

4A

।यानृषण्मासानुत्तरायणमित्याहुरितीति। केचित्तु चांद्रमासेनायनद्वयमभ्युपगच्छंति। मार्गशीर्षमासादिकैस्त्रिभिर्मासैः कल्पितः कालः षण्मासात्मक उ
त्तरायणं ज्येष्ठमासादिकैर्दक्षिणायनमिति। तत्र प्रमाणं ज्योतिःशास्त्रादौ मृग्यं तत्र द्विविधं हि दक्षिणमुत्तरं चेति। कर्कसंक्रांतिमारभ्य दक्षिणं मकर
संक्रांतिमारभ्योत्तरं। अनयोर्विनियोगो मदनरत्ने सत्यव्रतेनोक्तः। देवतारामवाप्यादिप्रतिष्ठा दक्षु खेरवौ।। दक्षिणाशामुखे कुर्वन्न तत्फलमवाप्नुया
दिति। वैखानसः मातृभैरववाराहनारसिंहत्रिविक्रमाः। महिषासुरहंत्री च स्थाप्या वै दक्षिणायने। वैशब्दोऽप्यर्थो निषेधप्रतिप्रसवोऽयं देवविशेषे। रत्नमा
लायां च गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबंधपूर्वं। सौम्यायने कर्म शुभं विधेयं यद्गर्हितं तत्खलु दक्षिणे चेति इत्ययनं।। अथर्तवः। हेमाद्रौ कात
वल्ख्ये षड्हेमंतशिशिरयोः समासेन पंच। षड्वा ऋतवः। पंचर्तवो हेमंतशिशिरयोः समासेनेति श्रुतेः। प्रयाजानुमंत्रणेऽपि प्रयोगे तथा च हेमंतशिशि
रयोरेकीकरणं। वसंतमृतूनां ग्रीष्ममृतूनां वर्षा ऋतूनां शरदमृतूनामिति चतुर्णामनुमंत्रणमाम्नाय हेमंतशिशिरावृतूनामिति पंचमस्यानुमंत्र
णं दृष्यो द्वे हो पादानात्। ऋतुशब्दार्थो माधवीये। ऋतुशब्दो ऽक्रगतावित्यस्माद्धातोर्निष्पन्नः। इयर्ति गच्छतीति अशोकपुष्पविकासादि असाधा
रणलिंगमिति वसंतादिः कालविशेषो ऋतुः। ते च वसंतोपक्रमाः। मुखं वा एतदृतूनां यद्वसंत इति श्रुतेः। निरूपिताश्चर्तवः क्रमेणास्तु तौ मधु

जयसिंहक:
५
5

श्च माधवश्च वासंतिकावृतू। शुक्रश्च शुचिश्च ग्रैष्मावृतू। नभश्च नभस्यश्च वार्षिकावृतू। इषश्चोर्जश्च शारदावृतू। सहश्च सहस्यश्च हैमंतिकावृतू
। तपश्च तपस्यश्च शैशिरावृतू इत्यत्र ऋतू इति द्विवचनं कृत्वा यत्र मासद्वित्वाभिप्रायेण। मध्वादिशब्दाश्च चैत्रादिमासवचनाः। तथा चाहुः। चैत्रो
मासो मधुः प्रोक्तो वैशाखो माधवो भवेत्। ज्येष्ठमासस्तु शुक्रः स्यादाषाढः शुचिरुच्यते। नभो मासः श्रावणः स्यान्नभस्यो भाद्र उच्यते। इषश्चाश्व
युजो मासः कार्त्तिकश्चोर्जसंज्ञकः। सहो मासो मार्गशीर्षः सहस्यः पुष्यनामकः। माघमासस्तपाः प्रोक्तस्तपस्यः फाल्गुनः स्मृत इति। सौरा वसंतादृ
यस्तु मीनादि सौरमासद्वयात्मकाः। मेषादि सौरमासद्वयात्मका वा। बौधायनेन मीनमेषयोर्मेषवृषयोर्वा वसंत इत्यभिधानात्। तदनुसारेणा
न्येषामपि द्वैविध्यकल्पना। एतेषां चतुर्णां विनियोगो वसंते ब्राह्मणोऽग्नीनादधीतेत्यादिवाक्येष्वेव गंतव्यः। श्रौतस्मार्तक्रियाः सर्वाः कुर्या
च्चांद्रमासस्तेषु तदभावे तु सौरर्त्तुष्विति ज्योतिर्विदां मतमिति त्रिकांडमंडनः। हेमाद्रौ यदा त्वधिकमासो भवति तदा चांद्रमानेन मासत्रयात्मकोऽपि क
श्चिदृतुः संपद्यते तथा च त्रिकांडमंडनेनोक्तं। चांद्रमानेन मदा चैत्रमासादिर्मलिन्मलदा। शुद्धेऽपि मलिने चैत्रे वैशाखेऽपि वसंतता। न चासौ वेदमायातामा एम.
सत्रयवसंततासंगत्यंतराभावात्सैगात्राशुपगम्यते। न चात्रापि विकल्पः किं तदन्याभ्युपगम्यते। मासास्त्वपो वसंतः स्यात्त्वदाघमथवांतिमे ५

5A

।अत्रोच्यते विकल्पोहि सौरमासे प्रयुज्यते। न तु चांद्रे प्रयुक्तोसौ मलमासानुवर्तिषिताघुत्का षड्रा ऋतव इत्येषा श्रुतिः सप्तमवार्षिका। तस्माद्द्वि
कमासः स्यात्तेषेव तुंडुषकुं त्रविन्न। यत्रैषोपभवेन्मासः सऋतुः सत्रिमासिकः। यद्वा षाष्टिदिने मास एक एवोभयात्मकः। अतोत्रापि वसंततत्वंस्यादपो रे
वमासयोरिति। इत्यृतुकथनं॥ अथ मासनिर्णयः मदनरत्ने। स च मासो मस्यते परिमीयते चंद्रवृद्धिक्षयादिनेति व्युत्पन्ने न मासशब्देन योगरूढ्या
मिथे यः। माधवीयेतु। तत्र समकालांतं मासिति प्रातिपदिकं चंद्रवावित स्य काल इति मासः। स च मासः चतुर्धा सावनः सौरः चांद्रो नाक्षत्रश्चेति। त्रिंश
द्दिनैः सावनः। अर्कसंक्रांत्यवधिः सौरः। पक्षयुग्मं चांद्रः। चंद्रस्य सर्वनक्षत्रभोगेन नाक्षत्रः। तदुक्तं विष्णुधर्मोत्तरे। सर्वैर्भैः परिवर्तैस्तु नाक्षत्रो मास उ
च्यत इति। चांद्रस्तु चित्राद्यान्वितपौर्णमास्योपेतो चैत्रादिसंज्ञां लभते। पंकजादिशब्दवच्चैत्रादिशब्दाः योगरूढाः नक्षत्रेणायुक्तः कालः सास्मिन्पौ
र्णमासीति सूत्रात् अण्पाणिनिना रूढिबोधकसंज्ञायामित्यभिधानएवं कंकात्यायनेन च अस्मिन्नेवार्थे चैत्रादिशब्दानां सुसाधनात्। न तु चैत्रादी
नां चित्रादियोगव्यभिचारित्वात्कथं चित्रादियुक्तपौर्णमासीयुक्तचांद्रमासवचनत्वं चैत्रादिशब्दानामिति चेन्न। चित्रादिपदेन यथायथं चित्रास्वाती
दिनक्षत्रद्विकत्रिकोपलक्षणान्न योगस्य सकलचैत्राद्यगतत्वेन चैत्राद्यहीनांतदव्यभिचारात्। चांद्रो मासो द्वेधा शुक्लादिर्दर्शांतः। कृष्णादिः पूर्णि

जयसिंहक

६

6

मांतश्च॥ तयोश्चांद्रोपि शुक्लपक्षादिः कृष्णादिर्वेतितद्विधेयुक्त्वा देशभेदेन व्यवस्थामाह त्रिकांडमंडनः॥ कृष्णपक्षादिकं मासं नांगीकुर्वंति केचनाये
पीछंतिन तेषामपीष्टो विंध्यस्य दक्षिणे इति। विंध्यस्य दक्षिणे कृष्णादिनिषेधादुत्तरतो द्वयोरप्यनुज्ञा गम्यते। तत्रापि शुक्लादिर्मुख्यः कृष्णादिर्गौणः॥ आ
स्त्वैवं शुक्लप्रतिपद्येव चांद्रसंवत्सरारंभो लोके। तथा च दीपिकायां। चांद्रोब्दो मधुशुक्लगप्रतिपदारंभ इति। न हि ये कृष्णादिं मन्यंते तेषां वत्सरारंभो
विद्यते अतः शुक्लादिर्मुख्यः। कृष्णादिनाम्न मासासंभवाच्च। चंद्रादीनां व्यवस्थोक्ता हेमाद्रौ ब्रह्मसिद्धांते। अमावास्यापरिच्छिन्नो मासः स्याद्ब्रा
ह्मणस्य तु। संक्रांतिपौर्णमासीभ्यां तथैव नृपवैश्ययोः। अत्र ब्राह्मणादीनां यत्र कर्मविशेषे वचनांतरेण वसंते ब्राह्मणोऽग्नीनादधीतेत्यादिव
न्माह उक्तस्तत्र दर्शांतत्वमात्रं नियम्यते न तु सर्वकर्मसु दर्शांत एवेति वृष्टपार्घ्यसौभरेहीषादिनिधननियमवद्विचिलाघवात्त्रैवर्णिकानां
सर्वकर्मसु मासविशेषविधेः सावनादीनां शूद्रानुलोमादिपरत्वायत्तेश्च। ज्योतिर्गर्गः। सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः। आब्दिके
पितृकार्ये च चांद्रो मासः प्रशस्यते। ऋष्यशृंगः। विवाहव्रतयज्ञेषु सौरं मानं प्रशस्यते। पार्वणे त्वष्टकाश्राद्धे चांद्रमिष्टं तथाब्दिके। स्मृत्यंतरे। एको राम
द्विष्टविवाहयज्ञव्रतादौ सौरसावनौ। ज्योतिर्गर्गः। आयुर्दायविभागश्च प्रायश्चित्तक्रिया तथा। सावनेनैव कर्तव्या शत्रूणां चाप्युपासना॥ ६

6A विष्णुधर्मे। नक्षत्रसत्रारायणानि वैदेहो मासे न कुर्याज्ज्ञारामात्मके नेति। प्राप्नोति तिथिं कृत्स्नां यस्मादिंत्यं तस्तु ज्ञास्मिन्नेव वा। विवाहादौ तु सौरादिं मासं कृत्याद्वि
निर्दिशेन्नदिति। इति शुद्धमासनिर्णयः॥ ॥अथ मलमासनिर्णयः॥ तत्रैकसंक्रान्तिरहितः सितादिश्चान्द्रो मासो मलमासः। संक्रान्तिद्वयवतः क्षयमा
सस्य संग्रहार्थे केति। स च द्विविधः। अधिमासः क्षयमासश्चेति। तदुक्तं मदनरत्ने काठकगृह्ये। यस्मिन्मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा। मलमासः स
विज्ञेयो मासः स्यात्तु त्रयोदश इति। न संक्रान्तिरित्यनेनाधिमासस्य ग्रहणं। संक्रान्तिद्वयमेवेति क्षयमासस्य। सत्यव्रतोऽपि। राशिद्वयं यत्र मा
से संक्रमेत दिवाकरः। नाधिमासोऽभवेद्देष मलमासस्तु केवलमिति। अयं च मासश्चान्द्र एव। अत एव चान्द्रमासस्यैव द्वयमध्ये संक्रान्तिर्न स्यात् संक्रान्ति
द्वयं वा भवेत्स मलमास उच्यते। तदाह गार्ग्यः। अमावास्याद्वयं यत्र रविसंक्रान्तिवर्जितं॥ मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदश इति। अस्यै
व मलिम्लुच इत्यपि संज्ञा॥ तदुक्तं ज्योतिःशास्त्रे। रविणालंघितो मासश्चान्द्रः ख्यातो मलिम्लुच इति। चान्द्रोऽपि शुक्लप्रतिपदादिरेव विवक्षितः। तदुक्तं लघु
हारीतेन। हृदर्शाग्निपत्रहूयते मासादिः सम्प्रकीर्तितः। अग्नीषोमौ स्मृतो मध्ये समाप्तौ पितृसोमकौ। तमतिक्रम्य तु यदा रविर्गच्छेत्कदाचन। आद्यो मलि
म्लुचो ज्ञेयो द्वितीयः प्रकृतः स्मृत इति॥ अधिमासस्य मलत्वं चाधिकमासत्वात्। तदुक्तं गृह्यपरिशिष्टे। मलं वदन्ति कालस्य मासं कालविदोऽधिकमिति

जयसिंह०
7

।कालाधिक्यं च वित्तुध मौतरे दर्शितं ॥ सौरे साब्दस्तु मासेन यदा भवति भार्गव ॥ सावनेन तदा मानेदिनषट्कं न दृश्यते ॥ दिनरात्र्याश्च तेरामप्रोक्ताः संवत्सरे सा
षट् ॥ सौम्यसंवत्सरस्यांते मानेन शशिजेन तु ॥ एकादशातिरिच्यंते दिनानि भृगुनंदन ॥ समाद्वये साष्टमासे तस्मान्मासोतिरिच्यते ॥ स चाधिमासकः प्रोक्तः
काम्यकर्मसु गर्हितं इति ॥ अयं नपुंसक इत्युक्तं ज्योतिःशास्त्रे ॥ असंक्रांतो हि यो मासः कदाचित्तिथिवृद्धितः ॥ कालांतरात्समायाति स नपुंस
क उच्यत इति ॥ नपुंसकत्वं च मासस्य पुंस्त्वप्रयोजकस्य सूर्यस्याभावात् ॥ तद्दर्पितत्वं चैवोक्तं ॥ वह्न्याः सूर्यो भानुस्तपनश्चंडो रविर्गभस्तिश्च ॥ अर्यमहि
रण्यरेतो दिवाकरो मित्रविष्णुश्च ॥ एते द्वादश सूर्या माघाद्येषूदयंति मासेषु ॥ निःसूर्योधिकमासो मलिम्लुचाख्यस्ततः पापः ॥ मासेषु द्वादशाहित्यास्तपंते
हयथाक्रमं ॥ नपुंसके चाधिके मासि मंडलं न तपते रविरिति ॥ मलिम्लुचत्वं तस्य कर्मफलचौरै राक्षसादिभिराक्रांतत्वात् तदुक्तं मातातपेन ॥ वत्सरांतर्गतः पापो
यज्ञानां फलनाशकृत् ॥ नैरृत्यैर्यातुधानाद्यैः समाक्रांतो विनाशकैः ॥ मलिम्लुचैः समाक्रांतं सूर्यसंक्रांतिवर्जितं ॥ मलिम्लुचं विजानीयात् गर्हितं सर्वक
र्मसु इति ॥ अत्र स्फुटमानागतासंक्रांतत्वाधिमासत्वेन ग्राह्यः ॥ न तु मध्यममानागतः ॥ तस्य श्रौतस्मार्तेषु च व्यवहारानुपयोगात् ॥ तथा हि ॥ इंद्राग्नी यत्र हूयेते गुम०
तेमासादिः स प्रकीर्तित इत्यादिवचनेन शुक्लप्रतिपदादिदर्शांतासंक्रांतमासस्य विधिनिषेधोपयोग्यधिमासत्वमवगम्यते ॥ न च मध्यममानागतासंक्रांतिनिय

7A

मेन शुक्लप्रतिपदादिदर्शांतः। अस्माहि नियतो भवन कालो वसिष्ठसिद्धांते दर्शितः। द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा। घटिकानां चतुष्केण प
ततिह्यधिमासकः इति। एतत्तु संभवार्थं न तु नियमार्थं। अन्यथा षोडशदिनाधिकद्वात्रिंशन्मासानंतरं कृष्णपक्षनियमेन शुक्लादित्वभंगापत्तेः। तेन न्यूना
धिककालेऽपि मलमासपातेऽपि न दोषः। यान्यपि मासे त्रिंशत्तमे भवेदित्यादीनि वचनानि तान्यपि संभवाभिप्रायेणैव न तु नियमाभिप्रायेणान्यमिवा
रस्य स्फुटत्वात्। निर्णयामृते। द्विसंक्रांतिमासस्तु मलमास एव नाधिमासः। तत्राह सत्यव्रतः। राशिद्वयं यत्र मासे संक्रमेत दिवाकरः। नाधिमासो
भवेद्देव मलमासस्तु वैमलम् इति। अयं द्विसंक्रांतिमासः क्षयाख्योऽपि। तदुक्तं ज्योतिःशास्त्रे। असंक्रांतिमासोऽधिमासः स्फुटः स्याद्द्विसंक्रांतिमासः क्ष
याख्यः कदाचित्। क्षयः कार्तिकादित्रये नान्यतः स्यात्तदा वर्षमध्येऽधिमासद्वयं चेति। स्फुटः स्फुटमानेन लब्धः। द्विसंक्रांतिमासो यदा भवति तत्र वर्षम
ध्ये मासद्वयमधिकं तत्र परोऽधिमासः। आद्यः शुद्धः। तदुक्तं तत्रैव। एकत्र मासद्वितयं यदि स्याद्वर्षेऽधिकं तत्र परोऽधिमासः। त्रयोदशांशस्तु तिरो
हवेदेव तद्देशः क्वापि न चास्ति दृष्टः इति। जाबालिरपि। मासद्वये ब्दमध्ये तु संक्रांतिर्न यदा भवेत्। प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्त
र इति। प्राकृतः शुद्धः कर्मार्ह इत्यर्थः। उत्तर इति उत्तर एवाधिमासः कर्मानर्ह इत्यर्थः। तथा मास एवा एकस्मिन्नपि वर्षे चेद्वौ मासावधिमा

जयसिंहक॰

९

१

मासतं क्रमेणाभिधानाह्वगम्यते। संसर्पोंऽहंक्रांतोपि न मलमासः। किंतु शुद्ध एव सः। उत्तरस्य संक्रांतो मलमास इत्युक्तं प्राक्।। इति मलमासस्वरूपनिर्णो
यः। अथ मलमासे वर्ज्यावर्ज्यनिर्णयः। तत्र सत्यव्रतः। मलिम्लुचस्तु यो मासः स मासः पापसंज्ञितः। वर्जितः पितृदेवाभ्यां सर्वकर्मसु संत्यजेत्। भृगुः। एक
राशिस्थिते सूर्ये यदा दर्शद्वयं भवेत्। हव्यकव्यक्रियाहंता तदा ज्ञेयोधिमासकः।। शातातपः। वत्सरांतर्गतः पापो यज्ञानां फलनाशकृत्। नैर्ऋतैर्यातुधा
नाद्यैः समाक्रांतोधिमासकः।। मलिम्लुचैः समाक्रांतं सूर्यसंक्रांतिवर्जितं। मलिम्लुचं विजानीयाद्गर्हितं सर्वकर्मसु।। गृह्यपरिशिष्टे। मलिम्लुचस्तु मासो
वै मलिनः पापसंभवः।। गर्हितः पितृदेवेभ्यः सर्वकर्मसु संत्यजेत्।। ब्रह्मसिद्धांते।। यदा शशी याति गभस्तिमंडलं दिवाकरः संक्रमणं करोति नु। तदाधिमा
सः कथितो विरिंचिना विवाहयात्रोत्सवयज्ञदोषकृत्।। सिनीवालीमतिक्रम्य यदा संक्रमते रविः। मासेनानेन लंघितो मासः सोत्र न हि सर्वकर्मसु।। ज्योति
ःशास्त्रांतरे।। सवितृमंडलमेति यदा शशी न तु संक्रमणं कुरुते रविः।। स्मरमहोत्सवनाशकरस्तदा तु निवरैः कथितोधिकमासकः।। पैठीनसिः।। श्रौ
तस्मार्तक्रियाः सर्वाः द्वादशे मासि कीर्तिताः। त्रयोदशे तु सर्वास्ता निष्फला इति कीर्तिताः। तस्मात्त्रयोदशे मासि कुर्यात्स्नानं कथं च न। कुर्वन्ननर्थं प्राप्नु
मेवाशु कुर्यादात्मविनाशनमिति। त्रयोदशत्वं च संक्रांतियुक्तप्राकृतद्वादशमासापेक्षया द्वादशत्वं च तादृशोत्तरमासापेक्षया। अत्र निष्फलाद २

9A

त्यभिधानात्फलकामनयाप्रवृत्तं कर्म निषिध्यत इति गम्यते। तथा च स्मृत्यंतरं। इष्ट्यादि सर्वकाम्यं तु मलमासे विवर्जयेदिति। यद्यपि पूर्ववचनेषु सर्व
कर्त्तव्यता निषेधो मलमासे प्रतीयते। तथापि न कुर्याद् वृद्धिके मासि काम्यं कर्मेक सवचनात्। मलेव देति कालस्य मासं कालविरोधिकं। न कुर्याद् वृद्धिके मा
सि कर्माकर्मेकवचनात्। मुख्यानैमित्तिकं कर्म तद्धितनैव कीर्तितमित्यादिशं स्व स्तु मलतु विशेषवचनेभ्यो नित्यनैमित्तिके कुर्यादप्यतः सन्मलिम्लु
च इत्यादि प्रतिप्रसववचनेभ्यश्च काम्यमात्रमेव सः। न च शंकवचने कर्माकर्मशब्दे न काम्यं कर्मोच्यते तदपि फलकामैः क्रियमाणत्वात्काम्यमेव तदका
मेर क्रियमाणत्वादकाम्यं कर्म च तदकर्म चेति कर्मधारयः। नित्यनैमित्तिकानां तु करणमेव। नित्यनैमित्तिके कुर्या[illegible]दं कुर्यान्मलिम्लुचे। तिथि
नक्षत्रवारोक्तं काम्यं नैव कदाचनेति जाबालिवचनात्। तदप्यगतिकानामेव। अनन्यगतिकं नित्यं कुर्यान्नैमित्तिकं तथेति स्मरणात्। मलेनन्यगतिं
नित्यं कुर्यान्नैमित्तिकीं क्रियामित्यादिकवचनाच्च। अनन्यगतिकं च यस्यानियतस्य तत्कालातिक्रमे जघन्यस्य कालांतरस्यानुक्तत्वाद
त्यंतलोपे प्रायश्चित्तं प्रसज्यते तन्मलमासे काम्यनिषेधोपारंभसमाप्तिविषयश्च। असूर्या नाम ये मासा न तेषु मन्यसंमतः। व्रतानां नैव यज्ञानामा
रंभश्च समापनमिति व्रत्यासिद्धांतवचनात्। प्रारब्धासमाप्तं तु काम्यं कर्म मलमासेपि भवत्येव प्रारब्धं कर्म यत्किंचित्तत्कार्यं मलिम्लुचे इति तत्रैवो

जयसिंह क०
१०
10

कृत्वात्। वाक्यभूमौ स्त्रतारंभानंतरं तत्समाप्तिकालादर्वाक्मध्यपतितेपि मासे अधिमासनिपातेपि स्वेष एव विधिक्रम इति वचनेन तद्व्रतस्याभ्युत्तादर्शी
नेनकाम्यकर्मांतरे स्थापितत्वात् कल्पयितुरश्च वितत्वात्। आवश्यकं तु काम्यं कर्म मलमासे प्रारभ्य कर्तुं व्यं यथा तीव्रज्वरादिग्रस्ते वेतथा च तस्यैव श्रीरुद्रजपा
घनुष्ठानं मलमासमाप्त्रीविक्षायामनर्थप्रसंगात्।। तदाह मरीचिः।। रोगे वा लभ्ययोगे वा सीमंतोन्नयने चैव वा। यद्दानादिसमुद्दिष्टं पूर्वत्रापि न दुष्यतीति
। पूर्वत्रापि मलमासेपीत्यर्थः। तथा मिवरतः। प्रतिवर्ष तच्छ्राद्धादिकमपि आद्यमासे वैत्स्वनमेकादशकपालं निर्वपेत् अभिवरान्नितिप्रति वैपरस्त्वादभिव
रंतमभिवरंति इत्यादिवाक्यविहितं तद् आवश्यकत्वात् चकार्यमेव। तथा राजज्ञेहादिनापमसुः प्रसक्तस्तत्र। योन्यतो विनीयात् तस्माएतांप्राजाप
त्यां शतकृष्णलां निर्वपेदित्यादिना विहितेष्टिरपि कर्त्तव्येव कृष्णलाः स्वर्णशकलानि यवत्रयपरिमितानि शतसंख्यानि यस्यां निर्वपणीयानि सेष्टिः
शतकृष्णला तथा यदा वृष्ट्यभावात्सस्यानि शुष्यंति मलमासश्चागतस्तदा कारीर्याख्येष्टिकामो यजेतेति विहितेष्टिरपि न कालविलंबं सहते एवं स्मा
र्तान्यप्यावश्यकान्युदाहरणीयानि। अग्निनगतिकानि निस्तानितु गृह्यपरिशिष्टे उदाहृतानि। अवषट्काराहोमाश्च पर्वनायपर्यातथा मलमासे तु राम०
कर्त्तव्यं काम्या इष्टीर्विवर्जयेदिति। अवषट्कारहोमा अग्निहोत्रोपासनवैश्वदेवादयः। पर्वदर्शपौर्णमासौ पार्वणस्थालीपाकश्च। आग्रयणकं १०

10A नैव्यताव पुराणा लाभेन स्नानेव कर्जं यतै वाञ्च ने नैवाभिप्रायेणापैवीन सिनासंक्रांतिरहितेमासि कुर्यादाग्रयणं नवेति विकल्प॰ का॰। नैमित्तिका
न्यपिकानिमि॰ हान वष्यकानियमे न दर्शितानि। वं द्रसूर्यग्रहे स्नानं श्राद्धदानजपादिकं कार्याणि॥ मलमासेपि नित्यनैमित्तिकंतच्चेति। म॰ संतरो च
द्रसूर्यग्रहेष्वेव मरणेपुत्रजन्मनि। मलमासेपि देयं स्याद्दत्तमक्षयतां व्रजेदिति। चंद्रसूर्यग्रहणं कपिलषष्ठ्यादि लभ्ययोगानामप्युपलक्षणं। गात्यत
रयुक्तानि त्वनित्यनैमित्तिकान्यपि तत्र न कार्याणि। तान्यपिकानि विकाव्वक॰ घ पुरि शिष्टे दर्शितानि। सोमयागादिकर्माणि नित्यान्यपि म बि
स्तुवे। षष्ठी ज्याम्य यणाधान चातुर्मास्यादिकान्यपि॥ महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्मेयत्। स्पष्ट मासविशेषाख्या विहितं वर्जयेन्मल इति
। सोमयागो वसंते विहितः। तस्य मलमासे वर्जनेपि शुद्धमासे नुष्ठाने वसंते नुष्ठितत्वसंभवात्सगतिकत्वं। षष्ठीष्टिः काटकशाखादौ प्रसिद्धा। पुत्रेष्टि
रिसम्प्रत्रपाठः। तत्र पुत्रगतफलत्वादि फलायोइष्टिर्वा। तस्या नैमित्तिकत्वात् निमित्तानंतरं करणे प्रसक्तेपि शेषाषि विरोधान्निमित्तानंतर्यबा
धेन शौचकालरूपां गोपसंग्रहस्यवस्थापनेनाशौचापगमे नानुष्ठानमिवू मलमासेप्यतीते मल्यनुष्ठानं तदुल्लंघ्यापत्त्याद्युपपद्यत इति सगतिः
काजातेष्टिर्मलमासे न क्रियते। हेमाद्रौ पुत्रष्टीति पाठः। तत्रापि पुत्रप्रष्य र्यत्वात्पुत्रेष्टिर्वा। अन्यस्यारं इह प्रपाद्धेत्वदर्शनात्। महालयोभाद्रपद

अथमिंहक

११

11

सापरपक्षः। अतएवानावश्यकनिषेधोऽप्युपरिशिष्टो मलं वदंति कालस्य मासं कालविदो विदुः। नेहे तात्र विशेषेऽप्यामन्यत्रावश्यकादिष्वेवेति। यत्तु प्रवृत्तं
मलमासात्प्राग्यत्काम्यम् समापितं। आगते मलमासेऽपि तत्समाप्यमसंशयमिति मलमासेऽपि काम्यकर्मणः समाप्तिप्रतिपादकं कालकौमुद्युक्तं तत्तु वर्तमानो
पद्गीवितकृच्छ्रचांद्रायणादिहीनपक्षत्रादिविषयं। अत्र केचित् हेमाद्रिस्तु। प्रवृत्तं मलमासात्प्रागिति समाप्त्यनुज्ञानं मलमासात्प्रागारब्धस्यानियत
कालस्यापि। असूर्यैतिसमाप्तिनिषेधस्तु मोहात्तत्रैवप्रक्रांतस्य काम्यस्य मलमासे समापने दोषातिशयद्योतनार्थ इत्याह। तदयुक्तं। प्राक्प्रवृत्ता
स्यापानियतकालस्य समाप्तेः सगतिकत्वे न मलमासेऽनुचितत्वात्। प्रतिप्रसवस्याप्यगतिकविषयत्वात्। मलमासेऽप्यनुवर्त्तनेन तत्प्रयोगप्राप्तु
भावप्रसंगाभावात्। प्रवृत्तमिति वचनस्य चानियतकालकर्मरूपविषयांतरसत्त्वादितितदेतदापातरमणीयं। प्रवृत्तमितिवचनेनियतकालासा
धारणशब्देनाभिधानात्। असूर्येति वचनस्य तु स्वार्थेमलमासप्रारब्धस्यैव समाप्तिस्तत्र निषिध्यत इत्यत्राप्येवकारस्याप्यर्थकत्वेन तु श
ब्दस्यानुवृत्तिद्योतकत्वेन सर्वसमंतार्थकत्वेनैव व्याख्यातुं शक्यत्वाच्चेति। तस्मादावश्यकस्यैव काम्यं अनन्यगतिकानि नित्यनैमित्तिकानि च काम्यं
मीणि मलमासे आरंभणीयानि समापनीयानि च। मावनमाससमाप्यानि च काम्यान्यपि प्रारब्धानि समापनीयानि तदितरेषां त्वारंभः समा ॥

11A प्रियश्च न कर्तव्या॥ अत्र तु वर्जनमात्रं तत्कर्तव्यमिति एवं सामान्यतो वर्ज्यावर्ज्यविवेके सिद्धे विशेषतो वर्ज्यावर्ज्यानि संगृह्य प्रदर्श्यन्ते। तत्र पुंसवनसीमंतोन्न
यनजातकर्मान्नप्राशनान्तानि कर्माण्यपि तत्तन्निमित्तकाम्यसुदर्शकश्राद्धं वं दर्शश्च ग्रहप्रयुक्तस्नानश्राद्धदानजपादिकं रोगशान्त्यर्थं कर्माधौ दया
घलभ्ययोगनिमित्तश्राद्धं दशनवतादिकर्म तत्पोष्टिदहनोदकदानपिंडदानास्थिसंचयननवश्राद्धैकादशाहिकवृषोत्सर्गषोडशश्राद्धसपिंडीकरणानि
मघात्रयोदशीश्राद्धं संध्यावंदनाग्निहोत्राघतिपानगोवधादिनिमित्तप्रायश्चित्तमग्निनाशादिनिमित्तिकं पुनराधानं प्रतिमादिसंस्कारनाशहेतुका
पुनःप्रतिष्ठापूर्वेद्दृष्टार्थश्राद्धगजच्छायाश्राद्धादिनिमित्तवशान्मलमासे कर्तव्यानि। तथा च स्मृतिसंग्रहे। जातकर्म च पुंसूतिः सीमंतोन्नयनं व्रतं
।मलिम्लुचेपि कुर्वीत निमित्तं यदि जायत इति। पुंसूतिः पुंसवनं। व्रतेश च बौनश्च लभ्ययोगादिनिमित्तकव्रतानां मावृश्य कप्रायश्चित्तरूपकलकृच्छ्रचांद्रा
यणादीनां च ग्रहणं। यम। गर्भवार्द्धुषिके भृत्ये श्राद्धकर्मणि मासिके। सपिंडीकरणे नित्ये नाधिमासं विवर्जयेत्। तीर्थस्नानं जपो होमो यवव्रीहि
तिलादिभिः। जातकर्मान्त्यकर्माणि नवश्राद्धं तथैव च। मघात्रयोदशीश्राद्धं श्राद्धान्यपि च षोडश। चंद्रसूर्यग्रहे स्नानं श्राद्धदानजपादिकं॥ का
र्याणि मलमासेपि नित्यं नैमित्तिकं तथेति॥ गर्भे गर्भसंस्कारे पुंसवनादौ वार्द्धुषिके तत्कृते वृद्धिग्रहणे। भृत्ये तत्कृते भृतिग्रहणे मासिकं श्रा

जयसिंहक०
१२
12

ष्टकर्मो मासामासश्राद्धं। षोडशश्राद्धानां पृथगुपादानात्। नित्यं नित्यदानं होमो मौत्रौपासनहोमः। अथ व्रीहितिलादिभिरित्यग्निहोत्रहोमाविहितकरणा
द्रव्योपादानात्। अंत्यकर्माणि दहनोदकपिंडदानास्थिसंचयनादीनि।। कालादर्शकारोपि। द्वादशाहः सपिंडांतं कर्मग्रहणाज्जन्मनोः। श्रीमंते
षु मृते श्राद्धं द्वावेतौ जातकर्म च। योगेशांतिरलंमेवयोगे श्राद्धं व्रतानि काम्यप्रायश्चित्तानि। मित्तस्य वशात्पूर्वैः परं त्रयाः। अब्दोदकुंभमन्वादिमहा
लययुगादिषु। श्राद्धं दर्शेऽप्यहरहः श्राद्धमूनादिमासिकं। मलिम्लुचनाममासेषु मृतानां श्राद्धमाब्दिकं। श्राद्धं तु पूर्वेद्युः षष्ठेश्रुती येषु चैवं युगादिषु
।।मन्वादिषु तु यद्दानं दानं दैनंदिनं च यत्। तिलगोभूहिरण्यानां संध्योपासनयोः क्रियाः। पर्वहोमश्चाग्रयणं साग्नेरिष्टिश्च पर्वणोः।। नित्यान्येहोत्र
होमश्च देवतातिथिपूजनं। स्नानं च स्नानविधिना त्रिभक्ष्यायेषु वर्जनं। तर्पणं चाग्निमित्तस्य निमित्ताडभयत्रेव। अनित्यमनिमित्तं च स्नानं च मह
दादिकं। अमावास्यानाश्च राष्ट्रवर्तीर्थयात्रामरेक्षणं। देवारामतडागादि प्रतिष्ठामौंजिबंधनं। आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च निष्क्रमः।। रा
ज्ञाभिषेकः प्रथमः चूडाकर्मव्रतानि च। अन्नप्राशनमारंभो यद्दाराणां च निवेशनं स्नानं विवाहो नामापि पञ्चदेवमहोत्सवं। व्रतारंभसमाप्ती च कर्मकाम्य
म्यस्वपाप्मनः। प्रायश्चित्तं सर्वे समलमासे विवर्जयेत् उपाकर्मोत्सर्जनं च पवित्रदमनार्पणं। अवरोहश्च हैमंतः सर्पाणां बलिरष्टकाः। ईशानस्य १२

12A वलिर्विघ्नोः शयनं परिवर्तनं उर्ज्जेन्द्रस्थापनोत्थाने ध्वजोत्थानं च वर्ज्जिताः। सूर्वं तु प्रतिषिद्धानि पुरश्चान्यद्दैविकमिति। अत्र द्वादशाहे तथारम्भनि
मित्ताद्युभयत्र वेत्यं तेन यथैव न कर्त्तव्य संग्रहः। अनित्यमानिमित्तं चेत्यारम्भवर्जयेदित्यं तेन वर्ज्यसंग्रहः। उपाकर्मेत्यारभ्य पुरश्चान्यद्दैविकमि
त्यंतेन मलमासेष्व र्जितानां शुद्धमासे अवश्यकर्त्तव्यत्वे न संग्रहः॥ अत्र गर्भेत्यादीनि मासद्विचन नाद्युदाहृतानि स्मृतिसंग्रहेऽपि॥ पौर्णादिकमासि
कं तु श्राद्धं वापरपाक्षिकं। मन्वादिके तीर्थिकं च कुर्यान्मासद्वयेऽपि वेति। आपरपाक्षिकं प्रतिकृष्णपक्षे विहितं श्राद्धं तु महालयापरपक्षश्राद्धं
तन्निषेधस्याग्रे वक्ष्यमाणत्वात॥ मत्स्यपुराणे॥ दर्शे वा रहः श्राद्धदानं च प्रतिवासरं। गोभूतिलहिरण्यानां मासेऽपि स्यान्मलिम्लुचे इति। व्यास
ः। जातकर्मणि यच्छ्राद्धं दर्शश्राद्धं तथैव च। मलमासेपि तत्कार्यं व्यासस्य वचनं यथेति। यत्तु। संवत्सरातिरेकेण मासो यः स्यान्मलिम्लुचः। तस्मिं
स्तु यो दर्शश्राद्धं न कुर्यादिंदुसंक्षये इत्यृष्यशृंगवचनं गौडग्रंथेषु लिखितं तत्कार्त्तिकादिमासविशेषसंबंधामावास्याविहितफलविशेषार्थश्रा
द्धपरं स्पष्टमासविशेषाख्याविहितं वर्जयेन्मलइत्येतदेकवाक्यत्वात्सर्वकामार्थविहितकाम्यश्राद्धविषयं च। न कुर्याद्दाधिके मासि काम्यं कर्म
कदाचनेति सामान्यवचनेन तस्यापि निषेधात्। केचित्तु न कुर्यादिंदुसंक्षय इति प्रमादपाठः। न कुर्यान्नो पतिष्ठत इति बहुग्रंथदृष्टः पाठो ज्या

यानित्याः ॥ स्मृत्यंतरे । आद्यजातकनामानि ये च संस्कार सव्रताः । मलिम्लुचेपि कर्त्तव्या इष्टीः काम्याश्च वर्जयेदिति । संस्काराः अन्नप्राशन निष्क्रमणा
दयः । जनार्दन शयनादारभ्योत्थानं यावद्धुत्वाग्निं धारणापारणादिकं करिष्यामीत्येवं संकल्पसहिताः सव्रताः काम्यात्रापि इष्ट्यग्रहणं काम्य पशुबंधादि
धर्मोपलक्षणं । सर्वेषामपि काम्यानामनावश्यकत्वेन वर्जनीयत्वात् । हारीतोपि । अधिमासे न कर्त्तव्यं श्राद्धमभ्युदयं तथा । तथैव काम्यं यत्कर्मेति
। यत्काम्यं कर्मेष्ट्यादिकं तत्तन्मलमासे न कर्त्तव्यमित्यर्थः । गभस्तिः । एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते । तत्कार्यं पूर्वमासे च कालाधिक्ये
पि धर्मत इति ॥ गौतमः ॥ जातकर्मणि यच्छ्राद्धं नवश्राद्धं तथैव च । ग्रहरोगोत्सवादौ च तत्सर्वं च परत्र च वेति । निमित्तवशादिति वाक्यशेषः । आदिशब्दा
त्सीमंतादि संस्काराणामलभ्ययोगादीनां चोपसंग्रहः । मरीचिः । रोगे चालभ्ययोगे च सोमयंतेषु सर्वेपि च । यद्दानादि समुद्दिष्टं पूर्वं चापि न दुष्य
तीति । ज्योतिःशास्त्रे । तत्र दत्तमदत्तं च हुतं चाहुतमेव च ॥ स्तुजप्तमप्यजप्तं सान्नोपवासः क्षतो भवेत् । न यात्रां न विवाहं तु न च वास्तुनिवेशनं । न प्रति
ष्ठां च देवानां प्रासादस्य मखं तु हामिति ॥ । प्रजापतिरपि । उपाकर्म च हव्यं च कव्यं पर्वोत्सवं तथा । उत्तरे नियतं कुर्यात्पूर्वे तत्रिःफलं भवेत् ॥ राम·
अन्यत्रापि । अवरोहश्च हैमंतः सर्पाणां बलिरष्टकाः । ईशानस्य बलिर्विष्णोः शयनं परिवर्त्तनं । प्रायश्चित्तं तु सर्वेषु मलमासे विवर्जयेत् । गार्ग्यः १२

13 A

।अपूर्वं देवतां दृष्ट्वा ध्रुवः प्रसुर्नेष्ट मार्गवे। मलमासे प्यनावृत्ततीर्थयात्रां विवर्जयेदिति॥ शातातपोपि। अस्तंगते गुरौ शुक्रे वृद्धे बाले मलिम्लुचे। व्रतारंभ-
पवर्गं च न कुर्यान्मौञ्जिबंधनमिति॥ गार्ग्योपि॥ नामान्नप्राशनं चौलं विवाहं मौञ्जिबंधनं। निष्क्रमं जातकर्मादि काम्यं वृषविसर्जनं। अस्तंगते गुरौ शुक्रे बाले
वृद्धे मलिम्लुचे। उद्यापनमुपारंभं व्रतानां नैव कारयेदिति। नामेति स्वकालेऽकृतनामकर्मविषयं तदाह गार्ग्यः। नामकर्म च जाते च्छिंयथाकालं स-
माचरेत्। अतिपाते तु कर्त्तव्यं प्रशस्ते मासि पुण्यभे इति। वसिष्ठोपि। वापीकूपतडागादिप्रतिष्ठायज्ञकर्म च। न कुर्यान्मलमासेपि महादानं व्र-
तानि चेति। मरीचिरपि। गृहप्रवेशं गोदानं स्थानाश्रममहोत्सवान्। न कुर्यान्मलमासे तु गुरौ शुक्रेतथास्तग इति। मात्स्येपि। आधानयज्ञकर्मा-
दिप्रायश्चित्तव्रतानि च। न कुर्यान्मलमासेपि शुक्रगुर्वोः प्लव इति। पराशरः। अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च। वेदव्रतवृषोत्स-
र्गचूडाकरणमेखलाः। मांगल्यमभिषेकं च मलमासे विवर्जयेत्। अस्यापवादः। वृद्धसूर्यग्रहे चैव मरणे पुत्रजन्मनि। मलमासेपि देयं स्याद्दत्तमक्षय्य-
कारकमिति। अग्न्याधेयं प्रतिष्ठा चेत्यत्रानावश्यकत्वे सतीति शेषो द्रष्टव्यः॥ तेन मलमासेपि प्रायश्चित्तं तथा तमग्न्याधेयमप्यनुगमनानंतरं कर्त्तव्यं न
प्रतिषिध्यते। एवं प्रतिमासंस्कारनाशे पुनःप्रतिष्ठा न प्रतिषिध्यते॥ कौथुमिः॥ अब्दमंबुघटं दद्यादन्नं वापि स्वसंचितं। संवत्सरे विवृद्धेपि प्रति

जयसिंहक मासं च मासिकमिति। तथा चत्रिंशत्सोरंकुंभान्नदानानि स्कंमासिकं व्रतदाधिकं भवतीत्यर्थः। अत एव वसिष्ठः। संवत्सरमध्ये यद्यधिमासो भवेन्मासि
१४ कार्थे दिनमेकं च वर्द्धिनयेदिति। यत्तु ज्योतिः पराशरे प्रोक्तं। उपाकर्म तथोत्सर्गः प्रसवाहोत्सवाष्टकाः। मासवृद्धौ पराः कार्या वर्जयित्वा तु पैतृकं। प
14 राः कार्याः उत्तरे मासि कार्या इत्यर्थः। तत्र प्रसवाहो जन्मदिवस शब्देन जातेष्टिरेव गृह्यते न पुनराभ्युदयिकं श्राद्धं जातकर्मैव तयोरपि ग्रहणे श्राद्धजा
तकर्मणा मानीत्यादिस्मृतिविरोधापत्तेः। पैतृकग्रहणं मासावाशपकं तिषयं न तु केवलसांवत्सरिकविषयं अमावास्यादि श्राद्धस्यापि मलमासे विधा
नात्। काठकगृह्येपि प्रेतमासिकादिमारभ्य श्राद्धपिंडोदकक्रियाः॥ सपिंडीकरणांताश्च यथाकालमुपास्थिताः। यद्वा हितिले हौमो जातकर्मादिका
ः क्रियाः। मघा त्रयोदशी श्राद्धं प्रत्युपास्थितिहेतुकं। अनन्यगतिकत्वेन कर्त्तव्यं सदा मलिम्लुचे इति। प्रत्युपास्थितहेतुकामित्यनेन संध्या वंदनादि ति
पातश्रीमित्तत्याग्रहश्चिताग्निनाशादिनिमित्त पुनराधानादेरुपसंग्रहः। वृहस्पतिः। नित्य नैमित्तिके कुर्यात्प्रयतः सन्मलिम्लुचे। तीर्थश्राद्धं गजच्छा
याप्रेतश्राद्धं तथैव चेति। अत्र गजस्य पूर्वस्यां दिशिच्छाया गजच्छाया। पराह्णे तु पोदधाति न्दसांमधुना मह। हाच्छायायां तु गजेंद्रस्य पूर्वस्यां राम·
दक्षिणामुख इति विश्वामित्रोक्ता मुख्याग्रहानंतु पदेंदुः। पितृदेवस्येहंसश्चैव करेस्थितः। याम्या तिथिर्भवेत्सापि गजच्छायाप्रकीर्तिते तिते १४

14A

वोक्तापारिभाषिकी मलमासेतद्दर्शं भवान॥ हंसूसमूर्ये समघायुक्तेत्रयोदश्यां करे हस्ते बस्थाने सति भाद्रमासे कन्यासंक्रान्ते खशपं भावे न तस्य मल
मासत्वात्संभवाज्ज॥ नागरखण्डे॥ नभोवा यनभस्योवा मलमासो यदा भवेत। सप्तमः पितृपक्षः स्यादन्यत्रैव तु पंचमइति। तत्राषाढीमवधिं कृत्वा
सप्तमपंचमोद्रष्टव्यौ। आषाढ्याः पंचमे पक्ष इति वचनात्। आषाढमाससमाप्तिभागे कर्कटसंक्रान्तौ नभसोधिकमासत्वे। श्रावणमाससमाप्तिभागे
सिंहसंक्रान्तौ नभस्यस्याधिकमासत्वे तयोरुभयोरपि पक्षयोः कन्यायां वर्त्तमाने सवितरि यः इत्यस्य पक्षः सप्तमो भवति॥ असति त्वधिक्ये ऽधिमा
से पंचमः॥ देवलः अर्केनभस्यकन्यास्थे श्राद्धपक्षः प्रकीर्त्तितः॥ सिनीवालीमतिक्रम्य यदा कन्यां व्रजेद्रविः। तदा कालस्य वृद्धत्वादतीतेवपि
त्वकियेति। अतीतापंचमपक्षमतिक्रान्ता। एवं च यत्कैश्चिदुक्तं कन्यासंक्रान्तिनिमित्तानां श्राद्धानां षोडशसु दिवसेषु नैमित्तिकत्वान्नैमित्तिकस्य च
श्राद्धस्य मलमासे प्रतिषेधाभावात्तानि कार्याणि। तदुक्तं प्रजापतिना। मुक्त्वा नैमित्तिकं श्राद्धमिति। तन्न हामि ज्ञांते। सूर्ये गुणालंघितो मासो न क
र्मार्हः स्मृतो बुधैः॥ तस्मात्तत्र न कुर्वीत श्राद्धं नैमित्तिकादृते। निमित्तत्वं च श्राद्धं प्रति कन्यासंक्रान्तेः पुराणोक्तं कन्यागते सवितरि यान्यहानि
तु षोडश। क्रतुभिस्तानि तुल्यानि पितॄणां दत्तमक्षयमिति तन्निरस्तं। शातातपेन नभस्यस्यापरे पक्षे तिथिषोडशकस्तु यः। कन्यागता

जयसिंहक न्वितश्चेत्स्यात्स्वकेलः श्राद्धकर्माणि प्रशस्तमतिशेषः। यत्तु जातुकर्ण्यवचनं। आषाढीमवधिं कृत्वा यः स्यात्पक्षस्तु पंचमः। श्राद्धं तत्र प्रकुर्वीत कन्यां
१५ गच्छतु वा न वा॥ तत्स्वेप्रदर्शितवाक्यनिचयपर्यालोचनया पक्षोपक्रमाभिप्रायं। तथा च कार्ष्णाजिनिः॥ अंतेवायदिमध्येवायत्रकन्यांरविर्व्रजेत्
15 । पक्षस्तु पंचमः पूज्यः श्राद्धषोडशकं प्रति। तेन कन्यागते सवितरि इत्यादिपुराणवचनं पक्षमध्ये यस्मिन्कस्मिंश्चिदहनि कन्यासंक्रमणोप
तिप्रतिपदादिषोडशाप्यहानि उपादेयानीत्येवंव्याख्येयं नतु संक्रमणात्सर्वाणि हेयानीत्येवं। शुद्धमासमृतस्य प्रथमाब्दिकं मलमासमृतानां
प्रत्याब्दिकश्राद्धं च तत्संबंधिमासस्य मलमासत्वे मलमास एव कार्यं॥ तदाह वृद्धवसिष्ठः असंक्रांतेपि कर्तव्यमाब्दिकं प्रथमं द्विजैः॥ तथैव
मासिकं श्राद्धं सपिंडीकरणांतयेति॥ यमः। आब्दिकं प्रथमं यस्यात्तत्कुर्वीत मलिम्लुचे। त्रयोदशे तु संप्राप्ते कुर्वीत पुनराब्दिकं। पुनराब्दिकं
द्वितीयादिवार्षिकं त्रयोदशे मासे संप्राप्ते संपूर्णे सति चतुर्दशस्य वेशादिने कुर्वीतेत्यर्थः। लघुहारीतोपि। प्रत्यब्दं द्वादशे मासि कार्या पिंडक्रिया सु
तैः। क्वचित्त्रयोदशेपि स्यादाद्यं मुक्त्वा तु वत्सरमिति॥ द्वादशे मासपूर्तीतेऽनंतरदिने क्वचिन्मृतिमासे मलिने त्रयोदशे तीतेऽनंतरदिने पि स्यात्॥ किंतु राम
घं वत्सरं मुक्त्वाऽऽद्यवत्सरानंतरमृतिमासस्य मलिने तु द्वादशे तीतेऽनंतरदिन एव तेत्यर्थः॥ अयंयः प्रथमाब्दिकस्य मृतमासात्त्रयोदशमा १५

15 A माघदिनकर्त्तव्यतानियमः सोंतराधिमासपाताभावे ज्ञातव्यः। तत्सद्भावे तु त्रयोदशोऽतीत एव संवत्सरः समग्रो तु यादि स्यादधिमासकः। ततस्त्रयो
दशे मासि क्रियाप्रेतस्य वार्षिकीति विष्णुधर्मोत्तरात्॥ त्रयोदशेतीते। वार्षिकी उनाब्दिकं प्रथमाब्दिकं सपिंडीकरणरूपा। मासपक्षतिथिस्पृष्टे
यो यस्मिन्म्रियते हनि। प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तं विदुरिति व्यासवचनाच्च। अन्यथा कार्तिकमृतस्याश्विने प्रथमाब्दिकप्रसंगः। प्रथम
वर्षेऽधिमासपातेऽब्दिकमासिकविधानाच्च। यदा षष्ठ्यात्तु दिवसे मासः इति वचनात् शुक्लकृष्णभागयोरेकमासत्वमभिप्रेत्य तत्रापि द्वादशेतीत
त एवाब्दिकं। एतादृशव्यवहारोपपादनार्थमेवैकमासत्वाभिधानात्। तेन मलमासमृतानां कालक्रमेण यदाकदाचित् अधिमासः एव मलमा
सस्तदा तदा नीतनमाब्दिकं। यदा त्वन्यतिमासा त्रयोदशः एव मलमासस्तदा प्रथमाब्दिकं वा मलमासे मृतानां तु यच्छुद्धं प्रतिवत्सरं। मलमा
से तु कर्तव्यं नान्येषां तु कदाचनेति भृगुवचनेनाब्दिकप्रथमं यत्साक्षात्कुर्वीत मलिम्लुचे इति स्मरणान्न च मलमास एव कर्तव्यं। शुद्धमासमृता
नाब्दिकीयाद्याब्दिकं तु तन्मासेऽधिके स्यात् शुद्धमास एव कर्तव्यमिति। पैठीनसिरपि मलमासेपि कर्तव्यं श्राद्धं मृत्युतिवत्सरं संवत्सरं नव
र्द्धितश्राद्धं तेत्र्यमृतेहनीति। अत्र पूर्वार्द्धं मलमासमृतविषयं। मलमासे शुद्धमासमृतप्रत्याब्दिकश्राद्धनिषेधात् मलमासेपीत्यपि एवं धा

रणोउक्तत्वाच्छुद्धमासस्य तत्प्रथमाब्दिकविषयं। सांवत्सरं प्रथमाब्दिकं। न वर्द्धेत नोभयत्र करणीयं किंतु तत्र मलमासे कर्त्तव्यमित्यनुषज्यते।
यत्तु सत्यव्रतः। वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेहनि। मलमासे न तत्कार्यं व्याघ्रस्य वचनं यथेति। तद्द्वितीयादिवार्षिकविषयं। आब्दिकं प्रथ
मं यत्स्यात्तत्कुर्वीत मलिम्लुचे इति पैठीनसिवचनात्। तेन द्वितीयादि शुद्धमासएव। पृथ्वीचंद्रोदये दिवोदासीये मदनपारिजाते चैवं। अत्र के
चित्। मलमासे सांवत्सरिकं श्राद्धं कृत्वा तदुत्तरमासे पुनस्तदेवावर्त्तनीयं। आब्दिकं प्रथमं यत्स्यादिति पैठीनसियमवचनात्। अत्र वत्सरे यो द
र्शस्तु संपूर्णोसति वत्सरे दशमासप्रवेशदिनेषु तस्याब्दिकं कुर्वीतेत्ययं। सांवत्सरं न वर्द्धेतेत्यस्यायमर्थः। न वर्द्धेत न विच्छिद्येतेति तेनैतदेव
मासद्वयेपि श्राद्धमनुष्ठेयमिति प्रतिपाद्यते इति तदसत्। उभयत्र श्राद्धानुष्ठाने प्रमाणाभावात्। यमवचनस्य तु प्रथमाब्दिकद्वितीयाब्दिकवि
षयत्वेन व्यवस्थापितत्वात्। न वर्द्धेतेत्यस्य न विच्छिद्येतेत्यर्थकत्वे क्लिष्टत्वापत्तेश्च। यत्तु वृद्धवसिष्ठः। श्राद्धीयाहनि संप्राप्ते अधिमासो भवेद्यदि
। मासद्वयेपि कुर्वीत श्राद्धमेवं न मुह्यति। यच्च व्यासः। उत्तरे द्वे व कार्याणि पितृकार्याणि चोभयोरिति तन्मासिकादिविषयं। पौर्णादिकमासिकं च एम·
श्राद्धं वा परपाक्षिकं। मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेपि चेति स्मृतिचंद्रिकोक्तेः। तैर्थिकं तीर्थश्राद्धं। तत्र मासद्वयेपि कार्यमिति त्रिस्थ॰ १६

16 A लोमेतोमहाः। केचित्तु प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्सरं मन्वादौ च युगादौ चैतन्मासोरुभयोरपीति मरीचिवचनात्। वर्षे वर्षे तु यच्छ्राद्धं माता
पित्रोर्मृतेहनि। मासद्वयेपि तत्कुर्याद्व्याघ्रस्य वचनं यथेति गालवोक्तेश्च। प्रत्याब्दिकं मासद्वये कार्यमित्याहुः। तत्तुच्छं। प्रतिमासं मृताहे क्रियमा
णं मासिकं। प्रतिसंवत्सरं क्रियमाणं कल्यादि श्राद्धमिति मरीचिवचसो मदनरत्नेन व्याख्यानात्। गालवीयस्य च मासद्वयात्मकेक्षयमासइ
ति माधवेन व्याख्यानात्। अत एव कौथुमिः। अधिमासे न कर्तव्यं श्राद्धं मासमृतादिकं। वर्षवृद्ध्यभिषेकादि कर्त्तव्यमधिके न तु इति। यद्यपि नि
र्णयामृते पूर्वोक्तकालादर्शवचनान्मलमासे श्राद्धदिनस्य वंध्यत्वनिरासार्थं पितृदेशेन ब्राह्मणान् भोजयित्वा शुद्धमासे सपिंडकं श्राद्धं कुर्यादि
ति पिंडवर्जमसंक्रांते संक्रांते पिंडसंयुतं प्रतिसंवत्सरं श्राद्धमेवं मासद्वयेपि वेति वृद्धपराशरोक्तेरिति॥ ॥तदपि चिंत्यं। पूर्वोक्तवचनस्य क्षयपू
र्वभाव्यधिकमासविषयत्वात्। तत्र हि मासद्वये श्राद्धमुक्तं॥ तथा च सत्यतपाः। एकस्मिन्यदा मासः संक्रांतिद्वयसंयुतः। मासद्वयगतं श्राद्धं मलमा
सेपि शस्यते इति। मासद्वयगतं पूर्वसंक्रांतिगतं क्षयगतं च। मलमासे क्षयमासे अपि शब्दात्पूर्वाधिमासे चेति हेमाद्रिः। दीपिकापि। तत्राकृसंयधिमा
सको यदि भवेत्तत्र तत्सांवत्सरं तास्मिन् शुद्धतया क्षयेपि च वचनात्कुर्याद्द्वयोः कोविद इति। कालादर्शोपि कथं विदेत्तद्विषयतयैव व्याख्येय इति। एवं म

जयसिंहक० लमासेव ज्यो वर्ज्ये निर्णयेहक्तेक्षयमासेपिमलमासत्वान्मलमासप्रयुक्तनिषेधप्राप्तौ रविसंक्रमहीनो योवर्ज्यो वर्ज्यविधिः स्मृतः। स एवह्यद्विसंक्रां
१७ तोमलमासेषूदीरित इति काठकगृह्ये वचनाद्धिमासप्रयुक्तनिषेधप्राप्तौ विशेषोभिधीयते। अत्र काम्यव्रतादिकर्मणां प्रथमारंभमेव न कुर्या
17 द्वितीयाद्यारंभसमाप्तिं च कुर्यादेव। अन्यथा पौषमार्गशीर्षयोः क्षयमासांतःपाते पूर्वपौषेप्रारब्धस्य माघस्नानव्रतस्य पुनरनारंभः प्रसं
ज्येत तथा कार्तिकस्य क्षयमासांतःपाते चातुर्मास्यव्रतानां समाप्तिः प्रसज्येत। प्रारब्धकर्मणामाश्वासमाप्तौ पुनरनारंभेन च संकल्पविरोधः। आरं
भाद्विघ्नमेदे षष्ठ्यासमाप्तौ स्यादिति कात्यायनवचनविरोधश्च। अधिमासे तु शुद्धमासांतरसंज्ञावादारंभसमाप्त्योस्तत्रोपपत्तेरधिमासे तयोः प्रति
षेधे न कश्चिद्विरोधः। प्रथमारंभोपि क्षयमासे शुद्धमासांतराभावात्कस्मान्नस्यादिति चेत्॥ न कुर्यान्मलमासे तु महादानव्रतानि चेति
वचनविरोधात्। अस्तु वप्रथमारंभव्यतिरिक्तारंभसमाप्त्यादिनिषेधपरत्वे संकल्पविरोधस्योक्तत्वात्काम्यव्रतादीनां क्षयमासे प्रथमारंभनि
षेधपरत्वेऽविरोधाद्वेति। नन्वेवं सति यदा कार्तिकोधिमासो भवति तदा कार्तिकव्रतानामशुद्धाश्विन एवारंभः शुद्धकार्तिके च समाप्तिर्मासोप राम
वासव्रतस्यापि मासद्वयमेवानुष्ठानं प्राप्तमिति तत्राशंक्य। उच्यते॥ यदीह मासोपवासव्रतस्याश्विने प्रारंभविधानं शुद्धकार्तिके च समाप्तिं वि १७

17A धानं स्यात्तस्या देवं। नन्वेवमाश्विनित्वस्याश्विनशुक्लद्वादश्यामारंभमभिधायोपरितनशुक्लद्वादश्यां समाप्तिर्विष्णुरहस्येऽभिहिता॥ आश्विनस्या
मले पक्षे एकादश्यामुपोषितः॥ व्रतमेतत्तु गृह्णीयाद्यावत्त्रिंशद्दिनानि तु। अन्यत्राधिकमेवं तु व्रतं त्रिंशद्दिनैः कृतं। कृत्वा मासोपवासं तु
संयतात्मा जितेंद्रियः। ततो वै पूजयेद्विष्णुं द्वादश्यां गरुडध्वजं। पूजयेत्पुष्पमालाभिर्गंधपुष्पविलेपनैः। वस्त्रदानादिभिश्चैव भोजयेच्च द्वि
जोत्तमान्। दद्याच्च दक्षिणां तेभ्यः प्रणिपत्य क्षमापयेदिति। अतः शुद्धाश्विनशुक्लद्वादश्यामेव तद्व्रतमारभ्योपरितनशुक्लद्वादश्यां समाप
नीयं न मासद्वयमनुष्ठेयं मासोपवासव्रतस्य च काम्यत्वात्काम्यस्य च मलमासे त्यागात्। अस्य मलमासेऽपि समाप्तिश्चिन्नाम्नः कश्चिद्दोषः। मा
सद्वयपक्षे च यानि क्षयाहादिश्राद्धान्यपि क्षयमासे एवं कर्त्तव्यानि। तदाह सत्यव्रतः। एक एव यदा मासः संक्रांतिद्वयसंयुतः। मासद्वयगतं श्रा
द्धं मलमासेऽपि शस्यत इति। एवं मासद्वयसंबंधीन्यावश्यकान्यन्यान्यपि कर्माणि तत्रैवानुष्ठेयानि अनन्यगतिकत्वात्। मासद्वयोदितं कर्म तत्र
कुर्याद्धि निर्णयः। एकस्मिन्मासि मासौ द्वौ यदि स्यातां तयोर्द्वयोः। तावेव पक्षौ ता एव तिथयस्त्रिंशदेव हीति स्मृत्यंतरवचनाच्च। क्षयमासस्य
मासद्वयात्मकत्वेन क्षयमासे यावत्यस्तिथयस्ताः पूर्वार्द्धे तत्तज्जातस्य च क्रमेणाव्दांतरे क्षयाहश्राद्धं वर्द्धापनोत्सवं च क्षयमासांतर्ग

जयसिंहक॰
१८
18

तत्पूर्वमाससंज्ञके मासे कुर्यात् तत्पुनराद्यम् तस्य जातस्य वक्रमेणाक्षयाहस्याद्धवर्द्धापनोत्सवौ क्षयमासांतर्गतो उत्तरमाससंज्ञके मासे कुर्यात्
॥ तदुक्तं तिथ्यर्द्धे प्रथमे पूर्वो द्वितीयेर्द्धे तदुत्तरः। मासाविति बुधैश्चिंत्यौ क्षयमासस्य मध्यगाविति। उदक्षयमासतिथिपूर्वोत्तरार्द्धयोः क्र
मेण पूर्वोत्तरमाससंबंधित्वस्य व्यवस्थापकं वचनं तु क्षयमासकृत्यमासद्वयसंबंधिश्राद्धव्रतादिविषयं। अपराह्णादिकालविधायकाने
नेकवचनवाधप्रसंगात्। तस्मात्कार्तिकमार्गशीर्षयोः क्षयमासांतःपाते कार्तिकसंबंधीनि मार्गशीर्षसंबंधीनि च यानि श्राद्धव्रतादीनि य
स्मिन्नक्षये यस्यां तिथौ यस्मिन्नपराह्णादिकाले विहितानि क्षयमासे तत्र तत्रैव कर्त्तव्यानि। एवं क्षयमासांतरेपि द्रष्टव्यं ततश्च कार्तिकशुक्लप्र
तिपद्युक्ते पित्र्यक्षयाहैकोद्दिष्टं मार्गशीर्षशुक्लप्रतिपद्युक्ते मासि क्षयाहैकोद्दिष्टं च क्षयमासशुक्लप्रतिपदि सिध्यान्ह एव कर्त्तव्यं। एवमन्या
न्यपीति दिक्॥ यानि मलमासे वर्ज्यानि तानि सर्वाण्यपि शुक्रास्तादावपि वर्ज्यानि। तथा चोक्तं। बाल्ये वा यदि वा वृद्धे शुक्रे वास्तमुपागते। मल
मासइवैतानि वर्जयेद्देवदर्शनमिति। अत्र केचित्। मलइवेति सिद्धवद्दृष्टांतीकरणात् अन्यथानुपपत्त्या मलमासे प्रथमदेवतादर्शननिषेधः एम॰
सिद्धः। अपरे तु मलमासइवेत्युत्तरवचनोपात्ताग्न्याधेयादिष्वेव योजयंति यथा मलमासे वर्ज्यस्य ग्रहणादेकालव्यतिरेकेणैतेषां १८

18A

निषेधस्तथैव बाल्यादिष्वपि यथास्यादिति। तस्मिन् पक्षे मलमासे देवतादर्शनस्नानप्रतिषेधः। वस्तुतस्तु। अदृष्टं देवतां दृष्ट्वा सुस्नातस्तु न दृष्ट्वा गोत्र इत्यत्रोक्त
गाद्गतमलमासेऽपीत्यस्मान्नये न मलमासे अदृष्टं देवतादर्शननिषेधो युक्तस्त्वेवेति। लल्लोपि। नीचस्थे वक्रसंस्थेप्यतिचरणगते बालवृद्धास्तगे वा
संन्यासो देवयात्राव्रतनियमविधिः कर्णवेधस्तु दीक्षा॥ मौञ्जीबंधोथ चूडा परिणयनविधिर्वास्तुदेवप्रतिष्ठा वर्ज्याः सद्भिः प्रयत्नात्त्रिदशपतिगु
रौ सिंहराशिस्थिते चेति। नीचस्थो मकरस्थः। दीक्षा यागदीक्षा। आगमदीक्षा वा। तथा। उद्यान कूपव्रतबंधदीक्षाविवाहयात्रा वधूप्रवेशः। तडाग
कूपत्रिदशप्रतिष्ठा वृहस्पतौ सिंहगते न कार्या। दिव्यासतीये॥ गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलिम्लुचे। गृहकर्म व्रतं यात्रां मनसापि न चिंतयेत
असमाप्तव्रतारंभस्तत्रैव ब्राह्मे॥ मुंडनं चोपवासं च गौतम्यां सिंहगे गुरौ। कन्यागतेऽब्दे स्नायां न तु तत्तीरवासिनां॥ तथा आघाम्रा गौतमीं गगा हित्वा
याज्ञाह्नवी स्मृता॥ सर्वे तीर्थफलं स्नाना ज्ञातव्यं सिंहगे गुरौ॥ अस्त उक्तो ब्रह्मसिद्धांते। रविरश्मिसान्निध्ये ग्रहाणामस्त उच्यते। ततो वार्द्ध
कं मौ द्वादशाहं ध्वे बाल्यं प्रकीर्तितमिति। वार्द्धकबाल्ययोर्मानमपि तत्रैव। पक्षं प्रागादिशि वृद्धत्वं पश्चात्संवदि नेकवेः। शैशवं प्राक्तुमं वाहं पश्चाद्दशाद्दि
नं स्मृतं। शैशवं वार्द्धकं पक्षं प्राक् पश्चात्क्रमशः पश्चात्त्रि वृहस्पतेरिति। कविः शुक्रः॥ संहिताप्रदीपे। सप्तरात्रं गुरुः शुक्रः पोत्र्यव्रा लमह्नां दशकं वा

र्यो वृद्धोसि तेज्या वसुमौ शिशुत्वे शस्तौ युतस्ताबुपनीयमानौ। वृत्तश तो। वाल्व: शुक्रो दिवस दशकं पंचकं चैव वृद्ध: पश्चाद्दृष्टां त्रितयमुदित: पक्षमेवं ज्योक्रमेण।
जीवो वृद्ध: शिशुरपि तथा पक्षमन्ये: शिशुत्वो वृद्धो प्रोक्तौ दिवसदशकं वापरै: समग्रात्रं। पश्चिमत उदये दशदिनानि वाल्व:। अस्तेपंच दशदिनानि वृद्ध: पूर्वे
तो दिनत्रयं वा ल:। पक्षं च वृद्ध इत्यर्थ:। जीवो गुरु:। अमत्र तन्नयोर्क्ता। मा कश्यपाउदित: शुक्र: पंचसप्त दिनं शिशु:। विपरीतं तु वृद्धत्वं तद्वदेव गुरोरपीति। र त
मालायामपि। प्राग्युघत: शिशुरह स्त्रितयं सित: स्यात्पश्चाद्दशाहमथ पंचदिनानि वृद्ध:। मा वाल्वपक्षममरेंद्र गुरोस्तु पक्षं प्रागप्य वाग पि वदंति वसिष्ठ मुख्या
:। अन्न विशेष: पक्षं वृद्धो महास्ते तु वाल स्यात्र दशाहिक:। पादास्ते तु दशाहानि वृद्धो वालो दिनत्रयं॥ महास्त पादास्तलक्षणं तु। द्वात्रिंशद्दिनमास्ते जी
वस्य भाग वसन्त। द्वासप्तति मेहस्य सोपादास्ते द्वादशक्रमात्। एषां च पक्षाणां मध्यस्या माह समिहिर:। वहवोदर्शिता: कालाये वाल्पेवार्द्धके पिवा। याह्यास्त
त्रा स्विका: शेषा देशभेदा दुतापदीति। देशभेदश्च गार्ग्येण दर्शित:। शुक्रो गुरु: पाक्पराक्वालो विंध्ये दशावंति शुभमराज्ञां। वंगे च्युह गौड्वषद्वयं
त्र्यहं षेतु देशे त्रिदिनं वदंतीति। वृद्धत्व मप्येतत्समानं ज्ञेयं॥ सिंहस्थे गुरौ विशेषमाह मांडव्य:। श्रुतिनेधजातकान्नप्राशनचूडादिकं सर्वं। विभवन रा
स्ये जीवे कार्यं वर्ज्या विवाहास्त्विति। तथा रवि क्षेत्रगते जीवे जीवक्षेत्रगते गुरौ। वर्जयेत्सर्व कर्माणि व्रतस्नानायनानि वनयागुर्वादित्ये गुरौ सिंहे शुक्रेवा १९

19A समुपागते ।त्यजेद्यानं महादानं व्रतं देवविलोकनं।लक्षः।गुरुक्षेत्रगतो भानुर्भौमक्षेत्रगतो गुरुः। गुर्वादित्यः स विज्ञेयः सर्वकर्मसु गर्हितः।शौनकः।
एकराशिगतौ भानुजीवौ स्यातां यदा पुनः।व्रतबंधविवाहादि शुभं कर्म विलंघ्य जेत्॥ राजमार्तंडे। यात्रोद्वाहं विवाहं श्रुतिविवर विधिं शस्त्रमप्यवे
शं प्रासादो द्यानकूपं हर्म्यस्त्वरनृभवनारंभविद्याविधानं।मौंजीबंधंप्रतिष्ठामपि च कनकदानधारणं कुर्वते ये मृत्युः सिंहस्थितेज्ये गुरौ दिनकृतोरेकराशिस्थि
तौ च।तथा च। गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलिम्लुचे।याम्यायने हरौ सुप्ते सर्वकर्माणि वर्जयेत्॥ सिंहस्थे गुरौ विशेषमाह शातातपः।माघ्यां यदि
मघा नास्ति सिंहे गुरुर्न कारणं।अन्यच्चापि मघाक्षेपरित्यज्य यदा सिंहे गुरुर्भवेत्।तदा चेत्कन्यकोद्वाहमगास्तु प्रियामवेत्॥तथा।मा
घी मघसंयुक्ता मघायां च गुरुर्भवेत्।महामघस्तदा प्रोक्तो व्रतोद्वाहौ च वर्जयेत्। वृद्धगार्ग्यः।मीने धनुषि सिंहे वा स्थिते सप्तदशं गमे।क्षौरकर्म न
कुर्वीत विवाहं गृहकर्म च।तथा।वापीकूपतडागमागगमनं क्षौरं प्रतिष्ठाव्रतं विद्यामंदिरकर्णवेधनमहादानं वनासेवनं तीर्थस्नानविवाहदेव
भवनं मंत्रादिदेवेक्षणां हरो गोवाजिजीविषुः परिहरेदस्तंगते भार्गवे इति। लक्ष्मीत्र पुनर्विशेषमाह।उपप्लवे शीतजलमातुर्भानोर्ध्वोर्दये वा कपि
लास्य षष्ठ्या। हरारसोज्जात्समये च तीर्थयात्राविधिः संक्रमणो च शस्तः। गुरुशुक्रास्तमयादि निषेधकाले ग्रहणादौ न दोष इत्यर्थः। वशिष्ठः।अति

जयसिंहक
२०
20

चास्तगते जीवे वर्जयेत्तदनंतरं। व्रतोद्वाहादिकार्येषु अष्टाविंशतिवासरान्। अतिचारगतो जीवस्तं राशिं नैति चेत्पुनः। लुप्तः संवत्सरो ज्ञेयः सर्वधर्मब
हिष्कृतः। अस्यापवादः। वृषे मेषे घेस्तकुंभे यद्यतीचारगो गुरुः। न तत्र काललोपः स्यादित्याह गालवो मुनिरिति। राजमार्तंडे त्वन्येषां वार्द्धका
तन्मे तत्रैनास्ति मत्तः संध्याकालोपि एवमुक्तः। भवेल्लंघ्यागतः पश्चादंगमेषान्हिनत्रयं। दिनादे पंचपूर्वेणा तत्कृते कर्म वर्जयेत्। वाले वृद्धे च
संध्यांशे व्रतः पंचत्रिंशत्सरान्। जीवे च भार्गवे चैव विवाहादिषु वर्जयेत्। बालवृद्धे च संध्यायां न चेष्टं च मंगुनंदने। दुर्गं ता वासतीवं ध्याम्रखुयुक्ता
फलं कुमाता। बालेवद्धंगानारी वृद्धे नष्टप्रजा भवेत्। नष्टे च मृत्युमाप्नोति सर्वमेतद्भृगुराव पीति। अत्र वृद्धः पंचाघल्पकालकथनमापद्विषयं। य
स्तु दक्षिणायने चातुर्मास्ये च कुर्मनिषेधः स्यपेक्ष्य हृगायनानियमस्तद्विषयः काम्ययज्ञादिविषयश्च। यथा विष्णुधर्मोत्तरे। शेते त्र्यवत्तु रोमासान्या वद्ध
वति कार्तिके। विशिष्टानुप्रवर्त्तंते तदा यज्ञादिकाः क्रियाः। नास्ति षेधो नृपश्रेष्ठ या वह्ववति कार्तिकः। भविष्योत्तरेपि। सुप्ते वापि जगन्नाथे के
शवे गरुडध्वजे। निवर्त्तंते क्रियाः सर्वाः स्वाध्वर्गपर्यसमार्तता। ताश्च विवाहव्रतबंधादि आसंस्कारदीक्षणा। गृहयज्ञप्रवेशादिदानान्वेनप्रतिष्ठित् स्मृ
तिः। पुराया नियानि कर्माणि वर्जयेद्दक्षिणायने द्राते मर्शास्त्र तत्र परिगणितानि॥ मौंजीराजीये॥ सुप्ते हरौ प्रकुर्याच्छेषफणोपधाने लक्ष्मीक २०

20A राज्ञ पीमार्डिज्ञपाद्यश्रे। मीनेरवौ धनुषि वा सामिते च शुक्रे वास्तुक्रियाविधिरसौ मुनिभिर्निषिद्ध इति। एवं गुर्वेतिचारसिंहमकरस्थगुरुके त्याघ
ङ्कतो नरसमाहादिषु सर्वेषां शुभानां वश्यककर्मणां आकालिक व शुक्ले रैकाहादिषु च परिगणितानामेव यात्रादीनां निषेधस्तत्र ज्योतिःशास्त्र
वचनेभ्यो ज्ञेयः इत्यत्र मनया प्रसक्तानुप्रसक्तं चिंतया। प्रकृतमनुसरामः॥ यदुक्तं मनावक्ते तीर्थस्नानमनादिदेवतादर्शनं च मलमासादौ न कर्त
व्यमिति तस्य गयायां प्रतिप्रसवो वायुपुराणे। गयायां सर्वकालेषु पिंडं दद्याद्विचक्षणः। अधिमासे जन्मदिने अस्ते च गुरुशुक्रयोः। ॥ न त्यक्त
व्यं गयाश्राद्धं सिंहस्थेपि बृहस्पताविति। अत्र श्राद्धस्य यात्रापूर्वकत्वाद्यात्राप्रतियात्रापि न निषिद्धेसर्थः॥ ॥तथा गोदावर्यां गमायां च श्रीशै
लेय ह्रसाख्ये॥ सुरासुरगुरूसां च मौढ्यदोषो न विद्यते॥ ग्रहणाद्ये तन्निमित्त कुरुक्षेत्रयात्रा हाविति र्थः। अन्यत्रापि संप्रवाहः। काशीखंडे। न
ग्रहास्तादयक्कतो दोषो विश्वेश्वरालये। स्नानमौख्यायनं तत्र सदा तत्र महोदयः इति। एतानि काशीस्तुतिपराणीति मयूखे। तन्न। एतेषां का
शीस्तुतिपरत्वे पि उपरि हिदेवेभ्यो धारयन्नीतिवद्धलवत्तरबाधकाभावात्ते विधिकल्पकत्वस्य युक्तत्वात्। इत्यलं पल्लवितेन। अथ मलमासव्रतं
हेमाद्रौ पाद्मे। देवेशं शंकरं शंभुं सर्वदेवनमस्कृतं। षडाननो महातेजाः प्रणम्य पर्यपृच्छत। नत्वा त्रिमयि गच्छामि धर्मतत्त्वे सुरेश्वर। व्रतानां

जयसिंहक०
२१
21

रं महापुण्यं कथयस्व महाप्रभो। ईश्वर उवाच॥ शृणु वत्स प्रवक्ष्यामि व्रतं पापहरं शुभं॥ यस्यानुष्ठानमात्रेण तुष्टो भवति भास्करः। दुःखं हरति यत्क्षिप्रं
मद्वाक्यात्सौख्यमुत्तमं॥ स्कंद उवाच॥ किं व्रतं कस्य वै दानं कस्य देवस्य पूजनं। केन चादौ पुरा चीर्णं तत्सर्वं कथयस्व नः। ईश्वर उवाच॥ मलमासव्रतं स्कंद
सर्वपापहरं नृणां। सकामं स्यमलं दानं च पूजनं भास्करस्य च। यस्यानुष्ठानमात्रेण पुत्रदौहित्रवान्नरः। धनधान्यसमायुक्तः सर्वपापैः प्रमुच्यते॥
आसीत्पुरा महाराजो नहुषः पृथिवीतले॥ धर्मप्रियः सत्यनिष्ठो देवपूजनतत्परः। प्रजानां पालको नित्यमतिथीनां च पूजकः। गत्वा शक्रपदं
सोऽपश्यत्स्वर्गं नरवाहनः। योऽकुमाकारयद्वै गादगस्त्यमुनिपुंगवं। युक्तः समारूढस्य पतनं नो मिंद्रमायया। मोहितेन तु तेनैव सुक्तो ब्रह्मविदां
वरः सर्प सर्पेति मूढेन ताडितश्च मुनिस्तदा। क्रुद्धेन मुनिना तेन शापितः कुंभयोनिना। सर्पो भवेति हे पाप महासर्पस्तदाभवत्। राजा प्राप्तस्तदा को
दसर्पत्वमतिदारुणं। महारण्ये महाप्राज्ञ सर्वभक्ष्योषवर्जितः॥ देहभावेन तेनापि कृतास्ते पापराशयः। एकदा तु महारण्ये कश्चिद्द्वैपायनो मुनि
ः आजगाम महाभाग तस्य भाग्येन नो द्विजः। तयोस्तु संगतमभूद्दारुणे तरु सकुले तद्दर्शनात्तस्मात्पूर्वजन्मविचेष्टितं। ततश्च विकृतीभूतः राम०
प्रणम्य शिरसा मुनिं। पतितो दंडवत्तस्य पंडवा चव चनं रुदन्। पपात च महीपृष्ठे पापिष्ठं दंडक्ष मप्रभो। माहशानां तु पापानां त्वमेव शरणं सदा २१

21A ।अस्माद्दुःखाद्विमुंचत्वं कृपां कुरु मयि प्रभो।इतिस्तुत्वा च वत्स समुनिः करुणायुतः।उवाच वचनं सर्पं स्वगुप्तमनशोषितं।पूर्वकर्मविपाकेनत्व
याडुःखमुपार्जितं।सर्प उवाच॥तात केन विमुच्येहमनंताद्दुःखसागरात्।मुक्तिर्भवेद्धि भोस्माकं कस्येदं कर्मणः फलं।व्यास उवाच।पूर्वजन्म
नि राजेंद्र मलमासे समागते।नार्चितो भास्करो विष्णुर्विधिना न कृतं व्रतं।तत्कर्मपरिपाकेन त्वं द्विष्टो विप्रयोजने॥शिक्षां परां समभवत्स्वकर्मा
यासहायत्तः।तस्मात्त्वं सर्पयत्नेन न त्वं पतंव्रतमाचर॥यस्यानुष्ठानमात्रेण स्वपदं प्राप्स्यसे ध्रुवं।सर्प उवाच॥केन तावद्विधानेन कर्त्तव्यं व्रत
मीदृशं किं देयं हि व्रते नेह तत्सर्वं कथयस्व नः।व्यास उ०।विष्णुरूपं सहस्रांशुं मलिने मासि पूजयेत्।पूजिते च सहस्रांशौ विष्णुर्भवति पूजितः।म
लमासस्तु मासानां मलिनः पापसंभवः।तस्य पापविशुद्ध्यर्थं मलमासव्रतं चरेत्।दिने दिने प्रदेयानि विविधान्यानि भक्तितः।दक्षिणाघृतयुक्ता
नि कांस्यपात्रस्थितानि च।विष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः।अपूपान्नप्रदानेन मम पापं व्यपोहतु।अनेनमासेतु संप्राश्य गुडसर्पिः स
मायुतान् दद्यादनेन मंत्रेण त्रयस्त्रिंशदपूपकान्।त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने।मासस्यांते गुडमिश्राणि अधिमासेन पोत्तमाया
वंति तच्छिद्राणि अपूपस्य च पार्थिव।तावद्वर्षसहस्राणि स्वर्गलोके महीयते।वज्रांशुनिर्मलाः पूपाः शालितंदुलनिर्मिताः।आहाराः सर्वदेवानां

जयसिंहक०
२२
22

तेप्रकुर्वंतिमंगलं ॥ सहिरण्यान्घृतापूपान्त्रयस्त्रिंशद्दपूपकान् । अधिमासेतुसंप्राप्ते त्रयस्त्रिंशत्तु देवताः । उद्दिश्यापूपदानेन पृथ्वीदानफलं ल-
भेत ॥ मासाधिकेतुसंप्राप्ते यावत्तवर्तिनपूपकान् । तावद्वर्षमवाप्नोति विष्णुलोके सनातने । त्रयस्त्रिंशदपूपान्नं कांस्यपात्रे निधाय च । सघृतं सहिरण्यं च
ब्राह्मणाय निवेदयेत् । नारायणाज्जगद्बीज भास्करप्रतिरूपक । व्रतेनानेन पुत्रांश्च संपदं चाभिवर्धय । प्रार्थनामंत्रः ॥ अधिमासे यदा राजन् द्वादशी
नाथ पूर्णिमा । व्यतीपातदिने वापि दद्याद्वै वशक्तितः । साज्यपात्रान्हिमगुडं स्त्रयस्त्रिंशदपूपकान् । कांस्यपात्रे विनिक्षिप्य हिरण्येन सम-
न्वितान् । उपानच्छत्रसंयुक्तान्विप्राय विनिवेदयेत् । इदमश्रुरूपं । तत्र मंत्रः । यस्यहस्तेगदाचक्रे गरुडो यस्य वाहनं । शंखः करतले यस्य स मे वि-
ष्णुः प्रसीदतु । कलाकाष्ठादिरूपेण निमेषघटिकादिना । यो वंचयति भूतानि तस्मै कालात्मने नमः । कुरुक्षेत्रमयं देशः कालः पर्व द्विजो हरि-
ः । पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम । मलमासविशुद्ध्यर्थं पापप्रशमनाय च । पुत्रपौत्राभिवृद्ध्यर्थं तव दास्यामि भास्कर । मंत्रेणानेन
वै दद्यात्त्रयस्त्रिंशदपूपकान् । अन्नदानात्परं दानं मलमासे न विद्यते । गृहे तस्य स्थिरा लक्ष्मीर्यो दद्यात्पूपसत्रिधा । दारिद्र्यं न भवेत्तस्य सुतेषा राम-
गशोकविवर्जितः । व्याधिभिर्मुच्यते रोगी मूको वाचस्पतिर्भवेत् । एवं तु विधिना राजन् मलमासव्रतं चरेत् । पुत्रपौत्रैः समायुक्तो मोदते २२

22A पालयन्महीं॥ इत्युक्त्वा समुनिस्कंदं तत्रैवांतरधीयत्तानइत्योमानुषं सर्वं व्रतमेतत्प्रकारहा व्रतस्यास्य प्रभावेन सर्पो मानुषतां ययौ। पुनर्व्रतं चकारे
दं मुनिनायोपदेशितं। विमानवरमारुह्य जगामेंद्रस्य मंदिरं। तस्मात्स्कंद नरैः कार्यं व्रतमेतदनुत्तमं। व्रतेन तोषितो देवो मासकालो भक्तवत्सलः। द
दाति विपुलां लक्ष्मीं पुत्रपौत्रादिसंपदः॥ ॥इति मलमासव्रतं। अथ व्रतांतरं। देवदेव जगन्नाथ भुक्तिमुक्तिप्रदायक। कथयस्व प्रसादेन लो
कानां हितकाम्यया। मुनीश्वराः प्रवदंति क्षयं दैवपापनादयः। अदत्तं नैव लभ्येत दत्तं वै चोपतिष्ठते। यथा वृष्ट्याग्रहस्यस्य पतिवंशस्य नाशिनी
। तथा दानविहीनत्वज्जन्मसर्वं निरर्थकं। तथापि कथयंतीह देवज्ञाः शास्त्रकोविदाः। मलिम्लुचे सदा प्राप्ते क्रियाः कार्याः कथं प्रभो। क्षौरं मौंजी
विवाहश्च व्रतं काम्योपवासकं॥ मलिम्लुचे सदा त्याज्यं गृहस्थेन विशेषतः। श्रीरुवाच॥ अधिमासे च संप्राप्ते किं कार्यं ब्रूहि मे प्रभो। कस्योद्देशेन दात
व्यं वद किंचिन्मदेयकं॥ श्रीकृष्ण उवाच। शृणु देवि महाभागे सर्वलोकस्य हेतवे। सर्वं यदातास्वयं भो कापीद दाति द्विजातये। नान्यो दाता न भोक्ता च इह लोके पर
त्र च॥ असंक्रांतेऽपि संप्राप्ते मासमुद्दिश्य व्रतं चरेत्। अधिमासस्याधिपश्चाहं वैपुरुषोत्तमः। स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणं। देवार्चनमथान्य
च्च ये कुर्वंति मनुष्यजाः। अक्षयं तद्भवेत्सर्वं ममोद्द[illegible] नयत्नेन मलमासोऽगतः। स्नोत्यादि देवि प्रमादतः। दारिद्र्यपुत्रशोकत्वपायकाविविगाहितं। म
शे

जयसिंहक
२३
23

त्रैलोक्ये भवेज्जन्म तेषां देवि भवे सदा ॥ यदा मल्लिम्लुचो मासः प्राप्यते मानवैः प्रियो ॥ महोत्सवस्तदा कार्य आत्मनो हितकांक्षिभिः ॥ कृष्णपक्षे चतुर्दश्यां नभस्यां
वा सुरेश्वरि ॥ अष्टम्यां वा प्रकर्तव्यं व्रतं शोकविनाशनं ॥ यथालब्धोपहारेण मासे वास्मिन्मलिम्लुचे ॥ उपोष्य न्हि प्रातः कृत्वा यष्ट्वा पूर्वाह्णिकीं क्रियां ॥ ल्ली
पान्नियमं पश्चान्मध्याह्ने देवं हृदि स्मरन् ॥ उपवासस्य संकल्पं एकभक्तस्य भामिनि ॥ एकस्य निश्चयं कृत्वा ततो विप्रान्निमंत्रयेत् ॥ सपत्नीकान् सदाचारान् कुरूपा
न्दुःखेषकान् ॥ श्रुताध्ययनसंपन्नान् कुलीनान् ज्ञातिसंभवान् ॥ ततो मध्याह्नसमये लक्ष्मीयुक्तं जनार्दनं ॥ स्थापयेद्द्वारतो कुंभे वेदमंत्रैर्द्विजोत्तमैः ॥ पूज
येत्परया भक्त्या गोविंदं सपितामहं ॥ गंधतोयेन संस्नाप्य पंचामृतशुभेन वा ॥ चंदनेन सुगंधेन पुष्पैर्नानाविधैः प्रिये ॥ मिष्टान्नैश्च नैवेद्यैर्धूपादिभिरतंद्रितः
॥ आच्छादनं सुवस्त्रैश्च पीतवस्त्रैर्विशेषतः ॥ घंटावाद्यमृदंगानि घोषैः शंखभेरीसमन्वितः ॥ आरात्रिकं ततः कुर्यात्कर्पूरागरुचंदनैः ॥ अलाभे येन केनापि फलसर्पि
नंत्यहेतवे ॥ ताम्रपात्रस्थिते तोये चंदनाक्षतपुष्पकैः ॥ अर्घ्यं दद्यात्सपत्नीकः प्रहृष्टेनांतरात्मना ॥ मंत्रेणानेन देवेशि ब्राह्मणैः सह मां स्मरन् ॥ ना
रिंगैर्नारिकेलैश्च फलैर्नानाविधैः शुभैः ॥ पंचरत्नसमायुक्तं जानुनीकृत्य भूतले ॥ आरोप्य भाले हस्ताभ्यां श्रद्धाभक्तिसमन्वितः ॥ अर्घ्यदानमंत्रः ॥ देवदेव नम·
महाभाग प्रलयोत्पत्तिकारक ॥ कृष्ण सर्वेश भूतेश जगदानंदकारक ॥ गृहाणार्घ्यमिमं देव दयां कृत्वा ममोपरि ॥ अथ प्रार्थनामंत्रः ॥ स्वयंभुवे नमस्तुभ्यं २३

23A ब्रह्मणोमिततेजसे नमोस्तु ते ।श्रितानं दद्यांहलाममो परिएवं संप्रार्थ्य गोविंदं पूजयेद्व्रती ॥ सहासपत्नीकानुश्रुवीन्वातानल्लक्ष्मीनारायणौ

स्मरन् ॥ पूजयित्वा विधानेन सपत्नीकः स्मरन्विभुं ॥ स्मर्त्तव्यो द्विजरूपेण पत्नी वै वमन्तुस्मरेत् ॥ परिधाप्य यथाशक्त्या वस्त्रालंकारकुंकुमैः ॥ द्राक्षाभिश्च

कपित्थैश्च पनसैः कदलीफलैः ॥ नालिकेरैश्च नारिंगैः कूष्मांडैर्दाडिमैः प्रियैः ॥ घृतपक्वान्नगोधूमैः सुमैर्गोहालिकैर्वदैः ॥ मसूरैर्घृतशर्कैश्च फाली

तैः खंडमंडितैः ॥ कुंताककर्कटीशाकैः श्रृंगवेरैः समूलकैः ॥ अन्यैश्च विविधैः शाकैः सम्यक्पाकैः पृथक्पृथक् ॥ भक्ष्यभोज्यैश्च स्वादिष्ठकानि विशेषतः ॥

गोरसानां विचित्राणि वासितानि इलादिभिः ॥ अन्यान्यपि च देयानि दानानि विविधानि च ॥ वित्तशाठ्यं न कर्त्तव्यं आत्मनः श्रेय इच्छता ॥ यथावत्संसं

पादमुपविश्य मद्गुरुवन्नाइदं सादुइदं भोज्यं भवदर्थं प्रकल्पितं ॥ यान्यतोरोवते यद्वदन्मया पावितं प्रभो ॥ धन्योस्म्यनुगृहीतोस्मि सार्थं जन्म मदीयं

॥ विसर्जयेत्ततो विप्रान्दत्वा तांबूलदक्षिणां ॥ पत्राणि पूगखंडानि चूर्णं खदिरं शुभं ॥ एलालवंगकर्पूरजातीफलतज्ज्ववं ॥ भ्रानामिमरीचानिसु

रभीन्सदमुवांसुतया ॥ चतुर्भिर्मिलितैर्देवि तांबूलं मम वल्लभं ॥ यो ददाति द्विजाग्रेभ्यः स भवेत्सुभगो नरः ॥ सुभगा च सदा नारी सुसुभे भवेच्छुभे ॥ पुत्रसौभा

ग्यसंयुक्ता तांबूलाज्जायते वला ॥ पत्रैः तुकेशवः प्रीतः पूगेर्गीशः सहांबया ॥ चूर्णेन शंकरा याशुनलः खदिरेणात्मन्मथः ॥ चतुर्भिर्विश्वरूपो सौ यः सु

जयसिंहकृ
२४
24

स्नाति जगत्त्रयं पुनीते पापसंपलीका न हृहतो दद्याद्दक्षिणां।। आसीमांत मज्जु वर्ज्यं भुंजीत तवं धुनिःसह। असंक्रांतं व्रतं नारी या करोति हरिप्रिये। सा रिजं पुत्रशो
कं च वैधव्यं न प्राप्नोति कदाचन। नशोष्यं वंविधेद्दे विपादिकं पापं मलिम्लुचे। मलिम्लुचं प्राप्य नरश्च जितो यैः श्रीनाथदेवः परमो हभक्त्या। कथं भवेत्तेषु सुदुःखसंप
त्पुत्राः सुहृत्स्वे वचने च भार्या।। इति भविष्योत्तरपुराणे मलमासव्रतं। देवीपुराणे ईश्वर उवाच।। शृणु देवि महात्म्यं मलमासस्य पार्वति। ये च मा
साः संक्रांतास्तेषां स्वामी रविः स्मृतः। असंक्रांतास्तु ये मासास्तेषां स्वामी जनार्दनः।। तमुद्दिश्य च यत्किंचित्स्वल्पं वा यदि वा बहु। अक्षय्यं तद्भवेत्के
नैर्जेनानाम यत्तं श्रुतं। मलिम्लुचे तु संप्राप्ते यो न कुर्यात्स्वशक्तितः। दानं वाथ व्रतं वापि विप्राणां भोजनमेव च।। मलिम्लुचे न देहे न स याति निरयं नरः। एक
भक्तेन नक्तेन तथैवायाचितेन च। उपवासेन कुर्वीत मनसा संप्रयत्नतः। दानेनाथ व्रतेनापि यस्य शक्तिर्न विद्यते। शरीरशोषणं तेन कर्तव्यं तीर्थ
सेवनं। वचनाद्द्विजमुख्यानां सर्वव्रतफलं लभेत।। सर्वव्यापी यथा विष्णुः सर्वक्षत्रकपाकरः। मलिम्लुचे तथा दानं लोकद्वयसुखावहं।। श्रीदेव्युवा
च। आपपहीनास्तु ये मर्त्याः पापव्याधिवृतं गतिहि। विवेको नास्ति वै येषां किं कार्यं वै मलिम्लुचे। निर्धनाश्च दुराचारा चाराः परभाग्योपजीविनः। ईश्वर उवाच।। स्नाम॰
दानेन व्रतेन तथा नक्तेनायासेन कायशोषणे।। सर्वस्य नास्ति सामर्थ्यं कर्तव्यं विप्रसेवनं। साधूनां सेवनं देवि सर्वतीर्थफलप्रदं। कालेन लभ्यते तीर्थं स २४

24A घोवैमाधुसेवनात्। साधूनां दर्शनं चैव कीर्त्तनं श्रवणं तथा। मलमासे तथा देवि कर्त्तव्यं श्रेयइच्छता। पुण्यपुञ्ज्ययेन संप्राप्ताः संपदो विविधा गृहे। तामिः पु
नः प्रकुर्वीत संचयः पुण्यकर्मणां। अन्यायेन महादेवि यः प्राप्तो धनसंचयः। यथा कर्मक्षयान्नेह प्राप्यते पुण्यसंचयः। तस्मात्सर्वाणि संप्राप्ते द्रव्याणि नेम
कल्पयेत्। यथा बीजांकुरन्यायो विद्वद्भिर्धर्मतत्परैः। विना येनिश्चयं प्राप्तो धर्मोदयो न संशयः। धर्मबीजं अर्थफलं फलाद्बीजं सुरक्षितं कर्त्तव्यं न व्ययं तत्
न प्राप्ते हार्थ भवेभवे। बीजांकुरं ततो भस्ये घोनदद्याद्धनं द्विजे। लक्ष्मीनारायणं पूज्यं भोजयेच्च द्विजोत्तमान्। इति देवीपुराणे मलमासव्रतं। अथ वि
शेषपूजा। श्रीसूक्तमंत्रैः पुष्पांतं संपूज्य। मत्स्याय नमः। कूर्माय नमः। सहस्रशीर्ष्णे नमः। देवाय नमः। सहस्राक्षपदाय नमः। हरये नमः। लक्ष्मीकां
ताय नमः। हुरेश्वराय नमः। स्वयंभुवे नमः। अमिततेजसे नमः। ब्रह्मरूपाय नमः। देवाय नमः। ब्रह्मगोप्त्रे नमः। इति नामभिर्विष्णुं संपूज्य। लक्ष्मै
नमः। कमलायै नमः। श्रियै नमः। पद्मवासायै नमः। हरिवल्लभायै नमः। क्षीराब्धितनयायै नमः। इंदिरायै नमः। रामि लक्ष्मीं च संपूज्य धूपादु
पचारान्दद्यात्। पूजांते विशेषार्घ्यः तत्र मंत्रः। पुराणपुरुषेशान सर्वशोकनिकृंतन। अधिमासव्रतेनानेन प्रीत्यर्थं गृहाणार्घ्यं श्रिया सह। पुराणपुरुषेशा
न जगन्नाथ सनातन। सपत्नीको ददाम्यर्घ्यं स्थितिस्थित्यंतकारिणे। देवदेव महाभाग प्रलयोत्पत्तिकारक। कृपया सर्वस्य भक्तस्य जगदानंदकारक।

गृहाणार्घ्यमिदं देव हयांकृतामसमोपरि। इति विशेषपूजा। इति पौंडरीकयाजिरत्नाकरकृते जयसिंहकल्पद्रुमे मलमासकृत्यनिरूपणं॥ अथ संक्रांति
र्संक्रांतिमासनिर्णयप्रसंगात्संक्रांतिनिर्णयः प्रस्तूयते। तत्र मेषादिषु द्वादशराशिषु क्रमेण संचरतः सूर्यस्य पूर्वस्माद्राशेरुत्तरराशौ संक्रमणं प्रवेश
ः संक्रांतिः। ताश्च द्वादश। तासु मकरकर्कटसंक्रांती क्रमेणोत्तरायणदक्षिणायनसंज्ञके। तुलामेषसंक्रांती विषुवत्संज्ञके। वृषसिंहवृश्चिककुं
भसंक्रांतयो विष्णुपदीसंज्ञकाः। मिथुनकन्याधनुर्मीनसंक्रांतयः षडशीतिमुखीसंज्ञकाः। तदाह वशिष्ठः। अयने द्वे विषुवती चतस्रः षडशीतिप
ः। चतस्रो विष्णुपद्यश्च संक्रांत्यो द्वादश स्मृताः। मृगकर्कटसंक्रांती द्वे तूदग्दक्षिणायने। विषुवती तुलामेषौ तयोर्मध्ये ततो पराः। वृषवृश्चिककुंभेषु सिं
हे चैव यदा रविः। एतद्विष्णुपदं नाम विषुवादधिकं फलमिति। कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः। षडशीतिमुखाः प्रोक्ताः षडशीतिगुणाः फलैः।
दीपिकायामपि। हर्यंघ्रिर्वृषसिंहवृश्चिकघटेष्वर्कस्य यः संक्रमः कन्यामीनधनुर्नृयुक्षु षडशीत्याख्यं तुलामेषयोः। प्रोक्तं तद्विषुवं स्मृषेयन सुदृक्कर्को
दिके दक्षिणामिति। हर्यंघ्रि विष्णुपदं। नृयुक् मिथुनं। आसामेव संक्रांतीनां वारभेदेन संज्ञाभेदो रत्नमालायामुक्तः। घोराख्यौ ध्वांक्ष्यमृतघ्नतो व संक्रां रामः
तिरार्के च महोदरी स्यात्। मंदाकिनी सोमगुरौ च मंदा मिश्रा भृगौ राक्षसिका कर्कपुत्रे इत्यादि। तत्फलान्यपि तत एव ज्ञेयानि। आह च पुराणपतमः कालउक्तः विव २५

25A ष्ठः।पंचमसप्ताष्टनवद्वादशाएवचार्कमेण घटिकाख्येतास्तत्पुण्यपारमार्थिकमिति।आस्तुच स्नानादिकमुक्तं नागरखंडे।रवेः संक्रमणं राशौ संक्रांतिरिति कथ्यते।स्ना
नदानतपःश्राद्धहोमादिषु महाफला।हेमाद्रौ विष्णुधर्मे।श्राद्धं संक्रमणे भानोः प्रशस्तं पृथिवीपते।मन्वंतः।अमावास्याद्वादशी च संक्रांतिश्च विशेषतः।
एताः प्रशस्तास्तिथयो भानुवारस्तथैव च।अत्र स्नानं जपो होमो देवतानां च पूजनं।उपवासस्तथा दानमेकैकं पावनं स्मृतमिति।देवीपुराणे।विषुवे
षु च यज्जप्तं दत्तं भवति चाक्षयं।एवं विष्णुपदे चैव षडशीतिमुखेषु च।भरद्वाजः।षडशीत्यां तु यद्दत्तं यद्दानं विषुवद्वये।दृश्यते सागरस्यांतस्तस्यां
तो नैव दृश्यते॥वसिष्ठः।अयने कोटिपुण्यं च लक्षं विष्णुपदीफलं।षडशीतिसहस्रं तु षडशीत्यां स्मृतं बुधैः।शतमिंदुक्षये दाने सहस्रं तु दिनक्षये।वि
षुवे शतसाहस्रं व्यतीपाते त्वनंतकमिति।स्कांदे नागरखंडे।य एते ते मया प्रोक्ताः कालाः संक्रांतिपूर्वकाः।नैतेषु विघ्नं विघ्नोपतश्चाक्षयसंततिता
ः।अश्रद्धयापि यद्दत्तं कुपात्रेभ्योपि मानवैः॥अकालेपि च तत्सर्वं सत्यमक्षयतां व्रजेत्।अत्र स्नानाकरणे दोषमप्याह हेमाद्रौ शातातपः।रविसंक्र
मणे प्राप्ते न स्नायाद्यस्तु मानवः।सप्तजन्मानि रोगी स्यान्निर्धनश्चैव जायते।संक्रांतौ यानि दत्तानि हव्यकव्यानि दातृभिः।तानि नित्यं ददात्यर्कः पु
नर्जन्मनि जन्मनि॥पापक्षयादिकामस्य संक्रांतिनिमित्तोहोरात्रोपवासोऽयनविषुवयोस्त्रिरात्रोपवासश्च विहितो व।क्षिष्ठेनाउपोष्ये

जयसिंह
२६
26

चंद्रसंक्रांतौ स्नातो योऽभ्यर्चयेद्धरिं ॥ प्राप्तः पंचोपचारेण सकामं फलमश्नुत इति। हरिवंशे वृद्धवसिष्ठः। अयने विषुवे चैव त्रिरात्रोपोषितो ... नरः। स्नात्वा त्वायतनं
वै येष्ठा तु सर्वकामफलं लभेत्। अशक्तावाहापस्तंबः। अयने विषुवे चैव त्रिरात्रोपोषितो नरः। स्नात्वा यस्त्वर्चयेद्भानुं सर्वकामफलं लभेत्। अशक्तावाहापस्तं
बः। अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः। अहोरात्रोषितः स्नातः सर्वपापैः प्रमुच्यत इति। एतच्च पुत्रवद्गृहस्थव्यतिरिक्तविषयं। पुत्रवता गृहस्थेन तु संक्रा
मे नापि संक्रांतिनिमित्तोपवासो न कार्यः। आदित्येहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः। उपवासो न कर्तव्यो गृहिणा पुत्रिणा तथेति स्वनात्। संक्रांत्यामुपवासं
च कृष्णैकादशिवासरे। चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान् गृही इति नारदवचनात्। अत्र श्राद्धमुक्तं हेमाद्रौ विष्णुधर्मे। श्राद्धं संक्रमणे भानोः प्रशस्तं पृथिवी
पतेः। अत्रापि विहितश्राद्धस्य नित्यत्वमाहापरार्के विष्णुः। आदित्यसंक्रमणं विशेषेण विषुवद्द्वयमयनद्वयं व्यतीपातो जन्मर्क्षमभ्युदयश्च एतांस्तु श्राद्धकाला
न्नैमित्त्यानाह प्रजापतिरिति। तच्च पिंडरहितं। अयनद्वितये श्राद्धं विषुवद्वितये तथा। संक्रांतिषु च सर्वासु पिंडनिर्वपणादृत इति इत्यपरार्के मात्स्योक्ते
ः। अत्र च। द्वादशदिनैरर्वागयनांशप्रवृत्त्या वर्षेऽयुगांशे वक्रमयनग्रहणं अन्यथा संक्रमेणातिसिद्धेरयनग्रहणं व्यर्थं स्यादित्यपरार्कः। वस्तुतस्तु अयनांशाः
शाः षष्टिघ्नाः स्फुटरविगत्यामाजिताः लब्धेन दिनादिना तत्र द्वादशीसंक्रांतेः पूर्वं चलसंक्रांतिः सैवायनसंक्रांतिः। एवं धनायनांशकाले। कर्णाय २६

26A नांशकालेतु लब्धदिनादिनो ध्रुवचलसंक्रांतिर्भवति। करणायनांशास्तु पूर्वं स्थिताः। तदुक्तं वेदांगज्योतिषे। प्रपद्येते श्रविष्ठादौ सूर्याचंद्रमसावुदक्। सा
र्पार्द्धे दक्षिणार्कस्तु माघश्रावणयोः सदा। एतादृशस्त्वंशत्रयोविंशतिः करणायनांशकाले। महायुगादावयनांशाभावः। ततश्चरे वृत्तीयोऽगतागमे
पादे ज्ञोपिका। अन्यदा सर्वसौतारागणां स्वस्वस्थानात्सौरवर्षेणाचलतः पंचाशद्विकलाभिः पश्चिमतः एवं जम्बूचलनं भवति।। तत्र विदृष्ववत्क्रांतिवृत्तसं
पातात्पश्चिमतः क्रांतिवृत्ते ऽष्टादशशतसौरवर्षैश्चलनं भवति। गणसंज्ञं भवति। तस्मात्सप्तविंशत्यंशपर्यंतं सुपवयः। पुनः सत्ये वधनसंज्ञानामुपवया यव
यौ। एवं द्विशताधिकसप्तसहस्रवर्षैरेको भगणो भवति। एवं पुनरयनांशाभावकालः पुनस्तथैवायनांशप्रवृत्तिः। एवं ते भगणाः युगे खख
रामिताः ६०० भवति। तदुक्तं सूर्यसिद्धांते। त्रिंशत्कृत्यो ६०० युगे भानां चक्रं प्राक्परिलंबते। तद्गुणाद्भूदिनैर्भक्ताद्युगणाद्यदवाप्यते। तद्दोस्त्रिघ्ना द
शाप्तांशा विज्ञेया अयनाभिधाः। प्राक्चक्रं चलितं हीने छायार्कात्करणागते। अंतरांशैरथावृत्य पश्चाच्छेषैस्तथाधिके। यत्तु एवं कृते संक्रांतरवांके
द्वादशदिनैरयनसंक्रांतिसिद्धिर्न द्वादशायनांशकाले। इदानींतु घनाष्टादशांशा उपचिताः संति तद्दिनानि सूक्ष्मतया अष्टादश भवंति। गौरवः।
अयनांशकतुल्येन कालेनैव स्फुटं भवेत्। मकरकर्कादिके सूर्ये याम्योदगमनं भवेत्। तत्तत्संक्रांतिकालेऽस्तु स्मृतो विष्णुपदादयः। अयनांशच्युति

रूपसंक्रांतिकाले विष्णुपदाह्वयः प्रवर्त्तते। तेन तत्प्रयुक्तं पुण्यकालादि तत्रापि ज्ञेयमित्यपरार्कः। अस्यार्थः संक्रांतेः सूर्यमंडलनेमिरेखैकदेशस्य तन्म
ध्यकेंद्रस्य वा पूर्वराशिसंबंधत्यागेनोत्तरराशिप्रवेशरूपायाः कालस्यातिसूक्ष्मतया दुर्ज्ञानतया च तत्रैकस्यापि स्नानादिकर्मणोऽनुष्ठातुमशक्यत्वा
द्दूरं नातिदूरं तत्रांतर्घात्यागत्वं निहितकाले तान्यनुष्ठेयानि संनिहितं संनिहितकालश्च दर्शपूर्णमासौ प्रचकालः किमुभयतः किंवान्यतरतः किंया
वांत्यपेक्षायां हेतुपूर्वकं याह्यः कालो देवलेन दर्शितः। संक्रांतिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः। तद्योगाच्चाप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रि
ता इति। अधश्च त्रिंशन्नाड्यः ऊर्ध्वं च त्रिंशन्नाड्यः पुण्यकालः। संक्रांतिनिमित्तस्नानदानादियोग्य इत्यर्थ इति माधवः। हेमाद्रिस्तु। अधः पंच
दश ऊर्ध्वं च पंचदश इति संमिलिता त्रिंशदित्यपि व्याचख्यौ। यत्तु। कैश्चिदुक्तं माधवेन प्रत्येकं त्रिंशदित्युक्तं। तदतीतानागतो भोगो नाड्यः पं
चदश स्मृता इति देवीपुराणविरुद्धं भुज्यते पाल्यते विधिनिषेधावस्मिन्निति भोगः। भुज पालनाभ्यवहारयोरिति स्मरणात्। तत्त्यागलभ्य
विरुद्धमिति तं। सामान्यकालस्योक्तत्वात्। विशेषकालस्य तु त्रिंशत्कर्कटकोपायाः संनिहिता इत्यादिवक्ष्यमाणत्वात्। तथा च सामान्येऽनयोर्नाम-
यमकरणो हेमाद्रौ। अन्हि चेद्रात्रियुग्मं स्याद्राशौ वेदाः शरद्वयं। संक्रांतिः पक्षिराज्ञेया दानाध्ययनकर्मसु नित्यादिवा कार्य इत्यसामान्येन काल २७

27A विधानात्माधवोक्तावपि न दूषणोऽस्मावनं युक्तं। इदं सामान्यतः सर्वसंक्रांतिविषयं॥ विशेषस्तूच्यते। कर्कटके पूर्वास्त्रिंशत् नाड्यः पुण्याः। मकरे तु माध
वमते परा विंशतिनाड्यः पुण्याः। तदाह वृद्धवसिष्ठः। अतीतानागते पुण्ये द्वे उदग्दक्षिणायने। त्रिंशत्कर्कटके नाड्यो मकरे विंशतिस्मृता इति
हेमाद्रिमते तु मकरसंक्रांतौ चत्वारिंशत् घटिकाः पुण्यकालः। तदुक्तं ब्रह्मवैवर्त्ते। त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिकाः। भविष्यत्ययने पु
ण्याः अतीते चोत्तरायणे। दशाधिकास्त्वारिंशदित्यर्थः। बृहस्पतिः॥ अयने विंशतिः पूर्वा मकरे विंशतिः पराः। वसिष्ठः। मध्ये तु विषुवे पुण्यं
प्राङ्दृष्टो दक्षिणायने। षडशीतिमुखे तीते। अतीते चोत्तरायण इति। यत्तु न चैतद्युक्तं। अत्र चशब्दादुत्तरायणेऽनागतेपि पुण्यमिति हेमाद्रिः। त
न्मानं विमतमिति तन्न हेमाद्रौ संक्रांतिसामान्यपुण्यकालाभिप्रायेण तथाभिधानात्। अतीतानागतेषु पुण्ये द्वे तू दग्दक्षिणायने। उत्तरायणे तु
तत्काल्यमतीते चोत्तरायण इति वासिष्ठवचने पूर्वार्द्धेनोदग्दक्षिणायनयोरतीतानागतकालस्य पुण्यत्वमभिधायापात्तमोत्तरार्द्धे शेषसाकीते चोत्त
रायणे इत्यस्यानागतपुण्यत्वबोधकत्वे नैरर्थक्यात्। हेमाद्रौ तथैव व्याख्यानाच्च। विषुवयोस्तु प्राक्पश्चाद्दश दश नाड्यः पुण्याः। यथासह वाह
वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश इति। विष्णुपदीषु तु षोडश पश्चाच्च षोडश नाड्यः पुण्याः। तदाह वृद्धवसिष्ठः। पुण्यायां विष्णुपद्यां तु प्राक्प

जयसिंहक०
२८
28

स्यादपि षोडशेति। षडशीतिमुखपश्चात्षष्टिनाड्यः पुण्याः तदाह वृद्धवसिष्ठः षडशीत्यां व्यतीतायां षष्टिरुक्तास्तु नाडिकाः पुण्याख्या विष्णुपद्याश्च प्राक्पश्चा
दपि षोडश। तथा स्वर्णसारे तु षडशीतिमुखे पश्चात्षोडशघटिका इत्युक्तं अत्र हेमाद्रिः षडशीतिमुखानां च तसृणां मध्ये कैकस्याः पंचदश पंचदशेति मिलित्वा
षष्टिर्नाड्यः पुण्या इति तथा च स्कान्दे षडशीतिमुखे तीते नाड्यः पंचदश स्मृता इति कालतत्वविवेचने तु परमार्थतस्तु षष्टिरिति पाठः। अष्टिः षोडशतत्छंदसः षो
डशाक्षरत्वात्। अत्र विष्णुपद्याः पराः षोडश घटिकाः पुण्याः पूर्वाः षोडश घटिकाः पुण्यतमा इति। अवस्था द्रष्टव्या। याम्यायने विष्णुपदे तथा द्वौ हानाय
नं तं विषुवे तु मध्यं वदंत्यतीते षडशीतिवक्त्रे महर्षयः स्वल्पयने च सौम्ये षडशीतिमुखे तीते च नेव विषुवद्वये इत्यादिलौगाक्ष्याद्यनेकवचनेषु पूर्वकालस्य
पुण्यतमत्वप्रतिपादनात्। क्वचित्तु अतीते विषुवद्द्वय इति पाठः। कन्यायां मिथुने चैव मीने धनुषि चाद्विजाः घटिकाः षोडश ज्ञेयाः परतः पुण्यदीपिकाः वृष
भे वृश्चिके चैव सिंहे कुंभे तथैव च। पूर्वमष्टमुहूर्त्तं वयाह्यं स्नानजपादिषु स्थिति वृद्धहन्तारदीयवचनाच्च। ननु संक्रांतिसामान्यविषयत्वेन पश्चाद्धस्त्रिंशन्ना
ड्यः पवित्रा इत्युक्तं वाक्यांतरेषु दशषोडशादीनां पुण्यत्वमुक्तमिति परस्परविरोध इति चेत्। न। त्रिंशन्नाडीनां पुण्यत्वं षोडशनाडीनां तदपेक्षया सान्निहि तम·
तत्वात्पुण्यतरत्वं ततोपि संन्निहितानां पुण्यतमत्वमिति विरोधपरिहारात्। तदाह वसिष्ठः। यायाः सन्निहिता नाड्यः तास्ताः पुण्यतमाः स्मृता इति। संक्रां २८

28A

तीनां पूर्वोत्तरकालौ पुण्यपनयानिर्णीतौ। ताश्च संक्रांतमः कदाचिदन्हि भवंति। कदाचिद्रात्रौ भवंति। तद्भेदादनुष्ठानभेदमाह वृद्धवसिष्ठः। अन्हि संक्रमणे पु
ण्यमहः कृत्स्नं प्रकीर्तितं। रात्रौ संक्रमणे पुण्यं दिनार्द्धं स्नानदानयोः। अर्द्धरात्रादधस्तस्मिन्मध्यान्हस्योपरि क्रिया। ऊर्ध्वं संक्रमणे चोर्ध्वमुदयात्प्रहरद्व
यमिति। अर्द्धरात्रात्पूर्वं रात्रौ संक्रमे पूर्वदिनोत्तरार्द्धं पुण्यं। अर्द्धरात्रादूर्ध्वं संक्रमे उत्तरदिनपूर्वार्द्धं पुण्यं स्नानदानादिषो ग्यामि सर्वः। तथा च। आसन्न
संक्रमं पुण्यं दिनार्द्धं स्नानदानयोरिति। यदा समं पूर्णोर्द्धरात्रे संक्रांतिः स्यात्तदा दिनद्वयं पुण्यं। तदाह वृद्धवसिष्ठः। संक्रमस्तु निशीथे स्यात्सद्यूर्ध्वयामाः पूर्व
पश्चिमाः। संक्रांतिकालो विज्ञेयः ततः स्नानादिकं चरेदिति। ज्योतिर्वसिष्ठोपि। पूर्णे वैवार्द्धरात्रे तु यदा संक्रमते रविः। तदा दिनद्वयं पुण्यं त्वक्काम
कर्कटावितिता मकरकर्कटयोस्तु विशेषो वक्ष्यते। गार्ग्यः कालेन्दुनेर्द्धरात्रे तु यदा संक्रमणं भवेत्। तदहः पुण्यमिच्छंति गार्ग्यगालवगौतमाः। देवी
पुराणे। संपूर्णोर्द्धरात्रे तूदये तस्मये पि च। मानार्द्धं भास्करे पुण्यं अपूर्णे शर्वरीदले। संपूर्णोर्द्धरात्रे निशीथस्य सर्वे। उदयः प्रातः संध्या। अ
स्तमयः सायं संध्यामानार्द्धं प्रहरद्वयं। अस्तमये पूर्वदिने प्रहरद्वयं ग्राह्यं। उदये तूत्तरदिनप्रहरद्वयं प्रशस्तमतः। संपूर्णोच्चार्द्धरात्रे दलद्वयं संक्रमे सं
क्रमणे उभयोः पूर्वोत्तरदिनयोरुत्तरार्द्धं पूर्वार्द्धं पुण्यं। अपूर्णे शर्वरीदले। सायं प्रातःसंध्योरुक्तो। पूर्वभागपरि स्वर्थः। योगेनलक्षया वा भास्करोदिवसः॥ देवीपु

जपासिंहक
२९
29

राणे। अर्द्धरात्रे तु संस्पृष्टौ दिवा पुण्यमनागतं। संस्पृष्टौ उभयोर्यामयोर्मतिरेके परे हनि। अत्र संस्पृष्टौ अर्द्धरात्रशब्देन सायंसंध्यानिशीथपर्वभागग्रहणे तत्र सं
क्रमणे न विद्यते आगतं आगमनं यस्य तत् अनागतं अनागामि। अतीतमित्यर्थः। न पुनस्तत्केभावे कः। एवमर्द्धरात्रसंक्रमणे दिनद्वयार्द्धस्य विकल्पेन ग्राह्य
त्वे प्राप्ते व्यवस्था कृता देवीपुराणे। आदौ पुण्यं विजानीयात् यद्यद्भिन्ना तिथिर्भवेत्। अर्द्धरात्रे व्यतीते तु विज्ञेयमपरे हनीति। अर्द्धरात्रसंक्रमणे य
दि संक्रमणकालीना तिथिः पूर्वदिनसोत्तरार्द्धवर्तितिथ्यभिन्ना भवति तदा पूर्वदिनोत्तरार्द्धं ग्राह्यं। यदि भिन्ना भवति तदा पूर्वदिनार्द्धं न ग्राह्यं किंतु
परदिनपूर्वार्द्धमित्यर्थः सिद्धं। अर्द्धरात्रे व्यतीते तु संक्रमणे तत्कालीनतिथेर्भिन्नत्वे अभिन्नत्वेपि परदिनपूर्वार्द्धमेव पुण्यमित्यर्थः। यदा त्वर्द्ध
रात्रसंक्रमणे तत्कालीनतिथिर्दिनद्वयेप्यभिन्ना भवति तदा विष्णुपदा पूर्वदिनोत्तरार्द्धं ग्राह्यं षडशीतिमुखे तूत्तरदिनपूर्वार्द्धं ग्राह्यं विषुवे तु पूर्वदि
नार्द्धमुत्तरदिनार्द्धं वा ग्राह्यं। मकरस्य तु रात्रौ संक्रमे परदिनं पुण्यं। कर्कटकस्य तु रात्रौ संक्रमे पूर्वदिनं पुण्यं। अत एव वृद्धगार्ग्यः। यदास्तमयवेला
यां मकरं याति भास्करः। प्रदोषे वार्द्धरात्रे वा स्नानं दानं परे हनि। भविष्योत्तरेपि। कार्मुकं तु परित्यज्य झषं संक्रमते रविः। प्रदोषे वार्द्धरात्रे वा स्नानं दानं
नं परेहनीति। झषो मकरः। अर्द्धरात्रे तदूर्ध्वं वा संक्रांतौ दक्षिणायने पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविरिति। भविष्योत्तरेपि। मिथुनात्कर्कसंक्रां २९

29A तिर्यां हिंसादंसुमालिनः प्रभाते वा निशीथे वा कुर्यो दहनिवृर्वंतः। एवं मकरकर्कट्योः रात्रौ संक्रमेऽपूर्वोक्तवचननिचये नाहि वैव स्नानादिकर्त्तव्यता प्रति
पादिता। इदानीं रात्रावपि तत्र स्नानादिकर्त्तव्यताप्रतिपादकानि वचनानि लिख्यन्ते। भविष्यपुराणे। रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः। नैमि
त्तिकं च कुर्वीत स्नानं दानं च रात्रिषु। वृद्धवसिष्ठः। पुत्रजन्मनि यज्ञे च तथा संक्रमणे रवेः। राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा निशि। सुमंतुः। ग्रह
णोद्वाहसंक्रांतियात्रार्तिप्रसवेषु च। श्रवणे वेतिहासस्य रात्रौ दानं प्रशस्यते। गोभिलयाज्ञवल्क्यौ। राहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु। स्नान
दानादिकं शस्तं निशि काम्यव्रतेषु च। विष्णुः। विवाहव्रतसंक्रांतिप्रतिष्ठाऋतुजन्मसु। तथोपरागपातादौ स्नाने दाने निशा शुभेति। अत्र माधवम
दनरत्नादयः। एतेषां वचनानां मिथो विरोधात् स्यंतरां भवेन विकल्पोंगीकर्त्तव्यः। स च तत्तद्देशप्रसिद्धशिष्टाचारवशात् व्यवस्थितो द्रष्टव्यः। तथा च
माधवीये। मकरे कर्कटे रात्रावप्याचारादनुष्ठितिरिति। अतएव मदनरत्ने। तथा वृद्धाः शिष्टाचाराः शिष्टा रात्रौ मकरादिसंक्रांतौ तन्निमित्तस्नानदा
नादिकं रात्रावेव चरंति। उदीच्यास्तु तन्निमित्तस्नानदानादिकं दिवैव कुर्वंतीति। निर्णयसिंधौ तु। यानि विवाहव्रतसंक्रांतौ स्नानादि गोभिलादिवच
नानि रात्रौ स्नानदानश्राद्धादिकर्त्तव्यत्वप्रतिपादकानि। तानि मकरकर्कटसंक्रांतिविषयाणि। मुख्यत्काम करकर्कटावितिरिक्तयोर्हि वाऽनुष्ठानस्य पर्यु

जयसिंहक

३०

30

दृष्टत्वेन तत्रैव रात्रावनुष्ठानं न स्याद्विध्यात्प्रसूचितत्वात् इति हेमाद्रिप्रभृतयः । वस्तुतस्तु । प्रागुक्तवचनैरुक्तयोर्दिनद्वयपुण्यत्वादेवेवपूर्वदिनात्मकरकर्कट
योरपि स्नानदानं परेहनी [illegible] रिमिरहः पुण्यत्वोक्तेरहःपुण्यत्वानुपपत्त्या कल्प्यरात्रिनिषेधस्य प्रत्यक्षरात्रिविधिना बाधात्सर्वसंक्रांतिषु रात्रावनुष्ठा
नविकल्पः सर्वदेशाचाराद्यवतिष्ठत इति युक्तः पंथा इति स्थितं ॥ अयनविषुवे तु अनध्यायविशेषः स्मृत्यंतरे ॥ आह्नि वेद्वा त्रियुग्मं स्याद्द्वात्रौ वेद्वासरद्व
यं संक्रांतिः पक्षिणी तेषां च नाध्ययनकर्म तु ॥ स्नानं वेदस्य दानं अर्थयन मिज्ज्यावत् ॥ अन्यत्रापि । निशाद्वयं दिवारात्रौ संक्रमे वासरद्वयं । अनध्या
यं प्रकुर्वीत अयने विषुवे तथेति । संक्रांतिवदयने पुण्यकालमाह । जाबालिः । संक्रांतिषु यथा कालस्तद्वयेप्ययने तथा । अयने विंशतिः पूर्वा म
करे विंशतिः परेति । अयने मकरायनेस्वर्गीः पुण्यतमाः । मकरे मकरसंक्रांतौ पराः पुण्यतमा इत्सर्थः । माधवोपि । मकरस्य त्रिरिन्नैकादशसंक्रांतिसं
वेधि नित्ययने संक्रांतिवत्पुण्यमिति । आदित्यस्य राशिसंक्रमवत् नक्षत्रसंक्रमेप्यहो तत्र गार्ग्यः राशिनक्षत्रसंक्रमेपि स्नानदानादिकं कार्यं । तत्राहतो
मिनिः । नक्षत्रराशौ रविसंक्रमे स्युरर्वाक्परत्रापि सेंडुनाड्यः । पुण्यास्त्वघंदोः त्रिधराप लैर्मुगे कैव नाडीमुनिभिः प्रमोदिता । नाड्यश्चतस्रः सप राम·
बाः कुजस्य बृहस्पतेस्तामनवः पलानि ॥ साढीश्चतस्रः पल सप्त शुक्रात् गुरोश्च शुक्रे सप्त पलावतस्रः । दिनाग नाड्यः पल सप्त शुक्राः शनैश्चर ३०

30A

स्पामिहिताः स्वपुराणाः। आद्यंतमध्ये जपदानहोमं कुर्वन्नवाप्नोति स्कंदधाम। गार्ग्यः। यस्मिन्नृक्षमासाद्य रविः संक्रमणं भवेत्॥ तन्मासमध्यं तीरेण स्नायैरक्लेश
घ्न नक्षत्राः। तगरसरोरुहपत्रैः रजनीसिद्धार्थलोध्रसंयुक्तैः। स्नानं जन्मर्क्षगते रविसंक्रमणे नृणां शुभदं। अथ संक्रांतिकृत्यं हेमाद्रौ। अयनादौ सदा देयं द्रव्य
मिष्टं गृहेषु यत्। षडशीतिमुखे चैव विमोक्षे चंद्रसूर्ययोः। ब्रह्मपुराणे। शुक्लपक्षे तु सप्तम्यां यदा संक्रमते रविः। महाजया तदा सा वै सदा भीष्मा रविप्रिया। स्ना
नं दानं तपो होमः पितृदेवादिपूजनं। सर्वं कोटिगुणं प्रोक्तं तपनेन महोजसा। अस्यां घृतपयोभ्यां च रविं स्नापयिता अश्वमेधफलं प्राप्य सूर्यलोकं ततो यातीत्या
दित्यचैवोक्तं। अथ संक्रांतिविशेषे दानानि हेमाद्रौ विश्वामित्रः। मेषसंक्रमणे भानोर्मेषदानं महाफलं। वृषसंक्रमणे दानं गवां प्रोक्तं तथैव च। वस्त्रान्नपान
दानानि मिथुने विहितानि तु। घृतधेनुप्रदानं तु कर्कटे परिशिष्यते। ससुवर्णं छत्रदानं सिंहे च विहितं सदा। कन्याप्रवेशे वस्त्राणां सुरभीणां तथैव च। तुला
प्रवेशे धान्यानां बीजानामेव चोत्तमं। कीटप्रवेशे वस्त्राणां वेश्मनां दानमेव च। कीटो वृश्चिकः॥ धनुःप्रवेशे वस्त्राणां यानानां च महाफलं। झषप्रवेशे दारूणां
दानमग्नेस्तथैव च। कुंभप्रवेशे दानं तु गवां अंबुतृणस्य च। मीनप्रवेशे स्नानमालानामपि चोत्तमं। दानान्यथैतानि मया द्विजेंद्राः प्रोक्तानि कालेन तु
नरः प्रदत्ता प्राप्नोति कामं मनसेप्सितं च। तस्मात्प्रशंसंति हि कालदानं। स्कांदे। धेनुं तिलमयीं राजन् दद्याद्यश्चोत्तरायणे। स सर्वान्कामानवाप्नोति

जयसिंहक

३१

31

विंदते परमं सुखं। विष्णुधर्मोत्तरे। उत्तरे त्वयने विप्रा वस्त्रदानं महाफलं॥ तिलपूर्णमनड्वाहं दत्त्वा रोगैः प्रमुच्यते॥ मंगलकृत्येषु ज्योतिर्निबंधे नारदः। त्याज्याः स्व
र्पस्य संक्रांतेः पूर्वतः परतस्तथा। विवाहादिषु कार्येषु नाड्यः षोडश षोडशेति॥ एतत्सुरेप कालोपलक्षणं भानोः संक्रांतिभोगश्च ऊलिकश्चार्द्धयामिक इ
ति ज्योतिःप्रकाशे वर्ज्येषु संक्रांतिभोगस्य परिगणनात्। इति संक्रांतिनिर्णयः। तत्त्वसंचमसमाप्तं॥ अथ पक्षः। तत्र पक्षशब्दः पक्षपरिग्रह इत्यस्मात् धा
तोर्निष्पन्नो देवकार्याणि पित्र्यकार्याणि येन वा पक्ष्यते परिगृह्यते यः कालविशेषः स तथा वदति। अथवा चंद्रस्य पंचदशानां कलानामापूरणं क्षयो वा परिगृह्यते यत्र
स पक्षः। स द्विविधः शुक्लः कृष्णश्च। चंद्रकलावृद्ध्युपलक्षितः शुक्लः। चंद्रकलाक्षयोपलक्षितः कृष्णः। एतौ शुक्लकृष्णपक्षौ पूर्वापरपक्षाविच्युच्ये
ते। पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ इत्यमरसिंहेनाभिधानात्। शुक्लपक्षश्चापूर्यमाणपक्ष इत्यप्युच्यते। अनयोश्च विनियोगो ज्योतिःशास्त्रादौ द
र्शितः। उभौ नियुक्तौ खलु शुक्लकृष्णौ शुभाशुभे कर्मणीति प्रश्नसावित्र्यादिभिः। इति पक्षनिर्णयः। अथ दिवसनिर्णयः मदनरत्ने। स च तुर्विधः। चांद्रसौर
सावननाक्षत्रभेदात्। एतेषां स्वरूपमुक्तं विष्णुधर्मोत्तरे। तिथिनैकेन दिवसश्चांद्रे माने प्रकीर्तितः। अहोरात्रेण चैकेन सावनो दिवसः स्मृतः। आदित्यभागभो एम.
गेन सौरो दिवस उच्यते। चंद्रनक्षत्रभोगेन नाक्षत्रो दिवसः स्मृत इति। तिथिभागयोर्लक्षणं तत्रैव दर्शितं। त्रिंशांशश्चापि राशेर्भोग इत्यभिधीयते। आदि ३१

31A

स्याद्विप्रकृष्टस्तु भागद्वादशकं यदा। चंद्रमाः स्यात्तदा रामतिथिरित्यभिधीयत इति इति दिवसनिर्णयः॥ अथ तिथिनिर्णयः। तत्र तिथिशब्दस्तनोतेर्धातोर्नि
ष्पन्नः। तनोति विस्तारयति वर्द्धमानां क्षीयमाणां चंद्रकलामेकां यः कालविशेषः सा तिथिः। यद्वा यथोक्तकलया तन्यत इति तिथिः। तदुक्तं सिद्धांतशिरोम
णौ। तन्यंते कलया यस्मात्तस्मात्तास्तिथयः स्मृता इति। एतदेवाभिप्रेत्य स्कांदे पठ्यते। अमा षोडशभागेन देवि प्रोक्ता महाकला। संस्थिता परमा माया
देहिनो देहधारिणी। अमादिपौर्णमास्यंता या एव शशिनः कलाः। तिथयस्ताः समाख्याताः षोडशैव वरानने इति। अयमर्थः। या महामायाधारशक्तिरू
पा देहिनां देहधारिणी संस्थिता सा चंद्रमंडलस्य षोडशभागेन परिमिता चंद्रदेहधारिणी अमानाम्नी महाकलेति प्रोक्ता क्षयोदयरहिता नित्या तिथि
संज्ञिकैव। इतराश्चापि पंचदशकला दिवसव्यवहारोपयोगिन्यः क्षयोदयवत्यः पंचदश तिथयो भवंति तेनातिथयः षोडशैवेत्यविरुद्धं वचनं। श्रुतिरपि त
स्या एव पंचदशकला ध्रुवैवास्य षोडशी कलेति। एवं सत्यत्र सामान्यविशेषरूपेण तिथिर्द्विविधमुक्तं भवति। तत्र येयमुक्ता क्षयोदयवर्जिता
ध्रुवा षोडशी कला तद्युक्तकालस्तिथिसामान्यं यास्त्ववशिष्टा वृद्धिक्षयोपेताः पंचदशकलास्ता निर्विशिष्टाः कालविभागास्तिथिविशेषास्तासां च पंच
दशानामेकैकां कलां वह्न्यादयः प्रजापत्यंताः पंचदश देवताः क्रमेणापिबंति। तत्र वह्निरेकां कलां प्रथमं पिबतीति प्रथमेत्युच्यते। तया युक्तः कालस्ति

जयसिंहक
३२
32

शेषः प्राथम्यवाविना प्रतिपच्छब्देनाभिधीयते। एवं द्वितीयादिपंचदशपर्यंतानां तिथीनां नामान्यवगंतव्यानि। ताः एताः कृष्णपक्षतिथयो भवंति। पुन
श्चैताः पीताः कलाः अनेनैव क्रमेण। तत्र तथा वन्ह्यादिदेवताभ्यो निर्गतः स्वकं मंडलं पूरयंति। तामियुक्ताः कालविशेषाः शुक्लपक्षगताः प्रतिपदाद्यास्तिथयो भ
वंति। वन्ह्यादिदेवतानां कलापानं सोमोत्पत्तौ पाद्मे। प्रथमां पिबते वन्हिर्द्वितीयां पिबते रविः। विश्वेदेवास्तृतीयां तु चतुर्थीं सलिलाधिपः। पंचमीं तु वषट्
कारः षष्ठीं पिबति वासवः। सप्तमीमृषयो दिव्या अष्टमीमजएकपात्। नवमीं कृष्णपक्षस्य यमः प्राश्नाति वै कलां। दशमीं पिबते वायुः पिबत्येकादशीमुमा
।हेमाद्रौ तु रुद्र एकादशीं कलामिति पाठः॥ द्वादशीं पितरः सर्वे समं प्राश्नंति भागशः। त्रयोदशीं धनाध्यक्षः कुबेरः पिबते कलां। चतुर्दशीं पशुपतिः पंचदशीं
प्रजापतिः निपीताः कलावशेषश्चंद्रमा न प्रकाशते। कला षोडशिका या तु अपः प्रविशते सदा। अमायां तु सदा सोम ओषधीः प्रतिपद्यते। तमोषधिगतं गा
वः पिबंत्यंबुगतं च यत्। तत्क्षीरममृतं भूत्वा मंत्रपूतं द्विजातिभिः। हुतमग्निषु यज्ञेषु पुनराप्यायते शशी॥ दिने दिने कलावृद्धिः पौर्णमास्यां तु पूर्णतेति
।इति तिथिशब्दार्थनिर्णयः॥ ॥श्रीमद्दिल्लीशसेनोद्भटविकटभटश्रेणिमत्तेभसिंहश्चंडोन्माघत्तुरुष्कच्छिन्नबहुमतीपालनेधर्मराजः॥ पौत्रः श्री राम.
रामसिंहक्षितिपकुलमणेर्विष्णुसिंहस्य पुत्रः श्रीमन्महाराजाधिराजो जयहरिरमणाधीशवत्कोरुदेवी मातः।१ श्रीमत्पंडितदेवभट्टतनयः श्रीराघवांघ्रिद्व ३२

32A यद्यानावासमसमस्तकामनिवहः संप्राप्नुदसरत्नाकरः। तस्मै श्रीजयसिंहवर्मनृपतेः कल्पद्रुमेकामदं प्रत्यग्रं स्तबकं शिवं सममकोत्सत्काल्पपत्रावृत्तः।२।। इतिज
यसिंहकल्पद्रुमोद्योते संवत्सरादिनिर्णयः समाप्तः।। अथ मासान्मतः सर्वतिथिनिर्णयः। तत्रातिथिर्द्वेधा। सम्पूर्णा खण्डा च। तत्र संपूर्णा स्वोदयपूर्णा तोदर्शि
ता।। अतिपूर्वम्भूतयः सर्वा उदयादोदयाद्रवेः। संपूर्णा इति विख्याता हृतिज्योतिःसिद्धांते। सर्वोह्येतास्वसंपूर्णा श्चोदयाद्दोदयं स्थिताः षष्टिघटिका ति
कां तं पूर्णा तिथिरिति नारदीये। अथ घटिकामाधनं निर्णयाम्नतेम हाभारते निरूपितं।। कर्षगाम्यक्षिकैः षड्भिः पलैस्ताम्रस्य भाजनं। त्रिंशदंगुलविस्तारमु
च्छ्रितं चतुरंगुलं।। स्वर्णमाषेण कृतावचतुरंगुलकाष्ठिकां। मध्यभागेतया विद्धं नाडिका घटिका स्मृता।। तदंध्रेणांभसापात्रं यावत्कालेन पूर्यते।। स कालो
नाडिका तस्याः षष्टिभागो विघटिका। नाडीद्वयं मुहूर्तेस्तु ते पंचदशवासरः। एवं रात्रिस्तथापक्षमासर्त्वयनवत्सरा इति। स्वर्णमाषादिमानं चागमे प्रोक्तं
।यवः स्यात्सर्षपैः षड्भिर्गुंजावस्यात्त्रिभिर्यवैः।। गुंजाभिः पंचभिश्चैको माषकः परिकीर्तितः। भवेत्षोडशभिर्माषैः स्वर्णस्तैः पुनः स्मृतः। पलं स्वर्णैः च
तारः पंचवापि प्रकीर्तितमिति। कर्षस्तु पलस्य चतुर्थो भागः। तदुक्तं त्रिकाण्ड्यां।। मानं तूलांगुलिप्रस्थैर्गुंजापंचाद्य माषकः।। ते षोडशाक्षः कर्षो स्त्रीप
लं कर्षचतुष्टयमिति। अथ संपूर्णादि नक्षयसंबंधिनी खण्डा। तस्मां हि नद्वयसंबंधिन्यां सत्यां व्रताद्यनुष्ठाने पूर्वा परा वो पादेयस्यादिसंदेहे निर्णयः।। त्रि

पत्ते। तत्र प्रतिपदाद्याः सर्वाः खंडास्तिथयो मध्याह्नादिकालविशेषे विहितेष्वेकभक्तादिव्रतेषु यस्मिन्यस्मिन्दिने तत्कालव्यापिन्यो लभ्यंते तत्तद्दिनगतास्त
याह्याः। कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति वृद्धयाज्ञवल्क्यवचनात्। गार्ग्यः। निमित्तं कालमादा
य वृत्तिर्विधिनिषेधयोः। विधिः स्पृश्यतिथौ तत्र निषेधः कालमात्रके। तिथीनां पूज्यतानाम कर्मानुष्ठानयोग्यता। निषेधस्तु निवृत्तात्मा कालमात्रमपे·
क्षत इति। न च केवलं वाचनिकत्वायमर्थः। किंतु न्याय्योपीति निषेधवाक्ये समनेन सूचयति। तथा हि विधिषु विधेयानुष्ठानस्याभ्युदयहेतुत्वं प्रमेयं। स
ह्यहरनुष्ठानादेवाभ्युदयसिद्धेस्तिथिविशेषे कृत्यानुष्ठेयमिति विधेये जायते संदेहः। निषेधेषु तु कालविशेषे कर्मविशेषानुष्ठानस्यानर्थहेतुत्वं प्र
मेयं। यदाकदापि च तत्काले तत्कर्मानुष्ठानेनर्थप्रसंगात्सर्वदैव तत्काले तद्वर्ज्यं भवतीति तत्र नास्ति संदेहः। नन्वेवं वचनाभ्यां यतश्च कालविशे
षप्रयुक्तसर्वनिषेधानां तावत्कालिकत्वसिद्धौ अभ्यंगमैथुनदंतधावननिषेधेषु पुनरुक्तावत्कालिकत्ववचनं किमर्थं अभ्यंगे वोदधिस्नाने दंतधावनमैथु
ने। जाते च मरणे चैव तत्कालव्यापिनी तिथिरिति। सत्यं विधेयकर्मविशेषविषयव्यवस्था कल्पापवादार्थं तस्मिन्वचने निषेधानां केषांचिदुपादानं हि एम·
ष्टांतत्वेन जननमरणयोरिव। न हि जननमरणयोरनुष्ठेययोः साकल्यवचनप्रवर्त्तिते येन तदपवादः कर्त्तव्यः। साकल्यवचने स्नानदानज ३३

33A

पादिष्विमादिशब्देन तदर्थकेन दानाध्ययनकर्मस्विति बहुवचनेन शास्त्रदृष्टेष्टानामेव कर्मणां ग्रहणात्। अत एव निषेधानामप्यल्पसादृश्यात्तत्रानुपाद
नं। न च जननमरणाभ्यां तन्निमित्तकस्यानुष्ठेयकर्मणः सोपादानं तन्निमित्तकश्राद्धादौ साकल्येष्टत्वादेव तत्रापवादः संभवात् जननमरणयोस्तु
न्निषेधानामपि दृष्टत्वात्तत्रैव तत्रोपादानं ज्ञातस्य तत्र तिथिविशेषाधिकरणकोमातादिनिमित्तानां सकलनिषेधानां चोपलक्षणमेव तद्ग्रहणम्। मि
ति। न च युग्माहि वाक्यविरोधात्कथमयं निर्णयः। तथाहि। युग्माग्नियुगभूतानां षण्मुन्योर्वसुरंध्रयोः। रुद्रेण द्वादशीयुक्ता चतुर्दश्याथ पूर्णिमा। प्रतिपद्य
प्यमावास्या तिथ्योर्युग्मं महाफलम्। एतद्व्यस्तं महादोषं हंति पुण्यं पुराकृतमिति निगमवचनं॥ युग्मं द्वितीया। अग्निः तृतीया॥ युगं चतुर्थी। भूत पंचमी। षष्ठ
ष्ठी। मुनिः सप्तमी। वसुरष्टमी। रंध्रं नवमी। रुद्र एकादशी। अत्र द्वितीयातृतीयेत्येकं युग्मं। अत्र द्वितीयादिप्रतिपदंतासु क्रमेण द्वयोर्द्वयोस्तिथ्योः पर
स्परमेव युग्मं अक्षय्यफलं॥ न पुनर्व्यस्तमिति व्यस्तं युग्माभिप्रायः। अस्मिन्युग्मसप्तके पूर्वा तिथिरुत्तरविद्धा ग्राह्या उत्तरा तु पूर्वविद्धेत्यर्थः। ततश्चानेन वच
नेनामावास्याविद्धा प्रतिपत्पूर्वेद्युर्ग्राह्येति विधीयते। कर्मणो यस्य यः कालः इत्यनेन तु द्वितीयायुतायाः प्रतिपदः कर्मकालव्यापित्वेनासां ग्राह्यत्वे सुवचने
वचनयोर्विरोधः। तथा खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणं। खर्वदर्पौ परौ पूज्यौ हिंसा स्यात्पूर्वकालिकी तिथ्याद्योशनसो वाक्यं भवेत्तिथेः स्या

म्यं।दर्पो व ह्निः।हिंसाक्षयः।एते च व ह्निसाम्यक्षयाः पूर्वतिथ्यपेक्षया यथा॥एकादशी पूर्वे ह्नि मध्यान्हादधिका वर्द्धते।अन्यापि अन्यस्मिन्नपि पूर्वतिथेरधिका॥प
र्वः समतिथिः पूर्वदिने मध्यान्हव्यापिनी।अन्यापि अन्यस्मिन्दिवसे तावत्येवेति।हिंसा तिथेर्ह्रासः।तु घोगाञ्जितिथिरपि हिंसेत्युच्यते।यथा एकादशी पूर्वदिने मध्यान्हा
न्यूना अन्यापि अन्यस्मिन्नपि पूर्वतिथेर्न्यूनेति।ततश्च वह्निसाम्यपोहन्त्राया ह्या।क्षयेत्तु पूर्वेद्युः प्रतिपादकेनानेन कर्मकालव्यापिन्येव तद्दिपरी
तापि तिथिर्ग्राह्येति प्रतिपादकस्य कर्मणोपयस्येत्येवमादेर्विरोध इति।तथा शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः।कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्त
मितो रविरिति मार्कंडेयवचनेनापि विरोधः॥तस्मात्परस्परवचनविरोधात् कथं पूर्वोक्तनिर्णय इति चेत्।उच्यते।तत्र तावत् तिथिः पंचधा संभवति।अन्य
तरस्मिन्नेव दिने सकलकर्मकालव्यापिनी।अन्यतरस्मिन्नेव दिने कर्मकालैकदेशव्यापिनी॥दिनद्वयेपि सकलकर्मकालव्यापिनी दिनद्वयेपि कर्मकालै
कदेशव्यापिनी।तत्र व्याप्तोपकारद्वयं साम्यं वैषम्यं चेति दिनद्वयेपि कर्मकालसंबंधरहिता चेति।तत्राद्यपक्षद्वये व्रतदानादावेकोद्दिष्टादिश्राद्धे च कर्म
णो यस्य यः कालः इत्यनेनैव निर्णयः।न तत्तु ग्मवाक्यादिभिः।तत्र हि युग्मवाक्येन निर्णये कर्तव्ये विद्धा वा सा दिविद्धा कर्मकालव्यापिन्यः प्रतिप रप्फ·
द्यादिति पर्यायाः स्युः।तथा खर्वदर्पवाक्येनात्र निर्णये कर्तव्ये तिथिवृद्धौ कर्मकालव्यापिन्यप्युत्तरविद्धा ग्राह्या स्यात्॥ ॥तथा चात तत्कर्मवि ३४

34A शेषेषु प्रतिपदादितिथिविषयकानेकवाक्यबाधः स्यात्। संभवति चाबाधे बाधकल्पनमयुक्तं। तृतीये पंचमपक्षयोस्तु युग्मवाक्येन खर्वदर्पवाक्येन
च निर्णयः पूर्वोक्तदोषाभावात्। तत्राप्येवं व्यवस्था युग्मादिवाक्यं व्रतदानादिविषयमेव। खर्वदर्पवाक्यमेकोद्दिष्टादिश्राद्धविषयमेव। द्वितीयादिके युग्मा
नाम्नूपतान्नियमादिषु एकोद्दिष्टादिवृद्ध्यादौ ह्रासवृद्ध्यादि चोदनेति व्याख्यातेः। नियमादिषु व्रतदानादिदैवकर्मसु। एकोद्दिष्टादौ त्वादिशब्देना
भ्युदयिकव्यतिरिक्तश्राद्धग्रहणं। वृद्ध्यादिशब्देनाभ्युदयिकश्राद्धग्रहणं। चतुर्थपक्षे यदा दिनद्वयेपि कर्मपर्याप्तकालव्यापिनी तदा युग्मा
दिवाक्येन निर्णयः। एकस्मिन्नेव दिने कर्मपर्याप्तकालव्यापिनी तदा सैव ग्राह्या विहिततिथिलाभात्। यद्युभयत्रापि न कर्मपर्याप्तकालसंबंधीकिं
तूभयत्रापि कर्मकालैकदेशसंबंधिनी तत्र न्यूनाधिक्येऽधिककालव्यापिनी ग्राह्या साम्ये तु या कर्मोपक्रमकालस्पर्शिनी सैव ग्राह्या नान्या
याय स विहितः कालः कर्मणस्तूपक्रमे। तिथिर्याभिमता सा तु कार्या नोपक्रमोज्झितेति बौधायनवचनात्। स्कांदेपि योयस्य विहितः कालः कर्म
णस्तूपक्रमे। विद्यमानो भवेदंगनोऽसितोपक्रमेणातु। सर्वथा कर्मकालव्याप्त्यभावे तु कर्मोपक्रमकालगैव ग्राह्या कर्मोपक्रमकालगा तु कति
मियं ग्राह्या न युग्मादरः इति दीपिकोक्तेरिति निर्णयसिंधौ। अत एव यां तिथिं समनुप्राप्य उदयं याति भास्करः। सा तिथिः सकला ज्ञेया स्नानदानज

जयसिंहक पादिषु॥ यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः। सा तिथिः सकला ज्ञेया स्नानदानादिकर्मसु। त्यादीनि देवलादिवचनानि हि नद्युपेपि कर्मका
३५ लव्यापिति थ्यभावे सुगमा दिवाकाविहिततिथेः संपूर्णत्वं प्रतिपादयंति। इदं तूदयास्तमयकालिकतिथेः संपूर्णत्वाभिधानं यदोदयादूर्ध्वं मुहूर्त्तत्रयं
35 मुहूर्त्तद्वयं वा विहिता तिथिर्भवति अस्तमयात्प्राक् मुहूर्त्तत्रयं तद्द्वयं वा गत्तव्यं। तदुक्तं विष्णुधर्मोत्तरे। उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ। द्विमुहू
र्त्तं त्रिरन्हश्च सा तिथिः हव्यकव्ययोरिति। भानावुदिते सत्यन्हो मुहूर्त्तद्वयं दैवतं। अस्तमिते तत्पूर्वकालिकमन्हो मुहूर्त्तत्रयं। पित्र्यं अतः तत्काल
व्यापिनी तिथिः हव्यकव्ययोर्ग्राह्या। सा तिथिस्तदहोरात्रं यस्यामभ्युदितो रविः। वर्द्धमानस्य पक्षस्य ह्रासे त्वस्तमयास्थिता॥ त्रिमुहूर्त्ता न कर्त्तव्या या ति
थिः क्षयगामिनी द्विमुहूर्त्तापि कर्त्तव्या या तिथिर्वृद्धिगामिनीति दक्षवचने द्विमुहूर्त्तग्रहणां उदयसंबंधिन्यामेव॥ अस्तगायास्त्रिमुहूर्त्तापरत्वव्याख्याता हू
त॥ तदुक्तं स्कंदपुराणे। यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीपतिः। सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्त्तापि या भवेदिति। अत्र त्रिमुहूर्त्तोनेति दक्षवचना
त्ह्रासवृद्धिवशेन तिथिनिर्णय आमश्राद्धादिविषयः। तथा तु त्रिमुहूर्त्तापाः क्षयवृद्धिलक्षणामिति स्कंदवचनं व्रतादिविषयं द्वितीयादिके तिथ्यासनि राम·
गमवचनात्॥ यानि तु॥ व्रतोपवासस्नानादौ घटिकैका यदा भवेत्। उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके॥ आदित्योदयवेलायां याल्पोकापि तिथिर्भवेत्। ३५

35A पूर्वाह्णे स्नानं गतं व्याप्य भक्तानोदयं विनेत्यादीनि स्कंदपुराणोक्तौ बौधायनवचनानि मुहूर्तत्रयात्मककालव्यापिन्यामपि तिथौ संपूर्णत्वप्रतिपादकानि तानि वै
श्वानरादिकरणव्याप्येनाभ्युत्तानुवादरूपतया त्रिमुहूर्त्तव्याप्ततिथिप्रशंसापराणि । युग्मवाक्यादिनिर्णयप्रसूनवचनवारादियोगप्रशस्ततिथि व्यतिरिक्तविष
यः । अत एव गोभिलः । याति मित्रो द्वसंयुक्ता पावयोगेन नारद ॥ मुहूर्त्तत्रयमात्रापि सा पित्र्ये प्रशस्यत इति । द्वितीयोपि शाण्डिल्योभिन्नक्रमः । सर्वापीत्यन्वय
ः । उदये त्रिमुहूर्तेति द्विमुहूर्त्तगा या अस्तमये च त्रिमुहूर्त्तगा याः संपूर्णत्वाभिधानं वक्ष्यमाणाभ्यंगादिव्यतिरिक्तविषयं । तदुक्तं स्कंदपुराणे । अभ्यंगे चोदये स्ना
ने इत्यादि मन्वादौ च युगादौ च ग्रहणे वंशसंक्षयोः । व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रियेति । मन्वादिषु स्नानदानश्राद्धादिक्रियाम न्वाद्यादिकालएव क
र्त्तव्या । न कालांतर इति मन्वाद्यादि विलक्षणार्थः । नारदीयो पारणो मरणोन्मरणां तिथिस्तात्कालिकी स्मृता । यदा तु कैव तिथिः पूर्वाह्णे ग्राह्येत्येके न च वक्ने नोच्यते उक्त
तथा द्वैपस्मरणेन तदा शुक्लपक्षे तिथिर्ग्राह्या तिमार्कें उदय च वचनं व्यवस्थापकमिति सर्वमनवद्यं । इति सामान्यतः सर्वतिथिनिर्णयः । अथैकभक्तकालनिर्णा
यः । तत्र स्कंदपुराणे वैश्वानरव्रते पठ्यते । प्रतिपत्क्रमकाशीस्तमास्ने कपिला प्रदद्यति । तत्राद्यावेकभक्तानि विविधानि स्वतंत्रमंगागमुपवासप्रतिनिधिरूपं चेति
॥ तत्र स्वतंत्रैकभक्तस्वरूपं तन्निर्णयश्च स्कांदे । दिनार्द्धसमयेतीते भुज्यते नियमेन यत् । एकभक्तमिति प्रोक्तमतस्तत्स्याद्दिवैव हीति । देवलोपि । दिनार्द्धसमये

तीतेषु उपक्तो नियमेन यतः ॥ एकभक्तं द्वितयोक्तं न्यूनं ग्रासत्रयेणापि वितिः तत्रैकभक्तं मध्याह्नव्यापिन्यां कार्यं । तदुक्तं पुष्यपुराणे । मध्याह्नव्यापिनी ग्राह्या एकभ
क्ते सदा तिथिरिति । बौधायनोपि । उदये तूपवासस्य नक्तस्यास्तमये तिथिः । मध्याह्नव्यापिनी ग्राह्या एकभक्ते तु तिथिः । अत्र मध्याह्नो नाम पंचधा विभक्तस्या
ह्नः तृतीयो भागः । तत्र अहोरात्रयोस्त्रिंशन्मुहूर्त्ताः । अह्नि पंचदश रात्रौ पंचदश एतेषां मुहूर्त्तानां नामानि ज्योतिःशास्त्रे कश्यपेनोक्तानि गौरीवल्लभसर्पमि
त्रपित्तरोवसुस्तु विश्वाहू याजन्मोभो हतमखेंद्रइन्द्रमुकुंदेवेशनक्तंचराः ॥ तोयेशार्यमयोनयोहस्रगजथा पंचदश ॥ वामसरस्वत्यादि । रुद्राजाहिर्बुध्न्यपूषा
श्विनाग्रयः कीनाशोग्निधातृचंद्रादितिज्याः । विष्णुर्भास्करत्वाष्ट्रवायुमुहूर्त्ता रात्रौ क्रमात्स्वतकालाग्निरुद्राद् इति । स्मार्त्तानि नामानि पुराणे दर्शितानि रौद्रः श्वेत
श्च मैत्रश्च तथा सारभटः स्मृतः । सावित्रो वैश्वदेवश्च गांधर्वः कुतपस्तथा । रौहिणस्तिलकश्चैव विभवो नैरृतिस्तथा । शांबरो विजयश्चैव भगः पंचदश स्मृता
इति । एते पंचदश सूर्योदयादारभ्य क्रमाद्दिवामुहूर्त्ताः । तथा रात्रिमुहूर्त्ताः शंकरश्चाजपाच्चैव तथाहिर्बुध्न्यमैत्रकौ । आश्विनो याम्यवाह्नेयौ वैधात्रश्चांद्र एव च । आ
दितेयो गुर्वजेव श्चवैष्णवः सौर एव च । ब्राह्मो नाभस्यतश्चैव मुहूर्त्ताः क्रमशो निशीति । अत्र घटिकाद्वयात्मको मुहूर्त्तः तदुक्तं निर्णयामृते महाभारते- ना राम·
डीद्वयं मुहूर्तः स्यादिति सरउक्तं रत्नमालायां । दिनेयः पंचदशो भागो रात्रेस्तथा तद्वि मुहूर्त्तमामनंतीति तत्स्वाहोरात्रिकाभिप्रायेणावोध्यम् । यद्यपि अह्नो विभागः द्वे ३६

36A धा त्रेधा चतुर्धा पंचधा च दश पंचेति तथापि बहुसंमतत्वाच्चातुर्धा पंचधा विभाग एव गृह्यते। पूर्वाह्णोऽपराह्ण इति द्वेधा विभागः। स चोक्तः स्कांदे। आवर्त्त-
नात्तु पूर्वाह्णो ह्यपराह्णस्ततः पर इति। तस्य च पर्वनिर्णयादावुपयोगः॥ त्रेधा विभागमाह शातातपः। यस्मादह्नस्तु पूर्वाह्णे देवास्त्र्यंशं न मध्ये व हरंति। मध्यं-
दिने मनुष्यास्त्वपराह्णे पितर इति। स्मृत्यंतरेपि। पूर्वाह्णो देवानां मध्याह्नो मनुष्याणामपराह्णः पितृणामिति। एतस्य च श्राद्धादावुपयोगः। चतुर्धा विभागमाह
गोभिलः। पूर्वाह्णः प्रथमं सार्द्धं मध्याह्नः प्रहरं तथा। आतृतीयादपराह्णः सायाह्नश्च ततः पर इति। एतस्य च यत्र कर्मविशेषे गमकसंज्ञा वस्तत्रोपयोगः। पंच-
धा विभागस्तु श्रुतिमूलोक्तो यथा। मुहूर्त्तत्रितयं प्रातःस्तावानेव तु संगवः। मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्तु तादृशः। सायाह्नस्त्रिमुहूर्त्तश्च सर्वकर्मसु गर्हि-
त इति। अस्यार्थः। उदयान्मुहूर्त्तत्रयं प्रातःकालः। तदनंतरं मुहूर्त्तत्रयं संगवः। ततः परं मुहूर्त्तत्रयं मध्याह्नः। ततः परं मुहूर्त्तत्रयं अपराह्णः। ततः परं मुहूर्त्त-
त्रयं सायाह्न इति। ननु त्रिंशद्घटिकात्मके दिवसे पंचधा विभागे सति एकैकस्य कालस्य मुहूर्त्तत्रयात्मकत्वं संभवति। षडशीत्यादिषु दिनमानह्रासे क-
थं त्रिमुहूर्त्तात्मकत्वेनायं विभाग इति चेत्। उच्यते। त्रिमुहूर्त्तमित्यह्नः पंचमभागोपलक्षणं॥ अतश्चाह्नो ह्रासवृद्धौ न दोषः। एवं च षड्घटिकात्मकम-
ध्याह्नस्योत्तरस्मिन् घटिकात्रये एकभक्तं कर्त्तव्यं। अन्यथा दिनार्द्धसमयेतीते इति वचनस्यानर्थक्यं प्रसज्येत इत्यमेव निर्णीतं हेमाद्रौ मदनरत्ने निर्णी

जयसिंहक०
३७
37

याम्नोतेन॥ अत्र मध्याह्नशब्दो दिनार्द्धसमयेतीत इति वचनात् मध्याह्नोत्तरदलपरः पद्मोदग्ध इति वत्। तत्र स्वतंत्रमेकभक्तं यस्यां तिथौ विहितं तस्यां मध्या
ह्नोत्तरदलव्यापिन्यामेव कर्त्तव्यं। दिनद्वयेपि तद्व्यापिन्यां युग्मवाक्यान्निर्णयः। दिनद्वयेपि मुख्यकालास्पर्शे शैवैर्वैष्णवैर्ग्राह्या गौणकालव्यापित्वात्। तस्यामपे
कभक्तमुख्यकालस्यैव कर्त्तव्यं। तिथ्यादिषु भवेद्यावत् यावान्ह्रासो वृद्धिः परेहनि तावान् ग्राह्यः स्मृतः पूर्वे घुरहस्तोपि स्वकर्मणि इति वचनेन एवं तिथेरपि तावतो ह्रा
सस्य कल्पनेन मुख्यकालेपि एकभक्तादितिथिसंभवात्। केचित्तु तिथेः परस्या घटिकाश्च याः स्युर्न्यूनास्ताः पूर्वा साधिका स्वतांस्तां। अर्द्धं विप्रोज्झं वत याप्रयो
ज्यं ह्रासे वृद्धौ प्रथमेह्नि नेत्याहितिलोगाक्षिवचनेनोत्तरतिथिह्रासवृद्धिस्पर्शे वैतिथौ योजनात् मुख्यकाले तत्संभवमाहुः। दिनद्वये मुख्यकालैकदेशस्पर्शे तु
ल्पव्याप्तौ पू वैर्वैर्ग्राह्या। गौणकालस्यापि व्याप्तनात्। पद्मे चैकामुख्यकालैकदेशमप्यधिकव्याप्तौ तिनदाग्धिकमुख्यकालव्यापित्वे न मैकव्याप्तौ। अयं
निर्णयः स्वतंत्रैकभक्तविषयः। अनन्यत्र तामंत्रैकभक्तं प्रधानव्रतेन मध्याह्ने शुक्लयेन्द्रपेत्यादि वचनान्मुख्यकालावरोधेन गुणविरोधे व्रतादर्थ्यो रि
ति न्यायेन मुख्यकालात्ययात्तमपि गौणकाले कर्त्तव्यं। यथा दीक्षणीयेष्टिः प्रधानसोमयागानुरोधेन इष्टिकालासर्वदाः अप्रयुक्ताकालान्तरे क्रियते। उपम
पवासप्रतिनिधिरूपं तु एकभक्तमुपवासदिने मध्याह्ने उपवासाशक्तौ येसंग्राह्ये संग्राह्यं पिरात्रैव कर्त्तव्यं॥ तिथिर्यथोपवासस्यापेक्षैकभक्तेपि सा तथेति ३७

37A सूर्यं त्ववचनात्। इति जयसिंहकल्पद्रुमे एकभक्तकालनिर्णयः। अथ नक्तकालनिर्णयः। नक्तं नामाहरशनं वर्जयित्वा रात्रौ भोक्तव्यमिति। तिथ्यमादिवारात्रि
व्रते। तस्मादेतद्दिवारात्रिव्यापिन्यामेव तिथौ कर्तव्यं। तदुक्तं स्कंदपुराणे। दिवारात्रिव्रतेष्वेकमेव तिथौ स्मृतं। तस्मादुभयव्यापिन्यां कुर्याद्देवव्रतं व्रती।
अन्यो भयव्यापिन्यामेवैव न पः। दिवारात्रिव्यापिन्याश्चाभावे प्रदोषव्यापिन्या कार्यं तदुक्तं वत्सः। प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा। एकादशी
विनाः सर्वाः शुक्ले कृष्णे समाः स्मृताः। एकादश्युपवासप्रतिनिधिरूपं तु नक्तमेकादश्युपवासाशक्तेन एव कार्यं। नक्तैकादश्याः प्रदोषव्यापित्वापेक्षा समर्थ
ः। प्रदोषपरिमाणमुक्तं स्कंदपुराणे। उदयात्प्राक्तनी संध्या घटिकात्रयमिष्यते। सायं संध्या त्रिघटिका अस्तादुपरि भास्वतः। प्रदोषः त्रिमुहूर्तः स्याद्दिवा
वस्तंगते सतीति। व्यासोपि। त्रिमुहूर्तः प्रदोषः स्याद्भानावस्तंगते सति। नक्तं तत्र तु कर्तव्यमिति शास्त्रविनिश्चय इति। हेमाद्रौ विष्णुधर्मे। प्रदोषोस्तमया
दूर्ध्वं घटिकात्रयमुच्यत इति। अस्य च नक्तस्य कालद्वयं भविष्यपुराणोदर्शितं। मुहूर्तोनं दिनं नक्तं प्रवदंति मनीषिणः। नक्षत्रदर्शनान्नक्तमहं मन्ये गणा
धिपेति। अस्य च नक्तव्रतकालद्वयस्य अधिकारिभेदेन व्यवस्थामाह देवलः। नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतं। यतेर्दिनाष्टमे भागे तस्य रात्रौ
निषिद्धमत इति। स्मृत्यंतरेपि। नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः। यतिश्च विधवा चैव कुर्यात्तत्सदिवाकरं। सदिवाकरं तु तत्रोक्तमंतिमे घटिकाद्वये। नि

शा नक्तं तु दिवा नक्तं ज्ञेयं यामार्द्धे प्रथमे सदेति। इत्यं व्यवस्था नक्तकालद्वयस्य माधवेनोक्ता। मदनरत्ने तु प्रकारांतरेण व्यवस्थोक्ता। अयं नप्रदो
षो नक्तव्रतस्य मुख्यकालः। अस्तमयात्प्राचीनो मुहूर्त्तोनुकल्पः। मुहूर्त्तोनं दिनं नक्तमिति भविष्यपुराणोक्तिरेवं नक्षत्रदर्शनोत्तरं प्रदोषकालस्याहं मन्यइ
तिस्वाभिमतत्वेनाभिधानात्। इतरस्य तु पराभिमतत्वेनाभिमतत्वेनाभिधानाक्षेपात्तस्याभिप्रेतत्वात्। अत्र च वचनेन नक्षत्रदर्शनादिति ल्यब्लोपे पंचमी
अत्र तद्य नक्षत्रदर्शनं प्राप्य नक्तं विहितभोजनं विधेयमित्यर्थः। अतथात्वे परत्र साहस्त्रावगम्यते तो हि सेति जाबालिवाक्ये दिनद्वयेपि प्रदोषव्याप्त्यभावे सा
यान्हव्याप्तेराश्रयणात्। यदा नक्ततिथिः पूर्वदिने प्रदोषं व्याप्नोति अपरदिने अस्तमयादर्वाचीनं त्रिमुहूर्त्तं व्याप्नोति किं विधास्पदेश तिनदाह पूर्वत्रैव नक्तं
कार्यमित्युक्तं जाबालिना॥ अहस्तु तिथयः पुण्याः कर्मानुष्ठानतो दिवा। नक्तव्रते तु सर्वत्र रात्रियोगः प्रशस्यते इति। यदा नक्ततिथिः पूर्वापरयोरन्हो
:प्रदोषव्याप्नोति तदापरैव ग्राह्या॥ दिवारात्रिव्यापित्वात्। तदाह जाबालिः। यदि स्यादुभयोरन्होः प्रदोषव्यापिनी तिथिः। तत्रोत्तरत्र नक्तं स्यादुभयत्रापि
साप्यत इति॥ दिवारात्र्यावयोस्त्वर्थः। पुरुकर्म प्रसाराणि प्रदोषकालस्यात्र स्तमयात्प्राचीनमुहूर्त्तत्रयस्य च नक्तकालत्वाभिधानं प्रदोषव्यापिनी यत्र त्रिवि राम:
मुहूर्त्ता दिवा यदि। तदा नक्तव्रतं कुर्यात्स्वाध्यायस्यानिषेधवज्जन्मुख्यगौणसाधारणेन वर्तितव्यं। यत्तु भविष्यपुराणाद्दिवितोल्पकालग्रहणं नदमुख्य

38A

कालत्वेपि तत्वाशक्त्या येत्ति तेनासन विरोधः। ननु द्वयात्याक्तनीसंध्याघटिकात्रयमुच्यते। सायंसंध्या त्रिघटिका अस्तादुपरि भास्वत इति। स्कंदपुराणोक्तसं
ध्यायाः घटिकात्रयात्मकत्वाभिधानात्। तस्मात् चत्वारीमानि कर्माणि संध्यायां परिवर्जयेत्। आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकम् इति वचनेन भोज
नप्रतिषेधात्कथं नक्षत्रदर्शनानंतरं नक्तभोजनविधानमिति चेत्। न भोजननिषेधस्य मुख्यसंध्याकालसंबंधेनैव वक्तुं शक्यत्वात्। गौणघटिकात्म
कसंध्याश्रयेकारणाभावात्। संध्यानामदिनरात्र्योः संधौ विहिता संध्योपासनादिक्रिया। सूर्यबिंबखंडमार्त्तंडमंडलोपलक्षितसमयः। तस्याव्यक्तत्वात् क्रि
यापाश्च विततत्वेन तावत्तिकाले कर्तुमशक्यत्वात् मुख्याप्युपाधेसति संध्याशब्देन संधिसंबंधः पूर्वापरक्रियापर्याप्तः कालोलक्ष्यते अतश्च सर्वलोकप्र
सिद्धः खंडमार्त्तंडमंडलोपलक्ष्यादिताराकोदयांतो मुख्यः सायंकालः। तथा च याज्ञवल्क्यः॥ ॥प्रातःसंध्यां सनक्षत्रां सायंसंध्यां सभास्करां॥
जपन्नासीत सावित्रीं प्रत्यगातारकोदयात्। संध्या प्राक्प्रातरेवं हि तिष्ठेदासूर्यदर्शनात्। स्मृत्यंतरे च। नक्षत्रदर्शनात्संध्यासायं तत्परतः स्थिता। तु
त्परारजनीज्ञेया तत्र धर्मान् विवर्जयेदिति। घटिकात्रयात्मकः संध्याकालस्तु मुख्यकाले दैवादकृतानां संध्योपासनादीनां घटिकात्रयपर्यं
तंकर्त्तव्यताप्रत्तुत्तापनार्थः। संध्यागर्जितादिनाविहितानाध्यायादिपरश्च। हेमाद्रौमदनरत्ने च॥ उक्तस्तुवा घटिकात्रयं संध्याशब्दार्थः। तथापि

जयसिंहक
३९
39

नतत्रनिषेधः तस्य रात्रिप्रात्नभोजनविषयत्वात्। यत्तु निशीथेपि संध्यौ। गौडास्तु प्रदोषोस्तमयादूर्ध्वं घटिकाद्वयमिष्यते इति वचनोक्तः स दोषः। संध्यात्रदि
नराज्योः संधौ मुहूर्त्तः। अर्द्धास्तमयात्संध्याव्यक्तीभूता न तारका यावत्। तेजःपरिहानिर्वशाज्ञानोर्भागोदयं यावदिति वराहोक्तेरित्याहुः। तन्न अस्य मु
ख्यावृत्त्या नध्याय्यदीपरत्वादिति तदृज्ञानविज्ञमिंशिववस्तुनेनक्तभोजने चतस्यैव प्रदोषकालस्य सर्वत्र विहितत्वात्। यदपि तु। यच्च मदनरत्ने
नक्तस्य वैध्यत्वाद्रागप्राप्तभोजनगोचरो निषेध इति तन्नाविधेर्निषेधाविरोधात्। अन्यथा कपिंजलानित्यत्रापि श्योनादिकानां हिंसनं स्यादिति तत्
स्सर्वं विधिविस्पृष्टे निषेधानवकाशादिति मीमांसको क्षोषविरोधात् घटिकाद्वयत्र यप्रदोषप्रतिपादकमाधववचनं यथाविरोधाशोपेक्ष्यं। कालतत्वविवेच
नेपि घटिकात्रयं संध्याग्रहणोपि वैधनक्तभोजने नक्षत्रदर्शनानंतरं घटिकात्रयमध्येपि क्रियमाणे न दोषः। नह्विषयत्वे तु विधिप्राप्ते निषेधप्रव
त्तौ विहितनिषिद्धत्वेनाष्टदोषदुष्टविकल्पापत्तेरिति। अनेनैव न्यायेनादित्यवारसंक्रांत्यादिषु रात्रिभोजननिषेधस्य रागप्राप्तविषयत्वादृष्टमादि
नक्तव्रतरविवारादियोगेपि रात्रावेव कर्त्तव्यं यदा दिनद्वयेपि प्रदोषसंबंधः तदोत्तरदिने सायान्हे कर्त्तव्यं। तदुक्तं स्कांदे। प्रदोषव्यापिनी न स्याद्दिवा राम
नक्तं विधीयते। आत्मनो द्विगुणा छाया मतिक्रामति भास्करे। तन्नक्तं नक्तमित्याहुर्न नक्तं निशिभोजनं। एवं ज्ञात्वा ततो विद्वान्सायान्हे तु भुजिक्रियां ३९

39 A

रूपोन्नक्तव्रतीनक्तं फलं भवति निश्चितमिति । अत्र तथात्वे परत्र स्यादित्याह वृत्तक्रमे वा । अत्र वाशिष्ठे कृष्णपक्षे चैकभक्तं वा निरग्निः शोषेद्वर्षकः । सौरनक्तव्रतमपि पत्तत्प्रमी
रविवारादौ विहितं तत्कालाया हरप्रवर्त्तयं तदुक्तं सुमंतुना ॥ त्रिमुहूर्त्तेऽस्तगे वार्के निशि चैतावती तिथिः । तस्मात्सौरं नरो नक्तमहरन्ते तु भोजनमिति । कू
र्मपुराणेऽपि । नास्य हि पुराणां ह्यापाम तिकामे ग्रहारादिः । तदा सौरं चरेन्नक्तं न नक्तं निशि भोजनमिति । भविष्यपुराणेऽपि । येत्वादित्यदिने ब्रह्मन्नक्तं कु
र्वंति मानवाः । दिनांते ते तु भुंजीरं न निषेधो रात्रिभोजने इति । हरिनक्ते विशेषः स्कांदे उदयस्था सदा एज्या हरिनक्तव्रते तिथिरिति । अन्यन्नक्तं तु स
कांग्याद्यावपि रात्रावेव निषेधस्मरणात्प्रासभोजनगोचरस्तेन वैधो वाधकत्वात् । या निह्ना पदात्तु द्विगुणांच्छायां कुर्वंति पतिभास्करः । अत्र नक्तं विजानी
यात्तन्नक्तं निशि भोजनमित्यादीनि सौरधर्मादिवचनानि दिवानक्तविषयाणीति तानि यथाप्रथं हि न द्वयेपि प्रदोषव्याप्त्यभावविषयाणीयतिनक्तविषया
णि वा द्रष्टव्यानि । अत्र माधवः ॥ येत्वादित्यदिने ब्रह्मन्निति भविष्यपुराणमप्रदिश्य तत्र । अस्मिंश्च दिवा भोजने उक्तमोतिमसुहूर्त्तो मध्यमण्डपांतः । ततः प्राची
नो जघन्यः ॥ एवं चास्तमयात्त्रिमुहूर्त्तवचनान्युपपद्यन्ते । रात्रिभोजनेपि घटिकात्रयमुत्तमः कालः । घटिकाषट्कं मध्यमकालः । एतद्देवाभिप्रेत्य
वचनं स्मर्यते । प्रदोषोस्तमयादूर्ध्वं घटिकात्रयमिष्यते । इति त्रिमुहूर्त्तः प्रदोषः स्याद्रवावस्तंगते सतीति च । निशीथपर्यंतो जघन्यः कालः । नक्तं प्रकुर्वीत

जयसिंहक०
४०
40

रात्रावितिसामान्येनाभिधानादितिकालतत्त्वविवेके न कार्यैस्तु।मुख्यकालेपिविमुहूर्त्तात्मके आद्यंमुहूर्त्तद्वयंमुख्यतरं।निशानक्तंतुविज्ञेयंयामार्द्धंप्रथ
मेसदेतिस्मृत्यंतरादिष्टुक्तत्वंतः।अनेनैवन्यायेनसौरनक्तेषुसामान्येनवैषम्ये॥वादिनद्वयेप्रदोषैकदेशव्याप्तौपरेद्युरेवनक्तंकार्यंसायंकालस्यमुख्यस्य
तत्तिथिव्याप्तत्वात्।सायंकालैकदेशव्याप्तौ सर्वतिथिर्ग्राह्या·प्रदोषकालस्य गौणस्यतत्तिथिव्याप्तत्वात्।एकभक्तनक्तयोःएकस्मिन्दिनेप्रसक्तौएक
भक्तस्यप्राथम्यात् एकभक्तंमुख्यकालएवानुष्ठेयं॥नक्तंतुद्वितीयदिनेतत्तिथेःसायंकालेगौणेसत्वेद्वितीयदिनेनुष्ठेयं।द्वितीयदिनेगौणकाले
पितत्तिथेरसत्वेतुभार्यापुत्रादिनावातद्दिनेकार्यमिति।नक्तकर्तुःनियमोव्यासेनदर्शितः।मदनरत्नेहविष्यभोजनंस्नानंसत्यमाहारलाघवं।
अग्निकार्यमधःशय्यांनक्तभोजीषडाचरेदिति।इतिनक्तनिर्णयः।अयाचितनिर्णयः।मदनरत्नेनिर्णयामृतेच।नविद्यतेयाचितंयस्मिन्नभ्यव
हरणेतदयाचितंनाम।अहोरात्रेयाचितमन्नंनभोक्ष्येइत्येवंरूपोयाचितान्नभोजनाभावविषयःसंकल्पइतियावत्।अतएवप्राजापत्यकृच्छ्रप्रक
रणेगौतमेनोक्तं।अथापरंत्र्यहंनक्तंचान्यायाचितेति।अभ्यवहरणंचभक्ष्यभोज्यलेह्यपेयचोष्यभेदेनपंचविधं॥तत्रदंतैरवखंड्यावखंड्ययन्निगी राम·
र्यतेतद्भक्ष्यं।दंतावखंडनमंतरेणाश्रुत्वव्यापारेणैवयन्निगीर्यतेतद्भोज्यं।जिह्वयागृहीत्वायद्गतगिल्यतेतल्लेह्यं।पेयंप्रसिद्धंक्षीरादि।चोष्य ४०

40A

नामयज्ञव्यांतर्गतस्मरसंस्कृत्यापारेणादंतव्यापारे गावा गृहीत्वांतर्गिल्यते। असारमन्यत्सज्यतेतत्स्य याम्र फले क्षुदंडादि। अयमेवोपवासस्व दृहोर।
त्यसाध्यत्वादयाचितति येर्दिवारात्रियोगित्वेतस्यामेवानुष्ठानं। दिवारात्रिभक्तंयद्वेतिस्कंदपुराणावचनात्।। यत्तु तिथिरेकास्मिन्नहिने दिवैवअन्यास्मि
नूरात्रावेवतदाहव्याप्तिन्येवग्राह्या। अहस्तु तिथयः पुण्याः इतिजाबालिवचनात्। अयाचितान्नलाभे तु दिवारात्रौ वा अनिषिद्धकालेसकृद्भोजनं क
र्त्तव्यं न तु वासिष्ठवचनात्। अलाभेत्वयाचितस्यैवत्राप्ययाचितान्नभोजनपरित्यागस्यानिर्वाहान्नलोपः। अत्रमाधवः। अयाचितशब्दस्यापर्युदस्तप्रति
षेधः पर्युदासश्च। प्रतिषेधपर्युदासयोरुभयोः प्रतिषेधपक्षं प्राजापत्यस्मृत्याख्याने गौतमोप्यवजाहार।। अथापरं त्र्यहं नकंचन याचेतेति।। पर्युदा
संकहस्पतिरप्यवजहार।। त्र्यहं प्रातः त्र्यहं सायं त्र्यहमद्यादयाचितमिति। त्र्यहं परं तु नाश्नीयात् प्राजापत्यं चरन्द्विज इति स्मृत्यंतरेपि। अयाचिताशी
मितभुक् परां सिद्धिमवाप्नुयादिति। मितभोजित्वं दशग्रासभुक्त्वं। तदुक्तं वृद्धविंशतिमते। प्रातः स्तु द्वादश ग्रासा नक्ते पंचदशैव तु। अयाचिते तु द्वौ
वाष्टौ प्राजापत्ये विधिः स्मृत इति। तत्र भोजनद्रव्यं पराकीयं अयत्नोपनीतं। अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणा अन्यत्र कुलटाशंढपतितेभ्यस्तथा
द्विषद्भ्यः इति याज्ञवल्क्यवचनात्। तथायतिधर्मे उशना।। भिक्षाशनमनुद्योगात्प्राक्केनापि निमंत्रितं। अयाचितं तु तद्भैक्ष्यं भोक्तव्यं मनुरब्रवी

जयसिंहक०
४१
41

ञायदिप्रतिषेधः। यद्दिवा पर्युदासः उभयथा ये कर्मक्रमादिवन्नकालोविशेषणीयः। प्रतिषेधे कालविशेषानपेक्षणात्। पर्युदासेपराधीनत्वात्। अस्म
तितत्काल। विशेषविधौ न कर्मकालव्याप्तिवचनमत्रप्रवर्त्तते किंतु युग्मवाक्येनैव निर्णेय इति। पञ्चमरुखे॥ अयाचिते। विशेषवचनाभावात् उपवास
वन्निर्णेय इति केचित्तन्न॥ एकभक्तायाचितयोर्यो विशेष इष्टिकायां धृतः॥ सा तिथिः सर्वदा ज्ञेया नक्तेसायाह्नसंगतेति शार्ङ्गधरीयेनारदोक्तेरिति। तद्वि
त्याएतद्वचनस्य हेमाद्र्यादिनिबंधादावदर्शनात् निर्मूलत्वात्। इत्ययाचितकालनिर्णयः। एकभक्तादिव्रतानां खंडतिथौ प्रारंभसमाप्त्योः प्रतिषिद्ध
त्वात् खंडास्वरूपमभिधीयते निर्णयामृते। या तिथिरुदयादारभ्य हि नाड्यव्यापिनी न सा स्यात् खंडा। तस्यां व्रतानां प्रारंभसमाप्तिं न कुर्यात्। तदाह सत्य
व्रतः। उदयस्था तिथिर्या हि न भवेद्दिनमध्यगा। सा खंडा न व्रतानां स्यात्प्रारंभः समापनमिति। अखंडायां तु प्रारंभसमाप्ती आह वृद्धवसिष्ठः। अखं
डव्रतिमार्तंडायाह्यखंडाभवेत्तिथिः। व्रतप्रारंभणं तस्यामनष्टगुरुशुक्रयोरिति। नन्वत्र वचने समाप्तिपदाश्रवणात्तत्र समाप्तिः कर्त्तव्येति कुतोऽव
गम्यत इति चेत्सत्यं। खंडतिथौ निषेधवलादेवाखंडतिथौ विधानं प्राप्तं। भावाभावौ विहाय तृतीयावस्थायाः क्वचिददर्शनादिति। अत्रैव प्रसंगान्नक्षत्रम
व्रतकालनिर्णयः। निर्णयामृते। सूर्योदयसमयकालव्यापिनि नक्षत्रे नक्षत्रव्रतं कार्यं॥ यदा अत्यंतक्षयगामि नक्षत्रं दिनद्वयेप्यस्तमयकालव्या ४१

41A पिनं भवति ॥ तदार्द्धे रात्रादर्वाक्छेदे ग्राह्यत्वेन नक्षत्रे कार्यं ॥ तदुक्तं विष्णुधर्मोत्तरे ॥ उपोषितव्यं नक्षत्रं यस्मिन्नस्तमियाद्रविः ॥ युज्यते यत्र वै तारा निशीथे
शशिना सहेति ॥ अत्र निशीथशब्देनार्द्धरात्रात्प्राचीनः कालो लक्ष्यते । अन्यथास्तमयवचनेन विरोधः स्यात् । यदुक्तं । यदार्द्धरात्रादर्वाक् नक्षत्रं प्राप्यते ति
थौ । तन्नक्षत्रैव व्रतं कुर्यादतीते पारणान्तघेति । नक्षत्रोपवासे या तिथिः सैव नक्षत्रविहितनक्तैकभक्तयोरपि ग्राह्या । तदुक्तं स्कंदपुराणे ॥ तन्नैवोपवसे
दृक्षं यन्निशीथादधो भवेत् । उपवासे यदृक्षं स्यात्तद्यानक्तैकभक्तयोरिति ॥ इति नक्षत्रव्रततिथिनिर्णयः समाप्तः ॥ अथ दानहोमादिदैवकालनिर्णयः । एतेषां च
पूर्वाह्णः कालः । पूर्वाह्णो वै देवानामिति श्रुतेः । पूर्वाह्णो दैविकः कालो मध्याह्नश्चापि मानुषः ॥ अपराह्णः पितॄणां तु सायाह्नो राक्षसः स्मृत इति
याज्ञवल्क्यवचनाच्च ॥ तेनैतानि पूर्वाह्णव्यापिन्यां तत्तिथौ कर्तव्यानि ॥ अत एव याज्ञवल्क्यः ॥ पौर्वाह्णिकास्तु तिथयो दैवकार्ये फलप्रदा इति ॥ नन्वेवमेकामि
त्रदिनेति थिद्वयविहितस्यैकभक्तादेः कथमनुष्ठानमुच्यते । यस्य दानहोमैकभक्तादेः स्मिथो न विरोधस्तत्रैकमेवानुष्ठेयं ॥ यस्य त्वेकभक्तनक्तादेर्विरोधः
तत्रैकं स्वयं कृत्वान्यद्भार्यादिना कारयेदिति माधवमदनरत्नादयः । यत्र तु व्रतद्वयस्यादौ एकभक्तादिना दिवाभोजनं प्राप्तं भूताष्टम्योर्दिवा तु नक्तमरात्रौ
भुक्त्वा च पर्वणि एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेदिति तन्निषेधश्रुतत्रैकभक्तादेर्वैधत्वाद्दिवैव भोजने निषेधस्तु रागप्राप्तभोजनविषयः तत्र भोजनस्य

पवासनिषेधे त्विति वचनादुक्तसेन कार्यं एवं चतुर्दश्यां शिवरात्रिव्रतपारणायामपि वैधत्वाद्दिवैव भोजनं ॥ एवमष्टम्यादौ नक्तव्रते संक्रांत्यादौ रवौ संक-
ष्टव्रत उपोष्यो वरात्रौ भोजनं ॥ यत्र त्वष्टम्यादौ दिवाभुजिनिषेधः संक्रमे च रात्राविति निषेधद्वयं तत्रोपवास एव कार्यः । यद्यपि पुत्रिणः उपवासोपि निषिद्धः त-
थाप्युपवासनिषेधे तु किंचिद्भक्ष्यं प्रकल्पयेदिति वचनात्किंचिद्भक्षयित्वोपवासः कार्यः ॥ यत्तु निशायां सिंधौ वांछायामघोर्यकादश्यादौ तु भोजनं कार्य-
मेव वांछापरस्य काम्यत्वेन नित्यबाधकत्वादित्युक्तं तन्मन्दं ॥ फलाद्यशनेनापि वांछायां व्रतसंपत्तौ ॥ एकादश्यां भोजननिषेधवाक्यानामानर्थक्येन बा-
धानौचित्यात् इति दानहोमादिकालनिर्णयः ॥ एतावता प्रबंधेन व्रतानुष्ठानोपयोगिनः कालमात्रस्य तो निरूप्येदानीं प्राधान्येन प्रतिज्ञातविषयभूतव्रत-
स्वरूपं तदुपयोगि च निरूप्यते । तत्र व्रतं नाम अभियुक्तप्रसिद्धिविषयः संकल्पविशेषः । अभियुक्तप्रसिद्धिविषयमत्र व्रत । स्वकर्तव्यविषयो नियतः सं-
कल्पो व्रतमिति श्रीदत्तः तत्राग्निहोत्रसंध्यावंदनादिविषये संकल्पेतिप्रसक्तं ॥ नव्यसंकल्पस्य व्रतत्वे व्रतं संकल्पयेदित्यनन्वय इति वाच्यं ॥ याकं प्लवति दानं
दद्यादिति वच्चस्याप्यनुग्रहार्थं प्रयोगोपपत्तेः । निरुक्तं तु व्रतमिति कर्मनामापि वृत्तिकर्मवारयतीति । अथ व्रतप्रशंसा ॥ विष्णुधर्मोत्तरे ॥ व्रतोपवासैर्नियमैर्वि-
भुर्नान्निजमानितोषितः ॥ तेन राज्ञा निशार्द्दूल्यव्यहरोगादिबाधिताः ॥ एकं द्युराज्ञो । न शत्रुजितो भूत्तपतिः पुण्यैर्व्रतैर्नवीरीन वसत्यमुक्तं । हरिश्चशो

42A

कामय दुःखदग्धाः प्रायोऽत्र शोचं विततं एवमन्योः। राजाश्रियं जगति साधुजनोपभोगं प्राप्नोति चापि शिवलोकमथाप्नुतं तं। नानापमस्ति भुवनेऽत्र दृष्टं व्रतानां त
स्मात्सदा व्रतपरेण नरेण भाव्यं पद्मपुराणे॥ नाग्निर्विन्नकं रयाति न सस्तु त्रीन समद्भुती। नाश्वमेधादियाजी च गोसहस्रप्रदो न च। स्कांदे। नियमानां च दृश्यं
ते सम्यक् ह्वाः फलासिद्धयः। पद्मादि नियमानां च घोरा व्यापत्तयो न घ। नियमो व्रतं तथा॥ गौरीं प्रति शिववाक्यं देव त्वं देवता प्राप्ता। नियमान्निपमान्निय
मान्विते॥ तारारूपाज्वलं सेते नियमादैतपोधने वाराहपुराणे। किं विद्भुतं वा किं यत्नेऽप्यजायते वाक्लोवनः। विप्रेभ्यो दीयते सर्वमेतज्ज्ञमतः फलं॥ अ
यव्रताधिकारिणः। स्कंदपुराणे। निजवर्णाश्रमाचारनिरतः शुद्धमानसः। अलुब्धः सत्यवादी च सर्वभूतहिते रतः। व्रतेष्वधिकृतो राजन्नन्यथा विफ
लश्रमः। श्रद्धावान्पापभीरुश्च मददंभविवर्जितः। एवं निश्चयमाश्रित्य यथावत्कर्मकारकः। अवेदनिंदको धीमानधिकारी व्रतादिषु॥ निश्चयोऽनुष्ठेयस्स
। निजवर्णाश्रमाचारे सनेन चतुर्णामपि वर्णानां व्रतादिष्वधिकारः॥ संकोचे मानाभावात्॥ व्रतोपवासनियमैः शरीरोत्तापनं तपः इति देवले नव्रताद्वेस्तयो
हेतुत्वेनाभिधानात्तपसश्च श्राद्धकर्मतपश्चैव सत्यमक्रोध एव च॥ स्वेषु दारेषु संतोषः शौचं नित्यानसूयता॥ आत्मज्ञानं तितिक्षा च धर्मः साधारणो न
पेति महाभारते साधारणाधर्मत्व श्रवणात्॥ शूद्रो वर्णोऽश्च तुर्थोपि वर्णत्वाद्धर्ममर्हति॥ वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विना इति व्यासोक्तेः। शूद्रः स्त्र

स्त्रीजपहोमौ न माहेशो योगविवर्जित इति विशेषविधानात् ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव द्विजोत्तमाः ॥ अर्चयंति महादेवं यज्ञदानसमाधिभिः ॥ व्रतोपवास
नियमैर्होमस्वाध्यायतर्पणैः ॥ तेषां वै रुद्रसायुज्यसामीप्यं चातिदुर्लभं ॥ सलोकता समारूप्यं जायते तत्प्रसादत इति कूर्मपुराणाच्च ॥ वैश्याः शूद्राश्च
ये मोहादुपवासं प्रकुर्वते त्रिरात्रं पंचरात्रं वा तेषां पुष्टिर्न विद्यत इति भारते विशेषनिषेधाच्च ॥ क्वचिन्म्लेच्छादीनामप्यधिकारः ॥ वैश्यैः शूद्रैः भक्तियुक्तैर्म्ले
च्छैरन्यैश्च मानवैरिति नवरात्रप्रकरणे देवीपुराणे विधानात् ॥ स्वर्गकामादिवाक्याधिकारिविशेषणस्य लिंगस्याविवक्षितत्वात् स्त्रीणामप्यधिकारः ॥ अत
एव नरो वा यदि वा नारी त्यादितत्तत्वाभिधानं ॥ यत्तु अन्यत्र यत्तु ये विप्रास्तेषां श्रेयो विधीयते ॥ व्रतोपवासनियमैर्नानादानैस्तथा नृपेति भविष्यपुराण
वचनं ॥ तदन्येषां नानिष्टाघनाधिकारार्थं व्रतादिभिरेव तेषां श्रेय इति प्रतिपादनार्थं ॥ न तु सामान्याधिकारबाधनार्थं ॥ दानेप्यनधिकारापत्तेः ॥ निर्णयसिं
धौ तु अज्ञाननयिग्रहणामुपवासविषयं ॥ अत एव देवलः ॥ आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः ॥ अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नतामिति ॥
एकादश्यादौ तु विशेषवचनेन तेषामप्युपवासेधिकारो वक्ष्यते ॥ सभर्तृकस्त्रीणां तु भर्तुः पृथग्व्रते भर्त्रननुज्ञाताया नाधिकारः ॥ नास्ति स्त्रीणां पृथ राम॰
क्रयतो न व्रतं नाप्युपोषणमिति मनुवचनात् ॥ भर्तुः समानव्रतचारित्वमिति विज्ञानवचनाच्च ॥ पत्यनुज्ञाताया स्तु पृथगप्यधिकारः ॥ यथाह व्यासः ॥ ४३

43A पत्नीपत्युरनुज्ञानाद्व्रतादिष्वधिकारिणीति शंखलिखितावपि। कामं भर्त्रनुज्ञाताया व्रतोपवासनियमेज्यादीनामभ्यासः स्त्रीधर्म इति ॥ अभ्यासः पु-
नः पुनरनुष्ठानं ॥ तथा आदित्यपुराणे। पत्युरप्यधिकं नार्यो नोपवासव्रतं चरेत्। अनापृच्छ्य द्विजश्रेष्ठ पत्युस्तस्यास्तदुच्यते ॥ देवताराधनं कुर्यात्काम-
वान्नात्मरोगात्मम ॥ नारी पतिव्रता नाम प्राप्यानुज्ञां तु भर्तृतः। नारी खल्वननुज्ञाता भर्त्रा वा पितृतेन वा। विफलं तद्भवेत्तस्या यत्करोत्यौर्ध्वदेहिकमि-
ति। और्ध्वदेहिकं लोकांतरोपयोगिव्रतादिकं ॥ कात्यायनोपि। मार्या भर्तृमते नैव व्रतादीनाचरेदिति ॥ यत्तु स्कांदे। नास्ति स्त्रीणां पृथग्यज्ञो न
व्रतं नाप्युपोषणं। भर्तृशुश्रूषयैवैताः लोकान्निष्टान्व्रजंति हि। धर्मार्थकामसंसिद्ध्यै नारी भर्तुः सहायिनी। यद्देवेभ्यो यच्च पित्रादिकेभ्यः कुर्या-
द्भर्त्राभ्यर्चनं सत्क्रियां च। तस्याप्यर्धं सा फलं नान्यचित्ता नारी भुंक्ते भर्तृशुश्रूषयैवेति। तद्भर्त्रननुज्ञाविषयं। एवं च पत्यौ जीवति या नारी उपोष्य व्रतमा-
चरेत्। आयुः सा हरते भर्तुर्नरकं चैव गच्छतीति विष्णूक्तं सामान्यतः उपवासनिषेधोप्यननुज्ञातायाः पर्वस्त विषयः ॥ व्रतभेदाः वाराहपुरा-
णे। अहिंसा सत्यमस्तेयं ब्रह्मचर्यमकल्मषं। एतानि मानसान्याहुर्व्रतानि व्रतधारिणि ॥ एकभक्तं तथा नक्तं उपवासादिकं च यत्। तत्सर्वं कायिकं पुं-
सां व्रतं भवेति नान्यथा। कविभिर्विविधमप्युक्तं ॥ कायिकं वाचिकं चैव मानसं त्रिविधं स्मृतं। यज्ञो दानं तपश्चैव वदतस्तच्छृणुष्व मे ॥ अहिंसाब्रह्मचर्येण व्रत

पः कायिकस्तु स्मृतो। वाचिकं सत्यवचनं भूतद्रोहविसर्जनं।। मानसं मनसः शांतिः सर्ववैराग्यलक्षणामिति।। अथाधिकारिधर्मोः भविष्यपुराणे।। क्षमा
सत्यं दयादानं शौचमिंद्रियनिग्रहः। देवपूजाग्निहवनं संतोषस्तेयवर्जनं।। सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्थितः।। शौचं पाखंडआदिसंसर्गवर्जनं स्ना
नाचमनादि च।। इंद्रियनिग्रहः अवलोकनादिवर्जनं।। देवलः।। ब्रह्मचर्यमहिंसा च सत्यमामिषवर्जनं।। व्रतेष्वेतानि चत्वारि चरितव्यानि नित्य
शः।। ब्रह्मचर्यं।। स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं।। संकल्पोध्यवसायश्च क्रियानिष्पत्तिरेव च।। एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः इति
दक्षोक्ताष्टविधमैथुनत्यागः। देवलः।। स्त्रीणां तु प्रेक्षणात्स्पर्शात्ताभिः संकथनादपि।। विपद्यते ब्रह्मचर्यं न दारेष्वृतुसंगमादिति। स्वदारेष्विति पूर्वो
निर्णयामृते। ऋतुशब्देनात्र षोडशनिशा यात्रवर्त्तीनः स्रावकाशंका लोविवक्षित इति व्रतकथ्याख्यातं। परस्त्रीणामपि मात्राद्दिहेतु स्वदर्शनेन
दोषः निषेधस्तु सरागप्रेक्षणादिविषयः। षोडशाहिव सात्मकः ऋतुकालः तत्र सर्वथा असंभवे व्रतदिने ऋतुर्देयः तत्र सरागप्रेक्षणेपि न दोषः
निर्णयामृते कात्यायनः। रेतस्सेकात्मकं भोगमृतेन्यत्र क्षयः स्मृत इति च तः स्वदाराणां स्पर्शनादिभिरपि ब्रह्मचर्यभंगो नास्तीति तत्सिद्धांतः।। आ रामः
मिषं मांसं तथा आमिषं इति पानीयं गोवर्ज्यं क्षीरमामिषं।। महत्स्यामिषं सस्येफलेजं वीरमामिषं। आमिषं भुक्तिका चर्मामारनालं तथामिषमिति।।प ४४

44A प्यीचंद्रोदये स्मृत्य सुतासो॥ नितस्नायी विताहारो गुरुदेवद्विजार्चकः। क्षारं क्षौद्रं च लवणं मधु मांसानि वर्जयेत्॥ क्षारास्तु तत्रैव बोध्याः॥ इति लघुज्ञाद्वते शिंबंस
स्रेणोद्भम कोद्रवौ। धान्यकं देवधान्यं च शमीधान्यं तथैव च। स्विन्नधान्यं तथा पण्यं मूलं क्षारगणाः स्मृताः। गोधूमानां तु तत्रैव प्रतिप्रसवः। मदनरत्ने स्मृतिपुरा
णे। व्रीहिषष्टिकमुद्गाश्च कलायाः सतिलं पयः। श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः। कूष्मांडालाबु वार्ताकं पालंकीं ज्योत्स्निकां त्यजेत्। चरुभै
क्षं सक्तु कणाः शाकं दधि घृतं पयः। श्यामाकाः शालिनीवारा यावकं मूलतंडुलं। हविष्यव्रतनक्तादावग्निकार्यादिके हितं। मधु मांसं विहायान्यद्व्रतेष्वा
हितमीरितामिति। शमाधान्यं माषादि। पालंकी मध्यदेशे पोईइति प्रसिद्धा। ज्योत्स्निका कोशातकी। मिताक्षरायां गौतमः। चर्मैक्ष्यसक्तुकणया
वकशाकपयोदधिघृतमूलफलोदकानि हवींष्युत्तरोत्तरं प्रशस्तानि पयो दधि घृतं वा मितिः। मदनरत्ने छंदोगपरिशिष्टे। हविष्येषु यवा मुख्यास्तदनु व्री
हयः स्मृताः। माषकोद्रवगौरादीन् सर्वाभावेपि वर्जयेत्। भविष्योत्तरे हैमंतिकं सितास्विन्नं धान्यं मुद्गायवास्तिलाः। कलायकंगुनीवारा वास्तुकं हिलमोचिका। षष्टि
का कालशाकं च मूलकं केमुकेतरत्। कंदः सैंधवसामुद्रे गव्ये च दधिसर्पिषी। पयोनुद्धृतसारं च पनसाम्रहरीतकी। पिप्पलीजीरकं चैव नागरंगं च तिंतिणी। कद
लीलवलीधात्री फलान्यगुडमैक्षवं। अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते इति। अगस्त्यसंहितायां हैमंतासुद्गका॥ नारिकेलफलं चैव कदलीलवलीत

जपसिंहक॰
४५
45

था॥आम्रमामलकं चैव पनसं च हरीतकी। व्रतांतरप्रशस्तं च हविष्यं मन्वते बुधाः॥ सितं च जातिनं चेति विग्रहः। कलायो द्विविधः। अस्त्रोवर्तुलश्च। त्रिपुटांकवाटाणो
ति महाराष्ट्रभाषायां प्रसिद्धः। लवलीराजामलकीति केचित। लवलीस्थाने दाडिमीति क्वचित्पाठः। अतैलपक्वमित्युक्तहविष्याणां विशेषणं॥ सर्वभूतभयं व्या
धिः प्रमादो गुरुशासनं॥ अव्रतघ्नानि पठ्यंते सकृदेतानि शास्त्रतः॥ सर्वभूतभयं व्याघ्रादिसत्वेभ्यो जातेभ्यो भयं। व्याधिः प्रतिबंधकः मः प्रमादो विस्मरणं
गुरुशासनं गुरोराज्ञा तासकृद्भावानिघ्नानि देवापि निमितेषु घनः पुनस्त्यागे दोष एव। ब्रह्मपुराणे व्रतस्थः प्राणरक्षार्थं कदाचिदुदकं पिबेत॥ फलमूलेपवा
ः क्षीरं यत्नाच्छिष्टं तथाहविः। व्रतमध्ये तु रोगार्तो वैद्यप्रोक्तमथौषधं। करोति तु रोगी किं व्रतस्थस्तल्लक्षणादपि। ब्राह्मणानामनिल षितं साध्वये दक्षिणायन्
एतान्यष्टौ व्रतस्थानां नव्रतघ्नानि कुत्रचित्। पद्मपुराणेपि॥ अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः॥ हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधं
पयःपानादीनामव्रतघ्नत्वं स्त्रीबालाद्यत्यंतपीडितविषयं। भविष्यपुराणे। हविष्यभोजनस्नानमितादि। अन्येपि धर्मा हरिवंशे प्रदर्शिताः
अशक्लादिद्वंशयनं आसनं च तथाविधं। स्वयं प्रक्षालनं वापि पादयोरनुशाब्दिनां। अन्न शाब्दितं प्रत्योपयोगितया कथितं॥ अश्रुप्रपातो रोषश्च कलहस्य रामः
कातिरस्तथा। उपवासाद्धतात्मापि सद्यो भ्रंशयति व्रियं॥ व्रियमित्युपलक्षणं। सुक्लमेव सदा वासः प्रशस्तं च न संभवे। अंतर्वासोपरं चैव उपवासे व्रते तथा ४५

45A

।वसिष्ठः॥ जपहोमोपवासेषु धौतवस्त्रधरो भवेत्॥ अलंकृतः शुचिर्मौनी श्रद्धावान्विजितेंद्रियः।बौधायनः।काषायवाससः कुर्याज्जपहोमपरिग्रहं॥ सर्वेत्र द्वाक्षसं
विधा ह्येवं पित्र्येन वर्जयेत्।याज्ञवल्क्यः।परिधानाद्बहिः कक्षानिबद्धा ह्यासुरी भवेत्।धर्मे कर्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः।बहिः कक्षा बहिर्निर्ग
तेसर्थः॥ गोपानमुष्ठूयानं च कथंचिदपि नाचरेत्॥ स्वप्नयानं च सततं व्रते तेष्वप्युपसंकरामिति॥ उपसंकर अस्पृश्यस्पर्शः।विष्णुधर्मे। सर्वेष्वेवोपवासेषु पु
मान्वाथसुवासिनी।धारयेद्रक्तवस्त्राणि कुसुमानि सितानि वा।पादुकार्थः स्मृतेः कार्यः सर्वदा व्रतकेसति॥ उपवासेऽपि नावे स्थिरे यस्य प्रकीर्तितः।अंजने रो
चनं चापि गंधान्सुमनसस्तथा।व्रतके चोपवासे च नित्यमेव विवर्जयेत्।रोचनं कुंकुमादिनामुद्वोज्वलीकरणं दंतकाष्ठं शिरः स्नानमुद्वर्त्तनमथापिवा।विवर्जि
तम्लहामवेशौ वा यैस्तु विधीयते।तिलामलफलैर्नित्यं श्रीफलैश्च विधीयते।प्रक्षालनं तु शिरसः सदाम.।मैथिलैर्जलैः।शिरसोभ्यंजनं सोमे नैवम त्रपृशस्य
ज्ञो न पादयोर्न गात्रस्य स्नेहेनेति स्थितिः स्मृतेति अत्र गंधादिवर्जनाभिधानं पुराणकृत व्रतविषयं व्रतांतरे तु सभर्तृकाया न दोषः।दंतधावनपुष्पादिव्रतेप्य
सानदुष्यतीति व्यासवचनात्।अंजनं मंसृतां चूलं सिंदूरं रक्तवाससी।विभूष्यातोपवासापि अवैधव्यकरं परमिति भविष्यपुराणाञ्च।गंधालंकारवस्त्राणि
पुष्पमाल्यानुलेपनं।उपवासेन दुष्यंति दंतधावनमंजनमिति वृद्धशातातपवचनाञ्च।गंधःसोरभं अनुलेपनसा ष्टथगुपादानात्।उपवासेन तथाश्राद्ध

जयसिंहक
४६
46

नरकादेर्दंतधावनं।दंतानां काष्ठसंयोगो दहत्यासप्तमं कुलं।अनेन काष्ठेन दंतधावनं निषिद्धं न तु मृल्लोष्ठपत्रादिनेति हेमाद्रिः।पैठीनसिः।अलाभे वा निषिद्धे
वा काष्ठानां दंतधावने।पूर्णादिनाविशुद्धेन जिह्वोल्लेखः सदैव वेति॥व्यासः।अलाभे दंतकाष्ठानां निषिद्धायां तिथौ तथा।अपां द्वादशगंडूषैर्विदध्याद्दंतधा
वनं॥स्मृत्यर्थसारे तु पर्णादिकेनांगुल्या वा दंतान्धावयेत् प्रदेशिनीवर्जं मध्यमानामिकांगुष्ठैर्दंतदार्ढ्यं भवत्यपि।दंतधावने प्रायश्चित्तमुक्तं विष्णुधर्मो
त्तरे।श्राद्धोपवासदिवसे खादित्वा दंतधावनं।गायत्र्या शतशः पूतमंबु प्राश्य विशुध्यतीति॥कौर्मे।बहिर्ग्रामांत्यजान्सूतिं पतितं च रजस्वलां।न स्पृशेन्ना
भिभाषेत नेक्षेत व्रतवासरे॥उपवासस्वरूपं विष्णुधर्मोत्तरे।उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह।उपवासः स विज्ञेयः सर्वभोगविवर्जितः।निषि
द्धानि स्मृत्यंतरादाह।विहितस्याननुष्ठानमिंद्रियाणामनिग्रहः।निषिद्धसेवनं नैष्ठ्यं वर्जनीयं प्रयत्नतः।हारीतः।पतितपाखंडिनास्तिकादिसंभाषणमनृतमश्ली
लादिकमुपवासदिने वर्जयेदिति।विष्णुपुराणेपि।तस्मात्पाखंडिभिः पापैरालापस्पर्शनं त्यजेत्।विशेषतः क्रियाकाले यज्ञादौ चापि दीक्षित इति।पाखंडजा
दिस्पर्शनविषये प्रायश्चित्तमपि विष्णुपुराणे एवोक्तं।यथा।स्पर्शेनैव नरः स्नातास्तु विरादित्यदर्शनात्।संभाष्य तानूस्तुविषदं चिंतयेदच्युतं बुधः।तेषामाम
मालोकनात्सूर्यं पश्येत मतिमान्नरः इति।स्तुविषदंस्तु द्विसहं।विष्णुधर्मोत्तरे।असंभाष्यं समाभाष्य तुलसीतस्तिकादलं।आमलक्याः फलं वापि पा ४६

46A

णोऽप्यश्नन्नश्नातीति। गुणैः सहवास सूक्तं। तथा पुराणे विष्णुधर्मोत्तरेऽप्युक्ताः॥ यथा। तज्जप्यं जपनं ध्यानं तत्कथाश्रवणादिकं। तदर्चनं च तन्नामकीर्तनश्रवणा
दयः। उपवासकृतां ह्येते गुणाः प्रोक्ता महर्षिभिरिति। तच्छब्देनात्र प्रोक्तत्वाद्विष्णुरेवोच्यते। उपवासकृतां नियमा उच्यंते। उपवासव्रती दंतधावनं हिंसामनृतं द्यू
तं चैव यमसकृज्जलपानं मधुमांसं तांबूलभक्षणं स्त्रीसंयोगं दिवास्वापं मांसं च वर्जयेत्। विष्णुधर्मोत्तरे। असकृज्जलपानं च दिवास्वापं च मैथुनं॥ तांबूलचर्व
णं मांसं च वर्जयेद्व्रतवासरे इति। यत्तु कैश्चिदुक्तं मांसनिषेधः पारणाहिने। पारणांतं व्रतं ज्ञेयमित्युक्तेः। न तु प्रधानदिने प्रसक्त्यभावात् इति तन्न तांबूल
मांसभक्षणनिषेधस्यैकवाक्योपनीतत्वात्तद्व्रतदिन एवान्वयौचित्यात्। रागप्रसक्तेः सत्त्वात्। वर्जयेत्पारणे मांसमिति पारणादिने पृथक्निषेधस्य वैयर्थ्यापत्
तेश्च। तांबूलभक्षणे स्त्रीसंभोगे मांसभक्षणे व्रतलोपो भवेत्कुर्यात्स्मार्तवद्द्विजवर्जनमिति निर्णयामृते धृतव्रतलोपप्रायश्चित्तप्रकरणे पठितं येऽष्टि न स्त्रिवा
को तांबूलभक्षणादावेकप्रायश्चित्तामन्नानाद्या। अष्टौ तान्यव्रतघ्नानि अत्ययेऽम्बुपानेन नोपवासः प्रणश्यतीति। अत्यये प्राणात्यये। हेमाद्रौ। प्रवृत्तमन्यथा कुर्या
द्यदि मोहात्कथंचन। यतस्तदन्यथाभूतं तत एव समापयेत्। प्रवृत्तमारब्धं अन्यथाभूतं क्रमाघन्यलेन यद्वैपरीत्यमापन्नं समाश्लेषयद्विजानीयान्समापयेत
दयथोक्तं। तावदेव पुनः कुर्यान्नावृत्तिः सर्वकर्मणाः। एतच्च कर्मसप्रावल्याकरणोत्थानविषयं। प्रधानस्य क्रियायाम् असांगं तत्क्रियते पुनः। तदंतस्या

जयसिंहकं
४७
47

क्रियायां त्वनावृत्तिर्नैव तत्क्रियायत्र प्रधानस्य कर्मणोऽकरणं तत्र सांगमेव पुनः कर्त्तव्यं ।तदंगाकरणे तु न सांगप्रधानावृत्तिर्नापि तावन्मात्रस्यांगस्य करणं ।
किं तु प्रायश्चित्तमेव कार्यं ।।वायुपुराणे ।।क्रियां यः कुरुते मोहादनाचम्येह नास्तिकः ।।भवंति तु वृथा तस्य क्रियाः सर्वा न संशयः ।आचमननिमित्तान्याह
यमः ।उत्तीर्योदकमाचामेदवतीर्य तथैव चेति ।बृहस्पतिः ।अधो वायुसमुत्सर्गे आक्रंदे क्रोधसंभवे ।मार्जारमूषकस्पर्शे प्रहासेऽनृतभाषणे निमित्तेष्वे
षु सर्वेषु कर्म कुर्वन्नपः स्पृशेदिति ।। ।।अथ द्विराचमननिमित्तानि याज्ञवल्क्यः ।स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ।आचांतः पुनराचामेद्वासो
विपरिधाय चेति ।आचमनासंभवे त्वाह कूर्मीतालंभनं वापि दक्षिणं श्रवणं स्पृशेदिति मार्कंडेयोक्तं दक्षिणकर्णालंभनं बोध्यं ।अथ हस्ततीर्थानि हेमाद्रौ हारी
तः ।।अंगुष्ठस्योत्तरतो रेखा ब्राह्मं तीर्थं कनिष्ठिकायाः पश्चात्प्राजापत्यं मध्येऽंगुलीनां दैवमंगुष्ठप्रदेशिन्योरंतरा पित्र्यं मध्ये आग्नेयं ।प्रतिग्रहमाग्नेयेन प्र
तिगृह्णीयात् ।। ।।शामलेयः ।।हस्तमध्ये वह्नितीर्थं दक्षिणाग्रे हसोन्मतं तत् ।।ब्रह्मपुराणे ।।मूले रेखा प्रसूतांगुष्ठमणिबंधे शुभ मध्यमं ।प्राजापत्यं महातीर्थं
विप्रैः सेवितमेव तत्सदा ।धनायुर्दा रेखा तु सोमतीर्थं तु मध्यमं ।।लाजादिहवनं तेन कर्तव्यं वपनं तथा ।वपनं श्रीह्यादिनिर्वापः ।।दधिप्राशनं सोमतीर्थेन क रामः
र्त्तव्यं ।।वसिष्ठः ।स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि ।।पवित्राणां तथा जप्ये दाने च विधिनोदिते ।।शातातपः ।।दानमाचमनं होमं भोजनं देवतार्च ४७

47A नं॥ प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणं॥ आसनारूढपादस्तु जान्वोर्वा जंघयोस्तथा। कृतावसक्थिको यश्च प्रौढपादः स उच्यते। आपस्तं
बः। तस्मादो मिस्रुदाहृत्य पत्तहान तपः क्रिया। प्रवर्त्तंते विधानोक्ताः सततं ब्रह्मवादिनां। त्रिमात्रस्तु प्रयोक्तव्यः कर्मारंभेषु सर्वतः। तिस्रः सार्द्धास्तु कर्तव्या
मात्रा स्वतालु चिंतकैः। यमः। पुराणाहवा वनं दैवेज्यास्वगास्व विधीयते। एतदेव निरोंकारं कुर्यात् क्षत्रियवैश्ययोः। मार्कंडेयपुराणे॥ सूर्योदयं विना नैव स्ना
नदानादिक क्रियाः। अग्नेर्विहरणं चैव तत्कालभावश्च लक्ष्यते। सूर्योदयशब्देन उषःकालो लक्ष्यते। तेन नरा त्रौ कुर्यादिति तात्पर्यं। दक्षः। दैवकार्याणि पूर्वाह्णे
मनुष्याणां तु मध्यमे। पितॄणामपराह्णे च कार्याणीति विनिश्चयः। अंगिराः। संध्ययोरुभयोर्जप्ये भोजने दंतधावने। पितृकार्ये च दैवे च तथा मूत्रपुरी
षयोः॥ गुरूणां सन्निधौ दाने योगे चैव विशेषतः। एषु मौनं समातिष्ठन् स्वर्गं प्राप्नोति मानवः। व्रतांगलोपप्रायश्चित्तानि तु एकादशीप्रकरणे वक्ष्यंते। गृ
हीतव्रतत्यागे दोष उक्तो मदनरत्ने छागलेयेन। एवं व्रतं गृहीत्वा यो नाचरेत्काममोहितः। जीवन्भवति चांडालो मृतः श्वा चाभिजायत इति। तत्यागे प्रा
यश्चित्तमप्युक्तं पृथ्वीचंद्रोदये गारुडे। क्रोधात्प्रमादाल्लोभाद्वा व्रतभंगो भवेद्यदि। दिनत्रयं न भुंजीत मुंडनं शिरसोऽथवेति। प्रायश्चित्तानंतरं तु प्रकां
तानुष्ठानं कार्यं। प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेदिति वायुपुराणोक्तेः। अन्योपविशेषस्तत्रैव दानप्रतिग्रहो होमो भोजनं बलिरेव वा सांगुष्ठेन

सहाकार्यमसहरेभ्यो न्यूनामवेत् । एतानेकत्र कार्याणि दानादीनि विशेषतः । अंतर्जोनुविधेयानि तद्दानमनंतकं । याज्ञवल्क्यः । शैवेष्वपि च सौरान्मंत्रान्तथा
वैष्णवानभिचारिकान् । आहृत्यालभ्य वा तानि नंउपस्पृश्याम्य दाचरेत् । स्त्रीव्रते विशेषो हरिवंशे । स्त्रीणां ताह्री मातन्हस्याप यतिं विज्ञापयेत्सती । तथा । गृहीत्वौडुंब
रं पात्रं संकुशं साक्षतं तथा । गोमयं गंधहारिसिंचयगत्वी यावत्तज्जलं । औडुंबरं ताम्रमयं । ततो भर्तुः सती दद्यात्स्नातस्य पयतस्य वा । आत्मनश्चापि
षेक्तव्यं भर्तुः शिरसितज्जलं । त्रैलोक्यस्य सर्वतीर्थैस्नानमेतदुदाहृतं । उपवासेषु कर्तव्यमेतद्द्विव्रतकेषु वेति । सर्वव्रतेषु संकल्पविधिश्चमात्स्ये । गृ
हीत्वौडुंबरं पात्रं वारिपूर्णमुदङ्मुखः । उपवासं तु गृह्णीयाद्यद्वा संकल्पयेद्बुधः । देवलः । अभुक्त्वा प्रातराहारं स्नात्वाचम्य समाहितः । सूर्याय देवता
भ्यश्च निवेद्य व्रतमाचरेत् । अत्र प्रातर्व्रतमाचरेदिति संबंधः । प्रधानक्रियान्यसामर्हितत्वादिति वीरमित्रः । व्रतं निशासु वेयाद्यं बहिः स्मारकदर्श
नादिति विस्तृतं प्रकारान्तराय स्वीतनविषयं । अन्यव्रतेष्वपि यत्र पूर्वदिने व्रतग्रहणं श्रूयते । तत्र पूर्वदिने एव व्रतग्रहणं । अथ व्रतारंभकालः । मह
नल्ले गार्ग्यः । अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे । उद्यापनं उपारंभं व्रतानां नैव कारयेत् । रत्नमालायां । सोमसौम्यगुरुशुक्रवासराः सर्वकर्मसु भ
वंति सिद्धिदाः । भानुभौमशनिवासरेषु च प्रोक्तमेव खलु कर्म सिध्यति । तथा । विरुद्धसंज्ञा इह ये च योगास्तेषामनिष्टः खलु पाद आद्यः । सवैधृति ५८

48A स्तुव्यतिपातनाम सर्वौप्यनिष्टः परिघस्य चार्द्धं । तिस्रः स्तु योगे प्रथमे स्त्र वज्रे व्याघातसंज्ञे नव पंच शूले । गंडेतिगंडे च षडेव नाड्यः शुभेषु कार्येषु विव
र्जनीयाः ॥४॥ संग्रहे । कृष्णेग्निदिशि पोट्टूर्ध्वे सप्तमी भुजयोरधः । शुक्ले वेदेशयो रूर्ध्वे भद्रा प्राग्वद्दशर्ग्रायोः । श्रीपतिः । नास्ति द्विमापातिहतं च विष्टां विषा
रिघातादिकमत्र्यातिदुं । व्यवहारसमुच्चये । दशम्यामष्टम्यां प्रथमघटिकापंचकपरं हरिघः सप्तम्यां द्विघटिकांते त्रिघटिकेंतु तीयाया कायांतु व्य
मघटिकाभ्यः परमं वं शुभं विष्टः शुक्लं शिवतिथि चतुर्थ्यां स्तु विरमेतच्चैव ॥ सर्पिणी तत्सिते पक्षे कृष्णे चैव तु वृश्चिकी । सर्पिण्यास्तु मुखं त्याज्यं पृच्छं वृश्चिका
:पुच्छमेव च । माधवीये । वसिष्ठः । दिवाहनिति थेः पूर्वार्धजाता ष्वपरार्धजा निशि तथा शुभदा च पुच्छे ब्रह्मयाम ले । दिनभद्रा यदा रात्रौ रात्रिभद्रा यदा दिवा । न तत्रा
शुभकार्येषु प्राहुरेवं पुरातनाः । चोडगाने देवीपुराणे ॥ व्रतेष्वतीर्थे ग्रहणे श्राद्धे पि च विशेषतः । परान्नभोजनादेव यस्मान्नत्तस्य तत्फलं ॥ प्रतिमा
स्वरूपं मदनरत्ने भविष्ये । अनुक्तद्रव्यसंख्या देवताप्रतिमा न्रूपा सौवर्णी राजती ताम्री वृक्षजा मार्त्तिकी तथा ॥ चित्रजा पिष्टलेख्योत्था निजवितानुसा
रतः । आमाषात पलपर्यंतं कर्त्तव्या शाठ्यवर्जितैः । तत्रैव ब्राह्मे । आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते मंत्रस्य देवता यास्य प्रजापतिरिति स्थितिः । व्र
तोद्यापनानुक्तौ तु पृथ्वीचंद्रोदये नंदिपुराणे ॥ कूर्पो उद्यापनं तस्य समाप्तौ यदुदीरितं । उद्यापनं विना यत्तु तद्व्रतं निःफलं भवेत् । यादेवो द्यापनं नो

जयसिंहक॰ नैःस्वं तानुगुणात स्वरेत्।।विज्ञानुमात्तो दद्यात्तुक्तो व्यापने व्रते।।गाश्चैव कांचनं दद्याद्ब्राह्मणस्य परीक्षितये।।अशक्तौ तु नारदीये।।सर्वेषामप्यलाभेतु यथोक्त

५९ करणं विना।।विप्रवाक्यं स्मृतं शुद्धं व्रतस्य परिपूर्तये।।ऋष्याविप्रवचो यस्तु गृह्णाति मनुजः शुभं।।अदत्वा दक्षिणां पापः स याति नरकं ध्रुवं।।अथ

49 दानविभागनिर्णयः।।हेमाद्रौ अंगिराः।।बहुभ्यो न प्रदेयानि गोगृहं शयनं स्त्रियः।।विभक्त दक्षिणा ह्येता दातारं पातयंति हि।।एका एकस्य दातव्या न बहुभ्य

ः कथंचन।।ता तु विक्रयमापन्ना दहत्यासप्तमं कुलं।।विक्रेतुर्वैतद्दोषप्रदर्शनेन दातुरिति कात्यायनोपि।।कपिला शय्या गृहं चैव देयं पञ्चोस्त्रिया दिकं।।तदे

कस्मै प्रदातव्यं न बहुभ्यः कथंचनेति।।वैजवापः।।शिवनेत्रोद्भवं यस्मात् रूजतं पितृवल्लभं।।अमंगलं तद्यत्नेन देवकार्येषु वर्जयेत्।।कलशलक्षणं तद्दे

वताश्च दर्शिता देवीपुराणे।।पंचाशांगुलवैपुल्यमुत्सेधः षोडशांगुलः।।कलशानां प्रमाणं तु मुखमष्टांगुलं भवेत्।।तथा।।स्वर्णाः ह्रतेननोयेनासिता

स्त्वेकांते तोज्ज्वलाः।।सरित्सरः खातजेन तडागेन जलेन वा वापीकूपोद्भवेनापि समुद्रेणाथवाहृताः।।सर्वेमंगलमांगल्याः सर्वकिल्बिषनाशनाः।।अ

भिषेके सदा योग्याः कलशाः शुद्धगाः शुभाः।।यात्राविवाहादिकाले प्रतिष्ठायज्ञकर्मणि।।योजनीया विशेषेण सर्वकामप्रसादकाः।।तथा।।कलश

स्य मुखे ब्रह्मा ग्रीवायां च महेश्वरः।।मूले च संस्थितो विष्णुर्मध्ये मातृगणाः स्मृताः।।शेषास्तु देवताः सर्वा वेष्टयंति चतुर्दिशं।।इति व्याख्यानितो ५९

49A यो निष्कलशे निवसंतिहि। ग्रहाःशांतिश्च पुष्टिश्च पुष्टिश्चतुष्टिश्च मतिरेव च। ऋग्वेदश्च यजुर्वेदः सामवेदस्तथैव च॥ अथर्ववेदसहिताः सर्वे कल
शमं स्थिता इति। अथ पंचपल्लवाः॥ ब्रह्मांडपुराणे॥ अश्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्लवाः॥ अथ पंचरत्नानि कालिकापुराणे। कनकं कु
लिशं नीलं पद्मरागं च मौक्तिकं। एतानि पंचरत्नानि शास्त्रे दृष्टानि सूरिभिः। कुलिशं हीरः। आदित्यपुराणे। सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकं
॥ रत्नपंचकमाख्यातमिति॥ अभावे सर्वरत्नानां हेम सर्वत्र योजयेत्॥ तथा। कनकं मौक्तिकं चैव माणिक्यं वज्रमेव च। तथा मरकतं चैव महारत्ना
नि पंचधा॥ अथ नवरत्नानि विष्णुधर्मोत्तरे। मुक्ताफलं हिरण्यं च वैदूर्यं पद्मरागकं। पुष्परागं च गोमेदं नीलं गारुत्मतं तथा। प्रवालयुक्तान्युक्ता
नि महारत्नानि वै नव॥ महत्स्वेते हिरण्यस्थाने हीरकमिति पाठांतरम्॥ अथ सौभाग्याष्टकं मत्स्यपुराणे॥ इक्षवस्तरुराजं च निष्पावा राजिधान्य
कं। विकारवच्च गोक्षीरं कुसुंभं कुसुमं तथा॥ लवणं चाष्टमं तत्र सौभाग्याष्टकमुच्यते॥ मिताक्षरायां पाराशरः। गोमूत्रं गोमयं क्षीरं दधि
सर्पिः कुशोदकं। पंचगव्यमिति प्रोक्तं पवित्रं कायशोधनं। गोमूत्रं ताम्रवर्णायाः श्वेतायाश्चैव गोमयं॥ पयः कांचनवर्णायाः नीलायाश्च तथा
वेद्दधि। घृतं वै कृष्णवर्णायाः सर्वं कापिलमेव वा॥ अलाभे सर्ववर्णानां पंचगव्येष्वयं विधिः। गोमूत्रं माषकास्त्वष्टौ गोमयस्य तु षोडश। क्षीरस्य

जयसिंहक द्वादशप्रोक्तादश्वस्तुदशकीर्तिताः।गोमूत्रंवहृतस्मात्प्रोक्तंदर्ड तकुशोदकमिति।नृसिंहपुराणोक्त।गोशकृद्विगुणंमूत्रंसर्पिर्घा ईंच तद्गुणं।क्षी
५० रस्यद्विगुणंप्रोक्तंपंचगव्येतथादधि।वीरमित्रोदयेस्कांदेपितामहप्रोक्तेतत्कुस्मनीलानामाहरेत्स्नाम् गोमूत्रगोमयक्षीरदधिसर्पींषिचक्रमात्।
50 त्रिसुवर्न्हीडवाप्यकेदेवस्तानियथाक्रमंविध्येतानिकुशोदंवापितत्रज्ञाविदैवतं॥प्रोक्ताभावेनयैतानिकपिलायाःप्रकल्पयेत्॥गोमूत्रमात्र
त्तस्यार्धंप्राकृतक्षीरस्यत्र्यं·हृयंदध्नोघृतस्यैकमेकश्चकुशवारिणाः·गायत्र्यावैवगोमूत्रंगंधद्वारेतिगोमयं·आप्यायस्वेतिचक्षीरंदधिक्रावणो
तिवैदधि·तेजोसिशुक्रमित्याज्यंदेवस्यत्कुशोदकं·स्मृतिरत्नपंचभिर्युक्तैः पंचगव्यंप्रचक्षते·एतद्देवमहापुराणंपंचब्रह्मकूर्चमितिस्मृतमञ्जयस
प्तधान्यानि।यवगोधूमधान्यानितिलाःकंगुःतथैवच।श्यामाकंदेवधान्यंचसप्तधान्यमुदाहृतं।भविष्यपुराणे।सुवर्णंरजतंताम्रंमारकूटंतथै
व च॥लोहंत्रपुतथासीसंधातवःसप्तकीर्तिताः।तथा।सर्वधातुगणोमत्स्यपुराणे॥ताम्रकंवाशिलावज्रमंजनंश्याममेवच।काशीकासी
समाक्षीकंगैरिकंचादेतःक्रमात्तालकंहरितालं।शिलामनःशिला।वैक्रान्तवज्राभ्रकंअपस्तसंकमोणंगंधुरुकंज्वलसन्निभं।यत्रशब्दाय गाम:
तेवैक्रान्तंनवाच्छन्नंभवेदपि।सदाकरस्यमुद्गरेवज्ञत्पाष्यतेघनमितिवैघकात्।श्याममंजनं।काशीसौराष्ट्रमृत्तिका।कांस्यमाक्षिकंत्वपणे ५०

50A माक्षिकं। मत्स्यपुराणे।। राजाश्वस्थाद्वल्मीकसंगमाद्ध्रदगोकुलात्। राजद्वारप्रवेशाच्च मृदमानीय निःक्षिपेत्। चत्वरे इति पाठः। छंदोगपरिशिष्टे
।कुष्ठं मांसी हरिद्रे द्वे मुराशैलेयचंदनं। वचा चंपकमुस्ता च सर्वौषध्यो दश स्मृताः। सर्वबीजानि देवीपुराणे। यवगोधूममुद्गाश्च शालिः षाष्टिकमा
दकं।। तिलमाषाः प्रसातीनीवश्यामाकाश्च वाल्लकाः। आढकं आढकीफलं। दाक्षिणात्यभाषायां तुरीति प्रसिद्धं।। प्रसातीनीवारः। आशवं आशुधा
न्यफलं। वालकः कंगुः। कात्यायनः। आर्द्रं क्षीरं मधुतथा मधुरत्रयमुच्यते। गरुडपुराणे। कर्पूरमगुरुश्चैव कस्तूरी चंदनं तथा। कंकोलं च भवेदे
भिः पंचभिर्यक्षकर्दमः। गृह्यपरिशिष्टे। कर्पूरचंदनं दर्पः कुंकुमं च चतुःसमं। सर्वगंधमिति प्रोक्तं समस्तसुरवल्लभं। भविष्यपुराणे। अगरुः शिल्हकं
मुस्ता चंदनं च यथा तथा। समभागं च कर्त्तव्यं धूपोयममृताव्हयः। तथा। कर्पूरं चंदनं मांसी त्वक्पत्रैलाज्जलमित्रिभं। यत्र शब्दायते वन्हौ नैवे
द्यं नं भवेदपि। सदा करमसृद्धं तं वज्जेति प्रथितं घनमिति वैद्यकात्। शाममंजनं। काक्षी सौराष्ट्रमृत्तिका। कांस्यमाक्षिकं स्वर्णमाक्षिकं। मत्स्य
पुराणे।। राजाश्वस्थावल्मीकसंगमाद्ध्रदगोकुलात्।। राजद्वारप्रवेशाच्च मृदमानीय निःक्षिपेत्। चत्वरे इति पाठः। छंदोगपरिशिष्टे। कुष्ठं मांसी ह
लोलवंगकं। अगुरुः शिल्हकं धूपं प्राजापत्यं प्रचक्षते। सिल्हकं शिलारस इति निघंटुः। षड्भागकुष्ठं द्विगुणो गुडश्च लाक्षात्रयं पंचनखस्य भागाः। ह

जयसिंहक

५१

51

रीतकामजीसः समांसी भागे कमेकंचित्लवं शिलाजं ॥ घनसम्वत्सरि उरस्यवै कोऽपूपो दशांगः कथितो मुनीन्द्रैः । अथ व्रते सूतकादिनिर्णयः । तत्राशौ
च मृताशौचयोः सर्वस्मार्त्तकर्मनिवृत्तिः सूतके च समुत्पन्ने अकर्मणि मैथुने । क्षुद्रोद्गारे तथा वांतौ नित्यकर्माणि संत्यजेत् । इन्द्रेषु केवजीर्णोग्निनै
व भुक्तापि किंचन । कर्म कुर्यान्नरो नित्यं सूतके मृतके तथेति कालिकापुराणात् ॥ गौडास्तु । कृताशौचो वा दाव पिता मातुः पठंति च ज्ञात्वं र्घ्वक्षतजे
जाते निसकर्मन्वाचरेत्तेमिति । कंच नदधः स्वयं ज्ञोन वाचरेदिति । हेमाद्रौ पाद्मे । गर्भिणी सूतिका दिश्च कुमारी वा प्यरोगिणी । यदाशुद्धा त
दान्येन कारयेत्प्रयता स्वयमिति । उभौ व्येष विष्णुः लिंगस्या विवक्षितत्वात् । तेन यमिन्नते यत्र जाद्युक्तं तदन्येन कारयेत् । शारीरानियमान्स्वयं
कुर्यादिति । शुद्धितत्वे विष्णुः । वृद्धकालिकसंकल्पाग्रहीतव्रतपुराणादि । सूतके मृतके चैव व्रतं तन्नैव दुष्यति । एतत्काम्यपरं नित्यं तत्वनारब्धमपि का
र्यमिति गौडाः ॥ मदनरत्ने । पूर्वसंकल्पितं यच्च व्रतं सुनियतव्रतैः । तत्कर्त्तव्यं नरैः श्राद्धदानार्चनविवर्जितं । माधवीये कौर्मे । काम्योपवासे प्र
क्रांते त्वंतरा मृतसूतके ॥ तत्र काम्यव्रतं कुर्यात् दानार्चनविवर्जितमिति । सत्यव्रतः । प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् । न तत्रा रामः
पि व्रतस्य स्यादुपरोधः कदाचनेति । तन्न्याति निखिनाकारयेदिति एतत्सर्वं ॥ तदुक्तं मदनरत्ने मात्स्ये । अंतरा तु रजोयोगे पूजामन्येन कारये ५१

51A दिति॥ प्रतिनिधुर्यस्त्वनिर्णयामृते पैठीनसिनोक्तः। भार्या पत्युर्व्रतं कुर्याद्भार्यायाश्च पतिर्व्रतं। असामर्थ्ये परस्ताभ्यां व्रतभंगो न जायते। कालनलविवे
वने ब्रह्मवैवर्ते। उपवासासमर्थश्चेदेकं विप्रं तु भोजयेत्। तावद्धनानि वा दद्याद्यद्भक्ताद्द्विगुणं भवेत्॥ सहस्रसंमितां देवीं जपेद्वा प्राणसंयमान्॥ कु
र्याद्द्वादशसंख्याकान्यथाशक्ति व्रते नर इति॥ राज्यस्थः क्षत्रियार्थे च एकादश्यामुपोषितः। पुरोधाः क्षत्रियस्यार्द्धं फलं प्राप्नोति निश्चितं। पिताम
हादीनुद्दिश्य एकादश्यामुपोषिते॥ सुते तु तत्फलं विप्राः समग्रं समवाप्नुयुः॥ कृतोदशगुणां तु एणं प्राप्नोत्यत्र न संशयः। यमुद्दिश्य कृतं सोपि सं
पूर्णफलमाप्नुयात्॥ स्कांदेपि। पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा। एषामभावे एवान्यं ब्राह्मणं वा नियोजयेत्। तथा- भ्रातरं भगिनीं शि
ष्यं कारयेद्ब्राह्मणान्हिमिरिति- हेमाद्रौ वाराहपुराणे। असामर्थ्ये शरीरस्य व्रते तु समुपस्थिते। कारयेद्धर्मपत्नीं वा पुत्रं वा विनयान्वितं। भ
गिनीं भ्रातरं वापि व्रतमस्य न लुप्यते। माधवीये स्मृत्यंतरेपि। पितृमातृपितृभ्रातृश्वश्रूगुर्वादिभर्तृजां। अहस्यार्थमुपोषित्वा स्वयं च फल
माप्नुयात्॥ नारी च पतिमुद्दिश्य एकादश्यामुपोषिता। पुराणं तु शतं प्राहुर्मुनयः पारदर्शिनः। हेमाद्रौ कात्यायनः। पितृमातृभ्रातृ
पतिगुर्वर्थेषु विशेषतः। उपवासं प्रकुर्वाणः पुण्यं शतगुणं लभेत्। दक्षिणा नात्र दातव्या शुश्रूषा विहिता हि सा॥ मदनरत्ने पमासखंडे॥

जयसिंहक·
५२
52

भर्त्ता पुत्रः पुरोधा वा भ्राता पत्नी सखापि वा । यात्रायां धर्मकार्येषु कर्त्तव्याः प्रतिहस्तकाः । एभिः कृतं महादेवि स्वयमेव कृतं भवेत् । स्वयं कर्त्तुमशक्तश्चेत्का
रयेत्पुरोधसा । शूद्रस्य ब्राह्मणाः प्रतिनिधियुक्ताः । जपस्तपस्तीर्थसेवा प्रव्रज्या मंत्रसाधनं ॥ विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलमिति मरी
चिवचनात् । यत्तु नित्यानि यास्तिथावुक्तं प्रव्रज्यादीनां शूद्रे संभवान्नेदं वचनं ब्राह्मणस्य शूद्रप्रतिनिधित्वपरं । किंतु सच्छूद्रोतावाचनपरमिति तन्न ।
प्रव्रज्याया असंभवस्य शूद्रे संभवेपि जपादीनां संभवेन तद्विषये संकोचायोगात् । एतद्वचनस्य प्रतिनिधिप्रकरणे पाठेन सच्छूद्रोतावाचनपरत्वायोगाच्च ।
हेमाद्रौ कात्यायनः पुरोधाः सुतो भ्राता पत्नी वा द्वयोः सममितीरितं । उपवासफलं ताभ्यां समग्रं समवाप्यते । वायुपुराणे । उपवासे त्वशक्तस्तु आहिता
ग्निरथापि वा । पुत्रान्वा कारयेदन्यान्ब्राह्मणान्वापि कारयेत् । अथवा विप्रमुख्येभ्यो दानं दद्यात्स्वशक्तितः । उपवासफलं तेन समग्रं समवाप
नोति तत्र भोजनदो योपितस्ताराहेव नश्यति हव्यदातोपवासस्य फलं प्राप्नोत्यसंशयं । कर्त्ता न तदवाप्नोति नात्र कार्या विचारणा । घृणाया
वास्तमुद्दिश्य एकादश्यां तु पोषितः । यस्तूद्दिश्य कृतं विप्रात्स सर्वो कृतं भवेत् । अत्र विशेषमाह त्रिकांडमंडनः । काम्ये प्रतिनिधिर्नास्ति नित्यम·
से नैमित्तिकेपि सा । काम्येप्युपक्रमादूर्ध्वं केचित्प्रतिनिधिं विदुः । न स्यात्प्रतिनिधिर्मंत्रस्वामिदेवाग्निकर्मसु ॥ न देशकालयोर्नापि अरणोरग्निरेव ५२

52A

ता॥ नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्॥ हिरण्यकेशिसूत्रेपि॥ नस्वामित्वस्य मंत्रयोगाः उत्तमस्य देशस्य कालस्याग्नेर्देवतायाः कर्मणः शब्दस्य च प्र
तिनिधिर्विघ्नतइति॥ इति श्रीपौंडरीकयाजिरत्नाकरविरचिते जयसिंहकल्पद्रुमग्रंथे परिभाषाप्रकरणं॥ श्रीमद्दिल्लीशाहेनोद्भटविक्रमभटप्रा
ज्यमत्तेभसिंहश्चंडो न्यायतरुपक्षोन्नमितवसुमतीपालने धर्मराजः॥ पौत्रः श्रीकूर्मसिंहक्षितिपकुलमणेर्विष्णुसिंहस्य पुत्रः श्रीमान्राजाधि
राजो जयहरिरमराधीशवत्कौतुकोल्लासितात्॥१॥ श्रीमत्पंडितदेवशर्मतनयः श्रीराघवांघ्रिद्वयध्यानावाप्तसमस्तकामनिवहः सम्राट्सरत्नाकर
॥ तद्रूपे श्रीजयसिंहवर्मनृपतेः कल्पद्रुमे कामदं प्रत्यग्रं स्तवकं द्वितीयमकरोत्सद्व्रतनिर्णायकं॥२॥ अथ प्रतिपदादिसामान्यनिर्णयः प्र
स्तूयते॥ अत्र निर्णयो नाम विप्रतिपन्नानां वाक्यानां परस्परं विरोधपरिहारः॥ तद्वत्त्वदर्शनमुच्यते॥ तदुक्तं॥ तत्र विप्रतिपन्नानां वाक्यानामि
तरेतरं॥ विरोधपरिहारो यन्निर्णयस्तत्त्वदर्शनमिति॥ तत्रादौ स्मृत्यंतरोक्तप्रतिपद्धीनं॥ हेमाद्रौ॥ प्रतिपद्दिष्टा जायमाने षण्णां शक्तिपात्रांशासित
पक्षादिमासमतेति॥ ध्रुवसंगंस्कंदपक्षाद्यामासस्य स्थायत्तदुत्तवा॥ अक्षुस्तत्रं तु वंपुस्तंपात्रं भवेत्तत्तद्भुंजेति॥ प्रथमं प्रतिपत्कृत्वामावस्यातोऽनिर्णी
यते॥ असाध्यनाम निरुक्ते भविष्योत्तरे॥ तिथीनां प्रवरा यस्मादृश्चिनामसुदाहृता॥ प्रतिपद्याप्रदेशेंपूर्वे प्रतिपत्तेन सोचत इति॥ तत्र कृत्यपति

जयसिंहक०

५३

53

पद्ममावास्या तु तैव कार्या। युग्माग्नीति वचनात्। पैठीनसिनाप्युक्तं। पंचमास्तु नवमी चैव दशमी च त्रयोदशी। प्रतिपन्नवमी चैव कर्तव्या संमुखी तिथिरि
ति। संमुखी सायाह्नव्यापिनीति निर्णयामृते। को ऽर्थः सामाद्विकः उक्तवचनविरोधात्। हेमाद्रिविरोधाच्च संमुखी पूर्वविद्धेति तु युक्तं सापि यदापं
चधा विभक्तस्याह्नश्चतुर्थभागव्यापिनी न दैवात् पूर्वविद्धा ग्राह्या। तस्माद्वे सायाह्नव्यापिनी ग्राह्येति माधवमतं। तदभावे तु सायाह्नव्यापिनी परिगृ
ह्यतामिति तदुक्तेः। अपराह्नोत्तरकाले प्रवृत्तावुत्तरविद्धैव ग्राह्येति मदनरत्ने। प्रतिपत्संमुखी कार्या या भवेदापराह्णिकीति स्कंदपुराणवचनात्। न
न्वेतद्वचनं प्रतिपन्मात्रविषयमस्तु विशेषाश्रवणात्। न च प्रतिपत्सद्वितीया स्यादिति वचनविरोधः। तेषामापराह्णिकान्यप्रतिपद्विषयत्वेनोपपत्ते
ः। शुक्लप्रतिपन्मात्रविषयत्वे तु तस्य वचनांतरेणापूर्वविद्धत्वस्य लाभादापराह्णिकत्वमात्रस्य विधेयत्वे न गौरवं। यत्तु प्रतिपत्सद्वितीया स्याद्द्वि
तीया प्रतिपद्युतेत्युपसंवचनं तत्कृष्णप्रतिपद्विषयं।। अपराह्णोत्तरकालप्रवृत्तशुक्लप्रतिपद्विषयं वा पूर्वोदाहृतवचनविरोधात्। तस्मादापराह्णि
की शुक्लप्रतिपत्पूर्वैव ग्राह्या।। अन्या शुक्लप्रतिपदुत्तरैव ग्राह्येति मदनरत्नादि सिद्धांतः।। छस्मात्तु परा॥ छस्मात् तत्रतो विलोजिदीपिकोक्तेः। छस्मापि पूर्वं:
पूर्वैव नं तन्मदनरत्ने निर्णयसिंधौ॥ उपवासे शुक्लकृष्णप्रतिपत्पूर्वैव ग्राह्या प्रतिपत्संचमी चैव उपोष्या पूर्वसंयुतेति जाबालिवचनात्। प्रतिपत्सं ५३

53A

नमीभूतत्सा विद्धी वदष्टगींमानवमीदशमीषैवनोपोष्याः परसंयुताइतिब्रह्मवैवर्तवचनेन द्वितीयामंवमीवेधाद्दशमीवत्रयोदशी। चतुर्दशी
चोपवासेहन्युः पूर्वोत्तरेतिथी। उपवासेसप्तमीतुवेधाद्वंत्युत्तरंदिनमितिवदद्वसिष्ठवचनेनद्वितीयाविद्धायाअनुपोष्यत्वाभिधानाच्चावेधस्य
। पैठीनसिनासर्वासुतिथिषुसामान्यतोदर्शितः पक्षद्वयेपितिथयस्तिथिंपूर्वांनयोत्तरांत्रिभिर्मुहूर्तैर्विध्यंतिसामान्योयंविधिःस्मृतइति। उ
दयानंतरंस्थितात्रिमुहूर्त्ता पूर्वातिथिरुत्तरांतिथिंविध्यति अस्तमयात्प्राक्स्थितात्रिमुहूर्त्तोत्तरातिथिः पूर्वांतिथिंविध्यतीत्याद्युपूर्वमुक्तमेवानि
षिद्धपूर्वतिथिवेधस्तुउपवासविषयेस्वल्पोपित्याज्यः। तथाचस्मृत्यंतरे। घटिकामात्रवेधोपिदृष्यस्तुजन्मांतिथिं। षड्विंशन्मतेपि। घटिकार्द्धत्रि
भागंवास्वल्पंवाहृष्येत्तिथिः। पंचगव्यघटंशूद्रांसुरायाबिंदुकोयथेति। इदंवाक्यमुपवासमात्रविषयं॥ सर्वप्रकारवेधोयमुपवासस्पृक्षया
इतिनिगमेभिधानात्। अतएवबौधायनेनाप्युपवासतिथेरुदयकालीनत्वनियमउक्तः। उदयेत्पवासस्यनक्तस्यास्तमयेतिथिरिति॥ भवि
ष्योत्तरपुराणे। व्रतोपवासनियमेघटिकैकापर्याभवेत्। यातिथिःसकलाज्ञेयापित्र्येचापराह्णिकीति। पारमस्कांदयोरप्येवं। यदात्तूत्तरदि
नेउपवासतिथिःस्वल्पापिनलभ्यतेतदानिषिद्धपूर्वतिथिविद्धाप्युपोष्या। तथाचकूर्म्यभृगुः। अविद्धानिनिषिद्धैश्चेन्नलभ्यंतेदिनानितु

जयसिंहक
५४
54

।मुहूर्त्तैः पंचभिः विद्धा ग्राह्या वैकादशी तिथिः। तदर्द्धं विद्धा मन्यानि दिनान्युपवसेन्नर इति। अरुणोदयमारभ्य मुहूर्त्तं पंचको वेधः सूर्योदयमा
रभ्य सार्द्धमुहूर्त्तद्वयवेधो ज्ञातव्यः। अविद्धानाम लाभे तु यथोक्तविफलानि वा। महादेवाल्पमश्नीयादुपवासस्तथोभवेदिति। इति प्रतिपत्सामा
न्यनिर्णयः। अथ प्रतिपद्विशेषनिर्णयः तत्कृत्यं तद्व्रतानि च निरूप्यन्ते। तत्रादौ संवत्सरारंभे प्रथमोपस्थितत्वात्प्रतिपन्निर्णीयते। तत्र चैत्रशुक्ल
प्रतिपदि वत्सरारंभः। तत्र उदयव्यापिनी ग्राह्या। चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेहनि। शुक्लपक्षे समग्रं तु तदा सूर्योदये सतीति हेमाद्रौ ब्रा
ह्मोक्तेः। दिनद्वये तद्व्याप्तावव्याप्तौ वा पूर्वैव। तदुक्तं ज्योतिर्निबंधे चैत्रे सितप्रतिपदि यो वारोर्कोदये स वर्षेशः। उदयद्वितये पूर्वो नोदययुगलेपि पू
र्वः ज्योतिर्नि। पूर्वः स्यात्। यस्माच्चैत्रसिताहे रुदयाद्भानोः प्रवृत्तिरब्दादेरिति। वसिष्ठेनाप्युक्तं। वत्सरादौ वसंतादौ बलिराज्ये तथैव च। पूर्वविद्धै
व कर्त्तव्या प्रतिपत्सर्वदा बुधैरिति। असमलमासत्वेपि तत्रैव वत्सरारंभः। तस्यापि सर्ववत्सराद्यत्वादिति कल्पतरुलावल्यां। निर्णयसिंधौ तु यदा चै
त्रो मलमासो भवति तदा दैवकार्यस्य तत्र निषिद्धत्वाच्छुद्धे मासि संवत्सरारंभः कार्य इति केचिदाहुरिति। निष्कर्षस्तु शुक्लादेर्मलमासस्य होतं भेव राम·
ति वोत्तर इत्यादिवस्मादाग्रिमवर्षांतःपातिमलमासस्य मासमेव वर्षप्रवृत्तेः शुक्लादित्वाद्विवमलमासे एव कार्यमिति। ननु शुक्लादौ चैत्रशुक्लप्र ५४

54A तिपदंतरस्याभावाद्युक्तं तन्न अयमेवानुष्ठानं। मलमासे तु शुद्धप्रतिपदंतरस्य संभवात्तु युक्तस्तत्सारंभोयुक्त इति चेत्। भ्रांतोसि नहि प्रतिपदंतरस्य तं
प्रयोजकमपि तु वत्सरारंभः। स च मलमासेपीत्युक्तं प्राक्। नहि चैत्रशुक्लादिर्मलमासः पूर्ववर्षेतर्भवतीति त्वयापि स्वीकृतं। भास्करेणा चैत्र
समलमासत्वे तैलाभ्यंगश्च कथं वर्णादिशुद्ध एव कार्यं। यद्यपि वत्सरवसंतयोः प्रवृत्तिर्उक्ता तथापि तत्प्रयुक्तकृत्यं पश्चात्शुद्धदिवसे मासः क्वापि
नोवादपराणोः। पूर्वमर्धं परित्यज्य कर्तव्यो ज्वरे क्रियेति वचनानुत्कर्षोत्तरस्य एव कार्यं। नवरात्रारंभं नवम्यादिवदिति। अत्र तैलाभ्यंगो नित्यः
।वत्सरादौ वसंतादौ बलिराज्ये तथैव च। तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यते इति वृद्धवसिष्ठोक्तेः। शकादिप्रवर्त्तनमप्युक्तं ज्योतिःशा
स्त्रे। शकवत्सरभूपमंत्रिणां सस्यधान्येश्वरमेघपतीनां।। श्रवणात्तस्य मन्त्राद्वै वेदज्ञाः शुभमतो यात्सु शुभं महाश्रियेति।। अस्यामेव नवरात्रारंभः। त
दुक्तं मार्कंडेयपुराणे।। शरत्काले महापूजा क्रियते या च वार्षिकी इति। मलमासप्राप्ते तु उत्कर्ष इति कल्पलतावल्लां। तत्र परयुतैव ग्राह्या। अमा
युक्ता न कर्तव्या प्रतिपच्चंडिकार्चने। मुहूर्तमात्रं कर्तव्या द्वितीयादिगुणान्वितेति देवीपुराणात्। तिस्रो ह्येताः पराः प्रोक्ताः तिथयः कुरुनंदन
। कार्तिकाश्वयुजो मासे चैत्रमासे च भारतेति हेमाद्रौ ब्राह्मोक्तेः। पराः पूर्वयुक्ताः कार्याः।। विशेषतस्तु शारदे नवरात्रे वक्ष्यते। अत्र च पादानसु

जयसिंह
५५
55

क्रमपर्केराम विष्ये॥ अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे। पुण्येऽह्नि विप्रकथिते प्रपादानं समारभेदिति। तत्र मंत्रः। प्रपेयं सर्वसामान्या भू
तेभ्यः प्रतिपादिता। अस्याः प्रदानात्पितरस्तृप्यन्तु च पितामहाः। अनिवार्यं ततो देयं जलं मासचतुष्टयमिति। तथा। प्रपां दातुमशक्तेन वि
शेषाद्धर्ममीप्सुना। प्रत्यहं धर्मघटको वस्त्रसंवेष्टिताननः। ब्राह्मणस्य गृहे देयः शीतामलजलैः शुचिः॥ तत्र मंत्रः। एष धर्मघटो दत्तो ब्रह्म
विष्णुशिवात्मकः। अस्य प्रदानात्सकला मम सन्तु मनोरथा इति॥ अनेन विधिना यस्तु धर्मकुंभं प्रयच्छति। प्रपादानफलं सोऽपि प्राप्नोतीह न
संशयः इति। इयं प्रतिपत् श्वेतकल्पादिः। अत्र श्राद्धादि महाफलं तदुक्तं हेमाद्रौ नागरखंडे। अथ कल्पादयः प्रोक्ताः कथ्यंते तिथयः शुभाः।
यास्वश्राद्धे कृते तृप्तिः पितॄणामक्षया भवेत्॥ चैत्रशुक्लप्रतिपदि श्वेतकल्पः शुभोऽभवत्॥ तस्यां शुक्लत्रयोदश्यामुदानः समजायत। कल्प
स्तु नारसिंहाख्यः कृष्णायां प्रतिपद्यभूत्। अथ कृष्णे त्रयोदश्यां गौरीकल्पोऽयमकल्पत॥ वैशाखस्य द्वितीयायां शुक्लायां नीललोहितः। चतु
र्दश्यां तु शुक्लायां प्रवृत्तो मारुताभिधः। समानस्तु द्वितीयायां कृष्णायामुपपद्यत। महेश्वरस्य तु दशम्यां कृष्णपक्षे समागमत्। ज्येष्ठशुक्लतृ रामः
तीयायां वामदेवस्य संभवः। पौषो मासात्तु तस्यैव कौर्मः प्रववृते नृप॥ कृष्णपक्षे तृतीयायां माघे यः समवाप्नुत। तस्यां तस्यैव कृष्णायां सोम ५५

55A

कल्पः समापतत्। श्रावणे शुक्लपंचम्यां रावणाः समवर्जितात तस्मै वृकस्य पंचम्यां मानवः प्रत्यपद्यत। षष्ठीप्रोष्ठपदे शुक्लां प्राप्य प्राणाग्नि योभव
त्। सितेतरायां षष्ठ्यां तु तस्य तत्पुरुषाह्वयः।। कृष्णकल्पस्तु सप्तम्यां शुक्लायामाश्विनस्य तु। कृष्णायामपि वैकुंठः प्रविवेशाविशांयुते। कार्ति क
स्यासिते षष्ठ्यां कल्पः कंदर्पसंज्ञकः। असितायां पुनर्जज्ञे लक्ष्मीकल्पस्य कल्पना।। मार्गेशुक्लेन वम्यां तु कल्पः सद्योप्यपद्यत। असितायां तु सा
वित्रीकल्पः प्रारंभमभ्ययात्। शुक्ले दशम्यां शुक्लायामीशानः पादुरासह। असितायामघोरस्य कल्पस्योपक्रमो भवत्। एकादश्यां तु शुक्लायां
माघे ध्यानः प्रजमिवावृत्। तस्यामेव तमिस्त्रायां वाराहः प्रत्यपद्यत। समस्तस्तु द्वादश्यां शुक्लायां फाल्गुनस्य वा। कृष्णायामपि वैराजो विर
राजमहामनाः। इति त्रिंशदमी कल्पाश्चिथयः परमेष्ठिनः। आरंभतिथयस्तासु शुक्लाः पुराणतमा मताः। तासु श्राद्धे कृते पूर्णपमा कल्पस्था
यि कल्पत इति। अत्र वत्सरकृज्जोक्ताहे माद्रौ विष्णुधर्मोत्तरे। चैत्रमासस्य या शुक्ला प्रथमा प्रतिपद्भवेत्। तदन्हि ब्रह्मणाः कृत्वा सोपवासस्तु पूज
नं।। संवत्सरमवाप्नोति सौख्यानि भृगुनंदनेति। प्रथमासवेतिथीनामाद्या।। अत्र केचित् पशुसिंधुकारैमत्स्यजंमैष्टे श्वप्रथमा अमाविद्धेति व्या
ख्यातं तत्स्वचिंत्यमित्युक्तं तदेव प्रपंचितं। तादृशार्थस्यान स्पष्टत्वानुपलंभात्। तादृग्व्याख्यानमते पिडजरेन्हि प्रातिपदस्य तेअमाविद्धायाग्राह्य

जयसिंहक॰
५६
56

त्वाच। अत्र यद्यपि तिपद्रतास्तु यंते। तत्रादौ चैत्र शुक्लप्रतिपदि ब्रह्मपूजा गणेशः संवत्सरारंभ विधिरुच्यते। भगवानुवाच॥ चैत्रे मासि जगद्ब्रह्मा ससर्जप्र
थमेहनि॥ शुक्लपक्षे समग्रं तु तदा सूर्योदये सति। प्रवर्तयामास तथा कालस्य गणनामपि। ग्रहान्नागानृतून्मासान्वत्सरान्वत्सराधिपान्। तदादौ स
भगवान्ब्रह्मा सर्वदेवसमागमे। ब्राह्मीं सभायां ब्रह्माणमनिर्देश्य तत्तु तत। ततः प्रयोक्तैस्तेन मस्यंतस्तु वनेश्वाग्नपासते। ततस्तु कृतशुश्रूषास्ततो गत्वा
समालयं। स्वानि स्वान्यपि कर्माणि ते नियुक्तास्तु चक्रिरे। ब्राह्मी सभा कामरूपा विशेषेणात्मदानघा। धारयंत्यमलं रूपमनिर्देश्यं मनोहरा। ततः प्रभृ
तियो धर्मः पूर्वैः पूर्वतरैः कृतः॥ अद्यापि रक्षं स्वतरां कर्त्तव्योसौ प्रयत्नतः। तत्र कार्या महाशांतिः सर्वकल्मषनाशिनी। सर्वोत्पातप्रशमनी कलिदुःस्व
प्ननाशिनी॥ आयुःप्रदा पुष्टिकरी धनसौभाग्यवर्द्धिनी। मंगल्या च पवित्रा च लोकद्वयसुखावहा॥ तस्यामादौ तु संपूज्यो ब्रह्मा कमलसंभवः
। पाद्यार्घ्यपुष्पधूपैश्च वस्त्रालंकारभोजनैः। होमैर्बलिस्तुपहारैश्च तथा ब्राह्मणतर्पणैः। ततः क्रमेण देवेभ्यः पूजा कार्या पृथक्पृथक्। देवेभ्यो वक्ष्यमा
णेभ्यः कालादिभ्यः (कृत्वौंकारं नमस्कारो कुशोदक तिलाक्षतैः। पुष्पधूपप्रदीपाद्यैर्भोजनैश्च यथाक्रमं। मंत्रं संपूजनार्थं तु बहुरूपं परिस्फुटं। राम
ता मंत्रमिति ज्ञातावेकवचनं। बहुरूपमंत्रं नानास्वरूपा मंत्रा रूपपरिस्फुटे परिस्फुटी याहि सर्वः। तेन ॐ नमो ब्रह्मणे इत्यादि विभक्ते परमा ५६

56A

त्मनेनमस्तेवंमंत्रवाक्यंवेदोपान्तादेवताशब्दाःचतुर्थ्यन्ताःप्रणवशब्दादयोनमोन्तामंत्रत्वेनग्राह्याः। ॐ नमोब्रह्मणोऽप्रमेयकालायचमहात्मने। नमस्ते
स्तुनिमेषायत्रुटयेचनमोस्तुतेलवायचनमस्तुभ्यंनमस्तेस्तुक्षणायवानमोनमस्तेकाष्ठायैकलायैवाचसर्वदा। नाडिकायैसुतुभ्यायैमुहूर्त्तायन
मोनमः। नमोनिशाभ्यःपुण्याभ्योदिवसेभ्यश्चनित्यशः। पक्षाभ्यांवाचमासेभ्यऋतुभ्यःषड्भ्यएवच। अयनाभ्यांचपंचभ्योवत्सरेभ्यश्चसर्वदा। पंच
वत्सरेभ्यःसंवत्सर। परिवत्सरइद्वत्सरअनुवत्सरवत्सरेभ्यः। नमःकृतयुगादिभ्योग्रहेभ्यश्चनमोनमः। अष्टाविंशतिसंख्येभ्योनक्षत्रेभ्योनमोन
मः। राशिभ्यःकरणेभ्यश्चव्यतीपातेभ्यएवच। प्रतिवर्षाधिपेभ्यश्चविज्ञातेभ्योनमःसदा। नमोस्तुकुलनागेभ्यःमातृमातृभ्यएववा। नमश्च
द्वादशभ्यश्चमनुभ्यस्तुभ्योनमोनमः। नमःशक्रेभ्यश्चतत्संख्येभ्योनमोनमः। पंचाशद्भ्योनमोनित्यंदक्षकन्याभ्यएववा। नमोदित्यैमहाभद्रायैजपा
यैवाचसर्वदा॥ भ्रंशास्त्रायनमस्तुभ्यंसर्वास्त्रजनकायवा। नमस्तेवरुपुत्रायपत्नीभिःसहितायच॥ नमोवृद्धैस्तथावृद्धैर्निद्रायैवनदायव
। नलकूवरयक्षायगुह्यकस्वामिनेनमः। नमोस्तुशंखपद्माभ्यांनिधिभ्यांमध्यनित्यशः। भद्रकालींनमोनित्यंसुरभ्यैचनमोनमः। वेदवेदांतवे
दांगविद्यासंस्थेभ्यएवच। नागयक्षसुपर्णेभ्योनमोस्तुगरुडायवा। अरुणायनमस्तुभ्यंसप्तद्वीपेभ्यएववा। सप्तभ्यस्तुसमुद्रेभ्यःसागरेभ्यश्चम

जयसिंहक
५७
57

वेद्यं।। उत्तरेभ्यः कुरुभ्यश्च नमो ह्यैरावताय च। भद्राश्वकेतुमालाभ्यां नमः सर्वत्र सर्वदा।। इलावृताय च नमो हरिवर्षाय वै विहि। नमः किंपुरुषेभ्यश्च भर
ताय नमो नमः। नमो भारतमेदेभ्यो नवभ्यश्चाथ सर्वदा। पातालेभ्यश्च सप्तभ्यो नरकेभ्यो नमो नमः।। कालाग्निरुद्रशेषाभ्यां हरये क्रोडरूपिणे। सप्तभ्य
स्तथ लोकेभ्यो महाभूतेभ्य एव च।। तमसे रजसे चैव नमः प्रकृतये तथा। पुरुषायाभिमानाय नमोऽस्त्वव्यक्तमूर्तये। हिमवत्प्रमुखेभ्यश्च पर्वतेभ्यो
नमः सदा। पुराणेभ्यश्च ग्रामेभ्यः सप्तभ्यश्च नमो नमः।। नमो ह्लादघनिभ्यश्च सप्तभ्यश्चाथ सर्वदा। नमोऽस्तु पक्षिराडादिभ्यस्तीर्थेभ्यश्च पुनः पुनः।
निम्नगाभ्यो नमो नित्यं वितस्ताद्याभ्य एव च।। वक्त्रहेशभ्यो दीर्घेभ्यो धारिणीभ्यो नमो नमः। नमो धात्रे विधात्रे च छंदोभ्यश्च नमो नमः। सुरभ्यै रावणा
भ्यां च नमो भृग्वे नमो नमः। नमस्तथोत्तरैः श्रवसे ऋत्वायैव नमो नमः। नमोऽस्तु धन्वन्तरये शाल्वाभ्यां नमः सदा। विनायककुमाराभ्यां विघ्नेभ्यश्च नमः स
दा शाखाय च विशाखाय नैगमेयाय वै नमः।। नमः स्कंदग्रहेभ्यश्च स्कंदमातृभ्य एव च। ज्वराय रोगपतये भस्मप्रहरणाय च।। ऋषिभ्यो वा
लखिल्येभ्यः केशवाय नमः सदा।। अगस्त्यये नारदाय व्यासादिभ्यो नमो नमः।। अप्सरोभ्यः सोमपेभ्यो देवेभ्यश्च नमो नमः। असोमपेभ्यश्च नम
स्तुषितेभ्यो नमः सदा। आदित्येभ्यो नमो नित्यं द्वादशभ्यश्च सर्वदाः- एकादशभ्यो रुद्रेभ्यः सगणेभ्यो नमो नमः:- दशभ्यो विश्वदेवेभ्यः साध्येभ्यश्च न

राम:
५७

57A मोनमः ।। नमो वसुभ्यस्त्वष्टभ्यो नमो योगिभ्य एव च । द्वादशभ्यो मरुद्भ्यश्च नमः सर्वत्र सर्वदा । दशभ्यस्त्वंगिरोभ्यश्च तपस्विभ्यो नमो नमः । नमो नासत्यद
स्राभ्यामश्विभ्यां नित्यमेव हि । साध्येभ्यो द्वादशभ्यश्च पौराणेभ्यो नमः सदा ।। एकोनपंचाशद्भ्योथ मरुद्भ्यश्च नमो नमः ।। शिल्पाचार्याय देवाय नमस्ते वि
श्वकर्मणे ।। अष्टभ्यो लोकपालेभ्यः सानुगेभ्यश्च सर्वदा । आयुधेभ्यो वाहनेभ्यो वर्मभ्यश्च नमः सदा ।। आसनेभ्यो दुंदुभिभ्यो देवेभ्यश्च नमो नमः ।। दे
वराक्षसगंधर्वपिशाचेभ्यश्च नित्यशः । पितृभ्यः सप्रमेदेभ्यः प्रेतेभ्यश्च नमो नमः ।। क्षेत्रक्षेमेभ्यश्च देवेभ्यो भागगम्येभ्य एव च ।। नमस्ते बहुरूपाय
विष्णवे परमात्मने ।। अथ किं बहुनोक्तेन मंत्रेणानेन वा बलिं येत् । प्राङ्मुखो वोदङ्मुखो वाग्निं प्रान्देवानुद्दिश्य पूर्ववत् ।। अथवा बहुविस्तरेणाकिं । ब्रा
ह्मणानेव देवतोद्देशेन पूजयेत् । पूर्ववत्संचोक्तक्रमेण । अर्घ्यैः पुष्पैश्च धूपैश्च वस्त्रैर्माल्यैः सहस्रकं सहस्रकं शतोमां वं हष्टौ मासन्नर्चयेद्द्विज
र्षीः ।। धनधान्यसुविश्वैर्दक्षिणाभिश्च सर्वदा । इति होमपुराणाभ्यां प्रवर्जश्च द्विजोत्तमान् ।। कालज्ञान् वेदवेदज्ञान् सत्तां संबंधिबांधवान् ।। अ
नेनैव तु मंत्रेण स्वाहांतेन पृथक् पृथक् । यदि शापाय ये होमः कर्तव्यः सर्वकर्मणे ।। वेदवन्नक्षत्री दत्वा स्थाने पाथामिके सति । पवित्रः श्रेष्ठः । वे
हव देहोक्तविधिना । वक्ष्ये पी आज्यभागौ पाधानिके प्रधानहोमारंभे ह्यालाशो भात ततः कार्यमंत्रा लालंभनं तथा ।। भोजयित्वा द्विजान्सर्वान्तु

जयसिंहक०
५८
58

दृत्तं बंधिबांधवान्॥ विशेषेण विभोकत्र्यं कार्यः श्वापि महोत्सवः॥ नवसंवत्सरारंभः सर्वसिद्धिप्रवर्त्तकः॥ इति ब्रह्मपुराणोक्त संवत्सरारंभविधिः॥
अस्यामेवारंभविष्णोत्तरोक्तं तिलकव्रतं। युधिष्ठिर उवाच। ब्रह्मेशकेशवादीनां गौरीगणपतेस्तथा। दुर्गासोमाग्निसूर्याणां व्रतानि मधुसूद
न। शास्त्रांतरेणाद्दृष्टानि भवद्बुद्धिगतानि च। तानि मे वर्णितानीह देवयेन देवकिनंदन॥ प्रतिपत्क्रमयोगेन विहितायस्य या तिथिः। देवस्य यस्य तत
त्कार्यं न दृशेषेणामेवदा। श्रीकृष्ण उवाच। वसंते किंशुकाशोकशोभिते प्रतिपत्तिथिः। शुक्ला तस्यां प्रकुर्वीत स्नानं नियममास्थितः। नारी नरो वा
राजेंद्र संतर्प्य पितृदेवताः। नघास्तीरे तडागे वा गृहे वा तदलाभतः। पिष्टातके न विलिखेद्वत्सरं पुरुषाकृतिं॥ पिष्टातकः पटवासकोगंधद्रव्यचू
र्णविशेषः। ततश्चंदनचूर्णेन पुष्पधूपादिनार्चयेत्। मासर्त्तुनामभिः पश्चान्नमस्कारांतयोजितैः। मासर्त्तुनामभिश्चैत्रवसंतादिनामभिः। पूजयेद्वत्स
रोविद्वान्मंत्रैर्वेदोदितैः शुभैः। संवत्सरोसीति पठन्मंत्रं वेदोदितं द्विजः। नमस्कारेण मंत्रेण शूद्रोपीत्यं प्रपूजयेत्। शूद्रोपीत्यनेन न स्त्रीणां परिग्र
हः। तासां विशेषविध्यभावेवैदिकमंत्राणां विकारात्। संवत्सरोसि परिवत्सरोसि इदावत्सरोसि इद्वत्सरोसि। वत्सरोसीति यजुर्वेदप्रसिद्धो मंत्रः। नमस्कारेण मं राम:
त्रेणा संवत्सराय नम इत्यादिना। एवमभ्यर्च्य वासोभिः पश्चात्तमभिवेष्टयेत्। कालोद्भवैर्म्मूलफलैर्नैवेद्यैर्मोदकादिभिः। ततः संपूजयेत्पार्थ वरः स्वि ५८

58A

त्वाद्धृतांजलिः। भगवंस्त्वत्प्रसादेन वर्षं क्षेममिहास्तु मे। संवत्सरोपसर्गा मे विलयं यांत्वशेषतः एवमुक्त्वा यथाशक्त्या दत्वा विप्राय दक्षिणां। लला
टपट्टे तिलकं कुर्यात् चंदनपंकजं। ततः प्रभृत्यनुदिनं तिलकालंकृतं मुखं। धार्यं संवत्सरं यावच्छशिनेव नभस्तलं। एवं नरो वा नारी वा व्रतमेतत्समा
चरेत्। सदैवपुरुषमाघ्रभोगान्सुविपुलान्नासौ। भूतप्रेतपिशाचाद्या दुर्वारा वैरिणो ग्रहाः। निरर्थकाः भवंत्येते तिलकं वीक्ष्य तत्क्षणात्।। एतत्त्रि
लोकतिलकाख्यविख्यातं पापघ्नं व्रतं सकलदुष्टहरं परं। स्त्यंसमाचरति यः सम्यक्सर्वं विहस समर्त्सः प्रयाति पदमच्युतमिंदुमौलेः।। इति भविष्यो
त्तरोक्तं तिलकव्रतं।। अस्यामेव प्रतिपदि आरभ्य विष्णुधर्मोत्तरोक्तमारोग्यव्रतं। संवत्सरावसाने तु यं वदश्यामुयोषितः। प्रातः प्रतिपदि स्नात्वा कुर्या
द्धृतमनस्त्रीवीः। पूजयेद्भास्करं देवं वर्णकैः कमलेऽकृते। सुवोस्थंडिलदेशे नानावर्णैः कमलं विधाय तत्र भास्करं ध्यात्वा पूजयेदित्यर्थः।। शुक्लेन गं
धमाल्येन चंदनेन सितेन च। तथा कुंकुमधूपेन घृतधूपेन भार्गव। कुंडुरुः सल्लकीनिर्यासः। अपूपैः सैकतैः दद्यात्परमान्नेन भूरिणा।। सैकतैः श
र्करा विकारैः। ओदनेन च शुक्लेन सता लवणास्र पिंबा। सक्ता अन्नमेन। क्षीरेण च फलैः शुक्लैर्बहिर्ब्राह्मणांस्तर्पयेत्।। पूजयित्वा जगद्धाम दिनभागे च
तुर्थके। आहारं प्रथमं कुर्यात्सघृतं मनुजोत्तम। सर्वं वमनुजश्रेष्ठ घृतहीनं विवर्जयेत्। भुक्त्वा च सप्तकं हेवा चमाहारं च समाचरेत्। पानीयपानं

जयसिंहक॰ ऊर्वीत ब्राह्मणात्तुमते पुनः॥ प्रथममाहारं प्रथमप्यासं सर्वप्रथममप्रथमं वाहारं। मद्देवान्नं भुक्त्वा। एकमेव यासंभक्षयित्वाऽ चाभिस्टमन्नं त्यजेत्। ब्रा
५९ ह्मणात्तु मन्त्र्या पुनराहारं त्र्यवशिष्टान्नभोजनं पुनः पानीयपानं ऊर्पादिस्थ पूः॥ ब्राह्मणात्तु मत्वा भुंजानोपि घृतहीनं न भुंजीत घृतहीनं विवर्जयेदि
59 ति निषेधात्। संवत्सरमिदं कृत्वा ततः साक्षात्त्र्योदशं पूजनं देवदेवस्य तस्मिन्नहनि भार्गव। संवत्सरं प्रतिमासं शुक्लप्रतिपदि। ततः साक्षात्त्रयोदशा
मिति लिंगादर्शनात्। समापयेद्व्रतं पुराणं रामइत्यभिधीयते। होमशास्त्रेषि समिधीयत इत्यर्थः। संध्यभाकः छांदसः। सहिरण्यं सवस्त्रं च तथा दक्षा
द्विजोत्तमे। व्रतेनानेन धर्मज्ञो रोगमेवं व्यपोहति। आरोग्यमाप्नोति गतिं तथाप्यांय शमप्याथं विपुलांश्च भोगान्। व्रतेन सम्यक्सुखो थ नारी संपूज
येद्वस्तु जगत्प्रधानं। इति विष्णुधर्मोत्तरोक्तमारोग्यप्रतिपद्व्रतं॥ अथासामेवारभ्य विष्णुधर्मोत्तरोक्तं विधावतं। मार्कंडेय उवाच। अष्टपत्रं तु कमलं
विन्यसेद्वर्णकैः शुभैः। ब्रह्माणं कर्णिकायां तु तस्य संपूजयेद्विभुं। तस्य कमलस्य। ऋग्वेदं पूर्वपत्रे तु यजुर्वेदं तु दक्षिणे। पश्चिमे सामवेदं तु उ
त्तरे थर्वणं तथा। आग्नेये वतथांगानि धर्मशास्त्राणि नैरृते। पुराणं चैव वायव्ये ईशान्ये न्यायविस्तरं॥ एवं विन्यस्य धर्मज्ञः सोपवासः सहस्र रामः
जयेत्॥ चैत्रे शुक्लमथारभ्य सोपवासो जितेंद्रियः। सद्यः प्रतिपदं प्राप्य शुक्लपक्षस्य यादव। संवत्सरं महाभाग शुक्लगंधानुलेपनैः॥ भूरिराशाय ५९

59A रमान्नेन धूपदीपैरतं द्वितः। संवत्सरांते गां दद्याद्व्रते चीर्णे नरोत्तमः। इदं व्रतं यस्तु करोति राजन्सर्ववेदवित्साधुविधर्मनिष्ठः। कृत्वा तदा द्वादश वत्सरा
णि विरिंचिलोकं पुरुषः प्रयाति॥ इति विद्याप्रतिपद्व्रतं। अथ सामवेदगाउघुराणोक्तं विद्याव्रतांतरं। सनत्कुमार उवाच॥ अथ तं प्रतिपत्सु संप्र
ण्णु संपत्करं व्रतं। यत्कृत्वा नराः श्रियं विंदेद् दुर्लभां मानुषैरिह। शालितंडुलसंसिद्धे मंडले चतुरस्रके। श्रीशं श्रियमथा वाह्य पूजयेत्सुरः
सारं॥ अथ छन्नदलैः पद्मैः सुतैस्तं प्रपूजयेत्॥ अथ छन्नदलैर्विकासितैः सहस्रैर्वा यथायोगं पयसा पायसेन च ततश्चाविधिनाभ्यर्च्य पा
र्श्वे देवी सरस्वती। अथ ततः पूजयेद्दिंडुं गुरुं पश्चाद्दनम्य धीः परिवारवियोगेनता स्तुतत्कारयेदथ॥ प्रार्थना मंत्रः। मम विद्यां प्रदिशतु देवो वागी
श्वरो हरिः। विद्याधिदैवतं देवी विद्यां दिशतु मे दश। सरस्वती प्रदिशतु वाग्वृद्धिमतिशालिनी। सितांशुरपि मे तुष्टिं सर्वभोग प्रमृतरणी। पूजा
त्तु परागा वादिनमोंते नामममंत्रैरेवकर्त्तव्या॥ इत्थं वै कारयेत्साध्यं प्रसन्नः प्रजितो गुरुः। साध्यं शिष्यं उपदेश्यं विधिना चोपवासं तु कारयेन्निय
मान्वितं॥ समभ्यर्च्य द्वितीयायां देवदेवं श्रियः पतिं भुंजीत पायसान्नेन श्रुविशावमपसन्निधौ। साध्य इति शेषः। आचार्यो यवरं दत्वा कुर्यात्तद्
भीरानं पुनः। वरशब्देनाहिरण्यममिधीयते॥ अनवधीतमनारब्धं तदानीमारभेत ह। विद्याव्रतमिदं नित्यं गुरुं दैवतमित्यपि॥ मन्येतेति शेषः

।तन्मुखाद्धितदात्तस्य निः श्रेयसस्समागमः॥ निःश्रेयसं अतिशयितं श्रेयः। मृषा तद्धक्तो कारी स्यान्नस्यात्तच्छासनातिगः। तिष्ठेत्तिष्ठत्सु गुरुषु न वा
सीत तदग्रतः॥ न शयीत तदासीने कुर्वीत वचनान्यपि न लंघयीत वचनं गुरोः कृते यतेत च॥ निवेद्य गुरवे सर्वं कुर्याद्दौहिताहितं॥ एवमा
चार्यनिष्ठस्तु मतिमान्प्राज्ञसंमतः। उत्पन्नज्ञानवैराग्यो दीर्घमायुरवाप्य च॥ यशश्च विपुलं लब्ध्वा सदाचारप्रवर्त्तनं॥ पुत्रपौत्रश्रियाजुष्टः पुण्यां
गतिमवाप्नुयात्॥ एवं समाचरेद्विद्वान्॥ विद्याव्रतमुदारधीः दद्यात्फलानि विप्रेभ्यो ह्युत्कृष्टानि बृहत्पथा॥ कदलीचूतपनससंभवानि सुखीनि चाय
त्यवं कृते विद्वान् विद्याव्रतमनन्यधीः। समस्तविद्यानिपुणो वै सर्वं पदमृच्छति। इति विद्याव्रतं॥ अथ ज्येष्ठशुक्लप्रतिपदि भविष्योत्तरोक्तं
करवीरव्रतं। श्रीकृष्ण उवाच। ज्येष्ठे मासि शुभे पक्षे प्रथमे हि दिनोदये। देवोद्यानभवं वृक्षं करवीरं समर्चयेत्॥ कृत्वा तु परिधानं गंधधूपविले
पनैः॥ फलैः सप्तधान्यैश्च नारंगैर्बीजपूरकैः॥ गुडाकैर्बदरैर्भक्ष्यैर्नारिकेलैः सुशोभनैः॥ अभ्युक्ष्याक्षततोयेन मंत्रेणानेन क्षमापयेत्॥ करवीर वि
षावास नमस्ते भानुवल्लभ। मौलिमंडलदुर्गादि देवानां सततं प्रिय। आकृष्णेनेति वेदोक्तमंत्रेणाभ्यर्च्य भक्तितः॥ प्रदक्षिणामतः कुर्यात्ततः स्वभ
वनं व्रजेत्॥ एतद्व्रतं पुरा पार्थ सूर्याराधनकाम्यया। अनुष्ठितं त्रिःश्लुमया सावित्र्या सत्यभामया॥ दमयंत्या सरस्वत्या गायत्र्या गंगया तथा॥ अ ६०

60A न्यानि रविनारीभिर्मर्त्ये लोके प्यनुष्ठितं करवीरव्रतं पार्थ सर्वसौख्यफलप्रदं॥ संप्राप्ते कुसुमाविर्ति सर्वशाखं नीलैर्दलैस्ततस्तं करवीरवृक्षं प्रपू-
ज्य कामनोभिलषितान्सुविभवभोगान्भूत्वे वै प्रयांति भवनं भरताग्र भानोः। इति भविष्योत्तरोक्तं करवीरव्रतं॥ ज्येष्ठशुक्लप्रतिपदि दशहरास्नाना-
द्यारंभः काशीखंडे॥ ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिं। दशाश्वमेधिके स्नातात्मुच्यते सर्वपातकैः। एवं सर्वास्तिथिषु क्रमस्नायी नरोत्तमः।
आशुक्लपक्षदशमिं प्रतिजन्माघमुत्सृजेदिति। दशहरास्तोत्रपूजादिकं तु दशमीप्रकरणे वक्ष्यते। अथ माघशुक्लप्रतिपदि स्कंदपुराणो-
क्तं महत्तमाख्यं शिवव्रतं॥ तदेव मौनव्रतमित्युच्यते इदं व्रतं पूर्वविद्धायामेव कर्तव्यं तदुक्तं निर्णयामृते ब्रह्मवैवर्ते॥ कृष्णव्रतेषु सर्वेषु कर्तव्यास्त-
मुखी तिथिरिति मदनरत्ने। नंदिकेश्वर उवाच॥ देवकेन विधानेन व्रतं पुराणं महत्तमं कस्मिन्तिथौ तु कर्तव्यं विधानं तद्वदस्व मे। स्कंद उवाच
।मा।सि भाद्रपदे शुक्ले पक्षे च प्रतिपत्तिथौ। नैवेद्यं तु पचेन्मौनी षोडशान्त्रिगुणानि वा फलानि पिष्टपक्वानि दद्याद्द्विजाय षोडश। देवाय षोडश दत्तानि
हतव्यानि स्वयं च ततः। भुंजीत षोडश तथा व्रतस्य नियमाश्रयात्। सौवर्णं कारयेद्देवं यथाशक्त्या हिरण्मयं सौवर्णं कर्षपरिमितं तस्य वर्णाघटितं यथाश-
क्त्या वा नेत्रत्रयसमायुक्तं जटामंडलमंडितं। पंचवक्त्रं चतुर्बाहुं वृषारूढं सुमध्यगं। त्रिशूलं चाक्षसूत्रं च वहंतं दक्षिणे करे॥ कपालं कुंडिकां वा-

जयसिंह कृ० मेशिवायां चंद्रधारिणां पंचामृतेन स्नपनं कृत्वा संस्थापयेत्ततः। कुंभस्योपरि देवेशं शुक्ल वस्त्र युगान्वितं। गंधपुष्पैः समभ्यर्च्य फलैर्नानाविधैस्तथा
६१ । प्रसीद देव देवेश शव रावरजाह्नुगो। वृषध्वज महादेव त्रिनेत्राय नमोनमः। पूजामंत्रः। देवस्य परीधानं दद्याद्धेनुं पयस्विनीं। अनेन तु विधानेन य
61 ः कुर्याद्व्रतमुत्तमं। स राज्यं लभते देवदीर्घमायुस्तथैव च। सर्वपापविनिर्मुक्तः शिवलोके महीयते। भुक्त्वा तु विपुलान्भोगानंते शिवपुरं व्रजेत्।
इति महत्तमव्रतं। अथास्यामेव स्कंदपुराणोक्तं मौनव्रतांतरं। पार्वतीप्रश्नानंतरं। ईश्वर उवाच॥ शृणु देवि प्रवक्ष्यामि पृष्टोहं त्वयाधुना॥ व्रत
मेतत्पुरा वीरौ सीतया राघवेन च। अन्यैरपि जनैः सर्वैः संचीर्णं व्रतमुत्तमं। नभस्य त्र्यतिक्रांते नभस्ये च प्रवर्तिते। नभाः श्रावणाः नभस्यो भाद्रप
दः। तौ भ्रातृपूर्णिमां तौ ग्राह्यौ। एवं कालक्रमेणैव श्रावणादिषु पूर्णिमा गता। तद्दिनं प्राप्य विप्रेणोच्चरयेत्तत्रैवाभिधानात्। व्रतमेतत्तु कर्तव्यं षोडशैव
दिनानि तु। एतच्छ्रुत्वा ततो देवी प्रहृष्टा वाक्यमब्रवीत्। पार्वत्युवाच। किं विधानं पुराप्रोक्तं व्रते मौनव्रतात्मके। तत्सर्वमस्तु समाचक्ष्व प्रसादकृन्मे प्र
भो ईश्वर उवाच॥ तद्दिनं चैव संप्राप्य सभार्याः सहबांधवैः॥ गत्वा प्रभातसमये स्नानार्थं जलसंनिधौ॥ तडागे वाथ नद्यां तीरे गत्वा प्रस्रवणेथवा। स्नानं राम·
कार्यं तदा सर्वैः शिवध्यानपरायणैः। हस्ताः षोडशसंख्याश्च षोडशग्रंथिसंयुतं। तत्सूत्रं च करे न्यस्य स्त्रिया वामे नदक्षिणे। एवं विधानं कर्तव्यं यावत्स्या ६१

61A

द्वितीयदिने। तद्दिने चैव संप्राप्ते समाप्ये व्रतस्य तु। मौनेनैव नयेत्तोयं मौनेन गोधूमपेषणं। मौनेनैव च कर्त्तव्यं नैवेद्यं भोजनादिकं। सर्वोपस्करमा
दाय गत्वा च जलसन्निधौ। स्नानं कार्यं नदीतत्त्वमिसकर्म ततः परं। देवर्षिमनुजानां च पितॄणां चैव तर्पणं। पश्चाद्देवाधिदेवेशं मंत्रैः संपूजयेत्ततः। शूलपा
णे वृषारूढ चार्द्धेन्दुविभूषण। गात्रोयेन स्नापितो देव पवित्रं कुरु मां सदा। देवैः स्तुवं हित्वा चेतुः सर्वपापप्रणाशिनी। तत्क्षीरस्नापितो देव नित्यं मे वरदो भव। का
मतोऽकामतो वापि यन्मया दुष्कृतं कृतं। तत्सर्वं विलयं यातु दध्नास्नानेन मे शिव। रसानामुत्तमं तत्त्वं देवानां च सदा प्रियं। तेन त्वं स्नापितो देव निर्धिकां तिप्रदो भ
व। यस्योच्चारणमात्रेण तृप्तिं यान्ति पितामहाः। मधुना स्नापितो देव निःसंशोकहरो भव। यमलोकभयत्रस्तः शरणं त्वां गतः शिव। खण्डस्नानेन देवेश
मां कुरुष्व सुमानुषं। यस्य दर्शनमात्रेण शुद्धिं यायाच्च जीवितं। तेनैवोत्तमतोयेन स्नातो देहि प्रियं ध्रुवं। सुगंधं चंदनं देव कुंकुमेन समान्वितं। अर्चितोसि
मया भक्त्या शिव लोकप्रदो भव। अक्षयान् धुपत्वा हीन्कामं च वाञ्छितं ज्ञनः। अन्ते चैवाक्षयं लोकमक्षतैरर्चितः कुरु। संतानः पारिजातश्च ये चान्ये सुर
पादपाः। तेषां पुष्पैर्मया देव पूजितः सुखदो भव। धूपोयं गृह्यतां देव सहरो गंधवान् शुचिः। ईप्सितं मे वरं देहि परत्र च शुभां गतिं॥ शुद्धाशुद्धाश्च वर्त्तिराज्येन
समान्विता। दीपवर्त्तिप्रदानेन प्रीतः स्यादीश्वरो मम। सर्वमन्नं मया त्तं च देवानां च सदा प्रियं। तेनैवान्नप्रदानेन सुप्रीतो वरदो मम॥ शास्त्रप्रशास्त्रावसि

A.No. 282

जयसिंहक॰
६२
62

तावद्दर्वीविस्तारमहतावधारणीतलेयथा॥ ममापि संतानवर्धनं यावत्क्षयं कुरुष्वहरवे। शिवपूजनेरता नानाविधैः फलैः म्रम्यैः सुपुष्पाक्षतचंदनैः॥ भक्त्यापरमयादत्तं म-
हात्मा त्वं सुरेश्वर। जन्मजन्मांतरेष्वेव भावाभावेन यत्कृतं। क्षंतव्यं देव तत्सर्वं शंभो त्वां शरणं गतः। एतत्सर्वं त्वमौनेन शुद्धो भक्त्या समाहितः॥ शिवपूजां प्रकुर्वी-
णः कृतकृत्यो भवेन्नरः। इति पूजा। एवं संपूज्य विधिना संकल्पः क्रियते ततः। सदा संपन्नपूजा पांप्रीयतां मम शंकरः। संप्रीतो भव देवेश भक्त्या सम्यक् सदार्चित
। एवं पंचाम्रतस्नानं यः कारयति मानवः। आजन्मोपार्जितात्पापात्मुच्यते नात्र संशयः। विभागेन प्रदानं च ब्राह्मणाय शिवाय च। आत्मना चैव भोक्तव्यं
पक्वान्नं विधिवत् शुभं। एवं क्रमेण कर्तव्यं महेश जनवांछितैः। व्रते नाहितकामार्थं द्विजो भोज्यः सदक्षिणः। दातव्यं प्रीतिपूर्वेण याचते ताछिद्रकं हि
जं ततः। शिवपूजादिभावाभावेन यत्कृतं। तत्सर्वं मम संपूर्णं स्याद्धर्मकामार्थसाधनं॥ पुत्रपौत्रप्रदं चैव सर्वकामप्रदं व्रतं। एतत्सर्वं मया ख्यातं तत्त्व दद्ये प्रीति
पूर्वकं। श्रुतमात्रेण देवेशि सर्वपापैः प्रमुच्यते। इति मौनव्रतं। अथाश्विनस्य शुक्लप्रतिपदि भविष्योत्तरोक्तमशोकव्रतं। श्रीकृष्ण उवाच॥ अश्वयुक्शु-
क्लपक्षस्य प्रथमेऽह्नि दिनोदये। अशोकं पूजयेद्वृक्षं प्ररूढं शुभलक्षणं। प्ररूढैः सप्तधान्यैश्च गणकैर्मोदकैः शुभैः। फलैः कालोद्भवैर्हृद्यैर्नारिकेलैः स- राम॰
दाडिमैः। पुष्पधूपादिनातत्र पूजयेत्तं तरूत्तमं। अशोकं पांडवश्रेष्ठ शोकं नाप्नोति कुत्रचित्। अशोक शोकशमनो भव सर्वत्र नः कुले॥ इत्युच्चार्य ततो द- ६२

62A घादर्घ्यैश्चद्रासमन्वितः।पताकाभिर्लंकृत्यप्रच्छाद्यवस्त्रवाससा॥दमयंतीयथा स्वाहायथा देवीचजानकी॥तथाशोकव्रतादस्माज्जायतेप्रीतिवल्लभा॥
वनेवसंत्यास्तदुर्मंतीतयासंप्रदर्शितं॥दृष्ट्वाशोकंवनेपार्थपल्लवालंकृतंतरुं॥कृत्वातस्मीपेभर्त्तारंदेवरंचतिलाक्षतैः॥दीपालंकृतनैवेद्यैर्धूपस्त्रक्चफला
र्चनैः॥अर्चयित्वाभ्यर्थितोसौरक्ताशोकोसुविस्थिरः॥मैथिल्याप्रांजलिंकृत्वाभ्रातृवतोराघवस्यच॥प्रांजलिप्रबद्धमंजलिं॥चिरंजीवतुमेवृद्धःश्वशुरः
कोसलेश्वरः॥भर्त्तामेदेवराश्चैवजीवंतुभरतादयः॥कौशल्यामपिजीवंतीपश्येयमितिमैथिली॥पपावेदंमहाभागाडुपंवनविभूषणां॥प्रदक्षिणामु
पावृत्त्यततःसाप्रययौगृहं॥एवमन्यापियानारीपूजयेद्धनीनगं॥तिलतंडुलसंमिश्रैर्यवगोधूमसर्षपैः॥समर्प्यसेवयेन्मूलेपादपंरक्तपल्लव
वं॥तदभावेचसौवर्णंराजतंवास्वशक्तितः॥वर्णकैर्वासमालिख्यपूजयेद्विधिवत्ततः॥मंत्रेणानेनकौंतेयप्रणामसद्बीधतव्रता॥महावृक्षमहाशाख
मकरध्वजमंदिर॥प्रार्थयेत्वांमहाभागासर्वकामप्रदोभव॥एवंसमर्चितंवृक्षंदत्वाविप्रायदक्षिणां॥तेववृक्षंकृतंदत्त्वावस्त्रयुग्मसमन्वितं॥कृतं
हेमवर्णादिघटितं॥सखीभिःसहितासाध्वीभुंजीतब्रह्मचारिणी॥याःशोकनाशनमशोकतरुंयवस्त्रैःसंपूजयंतिकुसुमाक्षतधूपदीपैः॥ताःप्राप्यसौ
ख्यमतुलंभुविमर्त्यजातंगौरीपदंप्रमुदिताःपरमाप्नुवंति॥इतिभविष्योत्तरोक्तमशोकव्रतं॥आश्विनशुक्लप्रतिपद्यावाराज्जीवत्पितृकेणदौहि

जयसिंहक०
६३
63

त्रेण महालयापक्षनिमित्तकं मातामहश्राद्धं कार्यं॥ तदुक्तं हेमाद्रौ संग्रहे। जातमात्रोपि दौहित्रो विद्यमानेपि मातुले। कुर्यान्मातामहश्राद्धं प्रति
पद्याश्विने सितइति। इयं संगवव्यापिनी ग्राह्येति निर्णयदीपे उक्तं। प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणं। श्राद्धं मातामहं कुर्यात्सपितासंगवे सति
।जातमात्रोपि दौहित्रो जीवत्यपि च मातुले। प्रातः संगवयोर्मध्ये आर्यस्य प्रतिपद्भवे हित्वा द्विवचनात्। अत्र मूलं विमृग्यं॥ इदं च मलमासे न कार्यं॥ स्प
ष्टमासविशेषाख्याविहितं वर्जयेन्मलइति निषेधात्॥ इदं च जीवत्पितृकेणैव कार्यमिति शिष्टाः। इदं च शिष्टाचारात्पिंडं कार्यमिति केचित्। पिंड
रहितं तदुक्तं जीवत्पितृकस्य मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः। न जीवत्पितृकः कुर्याद्गुर्विणीपतिरेव चेति दक्षेण पिंडनिषेधात्। अन्वष्टू
कावविशेषवचनाभावाच्चेति केचित्। अन्ये तु न जीवत्पितृकं प्रति पिंडदानमात्रमनेन निषिध्यते किंतु दर्शश्राद्धं गयाश्राद्धं श्राद्धं वा परपाद्दि
कं। न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणं॥ पित्र्यं जीवत्पितृनेष्टमित्यादिवचनैकवाक्यतया श्राद्धमेव निषिध्यते॥ एवं च तत्राविशेषवचनप्रा
प्तश्राद्धं सपिंडमेव भवतीत्याहुः॥ अस्यामेव प्रतिपदि नवरात्रव्रतारंभः। तन्निर्णयस्तु निर्णयामृते देवीपुराणे। शुभे धाउवाच। अश्वयुजमत्रवक्ष्यामि चं
डिकाभजनक्रमं। आश्विनस्यासितेपक्षे प्रतिपत्सु शुभे दिने। पुण्यर्क्षे वा श्रवणं कृत्वा कन्यामावाहयेत्ततः। कृत्वा स्वर्णमयीं देवीं कलशमात्रात्मि द को०६३

63A विकां। मैरवाष्टकसंयुक्तां न्यसेदुर्ध्वेशापीठके। एवं समावमुद्धार्य पश्चाद्देवीं समर्चयेत्॥ शुद्धेति यो समकर्त्तव्यं प्रतिपद्योर्ध्वगामिनी। आषाढस्तु नाडिका
स्यन्काषोडशद्वादशापि वा। अपराह्णे प्रकर्त्तव्यं शुद्धसंततिकांक्षिभिः। इदं वापराह्णयोगिन्याः आश्वस्यं द्वितीयदिने प्रतिपद्यो भावे ज्ञेयं॥ तथा तत्रैव दे
वीवचने। अमायुक्ता न कर्त्तव्या प्रतिपत्पूजने मम। मुहूर्त्तमात्रा कर्त्तव्या द्वितीयादिगुणान्विता। आषाढः षोडशनाड्यश्चलच्छायः कुरुते नरः। कल
शस्थापनं तत्र अरिष्टं जायते ध्रुवं। वर्ज्जनीया प्रयत्नेन अमायुक्ता तु पार्थिव॥ द्वितीयादिगुणोपेता युक्ता प्रतिपत्सर्वकामदा॥ शरत्काले विधातव्यं अंबामा
श्रितस्य पल्लतः। पूजनं गंधपुष्पाद्यैर्नानाभक्ष्यसमन्वितैः॥ देवीवचनं। योमां संपूजयेन्नित्यं द्वितीयादिगुणान्विते॥ प्रतिपच्छारदे तस्य त्वामेशश्रुतेह
रवमप्ययं॥ यदि कुर्याद्मायुक्तं प्रतिपत्स्थापनं मम॥ तस्य शापानुते दत्वा भस्मशेषं करोम्यहं। आग्रहाल्लकृते यस्तु प्रथमे स्थापनं मम। तस्य संपद्वि
नाशः स्याज्ज्येष्ठः पुत्रोपि नश्यति। अमायुक्ता न कर्त्तव्या प्रतिपच्चंडिकार्चने॥ धनार्थिभिर्विशेषेण वंशहानिस्तु जायते। नदर्शकलयायुक्ता प्र
तिपच्चंडिकार्चने। उदये द्विमुहूर्त्तापि ग्राह्या सोदयगामिनी॥ हदयामले। अमायुक्ता सदा देवि प्रतिपन्निंदिता मता। तत्र वै स्थापयेत्कुंभं दुर्भिक्षं
जायते ध्रुवं। प्रतिपत्सद्वितीया स्यात्कुमारीपराक्रमेणीति॥ यत्तु कौशिवडुक्तं। नदर्शकलयेत्वा द्विश्रुतप्रफलप्रदमिलंता निश्चमायोगनिषेध

कानियानि वर्द्धितीयाशेषसंयुक्ताप्रतिपद्यं डिकार्थेने।। मोहाद्यो पदेशाद्वा हताश्च विनाश हतं। आरंभेनव रात्रस्य द्वितीया युतोसंयुक्तानकेवलं
तिथिं हंति वेधात्साभु त्रयं संपद इत्यादीनि द्वितीयायोगनिषेधकानि मासुभयविधान्यपि सर्वाणि निर्मूलानि समूलत्वेपि परस्परं सत्यातिपक्षतादनिर्णा
यकानीति तत्स्याठि वाद्यमात्रं प्रसक्तातो देवीपुराणो सर्वैपाम वोपलंभात।। वाक्यो पपत्तिरपी त्यं कर्त्तव्या नंद शंकलयेत्पा द्विवाक्यानि प्रतिपदः खंडत्वेपू
र्वेविद्धानिषेधकानि। द्वितीयाशेषसंयुक्तेत्याहि वाक्यानि त्वयदा मा विद्धा प्रतिपत्पर दिनेनास्ति तदा विद्धापि याह्येत्येत त्सराणि एतद्विषयाएयेवं अमा
युक्तैव कर्त्तव्या प्रतिपद्यं डिकार्थेन इत्यादीनि न्यायसिंहप्रमादोदाहृतानीति। अत्रेदं तत्वं। या पूर्वेद्युर्दिने षष्टिदंडाभूत्वा परदिने त्रिमुहूर्त्तापि सामायो
गाभावात्पूर्वैव ग्राह्या स्पृशाति तात। आदित्योदयवेलायामारभ्य षष्टिनाडिकाः। तिथिस्तु सा हि शुद्धा स्यात् सार्वतिथ्यो ह्ययं विधिरिति नारदीयात् तानि
वाद्वितीयायोगनिषेधकानि सनातनेतान्यपि शुद्धाधिकानि षेधपराणि। परदिने प्रातिपदो त्यंतासत्वे तु प्रतिपदयमा वा सेति युग्मवाक्याद्दर्शयु
तैव ग्राह्येति। तदाह लल्लः। तिथिः शरीरं तिथिरेवकारणामित्यादि। कालतत्वविवेचनकारे स्तदस्तु सारेमिश्वमाधवहेमाद्याद्युक्तं नक्तव्रततत्व गाम्भ.
न्तेऽधेनरवंडाप्रतिपत्प्रदोषव्यापिनीग्राह्येत्युक्तं। नक्तव्रतत्वं च न नक्तभोजनरूपत्वात्। तस्य पाह्निकत्वादंगत्वाच्च।। किं तु पूजारूपस्य दं५

64A मध्यान्नस्नानन्तु कालमाध्यतावूतेव। निशि भ्रमंति भूता निशक्रयः स्थलमूयत इत्यादिसामान्यवचनात्। आश्विने मासि मेघांते महिषासुरमर्दि
नी। निशासु पूजयेद्भक्त्या सोपवासादिकं क्रमात्। तथा। आश्विने मासि मेघांते प्रतिपद्यातिथिर्भवेत्। तत्सां नक्तं प्रकुर्वीत रात्रौ हे वीन पूजयेत्। तथा
मासिवाश्वयुजे शुक्ले नवरात्रे विशेषतः। संपूज्य नवदुर्गां च नक्तं कुर्यात्समाहितः। नक्तेन नक्तभोजनमिति पाद्मे कनक भोजन परामर्शः। तथा रात्रि
व्रतमिदं देवि सर्वपापप्रणाशनं। सर्वकामप्रदं न्हृणां सर्वशत्रुनिवर्हणं। तथा रात्रिव्रतमिदं तत्स रात्रौ कर्त्तव्यते व्यत इत्यादि देवीपुराणादि
वचनेभ्यश्चाग्रामस्तेऽप्येवं च पूजादिरूपस्य प्रधानस्य रात्रिकालत्वावस्थिते कर्माङ्गोपस्य यः काल इति वचनात् प्रदोषव्यापिनी प्रतिपन्नवरात्रव्र
ते ग्राह्या। तत्र पूर्वाह्नि न स्त्र व प्रदोषव्याप्तौ परवा। एतद्विषयाण्येव अमायुक्तैव कर्त्तव्येत्यादि न्यासिंह प्रासाहोदाहृत वचनानि। द्वितीयाशेषसंयु
क्तेत्याहि लल्लसंहितावचनानि च। तथा हि द्वितीयादिकलोपेता प्रतिपच्चण्डिकार्चने। वर्जनीया प्रयत्नेन विषलेशो पयांभसि। धवलनिबंधे दे
सुवा च। प्रतिपत्स्तु षसंयुक्ता द्वितीयायां ममार्चनं। हन्तं धर्मं नाशयति संततिं पुत्रपौत्रिकीं। अमायुक्तैव सा ग्राह्या प्रतिपच्चण्डिकार्चने। अन्यथा
करोति तावद्वाऽपभंगाः प्रजायन्त इत्यादीनि वादे न द्वयेत घ्याप्राउत्तरा। दिनद्वये तद्व्याप्तावपूर्त्तरैव। सामान्यरूपगोणकालव्याप्तिलाभात्तार

जयसिंहकृ०
६५
65

न द्विषयारोपे तु द्वितीयायुक्तविधायकान्यमायुक्तनिषेधकानि वचनानि । द्विमुहूर्त्तापीत्यपि शब्देन कैश्चित्सन्ध्यापप्रदर्शनात्कलादिशब्दा अविरु
द्धाः । यत्तु आद्यास्तु नाडिकास्त्याज्याः षोडश द्वादशापि वा । अपराह्णे तु कर्त्तव्यं शुद्धसंततिकांक्षिभिरिति वचनं तदाद्याः षोडश नाडीस्तु लब्ध्वा
यः कुरुते नरः । कलशस्थापनं तत्र अरिष्टं जायते ध्रुवमिति वचनांतरैकवाक्यतया कुलाचारप्राप्तकलशस्थापनविषयं । एवं द्वितीयाविद्धप्र
तिपद्विधायकानि वचनानि वस्तुतस्तु द्विषयारोपे वेत्येवमाहुः । तत्र प्रारंभतिथेः खंडत्वे समग्रत्वे वा देवीपूजनरूपं व्रतं कदा प्रारब्धव्यमिति
संशये कालव्याप्यानिरोपापत्तेस्तत्कालो निर्णयः । अत्र गौडाः पूर्वाह्ण एव तत्कालः । तथा च सैव च निर्णयः । तथा हि । देवीपुराणे । प्रातरा
वाहयेद्देवीं प्रातरेव प्रवेशयेत् । प्रातः प्रातः श्च संपूज्य प्रातरेव विसर्जयेत् दिति ॥ अत्र प्रातःशब्दः पूर्वाह्णपरः । आश्विनस्यासिते पक्षे नवरात्र
मुपोषितः । सुस्नातस्तिलतैलेन पूर्वाह्णे तु पूजयेच्छिवामिति । तत्र स्ववचनानुरोधात् । तथा तत्रैव भगवत्याः प्रवेशादिविसर्गांताश्च याः क्रि
याः । तिथ्योरुदयगामिन्योः सर्वास्ताः कारयेद्बुध इत्याह्विचा तस्मात्पूर्वाह्ण एव पूजादि कर्त्तव्यमिति प्राहुः । अयमेव वस्तुस्थ्यः पक्षइति प्रतिभा सम्
ति । पूर्वाह्णे तु देविकर्मैत्यादि पूर्वाह्णे वै देवानामित्यादिस्मृतेः । शरत्काले महापूजा क्रियते या च वार्षिकी । सा कार्योदयगामिन्यां न तत्र तिथि ६५

65A

युग्मतेत्यादिनं हिकेष्वप्युगागादिवचनाच्च । युग्मतेति नयुग्मवाक्यात्तु रोधे न निर्णयः इत्यर्थः । वार्षिकीत्यनेन संवत्सरस्यादौ चैत्रशुक्लप्रति
पद्युपक्रम्यमन्वब्दं तत्पूजाभिधीयते । तत्र शशरद्वसंतयोः सुल्पए वडुर्गोत्सवः कार्य इति फलितं निर्णयसिंधौ तु । गौडनिबंधेषु निर्णया दौ
दयिकी ग्राह्या । तत्रापि घटिकैकेत्यसमुहूर्त्तेत्युक्तित्वात्त्रिंहिमुहूर्त्ता ग्राह्या । उदिते दैवतं भानावित्यत्र द्विमुहूर्त्ता त्रिमुहूर्त्ता चेति वचनाद्दादयि
क्यादिमुहूर्त्ता याएव ग्राह्यत्व नियमात् । तेनोदये द्विमुहूर्त्ता पीत्याघनुसारे पि मुहूर्त्तमात्रा कर्तव्येति द्विमुहूर्त्तेत्युक्तिरिति स्थितं ॥ एवममा
युक्तायापा निषेधादपि शुद्धहस्तसमस्त कर्मकालत्वं तथाच देवीपुराणे । कुहूकाष्ठोपसंयुक्तां वर्जयेत्प्रतिपत्तिथिं । राष्ट्रनाशाय सा प्रोक्ता निहि
ताराष्ट्रपूजनं इति रुद्रयामले । अमायुक्ता सदाचैव प्रतिपत्सिंदितामम । तत्र चैत्स्थापयेत्कुंभं दुर्भिक्षं जायते ध्रुवं । प्रतिपत्साद्वितीयात्र कुंभा
रोपणकर्मणि इति ॥ यत्तु कौष्टिके तं रुद्रयामलडामरवचनं निर्मूलमिति तन्न । तयोरपि वेदांगत्वादागमादन्यांगत्वप्रामाण्यस्वीकर्तव्यत्वात् ।
तदुक्तं शिवार्चनचंद्रिकायां कपिलपंचरात्रे । न वेदः प्रणवं त्यक्त्वा मंत्रो वेदसमुत्थितः । तस्माद्वेदः परो मंत्रो वेदांगश्चागमः स्मृतः । वशपाकर्षी
हिकं कर्म दृष्टादृष्टफलप्रदम् । वेदेन साध्यतः सर्वं यह यज्ञादिभिः किल । न वेदेन विना यज्ञा न वेदाः यज्ञवर्जिताः । तस्माद्वेदः परो मंत्रो न मं

त्रो हेवे वर्जितः। न मंत्रेऽत्राधिकारोस्ति शूद्राणां नियमः पुंसः। मंत्राभासादमंत्रे राभाषितं सर्वं कर्महीति। शारदादीकायामपि। अस्ति हि आगमा
नामपि श्रुतिमूलत्वं। प्रत्यक्षोपलब्धश्रुतिमूलकरामपूर्वोत्तरतापिनीयनृसिंहपूर्वोत्तरतापिनीयसौरशाक्तशैवपंचाक्षरात्मिकासुश्रीवि
द्यादिष्वप्रत्यक्षात्श्रुतिराथर्वणादुपलभ्यत एव अत एव छांदोग्यास्तवाकांडमेव आगमशास्त्रात्मकं लोकप्रसिद्धं। किंच। ऋग्वेदस्य तु अष्टकात्तती
याध्याय प्रथमवर्गे च तृतीयाम मल्लिश्रीविद्यामंत्रोद्धारः श्रूयते। सा च चत्वार ईं बिभ्रति क्षेमयंतो दशगर्भं चरसे धापयंते। त्रिधातवः परमा अस्यगा
वो दिवश्चरंति परिसद्यो अंतानिति। अस्यार्थस्तु लक्ष्मीधरकृतसौंदर्यलहरीटीकायां द्रष्टव्यः। तस्मात्सर्वेषां रुद्रयामलडामरादिवेदागमे वे
तिकवैदिकरूपेषु। निर्णयसिंधौ तु। एषु वचनेषु कलशस्थापनगृहणात् तदेव प्रथमे दिने निषिध्यते। न तूपवासादि। तत्प्रातिपद्घस्रा वा
सोऽतिथियुग्मवाक्याच्छुक्लास्यात्प्रतिपत्तिथिः। प्रथमत इति दीपिकोक्तेः। शुक्लपक्षे दर्शविद्धतिथावश्वोतोके श्च पूर्वदिने प्राप्तस्य बाधे मानाभावात्तद्
तिथेवित्। वस्तुतस्तु पूर्वोक्तवाक्येषु चंडिकार्चनं एव जनगृहणादुपवासादेश्चांगत्वात्प्रधानदेवीपूजादावपि परेति युक्तं। कलशस्थापनगृहणमः
रणं। तदुपलक्षणं। अत एव देवलः। व्रतोपवासनियमे घटिकैकापि या भवेत्। सा तिथिस्तद्दिने पूज्या विपरीता तु पैतृके इति स्थितं। प्रसंगा ६६

66A त्वद्वितीयायुक्तप्रतिपद्दोयास्य नावेधकान्नमाशुक्लायायानिषेधकान्न्यान्यापिवाक्यानिलिख्यंते। याचाश्वयुजमासेस्यात्प्रतिपद्भद्रयान्विता। शुद्धा
समावर्जनं तस्यांश तयज्ञफलप्रदा। देशभंगोभवेत्तत्रदुर्भिक्षंचोपजायते। नंदायां दर्शयुक्तायां यत्रस्यान्ममपूजनं। तस्माद्ध्वादविताने दानवाणत्रे
प्रशस्यते। आश्विने मासि मेभक्तैः कर्तव्या प्रजक्षणा सगा। प्रतिपत्त्रिमुहूर्तापि उत्तपौत्रप्रवर्द्धिनी। धनवृद्धिकरी पुंसां सर्वसौख्यकरी तथा। अतोन्य
थानकर्तव्यानवरात्रव्रतेमम। योन्यथाकुरुतेमोहाद्धाज्ञापूजाविधौमम। तस्यराष्ट्रप्रजानाशं करिष्यामिन संशयः। तामप्यास्वहितायाध्यानकृद्धावि
द्धिच्छ्रक्ष्यौः। सर्वक्षयकरीयस्मात्तस्मात्तांपरिवर्जयेत्। अमावास्यायुतांकुर्याद्यदिकाश्चित्कदाचन। अल्पनाशमवाप्नोति पंचत्वं चाधिगच्छति। द्व
विवृद्धात्तुपास्तस्क्ताभवेत्प्रतिपदाश्विनी। नवरात्रव्रतंतस्यांन कार्यंशुभमिच्छतेस्तादि। तथा। यथा द्वादशभिर्मासैर्मासो वृद्धो मलिम्लुचः। त
थातिथिस्त्रुहोरात्रवृद्धोपोकामलिम्लुचा। यथामलिम्लुचः पूर्वोमासोदैवस्त्यथोत्तरः। साज्यातिथिस्तथा पूर्वायाह्यादैवेतथोत्तरेत्याहि। प्रति
पद्दिवि चावैधस्यादियोगानिषेधो भार्गवार्चनदीपिकायां देवीपुराणे। प्रारम्भं नवरात्रं स्यादित्वा चित्रां च वैधृतिमिति। त्वाष्ट्रवैधृतियुक्तावेत्प्रति
पद्वाडिकार्चने। तयोरंते विधातव्यं कलशारोपणं गृहे। रुद्र्यामले पि। वैधृतौ पुत्रनाशः स्याच्चित्रायां धननाशनं। तस्मान्नस्यापयेत्कुंभं

चित्रायां वैधृतौ तथेति ॥ तत्र विशेष उक्तः कात्यायनेन । प्रतिपद्याश्विने मासि भवेद्वैधृति चित्रयोः । आद्यपादौ परित्यज्य प्रारभेन्नवरात्रकं ॥ मत्स्ये । चित्रा वैधृति संयु
क्ता प्रतिपच्चेद्भवेन्नृप । त्याज्या स्यं शास्त्रपत्वा घात्तुरीयांशे तु पूजनमिति । चित्रा वैधृतियुक्तापि द्वितीया युक्ता चेत्सैव ग्राह्येत्युक्तं दुर्गोत्सवे । भद्रान्विता चेत्प्र
तिपच्चलमप्रतौ विहाय द्वयोगेऽपि संगता सती । सैवापराह्ने विविधैर्विधेयाश्रीपुत्रराज्यादिविवृद्धिहेतोरिति रुद्रयामले ॥ संपूर्णा प्रतिपच्चेद् चित्रायु
क्तापि दा भवेत् । वैधृत्या वापि युक्ता सा तदा मध्यादिने रवौ । अभिजिन्मुहूर्ते यत्तत्र स्थापनमिष्यत इति ॥ एवं रात्रौ चित्रावैधृत्योः तल्लाभेऽपि दैवव
कलशस्थापनं कार्यं न रात्रौ स्थापनं कार्यं न च कुंभाभिषेचनमिति वचने रात्रौ तन्निषेधात् ॥ विष्णुधर्मे ॥ भास्करोदयमारभ्य यावत्तु दश नाडिका न
प्रातःकाल इति प्रोक्तः स्थापनारोपणादिषु । अथ विस्तरेण नवरात्रकृत्यं । आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकं प्रतिपदादिक्रमेणैव यावच्च न
वमी भवेत् ॥ भविष्योत्तरे ॥ एवं च विंध्यवासिन्यां नवरात्रोपवासतः । एकभक्तेन नक्तेन तथैवायाचितेन वा । पूजनीया जनैर्देवी स्थाने स्थाने पुरे पु
रे । गृहे गृहे शक्तिपरैर्ग्रामे ग्रामे वने वने । स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः । वैश्यैः शूद्रैर्भक्तियुतैर्म्लेच्छैरन्यैश्च मानवैः । स्त्रीभिश्च कुरुशार्दूल·
हूलतद्विधानमिदं श्रावति । विंध्यवासिन्यामधिष्ठाने देवी पूजनीयेति संभवाभिप्रायेणान्तु नियतं । स्थाने स्थाने पुरे पुरे गृहे गृहे तत्संभवात् । अत्रोपवा ९६

67A मादिदेवीपूजाकुमारीकापूजादिवहुकर्म्मविधानेपि पूजायाएव प्राधान्यं। पूजयित्वाश्विने मासि विशोको जायते नरः इति हेमाद्रौ भविष्योत्तरस्याएव प्रकृतं
वंधात्मात। अनन्तरोक्ते अन्यथाहि। मार्गवतेच्छेरुद्रविष्णुंकुजानाः कात्यायन्यर्चनं ज्ञातमिति। देवीपुराणेपि शारदीपूजासु पंचकर्म्मोक्तं। महाव्रतं महापुण्यं
शंकराद्यैरनुष्ठितं। कर्त्तव्यं सुरराजेन्द्र देवीभक्तिसमन्वितैरिति। तस्याएव हितत्वे वान्यद्वारापि कर्त्तव्यत्वाभिधानेनावश्यकर्त्तव्यताप्रतीयते। स्वयं वाप्यन्य
तो वापि पूजयेत्पूजयेत्तिवेति। पूजायाएव हि विविधत्वमुक्तं स्कंदपुराणे भविष्ये च। शारदी चंडिकापूजा त्रिविधा परिगीयते। सात्विकी जपयज्ञाद्यैर्नैवे
द्यैश्च निरामिषैः। माहात्म्यं भगवत्याश्च पुराणादिषु कीर्तितं। पाठस्तस्य जपः प्रोक्तः पठेद्देवीमनास्तथा। राजसी बलिदानेन नैवेद्यैः सामिषैस्तथा। सुरामांसाद्यु
पहारैर्जपहोमैर्विना तु या। विना मंत्रैस्तामसी स्यात्किरातानां तु संमता। ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः। एवं नानाम्लेच्छगणैः पूज्यते सर्वदस्यु
भिरिति। अत एव हेमाद्रेरपि पूजात्वमुक्तं लिंगपुराणे। शारदीया महापूजा चतुःकर्म्ममयी शुभा। तां तिथित्रयमासाद्य कुर्याद्भक्त्या विधानतः इति। अत्र
वस्नपनपूजनवलिदानहोमरूपाणि चत्वारि कर्म्माणीत्युक्तं। कालतत्त्वविवेचने तिथित्रयं सप्तम्यादि महानवम्यंतं देवीपुराणे। कन्यासंस्थे रवौ शक्र शु
क्लामारभ्य नंदिकां। अयाची ह्येकभक्ताशी नक्ताशी वाथवास्वदः॥ प्रातःस्नायी जितद्वंद्वः त्रिकालं शिवपूजकः। जपहोमसमायुक्तः कन्यकां भोजयेत्तदा

जयसिंहक:
६८
68

।शिवश्चशिवा च शिवौ तयोः पूजकः॥ इति मयूरखंडे भौशयीत्वा मंत्र्यकुमारीभोजयेन्मुदा। वस्त्रालंकारदानैश्च संतोष्याप्नोति वासरं। बलिंच मत्यहं दद्याद्दोहनं
मांसमाषवत्। त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणः॥ इति। नंदिकाशरत्पदेति मैथिलाः। षष्ठीति गौडाः। माघकाम्यानि त्या चा एवमन्येऽपि तथा देवाः
कार्यं प्रपूजनं। विभूतिमतुलां लब्ध्वा चतुर्वर्गप्रदायकमिति। यो मोहाद्यथवालस्याद्देवीं दुर्गां महोत्सवे। न पूजयति दंभाद्वा द्वेषाद्वाप्यथ भैरव। क्रुद्धाम
वतीतस्य कामानिष्टान्निहंति वै। इति कालिकापुराणोक्तफलनिंदाश्रुतेः। भविष्ये तु रेपि। भवानीतुष्टये पार्थ संवत्सरसुखाप्तये। भूतप्रेतपिशाचानां नाशार्थं
चोत्सवाय चेति। अन्यत्रापि पूजयित्वाश्विने मासि विशोको जायते नर इति। वर्षे वर्षे विधातव्यं स्थापनं च विसर्जनमिति तिथितत्त्वे देवीपुराणाच्च
।पूजावराचावपिकार्या। आश्विने मासि मेघांते महिषासुरमर्दिनी। निशासु पूजयेद्भक्त्या सोपवासादिकः क्रमादिति देवीपुराणात्। संग्रहेपि
।आश्विने मासि मेघांते प्रतिपद्यातिथिर्भवेत्। तस्यां नक्तं प्रकुर्वीत रात्रौ देवीं प्रपूजयेत्। रात्रिरूपा यतो देवी दिवारूपो महेश्वरः। रात्रिव्रतमिदं देवि सर्व
पापप्रणाशनं। सर्वकामप्रदं नृणां सर्वशत्रुनिवर्हणं। रात्रिव्रतमिदं तस्माद्रात्रौ कर्तव्यतेष्यते। न जात्रव्रतमिदं यस्मादन्यथा नारकेगतिरित्यादिवचनाच्च राम:
।अष्टम्यां विशेषतोपि रात्रौ पूजा विहिता। निशायां पूजिता देवी वैष्णवी पापनाशनी। तस्मात्सर्वप्रयत्नेन अष्टम्यां निशि पूजयेत्। कन्यासंस्थे रवावी ६८

68A षेयाश्रुक्लातिथिरष्टमी। तस्यां रात्रौ पूजितव्या महाविभवविस्तरैरितिच। यत्तु। अतोर्थं पूजनीया सा तस्मिन्नहनि मानवैरिति तत्राहुः यदंतिथिरूपवाद्ववादि
न परां तस्मिन्निति प्रकृताष्टमीपरामर्शात्। ननु आश्विनस्य सिते पक्षे तत्तादि पूर्वोक्तवचनैः रात्रिपूजाभिहिता। प्रातरावाहयेद्देवीमित्यादिवचनैस्तु पू
र्वाह्णे पूजनमभिहितं। एवं एतेषां वचनानां परस्परं विरोधे कुत्र पूजनं कर्त्तव्यमिति चेत्। अत्रोच्यते प्रातर्मध्याह्नयोः संक्षेपपूजनं अंगादि विस्तरपूजनं
तु रात्रावेव रात्रौ शक्तौ पूजनस्य फलाधिक्यात्। एवं सति प्रातरेव कलशस्थापनादिपूर्वकं देवीस्थापनं पूर्वाह्णे तु पूजयेच्छिवामित्यादिवचनात्। निष्प्रथमका
लपूजार्थकानि च संगच्छंते। तथा च देवीपुराणे कालत्रयेपि पूजनमुक्तं। त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणः इति। नवरात्रे रूपं कर्म तु दशमीपर्यं
तं कार्यं। संपूज्य प्रेषयेत्तां कुर्याद्दशम्यां शावरोत्सवैरिति भविष्योत्तरात्। अत्र प्रतिपदमारभ्य नवमीपर्यंतं वृद्ध्या पूजाजपकुमारीपूजनादिकं विहितं
। यद्याघे दिवसे कुर्यात्वृद्धिकापूजनादिकं। द्विगुणां तद्द्वितीयेन्हि त्रिगुणां तत्परेहनि। नवमीतिथिपर्यंतं वृद्ध्या पूजाजपादिकमिति। अत्र केचित्। नवरा
त्रशब्दो न्वाहोरात्रपर इति मत्वा तिथिवृद्धौ तिथिह्रासे न वरात्रमपार्थकमिति एवं पक्षायित्वा वृद्धौ समाप्तिरष्टम्यां ह्रासे मा प्रतिपत्त्रिशी। प्रारंभो नववं
ध्यासु नवरात्रमतो र्थं वदिति देवीपुराणवचनेन समादधिरे। अन्ये तु वचनमिदं निर्मूलमिति मत्वा तिथिविशेषपरतामेवाहुः। उक्तं चैतत्। अमावा

जयसिंहकं
६९
69

स्मारात्रैरमतिपञ्चेशाभावेपिप्रतिपत्प्रभृत्येवात्यंतापत्त्येनाष्टरात्रोपजनेतिवद्याचाष्टम्यहोरात्रास्पर्शिनवमीगृहीत्वाष्टमारात्रोपजनेतिथिवि
शेषपरत्वस्यावश्यकत्वात्।प्रारंभोनवरात्रस्येत्यादौतुनवरात्रशब्दस्यलक्षणयाकर्मपरत्वं।अत्रचकालतत्त्वविवेचनकाराः।नवरात्रशब्दोरात्रिश
ब्दस्यतिथिविषयत्वेवाक्येकवाक्यतयाऔत्सर्गिकसंभृतातिथ्यौवषाप्रयोगव्यवहारविषयत्वेनसंप्रतिपत्त्यावतिथिलक्षकत्वात्।सप्तमंत्तःकाल
रूपगुणविधिः।द्वितीयांतोपिकविच्छुरतःकालाध्वनोरत्यंतसंयोगइतिवचनात्वताहशाएवानतुनामधेयं।तत्रैवग्रंथेवाक्यांतरेणाप्यवच्छिन्नत्वानि
मित्तकालसंबंधस्याविधानेनतत्प्रत्यभिज्ञायाभावात्।स्तुत्यागुणविधानेसंभवतिबहुव्रीहौसमासांतानुपपत्त्यासमाहारद्विगुत्वेनरात्रिसमुदा
यवचनतयानिरूढप्रायस्यलक्षणयानामधेयत्वानौचित्यात्।नवरात्रोपक्रमतइत्यत्रकथंचिदुपवाससामानाधिकरण्यसंभवेपिप्रधा
नेनएकेननवैकलिंगैककर्मत्वादिनिरस्वीकृतनादिघटितसमुदायेनवासामानाधिकरण्याभावाच्च।नवतिथिह्रासवृद्ध्योर्गुणविध्यसंभ
वान्नित्यवच्छेदकत्वाविरोधः।नामधेयत्वंतुयदाकदाचित्प्रवृत्तिनिमित्तस्यज्ञानेनाप्युपपन्नं।वैश्वदेवशब्दस्यैवैकदेवतासंबंधेनेतिवाच्यं।त्रिश राम:
ब्दस्यतिथिपरत्वेनह्रासवृद्ध्योरपितद्गुणविधिसंभवेनाविरोधात्।।ह्रासेतिथिद्वयप्रयुक्तस्यरज्ञादेस्तंत्रानुष्ठानेनवृद्धौचैकतिथिप्रयुक्तस्यप्र ६९

69A

क्रांतनियमभंगभयाच्छक्त्यानुष्ठानेनसर्वेद्युनवतिथिप्रयुक्तकर्मत्वादितिदीक्षितनिर्णयसिंधुकारप्रभृतयोप्येवमेवाहुः। अत्रमुख्यक
ल्पेऽसमर्थस्यान्येपिपक्षाउक्ताः। अथवानवरात्रंवसप्तपंचत्रिकादिवा। एकभक्तेनक्तेनयाचितोपोषितैः क्रमादिति। अत्रादिशब्देनाष्टरा
त्रद्विरात्रैकरात्रपक्षाः संगृहीताः। भविष्यपुराणेपि प्रपूजयेद्देवींसप्तम्यादिदिनत्रयमिति॥ भविष्योत्तरेपि॥ ॥आश्विनेमासिशुक्लेतुकर्त्तव्यं
नवरात्रकं। प्रतिपदादिक्रमेणैवयावच्चनवमीभवेत्। त्रिरात्रंवापिकर्त्तव्यंसप्तम्यादियथाक्रममिति। अष्टमीनवम्योरेववादेवीपूजनंकर्त्तव्यं॥ अष्टम्यांचन
वम्यांचजन्ममोक्षप्रदांशिवांपूजयित्वाश्विनेमासिविशोकोजायतेनरइति। केवलाष्टमीकेवलनवमीकल्पावुक्तौकालिकापुराणे। यस्त्वेकस्यामथाष्ट
म्यांनवम्यामथवाऽपिसाधकः। पूजयेद्वरदांदेवींमहाविभवविस्तरैरिति॥ गोविंदार्णवेदेवीपुराणेपि॥ नवरात्रव्रतेऽशक्तःत्रिरात्रंचैकरात्रकंव्रतंचरतियोभक्त्या
स्तस्मैदास्यामिवांछितमिति। भविष्ये॥ प्रथमाद्वितीयातृतीयावचतुर्थीनराधिप। एतास्तुएकभक्तेनप्रवदंतिमनीषिणः॥ नेपाइतिशेषः। पंचमीच
तथाषष्ठीसप्तमीवाष्टमीतुच। उपवासपरोभूत्वापूजयेच्चंडिकांधरेति। सप्तरात्रपक्षोहेमाद्रौयामले। दुर्गोत्सवेऽस्मजंदेकिउपवासस्यसप्तके॥ अष्टमेदिव
सेहोमःततःकिंचित्तुभक्षयेदिति। पंचरात्रपक्षोभविष्ये॥ एकभक्तंतुपंचम्यांषष्ठ्यांनक्तंप्रवर्त्तयेत्। अयाचितंतुसप्तम्यामष्टम्यांतुउपोषितः। नवम्यां

जयसिंहक॰
१०
70

पारणं कुर्याद्दिनस्येवं पंचरात्रकमिति ॥ षष्ठ्यादि पक्षोप्युक्तः कालिकापुराणे ॥ बोधयेद्बिल्वशाखायां षष्ठ्यां देवीं फलेषु च । सप्तम्यां बिल्वशाखायां तामाहृ
त्य प्रपूजयेत् ॥ पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत् । जागरं च स्वयं कुर्याद्बलिदानं महानिशि ॥ प्रभूतबलिदानं च नवम्यां विधिवच्चरेत् ॥ ध्यायेद्दशभु
जां देवीं दुर्गां तं ते न पूजयेत् । विसर्जनं दशम्यां तु कुर्याद्वै सारवोत्सवैः ॥ धूलिकर्दमविक्षेपैः क्रीडाकौतुकमंगलैः ॥ भगलिंगाभिधानैश्च भगलिंगप्र
गीतकैरिति ॥ कल्पांतरप्रतिपादकं देवीपुराणेपि ॥ इषे मासि सिते पक्षे कन्याराशिगते रवौ ॥ नवम्यां बोधयेद्देवीं क्रीडाकौतुकमंगलैः ॥ ज्येष्ठानक्षत्रयुक्ता
यां षष्ठ्यां बिल्वाभिमंत्रणं । सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनं । पूर्वाषाढायुताष्टम्यां पूजा होमाद्युपोषणं । उत्तरेण नवम्यां तु बलिभिः पूजयेच्छि
वां ॥ श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेदिति । अत्र देवीपूजाप्रकारस्तु क्रोडपत्रे मलमासनिर्णये मांगलिकं कृत्यं ततो देवीं प्रपूजयेत् ॥ शुभा मृन्मृत्तिका
मिश्रपूर्वैः कृतां तद्वत्हैमीं ॥ यवान्नैर्वा पयः पात्रगोधूमैश्चापि संयुतां वा । तत्र संस्थापयेत्कुंभं विधिना मंत्रपूर्वकं ॥ सौवर्णं राजतं वापि ताम्रं मृन्मयजं तथा
प्रतिमां पूजयेत्तत्रेति ॥ प्रतिमां तु मंडलमध्ये स्थापितकलशोपरि स्थापयित्वा पूजयेत् । पूजा मंडलकुंभस्थिति देवीपुराणात् ॥ सा च हेमादिनयी राम॰
भवति । तस्मिन्देवीप्रकर्त्तव्या हैमी वा राजती तथा ॥ महाक्षीलक्षणोपेतां पदे शूलेऽथ पूजयेत् ॥ तथा हैमराजतमृद्दारुशैलचित्रापि वा १०

70A स्वर्णेश्व लोर्विन्ना देवी सर्वकामफलप्रदा ॥ तथा स्फटिकमयी प्रतिमां कृत्वा विल्वैर्मार्यस्तु पूजयेत् ॥ आत्मविन्नाशमारे ताम्रजमे न्मौलिकं पलाशमस्यादि देवीपु
राणादि वचनात् । अन्यत्रापि । कांचनी राजती ताम्री पैत्तली मृण्मयी तथा ॥ वार्क्षी मणिमयी चैव वर्णकैर्लिखिता तथेति । अन्यत्रापि । कांस्ये विभवतः सु
भेति हयशीर्षे पंचरात्रे मृण्मयी दारुघटिता लोहजा रत्नजा तथा । शैलजा गंधजा चैव कौसुमी सप्तधा स्मृता । कौसुमी गंधजा चैव मृन्मयी प्रतिमा
हिता ॥ तत्कालपूजिताश्चैताः सर्वकामफलप्रदाः ॥ अथासां फलानि । स्वाहजा का महाप्रोक्ता सौवर्णी भुक्तिमुक्तिदा । राजती स्वर्गसुखदा ताम्री स्यात्पु
त्रविवर्द्धिनी । कांस्या बहुधा पदं हंति रीतिकी शत्रुनाशिनी । सर्वभोगप्रदा शैली स्फाटिकी मोक्षकारिका । महाभोगप्रदा ख्याता मृन्मयी रत्नशोभना ॥ दे
वी मृत्तिका च यन्नं दुर्गाभक्तितरंगिण्यां देवीपुराणे ॥ याम्यास्या शुभदा दुर्गा पूर्वास्या जयवर्द्धिनी ॥ पश्चिमाभिमुखी स्वच्छा प्यानस्या प्यासौम्यदिङ्मुखी
प्रतिमा भाववृशेषप्रत्यैव ॥ यद्यदस्या प्रधर्षं प्रोक्तं तस्मिन् तस्मिन् पूजयेत् ॥ देवीभक्त्या विंता उसारा ज्यायुः स्तनसौख्यदा । हव्यतलाग्नि वेकालि कुंभपु
राणे ॥ लिंगस्था पूजयेद्देवीं मंडलस्थां तथैव च । पुस्तकस्थां महादेवीं पावके प्रतिमास्तु च । चित्रे च त्रिशिखे खड्गे जलस्था वापि पूजयेत् । चित्रमृन्मु
प्या दौ स्नाना घसंभवे तत्रैवोक्तं । अंतिके स्थापिते खड्गे स्नापयेद्दर्पणो धवेति ॥ अन्यत्रापि अंगुष्ठपर्वमारभ्य वितस्तिर्याव देव तु । गृहे तु प्रतिमा कार्या

जयसिंहक॰
७१
71

नाधिका शस्यते बुधैरिति। मानांगुलप्रमाणेन दशपंचांगुलाधिका गृहे तु प्रतिमा पूज्या नाधिका हि प्रशस्यत इति॥ सौम्या तु हस्तमात्रा वसुदा हस्तद्वयो
च्छ्रिता प्रतिमा क्षेमसुभिक्षाभवे त्त्रिचतुर्हस्तप्रमाणां चेतितु स्थापित्त प्रतिमा विषयं ज्ञेयं। मृन्मय्यां विशेष उक्तः। मृन्मयीं प्रतिमां वक्ष्ये यथा वज्ञां निवो
धमे पक्वापक्व द्विधा प्रोक्ता मृन्मयी प्रतिमा क्रमात्। सर्वैर्लोकानसंसंतिप्रतिमां दग्धमृन्मयीं अपक्वा प्रतिमा शस्ता सैव कार्या विचक्षणैः। स्वधया वै
वकर्त्तव्या नाशमन्नर्णैः कदाचन॥ अथ मृच्छेदः। मृदैवं मृन्मयीं कुर्याद् यथावदनुपूर्वशः॥ ब्राह्मणस्य सिता मृद् हैक्षत्रियस्यारुणा स्मृता। अन्यत्रान्यप
भयमृत्स्नायां हीना पामकलताकृतैः। क्षामोदर्यां क्षुद्भयमर्थविनाशः कृशांगायां। मरणं तु सक्षतायां शस्त्रनिपातेन निर्दिशेत्कर्त्तुः। वामे विन
ता पत्नी दक्षिणे विनता हिनस्त्यायुः॥ अंधत्वमूर्ध्वदृष्टौ करोति चिंतामधोमुखी दृष्टिः। सर्वप्रतिमास्वेवं शुभाशुभं गात्र कारो क्रमवगच्छेदिति। तथान्यत्रा
पि॥ नाधिकांगी न हीनांगी कर्त्तव्या देवता क्वचित्। अधिका शिल्पिनं हन्यात् कृशा वै वार्थनाशिनी॥ कृशोदरी तु दुर्भिक्षं निर्मासा धननाशिनी। वक्र
नासा तु दुःखाय संक्षिप्तांगी भयंकरी। चिपिटा दुःखशोकाय अनेत्रा नेत्रनाशिनी। दुःखदा हीनवक्त्रा तु इत्यादि। पाणिपादविहीनायां जायते नरः राम॰
कोमहान्। जंघाहीना च या मूर्त्तिः शत्रुकल्याणकारिणी। पुत्रमित्रविनाशाय हीना वक्षःस्थले तु या। संपूर्णावयवा या तु आयुर्लक्ष्मीप्रदा सदा॥ एवं ७१

71A

लक्षणामासाद्य कर्त्तव्यास्तूर्णिहन्नमेति। अन्यच्च विशेषः खंडितेस्फुटिते भ्रष्टे दग्धे मानविवर्जिते। या गृहीने यत्नो दुष्टे पतिते दुष्टभक्षमिष्ठ॥ अन्यमंत्राविं
ते चैव पतितस्पर्शदूषिते। दृश्यस्वेतेषु नो वक्तुः सान्निध्यानं दिवौकसः। अत्र मंडपादिकमपि कुर्यात्। तदुक्तं निर्णयामृते भविष्योत्तरे। हे पार्थ। हंसकर्ण्णे
यं चतुरस्त्रं सुशोभनं। रहसंस्थालिकाघैश्च वर्त्तितं वस्त्रमंडितं। गौरमन्होमयाभ्यांच लिप्तं शाद्वलसमन्वितं। तन्मध्ये वेदिका कार्या चतुर्हस्ता समास्तु भा
।तसंतामिंहासने नैतोमकंवलाजिनसंयुतां। तत्र दुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुतां। सर्वदेवमयीं प्रौढयौवनोन्मादशालिनीं। भुजैश्चतुर्भीरुचिरैर्दश
भिर्वा विभूषितां॥ तप्तहाटकवर्णाभां त्रिनेत्रां शशिशेखरां। पीतांवरपरीधानां नीलकौशेयसंयुतां। ग्रैवेयहारकेयूरनूपुराभरणान्वितां नानारत्नवि
चित्रेण मुकुटेन विराजितां॥ अनेककुसुमाकीर्णां कपर्देन सुशोभितां। नितंवविंवसंवद्धकिंकिणीकणनादितां। शूलचक्रदंडशक्तिवज्रपाशा
सिधारिणीं। घंटाक्षमालाकटकपानपात्रलसत्करां। तदग्रे छिन्नशिरसं महिषं रुधिरप्लुतं निःसृतार्द्धतनुं कंठनाराचमार्गेस्थधारिणां। देवीकरधृत
नीवशूलेनोरसि ताडितं। दैत्यं करालदंष्ट्रास्यं विद्युल्लापेलमद्दृजं। नागपाशेन संक्षिप्तं पर्यक्षेणापि विद्रुतं वमद्रुधिरवक्त्रेणा ह्यन्नोर्द्धसटंकृपा
।च्चाईलांगूलदंडेन दंष्ट्राविषाणशोभिना। सर्वतोमातृचक्रेणासेवमानासुरेतस्या। पूजयेत्प्रयतो देवीं नरो नियममास्थितः इति। वेदिको

जपतिंहक गोष्वपि कलशस्थापनविधिना चत्वारः कलशास्थाप्याः चत्वारः कलशा न यस्तु दद्याद्देवगृहे नरः॥ चतुःसमुद्रवलयां सत्वभुंङ्क्ते स वसुंधरामिति वि-
७२ ष्णुधर्मोत्तरात्॥ ततः पूजनं कुर्यात्॥ अथ पूजाविधिः॥ तच्च प्रतिपदि पूर्वाह्णे शुभे तैलादिना कृतमंगलस्नानः निमंत्रितां कृत्वा नवे वाससी परिधा-
72 य चंदनमृगमदकुंकुमैः सर्वांगमनुलिप्यात्रिपुंड्रं कृत्वा पूर्वाभिमुखो देवीमुखो वा सम्यगुपविश्य सोपग्रहपाणिराचम्य मम इह जन्मनि दुर्गाप्रीतिद्वारा
सर्वपापक्षयपूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थं शारदनवरा-
त्रप्रतिपदि विहितकलशस्थापनदुर्गापूजाकुमारीपूजादि करिष्य इति संकल्प्य ततः गणपतिपूजनं स्वस्तिवाचनं च कृत्वा स्मेदारुमये देवीपू-
जार्थं मे च निर्मिते कदलीस्तंभादिमंडिते गृहे उत्तमवस्त्रादिभूषिते पूर्वं गृहे एक्यावत्तुरस्रचतुर्हस्ते वेदिकोपरि सर्वतोभद्रादिमंडलं विधाय मं-
डपं च कृत्वा तत्र प्रतिमास्थापनं कुर्यात्। तत्र क्रमः॥ आदौ गणानां त्वेति मंत्रेण गणेशं संस्थाप्य तदनंतरं हेहेरंबत्वमेह्येहि वांबिकात्र्यंबका-
त्मज। सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितुः प्रभो। नागास्यनागहारत्वं गणराज नमोस्तु ते॥ भूषितः स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः। आवाहयामि रामः
पूजार्थं रक्षार्थं च मम क्रतोः। इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष मे। आवाहयेवं गणेशानं पूजाद्रव्यैः प्रपूजयेत्। एवं यथासंभवं पूजयित्वा घंपात्रे ७२

72A गंधादिकं दत्वाऽर्घ्यं दद्यात॥ तत्र मंत्रः॥ रक्ष रक्ष गणाध्यक्ष त्र्यक्ष त्रैलोक्यरक्षक॥ भक्तानामभयं कर्ता त्राता भव भवार्णवात॥ द्वैमातुरकृपासिंधो षाण्मातुरा
ग्रज प्रभो॥ वरद त्वं वरं देहि वांछितं वांछितार्थद॥ गृहाणार्घमिदं देव सर्वदेव नमस्कृत॥ अनेन फलदानेन फलदोस्तु सदा ममेति॥ विघ्नेश्वराय वर
दाय सुरप्रियाय लंबोदराय सकलाय जगद्धिताय॥ नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते॥ भक्तार्त्तिनाशनपराय ग
णेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय॥ विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते॥ विघ्नराज नमस्तेस्तु उमापुत्राघना
शन यदुद्दिश्य कृतं तेनेस्तु मया भक्त्या प्रपूजनं त्वां विघ्नशत्रुदलनेति च सुंदरेति भक्तिप्रियेति सुखदेति फलप्रदेति॥ विद्याप्रदेत्यघहरेति च ये स्तु
वंति तेभ्यो गणेश वरदो भव नित्यमेव॥ तेन तुष्टो मया शीघ्रं सर्वान्कामान्प्रयच्छ॥ विघ्नान्नाशय मे सर्वान्दुष्टान्हृदि समागतान्॥ त्वत्प्रसादेन का
र्याणि सर्वाणीह करोम्यहं शत्रूणां बुद्धिनाशार्थं मित्राणामुदयाय च॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः॥ विश्वरूपस्वरूपाय नमस्ते रुद्ररू
पिणे॥ भक्तिप्रियाय देवाय नमस्तुभ्यं विनायक॥ लंबोदर नमस्तेस्तु सततं मोदकप्रिय॥ अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदेति प्रार्थयेत॥ ततो म
ही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां पिपृतां नो भरीमभिरिति भूमिं स्पृष्ट्वा॥ ॐ ध्रुवध्रुवः संवदंते सोमेन सह राज्ञा॥ यस्मै कृणोति ब्रा॥॥॥ ॥

जपति ह कं॰ गंधादिकं दत्वा॰ घटं दद्यात्॥ तत्र मंत्रः॥ रक्षरक्षगणाध्यक्ष त्रैलोक्यस्य गात्तं राजन पारयामसीति पात्रन्निक्षिप्य॥ आकलशेषु धावति पवित्रे परि
७३ षिच्यते। उक्थैर्यज्ञेषु वर्द्धत इति कलशं संस्थाप्य। इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या। असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृ
73 णुह्या सुषोमयेति जलेनापूर्य। गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियमिति गंधं निक्षिप्य। या ओष
धीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा॥ मनै नु बभ्रूणामहं शतं धामानि सप्त चेति सर्वौषधीः। कांडात्कांडात्प्ररोहंती परुषः परुषः परि। एवा नो दूर्वे
प्रतनु सहस्रेण शतेन च इति दूर्वाः। अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषमिति पंचपल्लवान्। स्योना
पृथिवी भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथा इति सप्तमृदः। याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो
मुंचंत्वंहस इति फलं। स हि रत्नानि दाशुषे सुवाति सविता भगः। तं भागं चित्रमीमहे इति पंचरत्नानि। हिरण्यरूपः स हिरण्यसंदृगपां नपात्सेदु हिरण्य
वर्णः। हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै इति हिरण्यं निक्षिप्य। युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः। तं
धीरासः कवय उन्नयंति स्वाध्यो मनसा देवयंत इति वस्त्रेणावेष्ट्य। पूर्णा दर्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो इति पूर्णां
७३

75A

ऽजतमं। अग्निर्दाद्द्रविणं वीरपेशा अग्निर्ऋषिं यः सहस्रा सनोति। अग्निर्दिवि हव्यमाततानाग्नेर्धामानि विभृता पुरुत्रा॥ अग्निमुक्थैर्ऋषयो विह्वयं
ते अग्निं नरो यामनि बाधितासः। अग्निं वयो अन्तरिक्षे पतन्तोऽग्निः सहस्रा परियाति गोनां॥ अग्निं विश ईलते मानुषीर्या अग्निं मनुषो नहुषो विजाताः। अग्निर्गान्धर्वीं
पथ्यामृतस्याग्नेर्गव्यूतिर्घृत आनिषत्ता। अग्नये ब्रह्म ऋभवस्ततक्षुरग्निं महामवोचामा सुवृक्तिं। अग्ने प्राव जरितारं यविष्ठाग्ने महि द्रविणमा यजस्व
ति। अग्नेवच एवृं अग्निशाव्दहितान्नं त्रास्त कत्यटिता अग्निप दस हितान्नं त्रानूवार ह्यं पठेत। अथ कातीयानां अग्न्युत्तारणा सूक्तं॥ हिमस्य
त्वा जरायुणाग्ने परिव्ययामसि। पावको अस्मभ्यं शिवो भव। उप ज्मन्नुप वेतसेऽवतर नदीष्वा॥ अग्ने पित्तमपामसि मण्डूकि ताभिरागहि सेमं नो यज्ञं पा
वकवर्णं शिवं कृधि॥ अपामिदं न्ययनं समुद्रस्य निवेशनं। अन्यांस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव। अग्ने पावक रोचिषा मन्द्र
या देव जिह्वया। आ देवान्वक्षि यक्षि च। स नः पावक दीदिवोऽग्ने देवाँ इहावह। उप यज्ञं हविश्च नः। पावकया यश्चितयन्त्या कृपा क्षामन्रुरुच
उषसो न भानुना। तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः। नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे। अन्यांस्ते अस्मत्तपन्तु
हेतयः पावको अस्मभ्यं शिवो भव। अग्ने तिग्मेन शोचिषा यासद्विश्वं न्यत्रिणं॥ अग्निर्नो वनते रयिं। इति वाजसनेयिनां अग्निसूक्तं। लेख्या

मूर्त्तिष्वेतल्लेख्यायांनाभिषेकःस्यादित्यादिवचनात्अभिषेकादिकंनत्वनकर्त्तव्यं।किंतुतदग्रेपात्रंस्थापयित्वातस्मिन्नेवकर्त्तव्यं।ततःपंचगव्यपं
चामृतादिनामूर्त्तिंसंस्नाप्यशुद्धपटमलेनस्नापयित्वा।पूज्यपूजकयोर्मध्येप्राचीशोकादिवक्ष्यरीतिप्राचींप्रकल्प्यमंडूकादिपीठपूजांकृत्वा
सिंहासनंसंपूज्यईशानादिक्रमतःविष्णुहरैकदंतरवीवफलेषुवस्तुखंकेलशेषुवासंपूज्यवेदिमध्यस्थकलशेस्वर्णादिमूर्त्तौदुर्गांपूज
येत्॥कलशस्थदेवीपूजनंचेत्मूर्त्तिस्थापनंसिंहासनोपरिकार्यं॥अत्रवस्तुभिर्णापतनैःसहदुर्गापूजनंगौडानुसारेणलिखितंअत्रप्रमा
णत्वेनकालिकापुराणवचनंतैरुपन्यस्तं॥शिवंभास्करमग्निंचकेशवंकौशिकीमपि॥मनसानर्चयन्यातिदेवलोकादधोगतिमिति॥अत्राग्निश
ब्देनगणेशःइतिशिवार्चनचंद्रिकायां।पावकःकार्त्तिकेयोऽसौकार्त्तिकेयोविनायकइतिभविष्योत्तरवचनात्॥यत्तुगौडैरग्निपूजनंपार्थक्येनाक्रि
यतेतत्स्वरूपं॥सतत्त्वज्ञास्मरणाहिर्निर्णयघाविकार्वैहिकार्यं।तदुक्तंमंत्रराजानुष्ठविधाने।श्रौतार्चनंतुविप्राणांविशेषेणभवेत्तदा॥स्मार्त्तागमार्च
नंक्षत्रेवैश्येशूद्रैःकेवलमागममिति॥एवंपूर्वोक्तक्रमेणावरणायतनपूजनानंतरंजपराजदेवतादिध्यात्वाहृत्स्थस्यपुष्पांजलौअयाकृतोवाहृत्स्थागम
रविंदादावाहयेदितिवचनात्सूर्यमंडलाद्वाहृदपारविंदाद्वादेवीमागतांविभाव्यपुष्पाणिकलशेमूर्त्तौवाप्रक्षिपेत्॥ततःआत्मसंस्थामितिएहि ७६

76A

र्गे महाभागे रक्षार्थं मम सर्वदा। आवाहयाम्यहं देवि सर्वकामार्थसिद्धये। अस्यां मूर्त्तौ समागच्छ स्थितिं मत्कृपया कुरु॥ रक्षां कुरु सदा भद्रे देवि विश्वेश्वरि नमोस्तु
ते इति। आगच्छ वरदे देवि दैत्यदर्पनिषूदनि। पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये॥ सर्वतीर्थमयं वारि सर्वदेवसमन्वितं। इमं घटं समागच्छ तिष्ठ
देवगणैः सह। दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय। बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह। इत्यावाहनमंत्रेणावाहयेत्। मूर्त्तिपूजने तु स
र्वतीर्थमयमिति श्लोको न पठनीयः॥ एवं तु जयंतीमंत्रेण दुर्गामंत्रेण वा कार्या॥ तदुक्तं देवीपुराणे। रूपाद्देव्यास्तु मंत्रेण पूजां क्षीरघृतादि
भिरिति। जयंती मंगला काली भद्रकाली कपालिनी। दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तुते। अनेनैव तु मंत्रेण जपहोमौ तु कारयेदिति
। दुर्गामंत्रः वैदिकः आगमिको वा। वैदिको जातवेदसइत्यादि। आगमिकस्तु ॐ दुर्गे दुर्गे रक्षणि स्वाहेति नवाक्षरः। तल्लिंगैः पूजयेन्मंत्रैः सर्वदे
वान्समाहितः इत्याग्नेयपुराणात्। मंत्राभावे त्वचतुर्थ्यंतं नमोंतनाम्ना नाम्ना सर्वं समापयेदिति साधारणवाक्यात्। स्कांदे तु दुर्गे मे दुस्तरे कार्ये भव दुःख
विनाशिनी। पूजयामि सदा भक्त्या दुर्गां दुर्गार्त्तिनाशिनीं। अनेनैव तु मंत्रेण जपहोमादि कारयेत् इत्युक्तं॥ पूजा च षोडशोपचारैः पंचोपचारैर्वा।
अन्यैर्वा जोपचारैः छत्रचामरादिभिर्यथाविभवं कार्या। पूजायां वादित्राणामभावे घंटावादनं कार्यं॥ तदुक्तं॥ वादित्राणामभावे तु पूजाकाले च

जयतिहक॰
७८
77

सर्वदा।घंटाशब्दोनरैःकार्यःसर्ववाद्यमयीयतः।पाद्यादौविशेषोदेवीपुराणे।पाद्येश्यामाकदूर्वाब्जविष्णुक्रांतादिरिष्यते।गंधपुष्पाक्षतयवकुशाग्रति
लसर्षपाः॥तत्रैव।बिल्वरक्ताक्षतैःपुष्पैर्दधिदूर्वाकुशैस्तिलैः।सामान्यःसर्वदेवानांअर्घोयंपरिकीर्तितः।पुष्पसारसुधानिधौ।इक्षुमधुघृतंचैव
पयोदधिसदैवतु।प्रस्थप्रमाणंवाग्राह्यंमधुपर्कइहोच्यते।आचमनेतु।जातीलवंगकंकोलादिद्रव्याणिदेयानिपंचामृते।स्कांदे।क्षीरादृशगुणं
दध्नाघृतेनैवदशोत्तरम्॥घृताद्दशगुणंक्षौद्रंक्षौद्राच्चैवेक्षुजंतथेति।रजोत्तंमाषभक्तंबलिंकूष्मांडादिबलिंवानिवेदयेत्॥ततोनीराजनं
कृत्वायथाशक्तिवैदिकमागमिकंवादुर्गामंत्रंजपेत्।दुर्गाग्रतोजपेन्मंत्रमेकचित्तःसमाहितइतिदेवीपुराणात्॥ततश्चंडीपाठंकृत्वादेवीमर्घ्य
र्घयेत्॥महिषघ्निमहामायेचामुंडेमुंडमालिनि।द्रव्यमारोग्यविजयंदेहिदेविनमःसदा।भूतप्रेतपिशाचेभ्योरक्षोभ्यश्चमहेश्वरि।देवेभ्योमा
नुषेभ्यश्चभयेभ्योरक्षमांसदा।सर्वमंगलमंगल्येशिवेसर्वार्थसाधिके।शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते।रूपंदेहियशोदेहिभगंभगवति
देहिमे।पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमेइति।ततःशिवरहस्योक्तांदुर्गास्तुतिंपठेत्॥दुर्गांशिवांशांतिकरींब्रह्माणींब्रह्मणःप्रियां।एम॰
सर्वलोकप्रणेत्रींचप्रणमामिसदाशिवां।मंगलांशोभनांशुद्धांनिःकलांपरमांकलां।विश्वेश्वरींविश्वमातांचंडिकांप्रणमाम्यहं।सर्वदेवमयींदेवींस ७८

77A र्वरोगभयापहां। ब्रह्मेशविष्णुनमितां प्रणमामि सदा उमां॥ विंध्यस्थां विंध्यनिलयां विंध्याचलनिवासिनीं। योगिनीं योगमातां च चंडिकां प्रणमाम्यहं। ई
शानमातरं देवीं ईश्वरीमीश्वरप्रियां। प्रणतोस्मि सदा दुर्गां संसारार्णवतारिणीं। य इदं पठति स्तोत्रं शृणुयाद्वापि यो नरः। स मुक्तः सर्वपापैस्तु मोदते दु
र्गया सह इति। ततः पुष्पांजलिं दद्यात्। इति दुर्गापूजाविधिः। अथ चंडीपाठविधिः देवीपुराणे॥ माहात्म्यं भगवत्याः स्तु पुराणादिषु कीर्तितं। पठेच्छ्रु
णुयाद्वापि सर्वकामसमृद्धये। तथा। एकोत्तराभिवृद्ध्यात्तु नवमीयावदेव हि। चंडीपाठं जपेच्छैव जायते हि विधानतः इति। वाराहीतंत्रे॥ संकल्पित
स्तोत्रपाठे संख्याकृतापठेत्सुधीः॥ आवृत्तिसंख्याभेदेन फलभेदः श्रुतस्तंत्रे चोक्तः। चंडीपाठफलं देवि शृणुष्व गदतो मम। एकावृत्त्यादिपाठानां यथा
वत्कथयामि ते। संकल्पपूर्वं संपूज्य न्यासांगेषु मनूस्त कृत। पाठद्बलिमहानाड्वा सिद्धिमाप्नोति मानवः। उपसर्गोपशांत्यर्थं त्रिरावृत्तं पठेन्नरः। ग्र
होपशांतौ कर्त्तव्यं पंचावृत्तं वरानने। महाभये समुत्पन्ने सप्तावृत्तं समुन्नयेत्॥ नवावृत्त्या भवेच्छांतिर्वाजपेयफलं लभेत्॥ राजवश्याय भूत्यै च रु
द्रावृत्तमुदीरयेत्। अर्कावृत्त्या काम्यसिद्धिर्वैरिहानिश्च जायते। मन्वावृत्त्या रिपुर्वश्यस्तथा स्त्रीवश्यमाप्नुयात्। सौख्यं पंचदशावृत्त्या श्रियमाप्नो
ति मानवः। कलावृत्त्या पुत्रपौत्रधनधान्यागमं विदुः। राज्ञो भीतिविमोक्षाय वैरस्योच्चाटनाय च। कुर्यात्सप्तदशावृत्तं तथाष्टादशकं प्रिये। महा

जयतिं टी
ग्रह विमोक्षाय विंशावृत्तं पठेत्सुधीः। पंचविंशावर्त्तनात्तुभवेद्बंधविमोक्षणं। संकटे समनुप्राप्ते दाश्विकित्सभये तथा। जातिध्वंसे कुलोच्छेदे आयुषो
१८ नाशआगते। वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा ह्युपे। तथैव त्रिविधोत्पाते तथा चैवातिपातके। कुर्याद्यत्नाच्छतावृत्तं ततः संपद्यते शुभं। श्रेयोवृद्धिः
78 शतावृत्त्याद्या जपवृद्धिस्तथा परा। मनसा चिंतितं देवि सिद्ध्येदष्टोत्तराच्छतात्। शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते। सहस्रावर्त्तनाल्लक्ष्मीराव
णोति स्वयं स्थिरा। भुक्त्वा मनोरथान्कामान्नरो मोक्षमवाप्नुयात्। यथाश्वमेधः क्रतुराट् देवानां च यथा हरिः। स्तवानामपि सर्वेषां तथा सप्तशती स्तव
ः। अत एव बहुनोक्तेन किमेतेन वरानने। चंड्याः शतावृत्तिपाठात्सर्वाः सिध्यंति सिद्धय इति। सर्वैव गुणायुक्ताः। विस्पष्टमद्भुतं शांतं सष्टाक्षरपदं
तथा। कुलस्वरसमायुक्तं रससभावसमन्वितं। उद्यमानः सदा ग्रंथं ग्रंथार्थं कल्पशो नृप। ब्राह्मणादिषु सर्वेषु ग्रंथार्थं चार्पयेन्नृप। य एवं वाचयेद्ब्र
ह्मन्स विप्रो व्यास उच्यत इति। स्तोत्रपाठश्च नारायणादीन्नमस्कृत्य कर्तव्यः। नारायणं नमस्कृत्य नरं चैव नरोत्तमं। देवीं सरस्वतीं व्यासं ततो जयमु
दीरयेदिति वचनात्। जयशब्दार्थश्च भविष्ये। अष्टादश पुराणानि रामस्य चरितं तथा। विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत। कार्ष्णं च पंचमो वेदो एम॰
यन्महाभारतं स्मृतं। सौराश्च धर्मा राजेंद्र मानवोक्ता महीपते। जयेति नाम एतेषां प्रवदंति मनीषिण इति। पाठप्रकारश्च मत्स्यसूक्ते प्रणवं चादितो १८

78A जष्टाशतोत्तं वा संहितां पठेत्। अंते च प्रणवं दद्यादित्युवाच हि पूरुषः। सर्वत्र पाठे विज्ञेयो ह्यन्यथा विफलं भवेत्। अशुद्धेनान न्यायवित्तेन पठितव्यं प्रय

लतः। न कार्यो सत्क्रम नमस्कार्यः स्तोत्र सवाचने। आधारे स्थापयित्वा तु पुस्तकं प्रजपेत्सुधीः। हस्तसंस्थापनाद्देवि यस्मादल्पफलं भवेत्। स्वयं च लिखि

तं यत्तु शूद्रेण लिखितं च यत्। अब्राह्मणेन लिखितं तथापि विफलं भवेत्। ऋषिच्छंदादिकं न्यस्य पठेत्स्तोत्रं विचक्षणः। स्तोत्रेण हृष्यते यत्र प्र

णवन्यासमाचरेत्। संकलितेस्तोत्रपाठे संख्यां कृत्वा पठेत्सुधीः। अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन। कृते विरामे मध्ये तु अध्यायादिं पठे

त्पुनरिति। अथ प्रसंगात् शतचंड्यादिविधानं लिख्यते। रुद्रयामले। शतचंडीविधानं च प्रोच्यमानं निबोध तत्। सर्वोपद्रवनाशार्थे शतचंडीं समा

चरेत्। षोडशस्तंभसंयुक्तं मंडपं पल्लवोज्ज्वलं। वस्तु कोरापुतां वेदीं मध्ये कुर्यात्त्रिभागतः। पक्केष्टकाचितां रम्यामनुच्छ्रायेह स्तसंमितां। पंचवर्णै

रजोभिश्च कुर्यान्मंडलकं शुभं। पंचवर्णाद्वितानं च किंकिणीजालमंडितं। आचार्येण समं विप्रान्वरयेद्दश सुव्रतान्। ईशान्यां स्थापयेत्कुं

भं पूर्वोक्तविधिना हरे। वारुण्यां च प्रकुर्वीत कुंडं लक्षणलक्षितं। मूर्तिं देव्याः प्रकुर्वीत सुवर्णस्य पलेन वै। तदर्धेन तदर्धेन तदर्धेन महीपते।

अष्टादशभुजां देवीं रूपाद्यष्टकरां मषि। पट्टकूलयुगच्छन्नां वेदीमध्ये निधापयेत्। देवीं संपूज्य विधिवच्च पंचकुर्युर्दश द्विजाः। शतमादौ शतं

जयसिंहक
७९
79

चांते जपेन्मंत्रं नवार्णं वै । चंडीमष्टशतीमध्ये संपुटो यमुदाहृतः । सर्वत्र ऐं ह्रीं क्लीं चामुंडायै विच्चे इति । एकं देवी तीर्थं चत्वारि जपेद्दिने नवमे तु पंचमं रूपाणी क्रम
शस्तद्वत्पूजनादिकमाचरेत् । पंचमे दिवसे प्रातर्होमं कुर्याद्विधानतः । गुडाज्यपायसं दूर्वां तिलान्बुल्का न्वा नपिच्चंडीपाठसहोमं तु शति
श्लोकं दशांशतः । होमं कुर्याद्ब्राह्मणैः सामिदाज्य चरूंस्तत्क्रमात् । हुत्वा पूर्णाहुतिं दद्याद्विप्रेभ्यो दक्षिणां क्रमात् । कपिलां गां नीलमणिं श्वेतां वृषं छ
त्रं चामरे । अभिषेकं ततः कुर्युर्यजमानस्य चर्त्विजः । एवं कृते महेशान सर्वसिद्धिः प्रजायत इति । इति शतचंडीविधिः । सहस्रचंडीविधिवस्तु पु
विष्णुमहामते । राज्यभ्रंशे महोत्पाते जनमारे महाभये । गजमारे श्वमारे वा परचक्रभये तथा । इत्यादिविविधे पुंड्रः रोगादिजे भये सहस्रचंडिकापाठं
कुर्याद्राकारयेत्तथा । जापकास्तु शतं प्रोक्ता विंशद्धस्तश्च मंडपः । भोज्याः सहस्रविप्रेंद्राः गोशतं दक्षिणां दिशेत् । गुरवे द्विगुणां देयं शय्यादानं
तथैव वा । ध्वजं नैवेद्यमुच्चैर्वा दानं श्वेतातपत्रं च मनोहरां । पंचाननिकामितामूर्तिः कर्तव्या वा धर्मानंतः । अष्टादशभुजा देवी सर्वायुधविभूषिता । अवारितान्नं हा
नयं सहस्रं प्रत्यहं विप्रो । शतं वा नियताहारः पयःपाने नवर्त्तयेत् । एवं यश्चंडिकापाठं सहस्रं तु समाचरेत् । तस्य साक्षात्कार्यसिद्धिस्तु नात्र कार्या वि राम:
चारणा । एतद्वदंपि यद्यपि महाविघ्नं चैवपुनास्ति तथापि प्रत्यक्षफलदायि तत्त्वमिति दिक् । इति सहस्रचंडीविधिः । अथ कुमारीपूजनं । तत्र प्रथमं रहस्ये यथा शाक्तैक ७९

79A ष्यादिकुमेरा कार्ये। तत्र कारश्च देवी पुराणो। ब्रह्मोवाचान तथा तुष्यते शक्र होमदानजपेन तु। कुमारीभोजनेनात्र यथा देवी प्रसीदति। अत्र नवरा
त्रे। पितरो वसवो रुद्रा आदित्याः सलोकपाः। सर्वे ते पूजिता स्तेन कुमार्यो येन पूजिताः॥ शुक्लाष्टमी चतुर्दश्योर्नवम्यां च विशेषतः। कुमपदे
विशेषेण भोजयेत्तु कुमारिकाः इति। अन्यत्रापि प्रक्षाल्य पादौ सर्वासां कुमारीणां वचासवा। हुलिप्रेमजलेरमेनचता आसनेस्थिताः॥
पूजयेद्गन्धपुष्पैश्च स्त्रग्भिश्चापि मनोरमैः। पूजयित्वा विधानेन भोजनं तास्तदार्पयेत्। खंडलड्डुगुडं सर्पिर्दधिक्षीरं समाक्षिकं। तासां देयं कुमा
रीणामशनैर्भोजयेत्तताः। पानीयं चापि तं देयमन्नं वा यावितं शुभं। तास्तुष्टास्तु पदा सर्वास्तदा स्वावमवं ददेत्। आचम्य वाक्षता दत्त्वा तयाश्च
नवामि स्तुता हात्तुः शिरसि दातव्याः कन्यकाभिरथाक्षताः। ते नापि प्राशी पात स्तु कर्त्तव्यो मनि पूर्वकं। अनेन विधिना शक्र देवी क्षिप्रं प्रसीदति
ददाति विविधान्कामान्मनोभीष्टान्सुराधिप। राज्यं कृत्वा ततः पश्चाद्देवलोकं च गच्छति। स्कांदे। एकैकां पूजयेत्कन्यामेकवृद्ध्या तथैव वा। द्वि
गुणं त्रिगुणं वापि प्रत्येकं नवकं च वा। नवभिर्लभते भूमिमैश्वर्यं द्विगुणेन तु। एकवृद्ध्या लभेत्क्षेममेकैकेन श्रियं लभेत्। एवं पीत्तु या कन्या
पूजार्थं तां विवर्जयेत्। गंधपुष्पफलादीनां प्रीतिस्तस्मान विघते। द्विवर्षकन्यामारभ्य दशवर्षावधि कुमाता। तासां चक्रमेण कुमारिका विमृतिः कल्या

जयसिंहक० णीरोहिणीकालीचंडिकाशांभवीदुर्गासुभद्रेतिनामान्युक्तानि। स्कांदे। कुमारिकाद्विवर्षोक्ता त्रिवर्षा तु त्रिमूर्तिनी। चतुर्वर्षा तु कल्याणी पंचवर्षा तु रोहि
८० णी। षड्वर्षा तु भवेत्काली सप्तवर्षा तु चंडिका। अष्टवर्षा शांभवी तु दुर्गा तु नवभिः स्मृता। दशवर्षा सुभद्रेति नामभिः परिकीर्तिताः। अत ऊर्ध्वं तु
80 मा कन्याः सर्वकार्येषु वर्जिताः। आसां क्रमेण फलान्याह स एव। दुःखदारिद्र्यनाशाय शत्रूणां नाशनाय च॥ आयुष्यबलवृद्ध्यर्थं कुमारीं पूजये
न्नरः। आयुष्कामास्त्रिमूर्तिं तु त्रिवर्गसफलाप्तये। अपमृत्युव्याधिपीडादुःखानामपनुत्तये। सौख्यधान्यधनारोग्यपुत्रपौत्राभिवृद्धये। कल्याणीं
पूजयेद्धीमान्नित्यं कल्याणवृद्धये। आरोग्यसुखकामी तु धनकामस्तथैव च। यशस्कामी नरो नित्यं रोहिणीं परिपूजयेत्। विद्यार्थी विजयार्थी च
राज्यार्थी च विशेषतः। शत्रूणां च विनाशार्थी कालिकां पूजयेन्नरः। संग्रामे जयकामी च चंडिकां परिपूजयेत्। दुःखदारिद्र्यनाशाय नृपसंमोह
नाय च। महापापविनाशाय शांभवीं च प्रपूजयेत्। सबले लोलदशत्रूणामुग्रसाधनकर्मणि। दुर्गां दुर्गार्तिनाशाय पूजयेद्बलतो बुधः। सौभा
ग्यधनधान्यादिवांछितार्थफलाप्तये। सुभद्रां पूजयेन्मर्त्यो दासीदासविवृद्धये। पूजाप्रकारस्तत्रैव। प्रातःकाले विशेषेण कृताभ्यंगो विशेषतः। एभि
ः। आवाहयेत्ततः कन्यां मंत्रेणानेन भार्गव। मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीं। नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं॥ आवाहनमं ८०

80A त्रः। ततः संपूजयेद्देवी मातृचक्रे निशि पृथक् पृथक्। जगत्पूज्ये सर्वदेवेशे सर्वशक्तिस्वरूपिणि। पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते। कुमार्योः। त्रि
पुरां त्रिपुराधारां त्रिवर्गज्ञानरूपिणीं। त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्यहं। त्रिमूर्त्तेः। कलात्मिकां कलातीतां कारुण्यहृदयां शिवां
। कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहं। कल्याण्याः। अणिमादिगुणाधारामकाराद्यक्षरात्मिकां। अनंतशक्तिकां लक्ष्मीं रोहिणीं पूजय
म्यहं। रोहिण्याः। कामचारीं शुभां कांतां कालचक्रस्वरूपिणीं। कामदां करुणोदारां कालिकां पूजयाम्यहं। कालिकायाः। चंडवीरां चंडमायां चंडमुंडप्र
भंजिनीं। चंडिकां सर्वदां देवीं चंडिकां पूजयाम्यहं। चंडिकायाः। सुखानंदकरीं शांतां सर्वदेवनमस्कृतां। सर्वभूतात्मिकां लक्ष्मीं शांभवीं पूजया
म्यहं। शांभव्याः। दुर्गमे दुस्तरे कार्ये भवदुर्गविनाशिनीं। पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीं। दुर्गायाः। सुंदरीं स्वर्णवर्णाभां सुखसौभा
ग्यदायिनीं। सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहं। सुभद्रायाः। एवमभ्यर्च्य नवकुमारीः सम्यक् प्रयत्नतः। वस्त्रकेशैर्वस्त्रैश्च गंधपुष्पाक्षता
दिभिः। नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्सा पयसा हविः। हीनाधिकांगीं कुष्ठादिविकारां कुत्सितां तथा। ग्रंथिस्फुटितगंभीरां स्फोटयुक्तव्रणांकितां। जा
त्यंधां केकरीं काणां कुरूपां तनुरोमशां। संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवां। आरोगिणीं सुरूपांगीं सुरूपां व्रणवर्जितां। एकवंशसमु

जयसिंहक० द्धतां कन्यां सम्यक् प्रपूजयेत्। ब्राह्मणीं सर्वकार्येषु जपार्थे नृपवंशजां। लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजां। दारुणे चांत्यजातीनां पूजये
८१ द्विक्षिप्तानरद्भुति। कृचित्तमंत्राक्षरमयीमिति सर्वासामेकरूप एव मंत्रउक्तः। यथोक्तकालामेव देवीपुराणे। विवाहानंतरं चासां कन्यात्वेनोपग
81 च्छति। तावत्संपूजयेत्कन्यायावत्पुष्पं न दृश्यते इति कन्यापूजनं॥ अत्र वेदपारायणमप्युक्तं रुद्रयामले। एवं च वेदविद्वेषिविप्रान्वा निमंत्रा
हयेत्। तेषां च वरणं कार्यं वेदपारायणाय वा इति। वेदमूलकत्वात्पुराणादिपारायणमप्युक्तं॥ अथ बलिदानं। तत्राष्टमे षष्ठागमाहिषश्रमा
सानामुत्तरोत्तरं प्राशस्त्यं फलविशेषश्च। तत्र प्रत्यहं कार्यं। तथा च देवीपुराणे। बलिं च प्रत्यहं दद्यादोदनं मांससमाश्रवत्। त्रिकालं पूजयेद्देवीं
जपस्तोत्रपरायणा इति। यत्तु कौशिदुक्तं। होमः अष्टम्यां नवम्यां वा कार्यः। बलिदानमपि अष्टमीनवम्योरेवेति। तत्तुच्छं। देवीपुराणे बलिं
च प्रत्यहं दद्यादिति वाक्ये न प्रातिदिनं तस्याभिधानात्। होमोपि प्रत्यहं कार्यः। पूर्वोक्तदेवीपुराणवाक्ये जपहोमसमायुक्त इत्युक्तेः। पुन
: पुजां तथाष्टम्यामित्यादिवचनेन अष्टमीनवम्योर्विशेषपूजापरं। अत्र च छागादिबलिदानमग्नीषोमीयपशुहिंसान्यायेन धर्ममपि क्षत्रियप०
यादिविषयमेव। ब्राह्मणस्य सात्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैरिति वाक्योक्तसात्विकपूजायामेवाधिकारात्। तथैव भगवद्गीतादिषु ८१

81A पतितः स्यादिति तत्वात् यद्यपि कालिकापुराणादिषु मद्यस्वगात्ररुधिरनिवेदनादिकमुक्तं तद्यपि ब्राह्मणस्य न भवति। स्वगात्ररुधिरं दत्वा ब्रह्महत्या
मवाप्नुयात्। मद्यं दत्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते इति कालिकापुराणस्य निषेधात्। ब्राह्मणेन तु माषभक्तादिना बलिदानं कार्यं
तदुक्तं कालिकापुराणे। माषभक्तबल्या माषमांसाद्यैर्दद्यो हि क्षुद्रबलिं निशि। कूष्माण्डमिक्षुदण्डं च मद्यमासवमेव च। एते बलिसमाः प्रोक्ताः तृप्तौ छाग
समाः स्मृताः। एतेष्वपि ब्राह्मणस्य मद्यमासवमतिभिन्नमेव भवति। राजसी बलिदानाद्यैर्वैधैः सामिषैस्तथेति मांसबलिदानादेः राजसत्वाभिधाना
त्। रुद्रयामलेपि। छागाभावेपि कूष्माण्डं श्रीफलं वा मनोहरं॥ वस्त्रसंवेष्टितं कृत्वा छेदयेत् छुरिकादिना। तथा। ब्राह्मणो न सदा देयं कूष्माण्डब
लिकर्मणि। श्रीफलं वा सुरश्रेष्ठे शस्त्रेणैव तु कारयेत्। विहितप्रतिषिद्धत्वात् छेदे विकल्पः। कालिकापुराणे। माषान्नेन बलिं दद्यो ब्राह्मणो
न विजानता। भुवनेशीपारिजातेपि। अन्नं व्यंजनपूर्णं तु बलिद्रव्यमुदाहृतमिति। अथ बलिदानविधानं। तत्रादौ देवीप्रीत्यर्थं बलिदान
महं करिष्ये इति संकल्पयेत्॥ कालिकापुराणे। उत्तराभिमुखो भूत्वा बलिं पूर्वमुखं तथा। निरीक्ष्य साधकः पश्चादिमं मंत्रमुदीरयेत्। पशुस्त्वं
बलिरूपेण मम भाग्यादुपस्थितः। प्रणमामि ततः सर्वरूपिणं बलिरूपिणं। मंत्रमूलप्रकाशे। पशुं स्नापयित्वा सिंदूरतिलकं दत्वा अस्त्रेण।

जयसिंहक

८२

82

वलोकयेत्।मूलेनप्रोक्ष्यतीर्थमंत्रैःप्रोक्षयेत्॥तीर्थमंत्राःवैदिकाःतांत्रिकाश्च।अग्निःपशुरासीत्तेनायजंतसएतंलोकमजयद्यस्मिन्नग्निःसतेलोको
भविष्यतितंजेष्यसिपिबैताअपः।वायुःपशुरासीत्तेनायजंतसएतंलोकमजयद्यस्मिन्वायुःसतेलोकोभविष्यतितंजेष्यसिपिबैताअपः।२सूर्यःप
शुरासीत्तेनायजंतसएतंलोकमजयद्यस्मिन्सूर्यःसतेलोकोभविष्यतितंजेष्यसिपिबैताअपः३वाचंतेशुंधामिप्राणंतेशुंधामिचक्षुस्तेशुंधामि
श्रोत्रंतेशुंधामिनाभिंतेशुंधामिमेढ्रंतेशुंधामिपायुंतेशुंधामिचरित्रांस्तेशुंधामि।मनस्तआप्यायतांवाक्तआप्यायतांदेवेभ्यस्त्वाजुष्टंनिर्वपामिदेवेभ्यस्त्वा
जुष्टंप्रोक्षामिस्वाहा॥वाराहीयमुनागंगाकरतोयासरस्वती।कावेरीचंद्रभागाचसिंधुभैरवसागराः।अजस्नानेसमायांतुपेवान्येनहंसंज्ञकाः।प
शुपाशविनाशायहेमकूटास्थितायच।परायपरमेष्ठिनेहुंकारायचमर्जये।एभिर्मंत्रैश्चसंप्रोक्ष्यवामेमंडलमालिखेत्।चंडेश्वरींयजेत्तत्रकुमारीं
सृजयेत्ततः।तद्वलिंतत्रसंस्थाप्यप्रोक्षयेत्साधकोत्तमः।हुंहुंपशून्हनहनहुंहुंफट्इत्यभ्युक्षेत्।ततोरज्जुमादायमस्तकेपशुंबंधयेत्।मेद्या
कारसंचमध्येपशुंबंधयय२सम्यग्गेसर्वांबयदंपशुंबंधय२ब्रह्मांडखंडमध्येपशुंबंधय२ॐह्रींफट्इतिबध्वाप्रजयेत्।परमपशुरूपिणेनमः।ॐसाम
शिरबंधनायनमःशिरसि।चंडिकायैललाटे।सरस्वत्यैभ्रुवोः।चंद्रादित्याभ्यां।नासिकायां।वह्निस्तयेचक्षुषोः।उग्रनासिकायैकर्णयोः।वैश्रवणैजिह्वा ८७

82A

यां। पशुनामायपश्चदरे। भैरवीनाम्नौ। रुधिरेणमायै याहेशु॥ ततः कर्णेजपेत्। हि लिखवहुरूपधारायै चंडदुर्गायै इमं पशुं स्वर्गोति योजयपशुमुक्तिंम
हर्शय शंही चंद्रमंडलाधिष्ठितविग्रहायै पशुरूपचंडिकायै पशुंप्रोक्षयामि स्वाहा। कुशाक्षतजलान्यादायोत्सृजेत्। कृतांजलिःपठेत्। यज्ञा
र्थे पशवः सृष्टाः स्वयमेव स्वयंभुवा। अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः। पशुरुत्साहितोऽस्यैर्यज्ञार्थं च विधानतः। इदानीं त्वं महोत्साहे
न त्वायोसि मयापुनः। अजोसि त्वं पशुस्तेन यज्ञार्थं निर्मितः पुरा। अतः सर्वं निदानेन त्वां श्रीपूजां करोम्यहं। पशुमेनं मया दत्तमपशुत्वंप्ररेहि मे। दे
वताबलिदानेन मांसेन रुधिरेण च। दानवापद्विनाशाय छागलाय नमो नमः। लोकानामुपकारार्थं पशुः सृष्टो मयाधुना। प्रोक्षितो भवती मीत्यै
मामात्मानं च तारय। अथ खड्गपूजा। कृष्णं पिनाकपाणिं च कालरात्रिस्वरूपिणं। उग्रं रक्तास्यनयनं मवीं सुरभयंकरां। रक्तांबरं धरं चैव पाश
हस्तं कुटुंबिनं। पिबमानं च रुधिरं भुंजानं क्रव्यसंहतिं। रसनात्वं चंडिकायाः सुरलोकप्रसादकः। इति ध्यात्वा पूजयेत्। ॐ स्रें श्फट्वज्रेश्वरि
खड्गरूपिणीतीक्ष्णधारे सर्वपशुसंहर २ ॐ ह्रीं कालिकालिवज्रेश्वरि लोहदंडायै नमः। इति संपूज्य। असिर्विशसनः खड्गः तीक्ष्णधारो दुरासदः
श्रीगर्भो विजयश्चैव धर्मपालन मोस्तुते। इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा। नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः। हिरण्यं च शरीरं ते दैवतं

जयसिंहक वजनार्दनः। पिता पितामहो देवस्त्वं मां पालय सर्वदा। नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः। भावशुद्धो मर्षरागश्च अतितेजास्तथैव च। इयं येन धृता
८३ क्षोणी हतश्च महिषासुरः। तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः। इति स्तुत्वा॥ रक्षार्थं बंधनं खड्गे सिंदूरत्रये मोचितो मया। देव्याः प्रीतिं समुत्पा
83 द्य संगं गच्छ पशो जनम इति वं वा मो च यित्वा मूलमंत्रं पठेत्। अथापरेण मंत्रेण छेदयेत्। ॐ ह्रीं श्रीं क्लीं चंडिकायै लोहदंडायै ह्रीं ह्रीं २ इमं पशुं महा
तं सिं महानंदं कुरु कुरु २ स्वेष्टं देवि गृह्ण २ स्वाहा। कालि २ स्त्रं २ कालि वज्रेश्वरि खड्गपाणि तीक्ष्णधारेण हन २ स्वाहा। अयं बलिर्मया दत्तः
पशूनां च पशूत्तमं गृह्ण २ महादेवि विरूपमांडुरिता तीवानत्। हर्षितं मलकं स्कंधं ततो देव्यै निवेदयेत्। घोरदंष्ट्रे करालास्ये हरामांसप्रिये सदा। बलिं
गृह्ण महादेवि पशुरक्तं समांसकं। ॐ चंडिके चंडिकायै काकोलूकगृध्रपरिवृतायै ह्रीं २ ह्रीं २ इदं पिशितरक्तान्नं गृह्ण २ स्वाहा। आहारे हवि
षां कांक्षि बलिं गृह्ण जयं कुरु। मम शत्रुसंहारिणि नवदुर्गे हरा र्विनो। इमं पिशितरक्तान्नं गृह्ण स्वाहा। ततो देवीं स्तुत्वा। नत्वा स्वहृद्गुह्वास्य
विहरेत्। इति मंत्रस्तलदीपिकोक्तबलिदानविधिः। अथ संक्षिप्तबलिदानविधिः। उत्तरामिमुखो भूत्वा बलिं पूर्वमुखं तथा निरीक्ष्य साधकः पश्चाद्दिमम्
मंमंत्रमुदीरयेत्। पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः। प्रणमामि ततः सर्वरूपिणं बलिरूपिणं। चंडिकाप्रीतिदानेन दातुरापद्विनाश ८३

83A

नं चामुंडा बलिरूपाय बलेतु भ्यं नमोस्तु ते। यज्ञार्थे बलयः सृष्टाः स्वयमेव स्वयंभुवा। अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोवधः। ऐं ह्रीं श्रीं मिति
मंत्रेणातं बलिं मत्स्वरूपिणां चिंतयित्वा न्यसेत् पुष्पं मूर्ध्नि स्पृष्ट्वा भैरवाद्यभिषिच्य बलिं पश्चात्कारवालेन पूजयेत्। अयम [illegible] :बलिमभिषिच्य वै
दूर्वादिभिः संपूज्याघेत्याहि दशवर्षीव छिन्नदुर्गाप्रीतिकाम इमं छागबलिं वह्निदैवतं भगवत्यै दुर्गादेव्यै तुभ्यमहं घातयिष्य इति संकल्प्य
खड्गं पूजयेदिति। कृष्णं पिनाकपाणीं च कालरात्रिस्वरूपिणीं। उग्ररक्तास्यनयनं रक्तमाल्यानुलेपनं। रक्तांबरधरं चैव पाशहस्तं कुटुंबिनं। पि
बमानं च रुधिरं भुंजानं क्रव्यसंचयं। रसनात्वं चंडिकायाः सुरलोकप्रसादकः। इति ध्यात्वा। ह्रां ह्रीं खं खड्गाय नमः इति चंदनपुष्पधूपदीप
नैवेद्यैस्तां जलानि दद्यात्। ततः कृतांजलिः पठेत्। असिर्विशसनः खड्गः तीक्ष्णधारो दुरासदः। श्रीगर्भो विजयश्चैव धर्मधार नमोस्तु ते। इत्य
ष्टौ तव नामानि स्वयमुक्तानि वेधसा। इत्यादि पूजयित्वा ततः खड्गं ओं हुं फडिति मंत्रकैः गृहीत्वा विमलं खड्गं छेदयेद्बलिमुत्तमं। पंचाब्दं लक्षणो
पेतं गंधपुष्पसमन्वितं। विधिवत्कालिकाप्रीतिजं हत्वा खड्गेन घातयेत्। ओं कालि कालि वज्रेश्वरि लोहदंडायै नमः। इति मंत्रः। तदुत्थं रुधिरं मांसं
गृहीत्वा पूतनादिभ्यः। आदिशब्दाच्चरकीविदारीपापराक्षसः नैर्ऋतेभ्यः प्रदातव्यो महाकौशिकिमंत्रतः। ओं ऐं ह्रीं कौशिकी रुधिरेणाप्याय

जयसिंहक॰
८५
84

नामिति। तस्याग्रतोन्यपः स्थापात्कल्वाशत्रुंतुपैष्टिकं खड्गेन घातयित्वातुदद्यात्कं हविशारवयोः। स्थानेनियोजयेद्वक्ताशिरश्च समदीपकं॥ एवंदत्वा ब
लिंपूर्णफलं प्राप्नोति साधकः। बलिदानेतुदुर्गायाः सर्वत्रायं विधिः स्मृतः इति। इति संक्षिप्त बलिदानं। अथ नवतिथिह्रासेतंत्रेणोपवासः। तिथिद्वयनि
मित्तंपूजादिमहालयश्राद्धवदेकदिनेऽश्राद्धसाकार्या। वृद्धौतदूर्द्धेवादशितिथिनिर्णयप्रसिद्धौ एककालकर्त्तव्यत्वेनोपवासवत्पूजापितंत्रेणकार्ये
तिकालतत्वविवेचने। स्वस्यास्त्राशक्तावन्येन पूजादिकारयेत्। स्वयंवाप्यन्यतोवापिपूजयेत्पूजयीतवेतिभार्गवोक्तत्वात्। इदंचदेवीपूजनंशुक्लाष्ट
ह्यामपिकार्यंतदुक्तंचर्मप्रदीपेनष्टशुक्लेऽतथाजीवेसिंहस्थेवब्रहस्पतौकार्यानैवसत्वदेव्यर्चाप्रत्यब्दंकुलधर्मतः इति। मलमासेतुवचनाभावान्नभ
वति। अत्रस्याश्वस्याश्वपूजनमुक्तंदेवीपुराणे। आश्वयुक्शुक्लप्रतिपत्स्वातियोगेशुभेदिने। पूर्वमुच्चैःश्रवानामप्रथमंश्रियमाहरत्। तस्मा
त्ताश्चैर्नरैःसोत्रपूज्योसोश्रद्धयासदा। पूजनीयाश्चतुरगानवमींयावदेवहि। शांतिस्वस्त्ययनंकार्यंतदातेषांदिनेदिने। धान्यंभक्ष्यातकंकु
ष्टंवचासिद्धार्थकास्तथापंचवर्णेनसूत्रेणग्रंथिंतेषांतुबंधयेत्। वायव्यैर्वारुणैःसौरैःशाक्रैर्मंत्रैःसवैष्णवैः। वैश्वदेवैस्तथाग्नेयैर्होमःकार्योदिने एम॰
दिने। तुरंगारक्षणीयास्तुपुरुषैःशस्त्रपाणिभिः। नवताड्याःक्वचित्तेनवचाघ्याःकथंचनेति तत्र पूजाक्रमः। अश्वेत्यादिश्चार्य आश्वपीडाशां

तयेप्रातिपत्प्रभृतिनवम्यंतं चाश्वयुजनमहं करिष्य इति संकल्पयेत् । ततउच्चैःश्रवसेनमइति मंत्रेणोच्चैःश्रवसं संपूज्यान्यानश्वानश्वेभ्योनमइति संपूज्य शां
तिंस्वस्त्ययनं च कृत्वा धान्यमञ्जातकादीनां वस्त्रग्रंथिं बध्वा पंचवर्णेन सूत्रेण संवेष्ट्य कंठे तेषां बध्नीयात् ततो वातेत्यादिमंत्रैर्होमः । वायव्यादयो मंत्रा
स्तु वातआवातु भेषजं शंभु मयोभुवो हृदे । प्रणआयूंषितारिषदित्यादिपंचभिः मोषुवरुणमृन्मयं गृहंराजन्नहंगमं । मृडासुक्षत्रमृडयेत्यादिपंचभिः
। उदुत्यंजातवेदसमित्यादिभिःसप्तयोदश मंत्राः । इंद्रंतावृषभमितिनवभिः । विष्णोर्नुकंवीर्याणिप्रवोचमिति षड्भिः । आनोभद्राः क्रतवोयंतु विश्व
तइति दशभिः । अग्निमीळेपुरोहितमिति नवभिः । एवं नवमीपर्यंतमन्वहं कार्यं । मयूखेतुब्रह्मांडपुराणोक्तं रैवंतपूजनमुक्तं । सर्ववर्ज्याःसूपाद्याः सं
ताप्यासुखात्सर्वीतुरंगाः वाजिगणाधिपतिः पूजामंत्रः शालिहोत्रे । नमोदेवाधिदेवाय तुरंगवल्लिनारिरोमपूर्वेयपुत्राय देवायतुरंगसहिताय च तुरं
गपरिषत्प्रसन्नगजोपरिधावति । माश्वमश्वाधिपं परक्षमत्यागीत्वा व्रजाम्यहं मंत्रेणानेन रैवंतं याधाघैरर्चयेत्सुधीः । नास्तिहयप्रासादेशिष्ठात्स्तुमंत्रांतरं पठं
ति । सूर्यपुत्रमहावाहो छायाहृदयनंदन । शांतिं कुरु तुरंगाणां रैवंतापनमोस्तु ते इति । एवं नवम्यंतं संपूज्य । नवम्यां तुच्छतत्रानैः सर्वैः पूज्यास्तु ब्राह्म
णाइति । इत्यश्वपूजाविधिः । इति प्रतिपत्पूजाविधिः । प्रतिपदादिषु विशेषो दुर्गाभक्तितरंगिण्यां भविष्योक्तेश संस्कारद्रव्याणि प्रदद्यात्प्रतिपद्दिने । पक्कौते

जयसिंहक॰ लं द्वितीयायां सिंदूरालक्तकं तथा। मधुपर्कं वस्त्रयुग्मं तिलकं नेत्रमंजनं। पंचम्यामंगरागं च शक्त्यालंकरणानि च। षष्ठ्यां बिल्वतरौ बोधं सायं संध्यासु कार
८५ येत्। सप्तम्यां प्रातरानीय गृहमध्ये प्रपूजयेत्। उपोषणमथाष्टम्यां मातृशक्त्या च पूजनं॥ नवम्यां तु यथा चंडायाः पूजां कुर्याद्बलिं तथा। कुमारीपूजनीया
85 च भूषणाद्यास्तु भूषणैः। संपूज्य प्रेषणं कुर्यात् दशम्यां शाबरोत्सवैः। अनेन विधिना यस्तु देवीं प्रीणयते नरः। स कं द्रवत्यालये देवी तं तु त्रैधनकीर्तिभिः॥
कन्यातं त्वाराधितं लिंगे॥ कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभे पिबा। नवम्यां बोधयेद्देवीं महाविभवविस्तरैः। शुक्लपक्षे चतुर्थ्यां तु देवीकेशविमोक्षणं। प्रा
तरेव तु पंचम्यां स्नापयेत्तु शुभैर्जलैः। षष्ठ्यां सायं प्रकुर्वीत बिल्ववृक्षेऽधिवासनं॥ सप्तम्यां पत्रिकापूजा अष्टम्यां चाप्युपोषणं। पूजा च जागरश्चैव नव
म्यां विधिवद्बलिः। विसर्जनं दशम्यां तु क्रीडाकौतुकमंगलैः। अवन्त्यां तु विशेषः परिभाषायां सेपः। अथाशौचे विशेषो निर्णयामृते विश्वरूपनि
बंधे आश्विनस्यासिते पक्षे शारद्येन वरात्रके। शावाशौचे समुत्पन्ने क्रियाः कार्याः कथं बुधैः। इति प्रश्ने सूतकं वर्तमाने च समुत्पन्नं यदा भवेत्। देवी
पूजा प्रकर्तव्या पशुयुक्त विधानतः। अत्र नवरात्रे वर्त्तमाने सूतकं प्रसज्जं भवेदित्यन्वयः तथा। सूतके पूजनं देव्याः पूजा प्रकर्तव्या पशुयुक्त विधानतः। राम॰
अत्र नवरात्रे वर्त्तमाने सूतकं युग्याः दानं वैश्वविशेषतः देवीमुद्दिश्य कर्त्तव्यं तत्र दोषो न विद्यते इति। गौडनिबंधे तिथितत्त्वेप्युक्तं। आश्विन कृष्णनव ८५

85A माहिष्मुङ्क्रु प्रतिपदादिषष्ठ्याहिमसमाहिषैकं कर्मी । जातश्चमध्ये आशौचपाते पि न दोषः । संकल्पोव्रतसत्रयोरिति विष्णुक्तेः । आरब्धं स्वयमेव कार्यं
। अनारब्धं त्वन्येन कारयेदिति विहितो हासीये ॥ रजस्वला तु अन्येन कारयेत् । सूतकादिवाहिरोषवचनाभावात् । अत्रानिर्णीमासमताहोयहाशौचेपि
नवरात्रपूजादिकं स्वयंकर्त्तव्यमित्युक्तं तन्मतं । शिवाचैनवंहिकाग्रंथ लिखितनारदादिपंचरात्रग्रंथविरोधात् । तथाचतत्वसागरसंहिता
यां । आतुरो सौतिकी चैवत्रासौ दौर्बोधकी तथा । साधनाभाविनो चेति पंचधाभिद्यते पुनः । यदिलंघनपर्यंतो व्याधिरात्मनिदृश्यते । तदा पूजा
न कर्त्तव्यास्वयंहिं लिंप्रतिमास्तदा । नस्नानं दंतकाष्ठं वा ऊर्द्धोमसमथापिवा । रविमंडलमालोक्य प्रतिमामथवा पुनः । मूलमंत्रं सकृज्जप्त्वा पुष्पमा
क्षतमुत्क्षिपेत् । श्रान्तो व्याधिभिरत्युग्रैः क्लान्तश्चैवो पवासकैः ॥ निजसामयिकैर्वापि स कर्त्तव्यं समापयेत् । स्नात्वा देवमथाभ्यर्च्य गुरुं च विप्रान्संपूज्य
वा एतावत्कालविच्छिन्नाः पूजायुष्मत्प्रसादतः । नदोषोस्त्विति संप्रार्थ्य पुनः पूर्ववदाचरेत् । यस्तु रोगवशान्मोहवशाद्वा दुरुपागतः । जपेन क्षा
लनीयः स्यात् हानेन हवनेन चेत्यादि । अत्र वृहस्पतिः । किंनः पूजाविदास्मागमचोदिता । स्नाता निर्वाणदीक्षितश्चेन्न स्यात्किं पयात्तदा । बाह्यपूजाक्र
मेरोगवस्थानयोगेन पूजयेत् । यदि कामी न चेत्कामी नित्यं पूर्ववदाचरेत् ॥ त्रासिनोवक्ष्यते पूजाय श्चैवागमचोदिता ॥ लब्ध्वा वा यदि वालब्ध्वा मिस्रादि

जपसिंहक.

८६

86

।सर्वोल्लासेन्वा।सुजोदकेन कर्त्तव्यानवेज्ञापं चविघतो।तघासंसृजयेद्दे वंभावनाकुस्तुमादिभिः।ह्रौंवौंविंकींप्रवक्ष्यामि पूजामागमबोधितो।मूर्खेस्त्री
बालवृद्धाघाडुर्वोधा इतिभाषिताः।मूलसुतिंषडंगानितेषांपूजाविधीयते।अन्येषामपिसर्वेषांप्रोक्तासंक्षेपकर्मणीति।यानित्वविर्क्षुहिव न
नानियज्ञव्रतविवाहेषु श्राद्धेहोमार्चनेजपे॥प्रारब्धेसूतकंनस्यादनारब्धेचसूतकं।प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः।नांदीमुखंविवाहा
दौश्राद्धेपाकपरिक्रियेति।यत्त्वाजपो देवार्चनविधिःकार्योदीक्षान्वितैर्नरैः।नास्तिपापंयतस्तेषांसूतकंवायतात्मनामिति देवीयामल
वचनं।सूतकेमृतकेचैव धर्मोज्ञाराद्धिकेतथा।जप्यंवाघ्यंनथाकुर्यान्मंत्रन्यासपुरःसरमिति मत्स्यानीतंत्रवचनं॥अत्रार्घ्यग्रहणांपूजोपलक्ष
णां।शिवविष्ण्वर्चनेदीक्षायस्यनाग्निपरिग्रहः।ब्रह्मचारियतीनांचशरीरेनास्तिसूतकमिति विष्णुयामलवचनात्।सूतकेमृतकेचैवनित्यंवि
ष्णुमयस्य वा।मातुषं।नस्यादिप्रेन्द्रसर्घःशुद्धिःप्रजायतइतिनारदपंचरात्रवचनं।उपासनेत्वविप्राणामंगशुद्धिःप्रजायतइतिपराशरव
चनं।सूतकेमृतकेवापिनत्याज्यंशिवपूजनमिति लिंगपुराणवचनमेतानिसर्वाणीगीत्राह्मणपराणेव।विप्राणामिसुतकेः मात्मगतसेवपूजोपम·
हंसुवेरप्यसुवेरपि।स्त्रीमृद्धस्यापिसंस्पर्शं वर्जयेत्सुतुस्तहमिति विष्णुवचनात्।विप्रस्यात्रसहैवाहंसुवेरप्यसुवेरपि।पूजांगहस्ता ८६

86A मिश्रः इमसउनः स्वाचारवर्तिन इति शिववचनाच्च। अत्र शूद्र इत्येतदुपलक्षणं क्षत्रियवैश्ययोरपि विप्राणामपि तां त्रिकशूद्रजायामेवाधिकारः। यत्तादौ तु न
। त्वाग्निहोत्रादिकर्मार्थं स्मृतिसत्कालिकीमतेति वचनेनाग्निहोत्रादावेव शुद्धमभिधानात्॥ तात्कालिकीया वृता कर्मसिध्यति। नैमित्तिककाम्यतां
त्रिकशूद्राजायां तत्वेषामपिनाधिकारः। सूतके मृतके वापि प्रवर्तमाने तु नारदः कामतः पूजितेमंत्रेशांतिकादौ च कुत्र चित्। जपे लक्षशतं मंत्री सिद्धमंत्र
सम्भक्तितः। शतत्रयमकामाच्च प्रामाश्विन्तविधौ जपेदितिनारद पंचरात्रवचनात्। स्मृत्यर्थसारेऽपि प्रायश्चित्तमुक्तं मन्द्रहारज स्वलाद्युपस्पर्शनेज
लाद्विवासं कृत्वा कलशेन स्नपयेदिति॥ विश्वरूपनिबंधादि वचनं तु गौडथिंत भावेऽणान्यद्वारा पूजाकारणीय तस्यैकत्वेन धारणीयं। कृत्यर
त्नाकरस्यामपि मात्स्ये। अंतरा तु रजोयोगे पूजामन्येन कारयेत्। एवमाशौचेऽपि। सूतकात्याकृत्वमास्थम नैकाहं तु यद्भूतं कायिकं तत्तु कुर्वी
त नत्तु दानार्जनं जपं। सूतकाहे तु यत्किंचिद्दानाद्यंतरितं भवेत् सूतकानंतरे तद्धि तत्कर्त्तव्यमतं द्विजैरिति। तस्मात्सूतकिभिः पूजनं नकार्यं
मतिनिषिद्धारात्तु कार्यमेव। दीक्षितोऽप्येवं। अतएव सूतकाशिष्टैः पूजनं न क्रियत इत्याचारोऽपीत्यलं विस्तरेण॥ ॥इति नवरात्रे सूतकादि
निर्णयः॥ आश्विनशुक्लद्वितीयायां दानस्नानं तत्प्रतं च वचनं तु द्वितीयाप्रकरणे वक्ष्यते। आश्विनशुक्लपंचम्यामुपांगललितावतं द्वादशीणा

जयसिंहक०
८७
87

सेवप्रमिदं ॥ तदुक्तं स्कांदे । शुक्लपक्षस्य पंचम्यामिषे मासि चरेद्व्रतमित्यादि ॥ अत्र पंचमी रात्रिव्यापिनी ग्राह्येति केचित् । मध्याह्नव्यापिनी ग्रा
ह्येत्यपरे । वचनानि तु पंचमीप्रकरणे वक्ष्यंते । कथापूजनादिकमपि तस्मिन्नेव प्रकरणे बोध्यं । इति पंचमीकृत्यं ॥ आश्विनशुक्लपक्षे मूलनक्ष
त्रे सरस्वत्याः स्थापनं कार्यं । यथोक्तं निर्णयामृते देवीपुराणे । मूलेषु स्थापनं देव्याः पूर्वाषाढासु पूजनं । उत्तरासु बलिं दद्यात् श्रवणेन विसर्ज
येत् । रुद्रयामलेपि । मूलर्क्षे वस्तुराधीश पूजनीया सरस्वती । पूजयेत्सह देव्या वहे स्मश्रमर्क्षके । नाध्यापयेन्न च लिखेन्नाधीयीत कदाच
न । पुस्तके स्थापिते देवि विद्याकामो द्विजोत्तमः । मूलस्थापया देव आवाहनमिति शिष्टाः । श्रवणाख्यपादे च विसर्जनं । आदिमा गे निशायां
तु श्रवणा स्याद्यदा भवेत् । संप्रेषणं तदा देव्याः दशम्यां च महोत्सव इति चिंतामणौ ब्रह्मांडपुराणात् ॥ अथ षष्ठीकृत्यं ॥ निर्णयामृते । आश्विन
शुक्लपंचम्यां स्थापिताया देव्याः सप्तम्यां पूजार्थं षष्ठ्यां ज्येष्ठानक्षत्रयुक्तायामसंभवे केवलायामपि बिल्ववृक्षाभिमंत्रणं कार्यं । कालि
कापुराणे बोधयेद्बिल्वशाखायां षष्ठ्यां देवीं फलेषु चेत्यादि ॥ अत्र सर्वत्र तिथिनक्षत्रयोगाद्यसंभवे मुख्यः कल्पः । तदभावे तु तिथिरेव ग्राह्या स्म
तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रितं । तस्मात्तिथिं प्रशंसंति न नक्षत्रं तिथिं विनेति विद्यापतिलिखितवचनात् । देवलः । तिथिनक्षत्रयो ८७

87A येंगेद्धपोरेवानुपालनं। योगाभावे तिथिर्योग्या देव्याः पूजनकर्मणीति॥ अथ षष्ठीसायंकालव्यापिनी ग्राह्या षष्ठ्यां बिल्वतरौ बोधं सायंसंध्या
सु कारयेदिति भविष्यवचनात्। पत्रीप्रवेशात्पूर्वं तु सायंकाले षष्ठ्यभावे तत्पूर्वदिने अधिवासनं कार्यं। सायंकाले संतानस्त्वेतदधिवासनं नत्वोपः ष
ष्ठ्यां सायं प्रकुर्वीत बिल्ववृक्षे अधिवासनमिति वचनादिति कल्पतरुः। सायंश्रुतिः फलातिशयमात्रार्थो न तु कर्मलोपः इत्यावा पत्रिकाडामगणाः। रु
सरत्नावलंबा कालतत्त्वविवेचने वमेवा आमंत्रणं तु। पत्रीप्रवेशो व्यवहितपूर्वे दिने कार्यः। पत्रीप्रवेशनं रात्रौ न कार्यं। पत्रीविसर्जनं रात्रौ प्र
वेशं वा करोति यः। तस्य राज्यविनाशः स्याद्राजा जानु विकलो भवेत्। कुक्षिपीडा गुरोर्धेन रात्रौ पत्रप्रवेशनं। विसर्गं वा करोति यस्तु स राष्ट्रः सविनश्य
तीति निषेधात्॥ तेन च पत्रीप्रवेशनस्याष्टमीविद्धायां सप्तम्यां प्रातः कर्त्तव्यत्वात्तदव्यवहितपूर्वदिने एव सायाह्ने षष्ठ्यभावे प्यामंत्रणं कार्यं
। पत्रीप्रवेशात्पूर्वं तु सायाह्ने बिल्ववासिनीं। चंडीमामंत्रयेद्विद्वानाचषष्ठीपुराद्विपेति ब्रह्मांडपुराणवचनात्। मत्स्यसूक्ते पि षष्ठ्या वा प्यथ
वा षष्ठी सायंकाले न चेद्भवेत्। सायमेव तथापि स्याद्बिल्वशाखाभिमंत्रणं। अथ षष्ठीमनक्षत्रं सायं प्राप्यामपि त्यजेत्। पत्रात्तु पत्रिकापूजा
नपरे तु भवति। मन्निकोष्ठ तु यत्र वैष्णव्यादिवस्त्रमस्तु। तद्दिने वरं गृहीत्वा परेशानां प्रवेशयेदिति। तत्र पूजनक्रमः। बिल्वाभ्याशं गत्वा वि

जयसिंहक॰ ल्ववृक्षस्थापनमइति बिल्वतरुं संपूज्य । बिल्ववृक्षे जपेतीमं मंत्रेणा दुर्गेरहाणां षष्ठेह तिष्ठेत् दुर्गामावाह्य षोडशभिः पंचभिर्वोपचारैः स्नातचैव संपूज्य गी
८८ तवाद्यघोषपुरःसरं तत्रैव देवीं विबोधयेत् । तत्र मंत्रः । रावणस्य वधार्थाय रामस्यानुग्रहाय च । अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा । अ
४४ हमप्याश्विने षष्ठ्यां सायाह्ने बोधयामि वै ॥ ततो बिल्वतरुमामंत्रयेत् । मेरुमंदरकैलासहिमवच्छिखरे गिरौ । जातः श्रीफलवृक्ष त्वमंबिकायाः स
दाप्रिय । श्रीशैलशिखरे जात श्रीफल श्रीनिकेतन । नेतव्योसि मया वृक्ष गच्छ दुर्गास्वरूपतः इति । एवं देवीमधिवास्य परदिने सप्तम्यां मूलयुक्ता
यां केवलायां वा पूर्वदिनामंत्रित बिल्वतरुसमीपं गत्वा पुनस्तं संपूज्य गृहं प्रवेशयेत् । तदुक्तं हेमाद्रौ लैंगे । मूलाभावे तु सप्तम्यां केवलायां प्रवेश
येत् । युग्माभ्यां नवबिल्वस्य फलाभ्यां शाखिकांतयोः । तथैव प्रतिमां देव्याः स्नातास्ववेश्म प्रवेशयेत् ॥ अत्र नोपवासः पूजादावौदयिकी सप्तमी
ग्राह्या । मत्स्यपुराणवाक्यात् पूर्वा । युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया । रवेरुदयमीक्षंते न तत्र तिथियुग्मतेति कृत्यतत्त्वार्णवोदाहृतवचनात् । भ
गवत्याः प्रवेशादि विसर्गांता श्च याः क्रियाः । तिथावुदयगामिन्यां सर्वास्ताः कारयेद्बुध इति तिथितत्त्वे नंदिकेश्वरपुराणाच्च । उदयगामिनितरं गीरायाम स्म॰
ये वा । तत्रापि घटिकातो न्यूनत्वे पूर्वान्वकार्या । व्रतोपवासनियमे घटिकैकापि या भवेत् इति देवलोक्तेरिति गौडाः । दाक्षिणात्यास्तु युग्मवाक्यात् पूर्वा ८८

88A

कुर्वंति। पत्रिकाम् अजावपूर्वो हि तान् एव कार्या। नत्वमूलात् तु रोधात् अन्यथा अन्हादाविति कल्पतन्वार्णवे उक्तं। ज्योतिषेपि। पूर्वाह्णे तु न वपत्रिकाशुभकरीस

र्वार्थसिद्धिप्रदा अपराह्णे पंथनदाऊरा तिविजयं चंडीप्रवेशे शुभा। मध्याह्ने जनपीडनक्षयकरी संग्रामघोरावहा। याह्नेवधबंधनाहिकलहं स

र्वक्षतं सर्वदा॥ सप्तम्यामस्तगायां पाद्धिविशतिगृह्ये पत्रिका श्रीफला घ्राणतः सर्वांग जंजन सुख मरवि लह तिमूलात् तु रोधात्॥ तस्मात् सूर्यो

दये स्यानरपति शुभहासप्रमीप्राप्य देवीभूपालो वशये त्वां सकलज नहितां गक्षसर्वोविहायेति अथसप्तमीकृत्यं। नित्यविधिं निर्वर्त्य पूर्वनिमंत्रि

तविल्वसमीपं गत्वा संपूज्या गच्छवरदे देवीति पूर्वोक्तमंत्रपठित्वा प्रार्थयेत॥ विल्वरक्ष महाभाग सर्वदा शंकरप्रिय। गृहीत्वा तव शाखां तु दु

र्गापूजां करोम्यहं। शाखाच्छेदोद्भवं दुःखं न च कार्यं त्वया प्रभो इति। ततः फलद्वययुक्तां शोभनामपराजितादिगतामेकां शाखां छेदयेद्वानस्पत्ये

नमंत्रेण। मंत्रस्तु। वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयं रुहेम। यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगायेति। क्वचिच्छिंधि

छिंधि फट् ॐ हूं फट् स्वाहेति मंत्रः। ततस्तां शाखामानीय गृहांगणे पीठे संस्थाप्य शुद्धोदकेन स्नापयेत् विल्वशाखायै नमः इत्यर्घ्यादिभिः पूजयि

त्वा विल्वशाखायां पत्रिकामयप्रतिमायां च देवीमावाहनपूर्वः सर्वं तर्पेयेत् पूजयित्वा माषभक्तादिबलिं च दत्वा होला दिनाशाखां प्रतिमां च पूजागृहं आर

जयसिंहक ८९ 89 देशमानीय तत्रैव स्थापयित्वा पूजागृहास्थितानिभृतानिभृतेभ्यो नम इति गंधादिभिः संपूज्य भूताः प्रेताः पिशाचाश्च ये वसंत्यत्र भूतले । तेगच्छंतु
मया दत्तो बलिरेष प्रसाधितः । पूजिता गंधपुष्पाद्यैर्बलिभिस्तर्पितास्तथा । देशादस्माद्विनिःसृत्य पूजां पश्यंतु मत्कृतां भूतेभ्य एष माषभक्त
बलिर्नम इति सपुष्पजलोत्सर्गेण बलिं तेभ्यो दत्वा । अपसर्पंतु ये भूता ये भूता भुवि पालकाः । भूता नाम विरोधेन पूजाकर्म करोम्यहमिति पठि
त्वा फडिति तानपसार्य तत्र सर्षपान् दिक्षु विकिरेत् । तदुक्तरत्नोहोषस्मरणात् । तथा च कालिकापुराणे । स्थितेषु तत्र भूतेषु नैवेघंमंडलेन था । वि
लुंपंति महालुब्धा न च गृह्णंति देवताः । तस्माद्यत्नेन कर्त्तव्यं भूतानामपसारणमिति । शारदातिलके । विकिरान्विकिरेत्तत्र सर्वमजप्तानशु
रास्त्रुना । लाजचंदनसिद्धार्थफलपुष्पांकुराक्षताः । विकिरा इति संप्रोक्ताः सर्वविघ्नविनाशना इति । शरारुः फडितस्त्रमंत्रः । सर्वाभिमं
त्रणो विकिरणो वा ततः पुनः शाखायां प्रतिमायां च देवीं संपूज्य श्रीशैलेत्यादिनेतद्यो सि मया गृह्य पूज्यो दुर्गास्वरूपतः इति दुर्गास्वरूपतया शा
खां बध्वा गीतवाद्यादिघोषेण प्रतिमासहितां तां पूजागृहं प्रवेश्य । आरोपितासि दुर्गे त्वं मन्मये श्रीफलेऽपि च ॥ स्थिरा नितांतं भव त्वा मे गृहे त्वं कारम·
महाभवेति पूजास्थाने शोभनपीठोपरि स्थिरीकृत्य पूर्वोक्तप्रकारेण प्राणप्रतिष्ठां कृत्वा प्रतिष्ठामंत्रेण प्रतिष्ठाप्य सपुष्पाक्षतानादाय त्र्या ८९

89A

वाहयाम्यहं देवीं मन्मये श्रीफले तथा ॥ कैलासशिखरा देवि विंध्याद्रे हिमपर्वतात् । आगत्य बिल्वशाखायां चंडिके कुरु सन्निधिं । भगवति दुर्गे
इहागच्छ स्वमयोगं वा ह्य । स्थापितासि मया देवि श्रीफले मन्मये शिवा । आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते । भगवति दुर्गे इह तिष्ठ तिष्ठ इति स्थापयि
त्वा कृतांजलिर्दुर्गे दुर्गस्वरूपासि सुरतेजो महाबले । सदानंदकरे देवि प्रसीद मम सिद्धये ॥ एषोहि भगवत्यं बशत्रुद्वपूजयम्पदे । भक्तितः
पूजयामि त्वां दुर्गे देवि स्थिराभविता । पल्लवैश्च फलोपेतैः पुष्पैश्च सुमनोहरैः । पल्लवैः संस्थिते देवि पूजये त्वां प्रसीद मे । दुर्गे देवि इहागच्छ सान्नि
ध्यमिह कल्पय ॥ यज्ञभागं गृहाण त्वं योगिनीकोटिभिः सहेति पठेत् । ततो जयंती सा दिव्ये गात्रानुलेपनां तं पूजयित्वा पुष्पांजलित्रयं द
घा दो दुर्गायै नमः इत्यावाहनेन । ततः श्रीमतो वृक्षं श्रीवृक्षे शंकरस्य समदापियं । बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि इति बिल्वपत्रं । ब्रह्मविष्णु
शिवादीनां प्रीणा पुष्पं समदापि पं । तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये इति पुष्पं च निवेद्य जयंतीतादि इमानि पुष्पाणि दुर्गायै नमः इति
जातीचंपकादि संगं द्विपुष्पाणि पिदत्वा तथैव धूपदीपनानानैवेद्य षद्गुणं वराञ्च मनीयंतांबूलानि दत्वा पूजां साङ्गां समाप्य अर्थं किंचिद्दक्षिणां च दत्वा स्तुति
भिः स्तुत्वा प्रणम्य बद्धांजलिः प्रार्थयेत् । महिषघ्नि महामाये चामुंडे मुंडमालिनि ॥ द्रव्यमारोग्यमैश्वर्यं देहि देवि नमोस्तु ते । ॐ ॐ सेन सभा ल श्वेद

जयसिंह क॰ नेनाविलेपिते। बिल्वपत्रकृतापीडे दुर्गेहं शरणं गतः। सर्वमंगलेतिरूपं देहीति च श्लोकद्वयं पठेत्। ततः कदल्यादिपत्रिकास्थ पूजा। तासु रंभा कापि

९० हरिद्रा च जयंती बिल्वदाडिमौ। अशोको मानवृक्षश्च धान्यादि नवपत्रिका इति कृत्यतत्वार्णवे उक्ताः। तत्र कदल्यां ब्रह्माणीं दाडिमे रक्तदंतिकां।

90 धान्ये लक्ष्मीं हरिद्रायां दुर्गां माने चामुंडां कचौ कालिकां बिल्वे शिवां अशोके शोकरहितां जयंत्यां कीर्तिं चावाह्य पूजयेत्ततो बलिं दद्यात् दुर्गां

शिवामित्यादि च पठेत्। कालतत्वविवेचने। पत्रिकापूजा च प्रतिष्ठापितदेवीप्रतिमासमीपे एव पत्रिकायां प्रतिमापूजायामपि सप्तम्या

दिपक्षे सत्यां पत्रिकयैव सह प्रतिपाद्या त्र्यादि देव्याः पूजा तद्गृहप्रवेशादि विसर्जनांतं कर्तव्यमिति दुर्गाभक्तितरंगिण्यामिति। इति सप्तमीपू

जाविधिः। अथाष्टमी सा च पूर्णा चेत्सैव खंडा चेन्नवमीविद्धा ग्राह्या। सप्तमीविद्धायाः निषिद्धत्वात् सर्वथा नवमीविद्धालाभे सप्तमीविद्धैव

ग्राह्या। वचनानि तु अष्टमीप्रकरणे वक्ष्यंते। अत्र कृत्यमुक्तं निर्णयामृते भविष्योत्तरे। तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी। प्रादुर्भूता महा

घोरा योगिनीकोटिभिः सह। अतोर्थं पूजनीया सा तस्मिन्नहनि मानवैः। उपोषितैर्वस्त्रमाल्यधूपैर्ललानुलेपनैः। आमिषैर्विविधैः शाकैः होमै राम॰

ब्राह्मणतर्पणैः। बिल्वपत्रैः श्रीफलैश्च चंदनेन घृतेन वा पशुभिः पानकैर्दीपैर्नृत्यजागरणेन वेति। अयं च केवलाष्टम्युपवासः पुत्रवतो निषि ९०

90A

ढः। उपवासं महाष्टम्यां पुत्रवान्न समाचरेत्। यथा तथा वा पूतात्मा व्रती देवीं प्रपूजयेत् इति कालिकापुराणोक्तेः। अष्टमीति श्रवणादिवा पूजा प्रती
यते॥ निशायां पूजिता देवीत्यनेन प्रागुक्तवचनेन कन्यासंस्कारवाविस्तादिना वज्राष्टम्यां रात्रावपि पूजनं कर्त्तव्यमित्युक्तं विशेषतोपि पूजनं तत्र
कर्तव्यमित्युक्तम् अतएव पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत्। जागरं च स्वयं कुर्याद्बलिदानं महानिशीति। कालतत्वविवेचने देवीपुराणे
पशुघातः प्रकर्त्तव्यो गावयाजैवमस्तथा। देवीं तु पूजयित्वा ये अष्टम्यां घातयन्ति पशून्भक्त्या ते भवन्ति महाबलाः॥ बलिं च ये प्रयच्छं
ति सर्वं भूतविनाशनं। तेषां तु तुष्यते देवी यावत्कल्पं तु शांकरमित्यादि। भविष्योत्तरे। तस्यां संपूजनीया चामुंडा मुंडमालिनी। तस्यां ये खु
पशुरूपेण गीर्णा नो महिषादयः। सर्वे ते स्वर्गतिं यान्ति घ्नतां पापं न विद्यते। यावन्त्येव लवेशानि पशुमावन्ह्यन्यते। न तथा बलिदानेन पुष्पधूपवि
लेपनैः। यथा संतुष्यते मेषैर्महिषैः विंध्यवासिनी। बलिदानं च मांसेन मघेन सहितोदनं। सप्तम्यां पत्रिका पूजा अष्टम्यां चाप्युपोषणं। पूजा च
जागरश्चैव नवम्यां विधिवद्बलिरिति। भविष्योत्तरे। जयाभिलाषी नृपतिः प्रतिपत्प्रभृति क्रमात्। लोहाभिसारिकं कर्म कारयेद्यावदष्टमीमिति
। लोहाभिसारिकविधानं तत्रैवोक्तं। प्रागुदक्प्रवणे देशे पताकाभिरलंकृतं। मंडपं कारयेद्दिव्यं नवसप्तकरं वरं। षोडशहस्तप्रमाणमित्यर्थः। आग्नेय्यां

जयसिंहक कारयेत्कुंडं हस्तमात्रं सुशोभनं ।मेखलात्रयसंयुक्तं योन्याश्वत्थदलाभया ।।राजविन्हानि सर्वाणि शस्त्राण्यस्त्राणि यानि च ।आनीय मंडपे तानि स
९१ वीरापत्राणि वासयेत् ।ततः सुब्राह्मणाः स्नाताः शुक्लांबरधराः शुचिः ।ॐकारपूर्वकैर्मंत्रैस्तल्लिंगैर्जुहुयाद्धृतं ।लोहनामाक्षवृक्षत्वग्दानवः स्तु महा
91 बलः समदेवैः समो रुद्रो बहुधा शकलीकृतः ।तदंगसंभवं सर्वं लोहं संदृश्यते क्षितौ ।शस्त्रास्त्रमंत्रैर्होतव्यं पायसं घृतसंयुतं ।हुतशेषं तु रंगाणां
राजा वस्तु पहारयेत् ।लोहाभिसारिकं कर्म तेनैतद्दृष्टिभिः स्मृतं ।धृतपल्लवरागानश्वान्गजांश्च समलंकृतान् ।भ्रामयेन्नगरे नित्यं न दिघोषघु
रस्कृतान् प्रत्यहं नृपतिः स्नात्वा संपूज्य पितृदेवताः ।पूजयेद्राजविन्हानि पुष्पमाल्यविलेपनैः ।हुतशेषं प्रदातव्यं मोपनाय निकेगजो ।तस्माभि
सरणाद्राजो विजयः समुदाहृतः ।पूजामंत्रान्प्रवक्ष्यामि पुराणोक्तान्हे तवायैः पूजिताः प्रयच्छंति कीर्तिमायुर्यशो बलमिति ।। अथ लोहाभिसारिक
कर्मप्रयोगः ।विजयप्राप्तिकामो लोहाभिसारिकं कर्म करिष्ये इति संकल्प्य षोडशहस्तप्रमाणं मंडपं त्र्याद्यन्यतमं मेखलात्रययुक्तं सयोनिहस्त
मात्रं कुंडं च कारयित्वा सर्वाणि राजविन्हानि मंडपे निधापयेत् ।ततः स्नाताः शुक्लांबरधरो ब्राह्मणा ॐकारपूर्वकैस्तल्लिंगैर्मंत्रैर्घृतं जुहुयात् ।।श रुद्र॰
स्त्रास्त्रमंत्रैर्घृतसंयुतपायसं च हुत्वा हुतशेषं तु रंगाण्युपहारयेत् ।ततः समलंकृतान्सपल्लवरागानश्वान्गजांश्च वा घघोषघुरःसरं नगरे प्रत्यहं भ्राम ९१

91A येत्। ततो राजा छत्रमंगानस्त्वा नः पिहित देवतास्त्र संछन्न विजयारोग्यादि वृद्धये छत्रादि इंजनमहं करिष्य इति संकल्प्य। छत्राय नम इत्यादि मं
त्रेण गंधादिभिः संपूज्य पठेत्॥ यथा दुःख छादयति शिवायेमां वसुंधरां। तथाच्छादय राजानं विजयारोग्यवृद्धये॥ अथ चामरमंत्रः। शशांककरसं
काशः क्षीरडिंडिर पांडुरः प्रोत्सारयाशु दुरितं चामरामरदुर्लभ॥ अथ खड्गमंत्रः। असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः। श्रीगर्भो विजय
श्चैव धर्मधारस्तथैव च। इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा। नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः। हिरण्यं च शरीरं ते धाता देवो जनार्दनः
। पिता पितामहो देव स्त्वं मां पालय सर्वदा। नीलजीमूतसंकाश तीक्ष्णदंष्ट्र कृशोदर। भावशुद्धोमर्षणाश्च अतितेजास्तथैव च। इयं येन धृता
क्षोणी हतश्च महिषासुरः। तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नम इति। अत्र केचिन्मंत्रा महानिबंधे षट् दृष्टा अपि पठंति ह ष्टालिख्यंते। अ
थ कटारमंत्रः रक्षांगानि गजान् रक्ष रक्ष वाजि धनानि च। मम देहं सदा रक्ष कटारक नमोस्तुते। अथ छुरिकामंत्रः। सर्वायुधानां प्रथमं नि
र्मितासि पिनाकिना॥ शूलायुधाद्विनिष्कृष्य कृत्वा मुष्टिग्रहं शुभं। चंडिकायाः प्रदत्तासि सर्वदुष्टनिवर्हिणी। तथा विस्तारिता वासि देवानां प्रति
पादिता। सर्वसत्वांगभूतासि सर्वाशुभनिवर्हिणी। छुरिके रक्ष मां नित्यं शांतिं यच्छ नमोस्तुते। ५। अथ कवचमंत्रः। शर्म प्रदस्त्वं मम मे देव मर्मस

जयसिंहक० वीयशोत्रुद्धारक्षमां रक्ष राणीयो हंतापनेपन मोस्तुते ।६ अथ वर्म मंत्रः । चंडिकायाः प्रदत्तं त्वं सर्वदुष्टनिवर्हणं ।। त्वया निस्तारिता देवाःस्तुपति
९२ र्थ्यपि तामहैः । अतस्त्वमपि बलं सर्वं विनय मे देवसत्तमैः । तस्माद्वयोधनेभ्यक्ष शत्रुन्नाशय सर्वदा ।७ अथ चापमंत्रः । सर्वायुधमहामात्र सर्वदे
92 वारिसूदना । चापमां समरे रक्ष साकं शरवरैरिहाद्य । ततः कृष्णेन रक्षार्थं संहारायहरेता च । त्रयीमूर्ति गते देवं धनुर त्वं नमाम्यहं ।८ अथ शक्तिर्
जा । शक्तिस्त्वं सर्वदेवानां गुहस्य च विशेषतः । शक्तिरूपेण देवि त्वं रक्षां कुरु नमोस्तुते ।९ अथ कुंतमंत्रः । प्रासपातयशत्रूं स्त्वमनयाना
कमापया गृहाण । जीवितं तेषां मम सैन्यवरक्षय १० । अथ आग्नेयमंत्रः । आग्नेय शस्त्र नमस्तेस्तु हरतः शत्रुनाशन ।। शत्रून्दहाहे शीघ्रं
त्वं शिवं मे कुरु सर्वदा ११ । अथ पाशमंत्रः । पाशस्त्वं नागरूपोसि विषपूर्णो विषोद्भवः । शत्रवो हित यावद्धा नागपाश नमोस्तुते ।। १२ अथ पर
शुमंत्रः । शक्रकेतो महावीर्यस्तु पराख्यस्त्वमुपाश्रितः । पत्रिराज नमस्तेस्तु तथा नारायणध्वजः । काश्यपेयामृताहर्त्ता नागारे विष्णुवाहन ।। अ
प्रमेय दुराधर्ष रणे देवारिसूदन । गरुत्मान्मारुतगतिस्त्वयि सान्निहितो यतः । साश्ववर्मायुधान्योधान् रक्षत्वं वरिपून्दह ।१४ अथ पताकामंत्रः । हु राम०
तभुक्कृष्णसम्भोत्सृष्टा वायुः सोमो महर्षयः । नागाकिन्नरगंधर्वयक्षभूतगणाग्रहाः । प्रमथास्तु सहादित्यैर्भूतेशो मातृभिः सह । शक्रसेनापतिस्कं ९२

92A

दोवरुणस्याश्रितस्त्वयि। प्रदहंतु रिपून्सर्वान्राजा विजयमृच्छतु। यानि प्रयुक्तान्यरिभिरायुधानि समंततः। पूतं तत्परिशत्रूणां हता नित्तु तेज
सा। हिरण्यकशिपोर्युद्धे युद्धे देवासुरे तथा। कालनेमिवधे यद्वद्यद्वत्त्रिपुरघातने। शोभितासि तथैवाद्य शोभयास्मान्स्वसंभवाः। नीलांश्वेतामि
मां दृष्ट्वा नश्यंत्वाशु नृपारयः। व्याधिभिर्विविधैर्घोरैः शस्त्रैश्च युधि निर्जिताः। सघः स्वस्याभवं त्वस्मात्द्वाते नापमार्जिताः। एतन्नारवती नाम्ना
कालरात्रिश्च या स्मृता। दहत्वाशु रिपून्सर्वान्पताकेतं मया चिता १५। अथ कनकदंडमंत्रः। शोत्लारणायदुष्टानां साधुसंरक्षणाय च। ब्रह्म
णा निर्मितश्चासि व्यवहारप्रसिद्धये। यशो देहि सुखं देहि जयदो भव भूपतेः। ताडय स्वरिपून्सर्वान्हेमदंड नमोस्तु ते १६ अथ दुंदुभिमंत्रः। दुं
दुभे त्वं सपत्नानां घोषाद्धृदयकंपनः। भव भूमिपसैन्यानां तथा विजयवर्द्धनः। यथा जीमूतघोषेण प्रहृष्यंति वर्हिणः। तथास्तु तव शब्देन
हर्षोस्माकं मुदावहः। यथा जीमूतशब्देन स्त्रीणां त्रासोभिजायते। तथैव तव शब्देन त्रसंत्वस्मद्विषो रणे।। अथ शंखमंत्रः।। पुण्यस्त्वं श
ख सुराणां मंगलानां च मंगल। विष्णुना विधृतो नित्यं अतः शांतिप्रदो भव।। अथ सिंहासनमंत्रः।। विजयो जयदो जेतारिपुहंता भयंकर
ः दुःखहा धर्मदः शांतः सर्वारिष्टविनाशनः। सप्तैवैतानि धौम्यर्मेजवासिंहा महाबलाः। तेन सिंहासने नित्यं त्वं वै हैमे चैत्रगीयसेत्वयि स्थितः

जयसिंहक॰ शिवः शांतस्त्वयि शत्रुः सुरेश्वरः। त्वयि स्थितो हरिर्देवस्त्वदर्थं तप्यते तपः। नमस्ते सर्वतोभद्र भद्रदो भव भूपतेः॥ त्रैलोक्यजयसर्वस्व सिंहासन नम
९३ मोस्तु ते १९ अथाश्वं संपूज्य तद्धर्मिराज्ञो जपेत्। कुलाभिजनजातोसि बलश्चाग्रे यं जनोत्तमैः। भर्त्तारमभिरक्ष त्वं शिवं तव भवे दिति। कृपा
93 घातमविघ्नानं क्षमस्व तुरगोत्तम। ततोऽश्वाय भक्ष्यं दत्वा॥ अश्वराजपुरोधास्तु विष्णुस्ते पुरतः स्थितः। वरुणाः पाशहस्तस्त्वां पृष्ठतः परि
रक्षतु। वैवस्वतः कुबेरौ च पार्श्वयोरभिरक्षतां। चंद्रादित्यौ पुष्पवंशे उदरं पृथिवी धराः। रक्षंतु वज्रं गंधर्वा बलमिंद्रो ददातु ते। हविः शेषमितिप्रा
श्य विजयार्थं महीपतेः॥ ततश्चाचमनीयं दत्वा स्तुतिं पठेत्। गंधर्वकुले जातस्त्वं मा भूयाः कुलदूषकः। ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य
स्य च। प्रभावाच्च हुताशस्य वर्द्धय त्वं तुरंगमान्। तेजसा चैव सूर्यस्य मुनीनां तपसा तथा। रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च। स्मर त्वं राजपुत्रत्वं कौ
स्तुभं च मणिं स्मर। स्मर त्वं सुरैर्मथ्यमानक्षीरोदाद्धस्तादिभिः। जातस्त्वं श्वैः श्रवाः पूर्वं तेन जातोसि तत्स्मर ११ यां गतिं ब्रह्महा गच्छेन्मातृहा पितृहा
तथा। भूमिहानृतवादी च क्षत्रियश्च पराङ्मुखः। सूर्याचंद्रमसौ वायुर्यावत्पश्यति दुष्कृतं। व्रजाश्च तां गतिं क्षिप्रं तच्च पापं भवेत्तव। विकृतिं यदि गच्छे राम॰
थाः पुत्रः ध्वनितुरंगमारिं विजित्य समरे सह भर्त्रा सुखी भव। २०। ततः सुखयानसिद्ध्यर्थं शिबिकां प्रजयेत्॥ तत्र मंत्रः। महेंद्रनिर्मितो दिव्ये दे ९३

93A वराजाहिसे विते ॥ शिविके पाहि मां नित्यं सद्यस्त्वं सन्निधौ भवा निर्मिता सि कुबेरेण या पात्त्वं निद्रालुस्सर्वार्थिना ॥ शिविके रक्षयां नित्यं शांतिं देहि नमोस्तुते ॥ १
पुत्रायकामो रथं स प्रपूजयेत् ॥ तत्र मंत्रः शक्रस्यार्थे धारणा यो निर्मितो विश्वकर्मणा ॥ रथ नेमि स्वनैर्घोरैः रिपोर्हृदयकंपन ॥ १ स्यंदने जय मर्मस्थ यथे गजं
प्रपूजयेत् तत्र मंत्रः कुमुदैरावणो पद्मः पुष्पदंतोथ वामनः सुप्रतीकोंजनो नीलश्चैते देवयोनयः ॥ तेषां पुत्राश्च पौत्राश्च वनान्यष्टौ समाश्रि
ताः ॥ मंद्रो भद्रो मृगश्चैव गजाः संकीर्ण एव च ॥ वने वने प्रसूतास्ते स्मरयोनिं महागज ॥ पांतु त्वां वसवो रुद्राः आदित्याः समरुद्गणाः ॥ भर्तारं
रक्ष नागेंद्र स्वामी वत्प्रतिपाल्यतां ॥ अश्ववास्तु हि जयं युद्धे गमने स्खलितोऽभ्रजा श्री सोमो माद्रलार्कि सोमेजः समुज्जवो निलात्मा ॥ स्थैर्य मे रोज्जैरुच्चा
घोषो देवासुररणा ॥ युद्धे रक्षंतु नागास्त्वादि शश्च महद्देवतैः ॥ आश्विनौ महांध वैः पांतु त्वां सर्वतः सदा ॥ ॥ इति राजनिकृपूजनं ॥ तथैव कर्मवि
न्यानि सर्वाणि प्रज्यानि शिल्पिभिः ॥ लोहाभिसारिकं कर्म कृत्वैवं मंत्रपूर्वकं ॥ यमं कृत्वा तथा पश्चात् पूर्वोक्तं स्नानमाचरेत् ॥ दारुणाणि विचित्रे तोरणा वि
न्यस्ते शोभने स्थाने ॥ उन्नतो वितनस्तंभ गावि चित्रगृहमध्यगा ॥ स्नाता कुंकुम पंकचंदन वस्त्रसमैः शैलपिष्टैश्च ॥ वर्तिता गाचीवंडीकुसुमैरभ्यर्च
येद्दृष्ट्वाभिः ॥ कुमुदैः सपद्मकुसुमैः सदीपधूपैः सनैवेद्यैः ॥ मांसैर्बलिपुष्पहारैर्गंधशब्दैः समुच्छ्रितैः ॥ विहितक्षैत्रेयानैः स्यंदनाशीतशब्द वादि

जयसिंहक० नलोकैः तु षैर्वरवस्त्रादि तु निवेद्य तेसर्वे मेव समग वतै । जयंती त्यादि पूजा मंत्रः । बिल्वपत्रीमंत्रस्तु अमृतोद्भवं श्रीवृक्षं मित्यादि । दुर्गा सा पूज नीया तु तद्दिने
२५ द्रोणपुष्पकं केरि सक्त नादत्वा पिद्रोणपुष्पं समर्पयेत् । तत्र मंत्रः । ब्रह्मविष्णु शिवां बा नामित्यादिः सप्तमीप्र करणो दृष्टव्यः । ततः पुष्पांजलिं दद्यादिति । इ
95 त सप्तम्या महः कृत्यं । अत्र राज्ञा विजय कामोऽर्धरात्रे विशेषपूजा पूर्वकं बलिं दद्यात् । तदर्धयामिनीशेषे विजयार्थं न पौ न मः । एवाद्य लक्ष्मणोपि तं प
धूप पत्रगार्चितं । विविवत्कालि कालीति जप्त्वा खड्गेन घातयेत् इति देवीपुराणात् ॥ नैमित्तिक पूजोत्तरं रात्रौ च ततः षष्टि योगिनी पूजा कार्या । तन्नामा
नि तु । ॐ विजयायै नमः ॥ ॐ मंगलायै २ ॐ भद्रायै ३ ॐ धृत्यै ४ शांत्यै ५ ॐ क्षांत्यै ६ ॐ शिवायै ७ ॐ सिध्यै ८ ॐ उमायै ९ ॐ श्रियै १० रत्यै ११ ॐ दीप्ता
यै १२ ॐ कांत्यै १३ ॐ यशस्विन्यै १४ ॐ लक्ष्म्यै १५ ॐ ईश्वर्यै वृद्ध्यै १७ ॐ साध्यै १८ ॐ जयायै १९ ॐ ब्राह्म्यै २० जयंत्यै २१ ॐ अपराजितायै २२ ॐ जिता
यै २३ ॐ मानस्यै २४ ॐ श्वेतायै २५ ॐ दित्यै २६ ॐ मायायै २७ ॐ महामायायै २८ ॐ मोहिन्यै २९ ॐ तिलालमायै ३० ॐ तारायै ३१ ॐ वि
मलायै ३२ ॐ गौर्यै ३३ ॐ शरण्यायै ३४ ॐ कौशिक्यै ३५ ॐ मत्यै ३६ ॐ दुर्गायै ३७ ॐ क्रियायै ३८ ॐ अरुंधत्यै घंटायै ४० ॐ कर्णायै ४१ ॐ रामः
कपालिन्यै ४२ ॐ रौद्र्यै ४३ ॐ काल्यै ४४ ॐ मयूर्यै ४५ ॐ त्रिनेत्रायै ४६ ॐ सुरूपायै ४७ ॐ बहुरूपायै ४८ ॐ रिपुहायै ४९ ॐ अंबिकायै ५० ॐ त २५

94A विंकायै ५१ ॐ अपराजितायै ५२ ॐ वैवस्वत्यै ५३ ॐ कौमार्यै ५४ ॐ वैष्णव्यै ५५ ॐ महालक्ष्म्यै ५६ ॐ कार्तिक्यै ५७ ॐ शिवदूत्यै ५८ ॐ चामुंडायै ५९ ॐ
ब्रह्माण्यै ६० माहेश्वर्यै ६१ ॐ वैष्णव्यै ६२ वाराह्यै ६३ ॐ इंद्राण्यै ६४ ॐ ततः खड्गं नमस्कृत्य सशत्रूणां वधसिद्धये ॥ इच्छेत विजयं राजा जयं खड्गमिक्षं चात्म
नो नृपः ॥ पुनः पुनः प्रणाम्याथ संस्मरन् हृदये शिवां ॥ ततो जयजयालापैः स्तवं कुर्याद्धिमं ततः ॥ सर्वमंगलमंगल्ये शिवे सर्वार्थसाधिके ॥ उमे त्र्यं
बके गौरि नारायणि नमोस्तु ते ॥ कुंकुमेन समालब्धे चंदनेन विलेपिते ॥ बिल्वपत्रकृतापीडे दुर्गेहं शरणागतः ॥ स्तवं कृत्वेति कौरव्य अष्टम्यां जाग
रं निशि ॥ नृत्यनृत्तकगीतैश्च कारयेत्तु महोत्सवं ॥ एवं हृष्टे निशां नीत्वा प्रभाते चारुणोदये ॥ घातयेन्महिषान्मेषान्नरश्चतोन्न कंधरान् ॥ शतमर्द्ध
शतं वापि तदर्द्धं वा यथेच्छया ॥ सुरासवभृतैः कुंभैस्तर्पयेत्परमेश्वरीं ॥ कापालिकेभ्यस्तद्देयं दीनानाथेभ्य एव वा ॥ दासीदासजने देयं तद्भक्तेभ्य स्तथै
व वा ॥ सर्वं विभज्य कौंतेय स्वहस्तं बांधवैर्बंधुस्ततोपराह्ण समये नवम्यां वैरथोस्थितां ॥ भवानीं भ्रामयेद्राष्ट्रे स्वयं राजा ससैन्य वाहन ॥ आहिष्टः पुरुषैर्वीपि
कुवारणैः ॥ काच्छिवोपोषितोवीरोविधृतोन्येनरवड्गश्रान् ॥ शनैः शनैस्तु नयनं ज्वलद्भिर्दीपवृक्षकैः ॥ आकृष्टखड्गैर्योधैश्च धानुष्कैश्च प्रगाल्भितैः ॥ नंदद्भिः शंखपटहैर्नृत्यद्भिर्व
न्दिभिस्तथा बलिं दद्यान्नमेराणानेनमामिषं ॥ सरक्तं सजलं चान्नं गंधपुष्पाक्षतैर्युतं ॥ त्रीस्त्रीन्वा

रान्तम्मूलेन दिग्विदिक्षु क्षिपेद्बलिं ॥ मंत्रास्त्वबलिंग‥एता ॥ इमं देवा आदित्या वसवस्तथा ॥ मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः । असुरा यातु
धानाश्च पिशाचोरगराक्षसाः । डाकिन्यो यक्षवेताला योगिन्यः पूतना शिवाः ॥ जंभकाः सिद्धगंधर्वाः माला विद्याधरा नगाः ॥ दिक्पाला लोकपाला
श्च ये च विघ्नविनाशकाः ॥ जगतां शांतिकर्त्तारो ब्रह्माद्याश्च महर्षयः । मा विघ्नो मा च मे पापं मा संतु परिपंथिनः ॥ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखा
वहा इति ॥ महिषघ्नि महामाये इत्यादि दुर्गां शिवां शांतिकरीमित्यादि च पठेत् । अष्टम्यां च तु दृश्येत नवम्यां चैकवेतसा इति मार्कंडेयपुराणस्वनात् । चंडीपा
ठोपि विशेषतः । कार्यः अत्र गौरीति तीयावत्सर्मकालव्याप्तिशास्त्रं वाधित्वा नवमीयुतायामेव रात्रावष्टम्यां नवमीपूजया सह तंत्रेणाष्ट
मीपूजोपवासादु वितावितिकालतत्त्वविवेचने । निर्णयसिंधौ तु ॥ अत्र तिथियोगपक्षे तंत्रेणोपवासः तिथिद्वयनिमित्तं पूजादिकं तु भेदेनेति समा
सः इति अष्टमीविधिः । अथ नवमीकृत्यं । इयं च नवमी दुर्गापूजायामष्टमीविद्धा ग्राह्या । सायंत्रिमुहूर्त्तयोगे पूर्वा नवमी ॥ श्रावणी दुर्गानवमी ति
थनात् । दशमीविद्धा निषेधाच्च । त्रिमुहूर्तयोगाभावे तु निषिद्धापि परैव कार्येति निर्णयसिंधौ । मदनरत्ने तु वस्त्रादौ परा कार्या ॥ अश्वयुक्शुक्लन राम॰
वमी मुहूर्त्ते वा कलायदि । सा तिथिः सकला ज्ञेया लक्ष्मीविद्याजयार्थिभिः इति सौरभगात् । सूर्योदये परं रिक्ता पूर्णा स्याद् हपराह्णयदि । वलिदानम ९५

95A

कर्त्तव्यं तत्र देशशुभावहं। बलिदाने कृतेऽष्टम्यां पुत्रभंगो भवेन्नृपे इति देवीपुराणात्॥ उपवासे इष्टैंति। निर्णयदीपे तु महानवमीपरदिने पारणा। यापि लेपरा
॥अन्यथा पूर्वैति। वचनानि तु नवमीप्रकरणे वक्ष्यंते॥ कालतत्त्वविवेचने। यदा तु नवम्यष्टमीविद्धा भवेत् तदा द्वितीयदिने पि किं यतीभवति तदा नवमीप्रयु
क्ता स्यात् प्रजादेः पूर्वदिने तु षष्ठेपि महाबलिदानमात्रं द्वितीयदिने कर्त्तव्यं। अस्य तु बलिदानं च नवम्यां विधिवत्स्वरे इति कालिकापुराणादिति। दशम्यां
बलिदानं तु दीयते यत्र मानवैः। तदा दुष्टं नाशमायाति मंगलोपद्रवैः किलेति भविष्यवचनात्। नवमीप्रयुक्ते बलिदानं सर्वथा नवमीमध्य एव कार्यं। न
तु दशम्यां अत्र केचित्। पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणमिति कालिकापुराणवचनादष्टम्यां होममाहुः। अन्ये तु। नवम्यां बलिदानं तु
कर्त्तव्यं वै यथाविधि। जपहोमं च विधिवत्कुर्यात्तत्र विभूतये इत्यादिवचनैर्नवम्यामेवारभ्य नवम्यां होमं समापयेदित्याहुः। अपरे तु अष्टम्या
मारभ्य नवम्यां समापयंति॥ तत्र मूलं शिष्टाचार एव। वस्तुतस्तु अष्टमीहोमवचनानि लोहाभिसारकर्मपराणि। लोहाभिसारिकं कर्म कारयेद्या
वदष्टमीति भविष्योत्तरपुराणे अष्टमीपर्यंतमेव तस्योक्तत्वात्। नवमीहोमवचनं तु नवरात्रव्रतविषयं इति न काप्यनुपपत्तिः। वयं तु अष्टमीनव
मीहोमवचनान्यष्टरात्रनवरात्रपक्षयोर्व्यवस्थया होमविधायकानि इति ब्रूमः। यत्तु निर्णयसिंधौ समस्तुत्रयपक्षस्य युक्त इति तदेतेन परास्तम्। यदपि

जयसिंहक० रुद्रयामले विकल्पउक्तस्तान्निर्मूलामीति तत्तत्रैव शिरादमार्जं ॥ यामलस्येव मूलत्वात् अथ घृतस्यैव निर्मूलत्वमितरमिश्राय सत्वतंत्राणामपि वेदमूलकतायमा
२९ रहृपञ्चमात्रादिभुक्तत्वात् दुर्गाभक्तितरंगिण्यामाहि गोडयं पेषपिनवम्यां होमउक्तः । अत्र च डामरतंत्रे विशेषः । पायसं सर्पिषायुक्तं तिलैः शुद्धैर्विमिश्रितं
96 । होमयेद्विधिवद्भक्त्या दशांशेन न तत्पोजनम ॥ रुद्रयामलेप्यथाहोमो मंत्रेणैकेन साध्यते । तथा तंत्र जपेद्धोमं स्तोत्रके नैकेन साधयेत् । यदा सप्तशतीजपे
होममंत्रो नवाक्षरः । ऐं ह्रीं क्लीं चामुंडायै विच्चे इति पूर्वोक्तिः । कात्यायनी वल्या देवीपुराणे । पूजयेत्तिलहोमैश्च दधिक्षीरघृताहि भिरिति । मंत्रश्च जयंतीसा
दिः अनेनैव तु मंत्रेण जपहोमादिकारयेत् इति देवीपुराणात् । केचित्तु मार्कंडेयपुराणगतसप्तशतीस्तवेन प्रतिश्लोकं स्वाहांतेन तिलमिश्रपाय
सेन होमं कुर्वंति । प्रतिश्लोकं च जुहुयात् पायसं तिलसर्पिषेति रहस्यग्रंथवचनात् । दुर्गाभक्तितरंगिण्यां तु तिलैर्जयंतीमंत्रेण होमउक्तः ॥ पुरश्च
रणकार्ये तु बिल्वपत्रयुतैस्तिलैरिति वचनाद्बिल्वपत्रयुक्ततिलैर्होमइति स्मार्ताः । यत्तु निर्णयसिंधौ मानाभावादिति स्मार्तमते हस्यणमाम्नेहितं तत्
च्छं । पूर्वोक्तवचनस्यैव मानत्वात् । यदि चैतद्वचनमनवरात्रसंबंधिहोमांगत्वेन बिल्वपत्रयुततिलविधायकत्वे मानाभाव इति भावात् न च बोधः नवरात्राम
त्रसंबंधिकाम्यपुरश्चरणांगहोमाभिप्रायेणातथाभिधानात् । रुद्रयामलेपि । प्रधानद्रव्यमुद्दिश्य यास्याम्नाति लाभतस्था । किंशुकैः सर्षपैः पूगैः लाजाद्ग २९

96A

वेंडुरैस्तथा। यवैर्वाश्रीफलैर्दिव्यैर्नानाविधफलैस्तथा। रक्तचंदनखंडैश्च गुग्गुलैश्च मनोहरैः। प्रतिश्लोकं च जुहुयात्स वन्हिर्व्याशीवचकमादितिनवा
क्षरेणावाहुत्वा नमोदेव्या इतीतिचेति एवं नवम्यां होमः कुमारीपूजनब्राह्मणभोजनादि कृत्वा दक्षिणां दत्वा यापानिवेद्यतां नवम्यां पूर्वैव पूजा कर्त्त
व्याभूतिमिळता। दक्षिणां स्त्रयुगंम चआ वार्पापानिवेद्योहि तिमत्स्यसूक्तात्॥ पूर्ववत्प्रतिपदादिवदिति कालतत्त्वविवेचने। तत्रैव भविष्योत्तरे
। कृताभिषेकावरहास्रूकेनाश्वयुजस्य वा। तस्मात्सा तत्र संपूज्या नवम्यां चंडिका बुधैरिति। इति नवमीकृत्यं॥ विसर्जनं तु दशम्यामेव कार्यं। संप्रपूज्य प्रे
षणां कुर्याद्दशम्यां शाबरोत्सवैरिति भविष्यपुराणात्। तत्र दशम्याः पूर्वातिथितेप्रातः सत्त्वे तत्र तदुत्तरं पारणा। तदुत्तरमपराजितापूजनं सीमातिक्र
मो निःसंदिग्ध एव। यत्र तु नवम्युत्तरमपराह्णे दशमी प्रवृत्ता उत्तरदिने च स्वल्पाभावस्था तत्र विसर्जनव्रतपारणापराजितापूजनक्रमेण भवति सं
देहः। पारणोत्तरं कर्त्तव्यस्य तत्रैवापराह्णे शिष्टैः क्रियमाणस्यापराजितापूजनस्य विसर्जनं विनानुपपत्तेः। अत्रोच्यते। नवमी दशमी पारणा
विधायकवचनद्वैविध्येन पारणाया अनियतकर्त्तव्यत्वेपि संप्रेषणं तु कर्त्तव्यं दशम्यां शाबरोत्सवैः। प्रातरावाहयेद्देवीं प्रातरेव विसर्जयेदित्यादि
वचनैर्विसर्जनस्य दशम्यां प्रातःकर्त्तव्यत्वेन निर्णीतत्वात्। पूर्वेद्युर्नवम्यां दशम्यां वा यथाचारं पारणां कृत्वापराह्णेऽपराजितापूजनं विधाय प्रात

जयसिंहक० ईशम्यां विसर्जनं कुर्यादिति यथा च रुद्रयामले। अष्टम्यां जागरं कुर्यान्नवम्यां पारणं तथा। दशम्यां च विसर्गः स्यादिति॥ अथ नवरात्रपारणानि
९७ र्णयः॥ तत्र द्विविधानि वचनानि॥ ॥कानिचिन्नवमीपारणाविधायकानि दशमीनिषेधकानि च। कानिचिद्दशमीपारणाविधायकानि नवमीनिषे
97 धकानि च॥ तत्र यथा कुलार्णवे स्कन्दवचनानि तु दशमीप्रकरणे वक्ष्यंते। नवरात्रव्रते पारणाहे सूतकेपि सूतके पारणं कार्यं तदुक्तं रुद्रयामले॥ सू
तके पारणं कुर्यान्नवम्यां होमपूर्वकं। तदन्ते भोजयेद्विप्रान्दानं दद्याच्च शक्तितः इति। तदन्ते सूतकान्ते। माधवीये कौर्मेपि। काम्योपवासे प्रक्रान्ते त्वन्तरा मृ
तसूतके॥ तत्र काम्यव्रते कुर्याद्दानार्चनविवर्जितमिति। व्रतयज्ञविवाहेषु श्राद्धे होमेर्चने जपे। प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकमिति विष्णुवचन
मप्याशौचमध्ये तत्कर्तव्यतामवगमयति प्रारंभस्तु तेनैवोक्तः। प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः। नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रियेति
स्त्रिया तु रजोदर्शनमध्ये पारणा कार्येति सहस्त्यव्रतः। प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत्। न तत्रापि व्रतस्य स्यादुपरोधः कदाचनेति। निर्णय
सिंधौ यत्तु नियमस्था यदा नारी प्रपश्येद्रजः। उपोष्यैव तु तारात्रीः स्नाता शेषं सुद्धतामित्यंगिरोवचनं॥ यच्च हारीतवचनं नियमस्था यदा नारी रजस्व-
ःपश्येत्तद्यंचना। त्रिरात्रं तु क्षिपेदूर्ध्वं व्रतशेषं समापयेदिति॥ तद्विधवोपवासविषयं तासां तत्र भोजननिषेधादिति केचित्॥ वयं तु प्राग्रजस्त्यव्रत ९७

97A

व्वनेदीर्घतपमासि तिविशेषोपादानाद्द्वादशीव्यतिरिक्तसकलैकादशीहोपवासविषयोयं निषेधः। त्रिरात्रनवरात्रादिदीर्घव्रते सूतकजो मध्ये एव पारणेति ब्रूम
इति। आशौचमध्येऽपि पारणा भवति। प्राग्युक्तकौर्मवचनादिति स्थितं। पारणायां विधिनिषेधयोः समत्वादाचारतो व्यवस्थेति केचित्। तन्न रुचिरं। मत्पक्षे त
वचनं सर्वथा परं। विधिवाक्यात्तु तत्र त्रिरात्रमध्ये भोजननिषेधादित्यन्ये। तन्न। निषेधस्य रागप्राप्तभोजनगोचरत्वेन वैधपारणाविषयत्वायोगात्। वस्तुतस्तु रज
स्वला या विधवाया त्रिरात्रमध्ये भोजननिषेधः प्रवर्त्तते पुष्पाद्यमाणा इति। कृतरत्नावल्यां तु। अत्र च नवरात्रे होमस्य सम्पूजारूपत्वेन प्रधानत्वात्तस्य वा नस्य साध्य
त्वेनाशौचे संभवान्नवदानार्चनं जपमिति निषेधात्तस्मात्रिंशि विनाशने यमरूपोपवासस्य माषः संभवाद्दाशौचान्ते होमादिपूर्वकं पारणं कर्त्तव्यं। प्रावाना शिष्टा
चारे प्येवमेव। ये तु होमो न क्रियते तेषां पारणं भवत्येवेति स्थितं। इति नवरात्रमध्ये आशौचरजोदर्शने पारणानिर्णयः। अथ दशमीकृत्यं दुर्गाभक्तितरंगि
ण्यां देवीपुराणे। ततः प्रातः पूजयित्वा दशम्यां विधिपूर्वकं। संप्रेषणं तु कर्त्तव्यं गीतवादित्रनिःस्वनैरित्यादि तत्क्रमः। प्रातः पूजां बलिदानसहितां विधायनी
राजनां तत्कृत्वा दुर्गां शिवां मिति रूपं देहीति महिषघ्नीत्यादि च पठित्वा पुष्पांजलिं दत्त्वा कर्त्तव्यं समापयेत्। विधिहीनं क्रियाहीनं भक्तिहीनं यदर्चितं पूर्णं
भवतु तत्सर्वं त्वत्प्रसादान्महेश्वरीति प्रसादक्षमस्वेत्युक्त्वा एकं पुष्पं ॐ दुर्गायै नमः इतीशान्यां निक्षिप्य विसर्जयेत्। महिषघ्नि महामाये शुम्भे पूजां प्रगृह्य वा ॐ

जपासिंहक॰

९८

१४

र्हषममकल्याणमयाभिः शान्तिभिः सह। उत्तिष्ठ देवि चंडेशीति पाठः। उत्तिष्ठ ब्रह्मणस्पते देवयंतस्त्वेमहे। उपप्रयंतु मरुतः सुदानव इंद्र प्राशूर्भवा सर्वे।
अस्मारमिदङ्गपोनि षिक्तपुष्करैर्मधु। अवतस्मा विसर्जने। यांतु देवगणाः सर्वे पूजामिति पठित्वा। गच्छ गच्छ परं स्थानं स्वस्थानं देवि चंडिके। व्रजस्रोतो जलं
वृद्धये तिष्ठ गेहे च भूतये। इत्युत्थापयेत्। ततः गीतवाद्यघोषपुरःसरं स्रोतोजलसमीपं नीत्वा। दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते। षण्मासेषु व्यतीते
षु पुनरागमनाय वै। इमां पूजां मया देवि यथाशक्त्योपपादितां। रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमम् इति जले प्रवाहयेत्।। ततो गृहमागम्य
शांतिकलशोदकेन ब्राह्मणैरभिषिक्तोऽ दुर्गापूजाप्रतिष्ठासिध्यर्थं ब्राह्मणेभ्यो दक्षिणां दत्वा ब्राह्मणान्भोजयित्वा बंधुभिः सह भुंजीतेति। इति द
शमीकृत्यं। इयमेव विजयदशमी उच्यते। सा च श्रवणयोगवती ग्राह्या।। पूर्वदिने चेत् पूर्वा द्वितीये श्रवणयोगे एकादशीयुक्तापि ग्राह्या। उभयदि
ने श्रवणयोगाभावेऽपराह्णयोगवती दशमी ग्राह्या। दिनद्वये त्वपराह्णयोगवती पूर्वा। दिनद्वयेऽपराह्णयोगाभावे नक्षत्रयोगिनी ग्राह्या। वचनानि तु दशमीप्र
करणे वक्ष्यंते। अस्यामेव दशम्यां गोपथब्राह्मणोक्तः प्रस्थापनविधिः कर्तव्यः। मूलवचनानि दशमीप्रकरणे वक्ष्यंते। तत्र प्रस्थानस्थलं कृत्वा ततः वीणादि मं राम॰
गलशब्दान् कृत्वा एवं होमसंभारानुपकल्प्य मैत्रे मुहूर्ते त्वग्निप्रतिष्ठापनं कुर्यात्। मैत्रमुहूर्तस्तु प्रातःकालतः तृतीयमुहूर्तः। ततः शांतिप्रतिसरं कारयित्वा ९८

98A
तोरणांतेनाग्निविंतेरन्।ऋत्विजइतिशेषः।यज्ञमानेनवस्त्रादिभिरलंकृतःस्वसमीपेउपवेश्यआलभ्यआचार्योऽभयैरपराजितैरायुष्यैःस्वस्त्ययनैःशर्मवर्म
भिर्जनवेदनैश्चहुत्वापार्थिवंसोऽभिमाप्रगामेतिवहुस्त्वाआगतस्येतीदंस्थालीपाकेनेष्ट्वाआतिष्ठजिष्णुरनक्षत्रराक्षजवइतिपथ्यानमास्थायजपेदिमो
पादौयतइंद्रेतिचात्रातारमिंद्रमानोविहृन्नभयंसोमोवृहस्पतिर्नःपरिपातुपश्चादितिचान्विष्णुक्रमांश्चाक्रामेत्सार्हः।मंत्रास्तुआथर्वणेऐंद्राभिषेकप्र
करणोद्रष्टव्याः।अथापराजिताद्दशम्यांपूर्वोक्तविजयमुहूर्तेऽकंस्थस्थितिकामेतुपक्रमतद्दर्पेतेश्लोकाः।।अलंकृतोक्षपितमत्तवर्गःपरिष्कृतोत्तुं
गतुरंगनागः।वादित्रनादप्रतिनादिताशःस्वमंगलाचारपरंपराशीः।राजानिर्गत्यभवनात्सुरोहितपुरोगमः।प्रास्थानिकविधिंकृत्वाप्रतिष्ठेत्पूर्वतोदि
शिगत्वानगरसीमांतंवास्तुपूजांसमाचरेत्।संपूज्यवायादिकपालान्पूजयेत्साधिदेवताः।।मंत्रैर्वैदिकपौराणैःपूजयेत्सुसमीतरुं।।अमंगलानांशमनी
दुष्कृतस्यचनाशिनी।दुःस्वप्ननाशनीधन्याप्रपद्येहंशमींशुभां।।ततःकृताशीःपूर्वस्यांदिशिविष्णुक्रमान्क्रमेत्।।रिपोःप्रतिकृतिंकृत्वाध्यात्वाचम
नसाचतां।शरेणास्वर्णपुंखेनविध्येद्धृदयमर्मणि।।दिशांविजयमंत्राश्चपठितव्याःपुरोधसा।एवमेवविधिंकुर्याद्दक्षिणादिदिशास्वपि।पूज्यान्द्विजां
श्चसंपूज्यसांवत्सरपुरोहितौ।।गजवाजिपदातीनांप्रेक्षांकौतुकमाचरेत्।।जयमंगलशब्देनततःस्वभवनंविशेत्।।नीराज्यमानःपुरपालिभिर्गरीका

जयसिंहक०

९९

99

भिः समं मन्त्रं एवं यः कुरुते राजा वर्षे वर्षे सुमंगलं। आयुरारोग्यमैश्वर्यं विजयं च समागच्छति। नाधयो व्याधयस्तस्य भवंति न पराजयः। श्रियं पुत्रानवाप्नोति विजय
श्च महदाप्नुवीतादि पुराणसमुच्चये॥ अस्यामेव अपराजितापूजोक्ता निर्णयामृते दशम्यां पूजयित्वा तु मन्त्रयी चापराजितां कलशीतोयसंपूर्णां जयंती
पल्लवाननां॥ व्रतवैरोस्तद्वायाज्ञामाधयेत्साधनेन वा दशम्यां च बलं राजा पूजयित्वा पराजितां॥ दशादिक्षु मनोयोगात्साध्यां कृत्वा यथेन्द्रपः। नीरा
जनं स्वस्य कृत्वा ततो नीराजयेद्बलिमिति। अथ पूजनक्रमः। आश्विन शुक्ल दशम्यां क्षेमसिध्यर्थं यात्रायां विजयसिध्यर्थं वा तु पूजनं दिक्पालपूजन
मार्गदेवतापूजनापराजितापूजन विष्णुपूजनं शमीपूजनानि करिष्य इति संकल्प्य शृगोपलादिषु चंदनादिलिखिताष्टदलमध्ये मन्मयप्रतिमायां
ॐ अपराजितायै नमः इत्यपराजितां तद्दक्षिणतः ॐ क्रियाशक्त्यै नमः इति जयां। तद्वामतः ॐ उमायै नमः इति विजयां प्रतिष्ठाप्य आवाहनाद्युपचा
रैस्संपूज्य प्रणम्य प्रार्थयेत्॥ चारुणा मुखपद्मेन विचित्रकनकोज्वला। जया देवी शिवे भक्ता सर्वकामान्ददातु मे। कांचनेन विचित्रेण केयूरेणादि
भूषिता। जयप्रदा महामाया शिवभाविततेजसा॥ विजया च महामाया ददातु विजयं मम। हारेणासु विचित्रेण भास्वत्कनकमेखला। अपराजिता रुद्ररता म
द्ररता करोतु विजयं मम इति। एवं संप्रार्थ्य हरिद्रारक्तवस्त्रे दूर्वायुक्तसिद्धार्थकान्बद्ध्वा दक्षिणे वलयाकारेण बध्वा। महापराजिते यस्मात्त्वं लतासु त्तमा स्मृ. ९९

99A

त्वा। सर्वकामार्थसिद्ध्यर्थं तस्मात्त्वां धारयाम्यहं॥ मया पराजिते देवि मम सर्वं समृद्धये। शृजितायां त्वयि श्रेयो मम मास्तु दुरितं हतमिति तद्दलयमभिमंत्र्याजय
देवरहे दे विदशम्याम पराजिते। धारयामि भुजे दक्षे जयलाभाभिवृद्धये। बलमाधेहि वलयमयि शत्रौ पराजयं तत्क्षारणाद्भवेयुर्मे धनधान्यसमृद्ध
यः इतिमंत्रेणादक्षिणबाहौ धारयित्वा। इमां पूजां यथाद्देवि यथाशक्त्या निवेदितां। रक्षार्थं तु समादाय व्रज स्वस्थानमुत्तममिति विसर्जयेदिति
। सर्वैश्च जनास्तस्यां यामसीमान्तमुल्लंघ्यापराजितां पूजयेयुः। तथा पुराणसमुच्चये। दशम्यां तु जनैः सम्यक् पूजनीयापराजिता। ऐशानीं दिशमा
श्रित्य सा पराह्णे प्रयत्नत इति। भविष्येपि। शमीसलक्षणोपेता मीशाना शाप्रतिष्ठिता। संप्राप्य तां व समं एजा वत्सरं स सुखी भवेत्। शमीमंत्रस्तु हेमाद्रौ
गोपथब्राह्मणे। अमंगलानां शमनीं शमनीं दुष्कृतस्य च। दुःस्वप्ननाशिनीं धन्यां प्रपद्येहं शमीं शुभां। तथा भविष्ये। शमी शमयते पापं शमी लोहित
कंटका। धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी। करिष्यमाणयात्रायां यथाकालं सुखं मम। तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजित इति ततःपृ
पोः प्रतिष्ठितिष्ठलेत्यादि कर्तव्यं पूर्वमेवोक्तं। ततः शमीमूलमृद्गृहस्तोयावत्तदुक्तं। गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदं। गीतवादित्रनिर्घो
षैरानयेत्स्वगृहं प्रति। ततो भूषणानि वस्त्रादि धारयेत्स्वजनैः सहेति। अत्र बलिनीराजनमुक्तं तत्र मंत्रः। वद्धरंगं बलं मह्यं निरीरिष्टं व्रजातिहा। सर्वत्र

विजयो मे ऽस्तु तत्त्वमा दास्तु रेश्वरीति। ज्यौतिषे। कृत्वा नीराजनं राजा बलवृद्ध्यै यथाक्रमं। शोभनं खंजनं पश्येज्जलगोगोष्ठसन्निधाविति। तत्र मंत्रः। तिथितत्त्वे।
नीललयीव शुभग्रीव सर्वकामफलप्रद। पृथिव्यामवतीर्णोसि खंजरीट नमोस्तु ते॥ वसंतराजे। तेयोगयुक्तो मुनिपुत्रकल्पमहर्ष्यं तामेषि शिखो ह्यमेन
।संदृश्यसे प्रावृषि निर्गतायां त्वं खंजनाश्चर्यतमो नमस्ते। दर्शनफलं तिथितत्त्वे। अब्जेषु गोषु गजवाजिमहोरगेषु राज्यप्रदः कुशलदः शुचिशाद्व
लेषु॥ भस्मास्थिकेशनखलोमतुषेषु दृष्टो दुःखं ददाति खलु शः खंजु खंजरीट इति। तत्रैव॥ वित्तं ब्रह्मणि कार्यसिद्धिरतुला शक्रे हुताशे भयं याम्याम
ग्निभयं सुरद्विषि कलिर्लोभः समुद्रालये। वायव्यां वरवस्त्रगंधसलिलं दिव्यांगनाप्तोत्तरे ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खंजने। इदं तु सर्वं न
वराहसंहितादत्र लिखितं। रामार्चनचंद्रिकायां। आश्विनस्य सिते पक्षे दशम्यां श्रवणर्क्षगे। कर्त्तव्यः स्वजनैः सार्द्धं सर्वत्र विजयार्थिभिः। हनुमद्वाक्य
मा कर्ण्य हृष्टेति जनकात्मजा। आनंदश्रुर्णिः कपिभिर्विज्ञापित पुरःस्थितं। रथमारोप्य देवेशं सर्वालंकारभूषितं॥ सामित्रणाधरगु वीतापारीन तं
वरांतकं स्वलीलया जगत्त्राणमाविर्भूतमजं विभुं॥ पौरैः श्वेतगजैः पद्भिः ससौमित्रिहरीश्वरैः। युतं रामं हृदि ध्याय नृशमीवृक्षे प्रपूजयेत्॥ विष्णुधर्मोक्तो रामः
मार्गे यात्रा निर्विघ्नसिद्धये॥ शमी विछ्वर्वेन कुर्वन्निति संकल्प्य पूजयेत्॥ सीताकांतं समुद्दिश्य भक्त्या नामभयंकरं। अर्चयित्वा शमीवृक्षमर्चयेत्तु १००

100A

ततः पुनः। शमीशमयते पापं शमी लोहितकंटका। धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी॥ करिष्यमाणा यात्रायां यथाकालं सुखं मया। तत्र निर्विघ्नक
र्त्री त्वं भव श्रीरामपूजिते। गृहीत्वा साक्षतां सार्द्रां शमीमामूललग्नताम्। दंगीतवादित्रनिर्घोषैर्युतो हेवं गृहं नयेत्। केचित्तु दक्षिणस्तत्र भायकैश्छिद्रावंतु वानरैः
। केचिद्दत्तसुखैर्भोग्यं कोशलेंद्रस्य तुष्टये। निर्जिता राक्षसा दैत्या वैरिणो जगतीतले। रामराज्यं रामराज्यं रामराज्यमिति ध्रुवं। आनीय स्थापयेत्तस्य दिव्यासिं
हासने विभुं। ततो नीराजयेद्देवं प्रणामेद्दंडवद्भुवि। देवाः पशुकेतवस्त्रादि धारयेत्स्वजनैः सह। इति विष्णुधर्मोत्तरोक्तो विजयप्रस्थानोत्सवः। इति पौंडरीक
याज्ञिरत्नाकरविरचिते जयसिंहकल्पद्रुमोद्योते नवरात्रप्रकरणं। अथ कार्तिकशुक्लप्रतिपत्कृत्यं· तत्र द्यूतादिकं कर्तव्यं। तथा च हेमाद्रौ वादिरा
घरारी। शंकरस्तु पुरा द्यूतं ससर्ज सुमनोहरं। कार्तिके शुक्लपक्षे तु प्रथमेऽहनि सत्यवान्। जितश्च शंकरस्तत्र जयं लेभे च पार्वती। अतोर्थे शंकरो दुःखी
उमा नित्यं सुखोषिता। तस्माद्द्यूतं प्रकर्तव्यं प्रभाते तत्र मानवैः। तस्मिन्द्यूते जयो यस्य तस्य संवत्सरं जयः। पराजये विरुद्धं तु लक्ष्मीनाशस्ततो भवेत्। श्रोतवंशी
तवाद्याद्दिस्वनुलिप्तैः स्वलंकृतैः। दीपमालापरिक्षिप्ते तथा धूपेन धूपिते। दापितामिश्रसहितैर्नैयासा च भवेन्निशा। नवैर्वस्त्रैश्च संपूज्यो द्विजसंबंधिबांधवा
इति। अन्यदपि मदनरत्ने भविष्ये॥ ॥ ततः प्रबुद्धे सकले जने मा प्रमहोत्सवे। मात्स्यदीपकहस्तेन स्नेहनिर्भरवत्सले विश्वाविलासिनीसार्थ स्वाशिमंगलवा

जयसिंहक.
१०१
101

तिथौ॥ महाद्रुहं व्रजति स्वपादाम्भंगप्रदायिनि॥ पिष्टको दत्तेन परो गुरुशुश्रूषणात्। कुले द्विजाभिवादनपरो स्तुखरात्म्या दिवादिनि॥ प्रभातसमये॥ स्नातो वापी या
स्नातो जनाः स्तु वासिनीभ्यो देयानि वस्त्राणाभरणानि वा सद्भावेन वसंतोषाद्दानेन च तथा द्विजाः॥ वस्त्रैस्तांबूलदानैश्च पुष्पकर्पूरकुंकुमैः॥ भोजयेद्भोजयेद्य
लैरंतःपुरविलासिनीः। पदातिजनसंघातान्यैर्वेषैः कंचुकैः शुभैः। स्वनामांकैः स्वयं राजा तोषयेत्स्वजनान्दृश्यकृतांस्तथा गणाधिपत्याश्च तथा मल्लान्वंदनभटान्।
वृषभान्महिषांश्चैव युध्यमानान्नृपैस्सह। गजानश्वांश्च योधांश्च पदातीन्समलंकृतान्। मंचारूढः स्वयं पश्येन्नटनर्तकचारणान्। कुर्याद्भूपयेच्चान्यांश्च गो
महिष्यादिकं ततः। वृषान्कृषीपमेह्नोमिलत्केप्रत्युक्तिवादिभिः। ततोपराह्णसमये पूर्वस्यां दिशि भारत। मार्गपालीं प्रबध्नीयात्तुंगस्तंभेथ पादपे। कुशकाशम
यीं दिव्यां लंबकैर्बहुभिर्वृतां। वीक्षयित्वा गजानश्वान्मार्गपालस्य तले नयेत्। गावो वृषाः समहिषा मंडिता घंटिकोत्कटाः। कृते होमे द्विजेंद्रस्तु बध्नीया
न्मार्गपालिकां। दुर्गामंत्रेण होमस्तु घृतेनाष्टोत्तरं शतं। नमस्कारं ततः कुर्यान्मंत्रेणानेन सुव्रत। मार्गपालि नमस्तेस्तु सर्वलोकसुखप्रदे। विधेयैः पु
त्रदारैश्च पुनरेहि व्रतस्य मे। नीराजनं च तत्रैव कार्यं राष्ट्रजयप्रदं। मार्गपालीतले वत्स यांति गावो महावृषाः। राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः। राम.
मार्गपालीं समुल्लंघ्य नीरुजः सुखिनः सदान्विताः। यो याद्दर्शनभावेन तिष्ठन्सम्यग्युधिष्ठिर हर्षदैन्यादिरूपेण तस्य वर्षं प्रयाति हि। यद्दिने तद्दिने वर्षं हृष्टो वर्षं १०१

101A

प्रहृष्यति। सुप्तोत्थितो भवेद्वर्षं स्वस्थः स्वस्थो भविष्यति। तस्मात्प्रहृष्टैस्तु षैस्तु कर्त्तव्या कौमुदी नरैः। वैष्णवी दानवी चेयं तिथिः प्रोक्ता युधिष्ठिरेति॥ अथास्या
निर्णयः॥ इयं बलिपूजने गोपूजनादौ च पूर्वविद्धा याह्या तथा च ब्रह्मघमः। श्रावणी दुर्गानवमी दूर्वा चैव हुताशनी॥ पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिन
मिति। प्रतिपद्दर्शसंयोगे पूजनं तु गवां मतं। परविद्धेषु यः कुर्यात्पुत्रदारधनक्षयः। पाकुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप। पूजने च्चीर्णा वर्द्धन्ते प्रजा गा
वो महीपतिरिति देवलवचनाच्च। माधवोपि बलेस्तूत्सवं च पूर्वेद्युरुपवासमेव दावरेदिति। दिनद्वये सायाह्नव्यापित्वे तु परैव ग्राह्या। तदुक्तं निर्णयामृते पुराण
समुच्चये वर्द्धमानतिथौ नंदा यदा सार्द्धत्रियामिका। द्वितीया वृद्धगामित्वा उत्तरा तत्र चोच्यत इति। तत्र गोक्रीडनादौ सत्त्वंतरोपि त्रियामगामदर्शतिथिर्भ
वेद्वेष्यार्द्धत्रियामा प्रतिपद्दिवस्त्री। दीपोत्सवे ते मुनिभिः प्रदिष्टे अतोन्यथा पूर्वयुते विधेयइति। सार्द्धत्रियामेत्यनेन चंद्रदर्शनाभाव उक्तः। द्वितीयायाः पं
चधाविभक्तदिनचतुर्थांशरूपापराह्णव्यापित्वाभावे चंद्रदर्शनासंभवात्। अत्र दीपोत्सवपदेन गोपूजनादिकमेव गृह्यते। कालादर्शहात्। नतु बलिपूजा
दि। कालेवाधप्रसंगात्। चंद्रदर्शनाभावप्रयोजकसार्द्धत्रियामोक्तिसामर्थ्याद्बलिपूजायादीपदानेसत्त्वेन दीपोत्सवपदस्य उभयत्र संभवाच्च। अमा
वास्यायामपि स्त्रियः क्रीडं समावास्यां गावो नंदास्तु कार्त्तिके इति वचनोक्तेः स्त्रीक्रीडने नीराजने दीपसंबंधात्तत्रापि दीपोत्सवपदस्य संभवात्तयानि

जयसिंहक
१०२
102

भद्रायां गोकुलक्रीडन्मदेशो वै विनश्यतीति । भद्रायां द्वितीयायां । तथा प्रतिपद्घटिकास्तां द्वितीयायां तु गोवर्धनं । छत्रछेदं स्वकुरुते वित्तनाशं कलत्रय
मित्यादीनि निषेधवाक्यानि तानि पूर्वदिने प्रतिपदः स्वाप्या न्यूना पित्वे द्वितीयदिने चंद्रदर्शनसंभवे ज्ञेयानि यद्यपि पूर्वोक्तेः क्रीडनं गवां । नंदोदये त्वत्र चैव
पूजयेत्सुरभीस्तथेत्यादिवचनात्प्रातःकालव्यापिन्युत्तरैव गोः क्रीडनादौ प्रतिभाति । तथापि गवां क्रीडा दिने यत्र रात्रौ दृश्येत चंद्रमाः । सोमो राजा य
शून्हंति सुरभीः पूजकांस्तथेति देवलेन प्रतिषिद्धत्वात्साम तत्र ग्राह्या । नीराजनमंगलमालिके तु तस्यामेव कार्ये । तथा च मदनरत्ने ब्रह्मपुराणे । का
र्तिके शुक्लपक्षे तु विधानं दैत्यपंभवेत् । नारीनीराजनं प्रातः सायं मंगलमालिका । अथ चेत्प्रतिपत्स्वल्पा नारीनीराजनं भवेत् । द्वितीयायां तदा कुर्या
त्सायं मंगलमालिकेति । लभ्यते यदि वा प्रातः प्रतिपद्घटिकाद्वयं तस्यां नीराजनं कार्यं सायं मंगलमालिकेति भविष्योत्तरपुराणात् । देवीपुराणेपि । प्रा
तर्नृप दि लभ्येत प्रतिपद्घटिका शुभा ॥ द्वितीयायां तदा कुर्यात्सायं मंगलमालिका । आश्विनांते यदा दृश्येन्नारीनीराजनं भवेत् । नारीणां तत्र वैधव्यं देश
उभिक्षमेव वा । कार्तिके शुक्लपक्षादौ अमावास्याघटीद्वयं । देशभंगभयान्नैव कुर्यान्मंगलमालिकामिति ॥ तैलाभ्यंगे तु पूर्वविद्धा ग्राह्या । बलिराज्ये राम.
तस्योक्तेः । बलेस्तु स्वर्णं च पूर्वेद्युरिति वचनेन बलेस्तु प्रवेशे पूर्वविद्धाया एव पूर्वं ग्राह्यत्वोक्तेः । यत्तु तिथ्यर्के नंदापास्तु दयेभ्यंगं कृत्वा नीराजनं ततः । सुवेषः सत्क १०२

102A यामीतेहानिश्च दिवसं नयेदिति ज्योतिर्निबंधधृतवचनाद्दर्शोत्तरविद्धायाश्चेत्युक्तं। तत्र एतद्वचनस्य हेमाद्र्यादिसकलनिबंधकारैरलिखि
तत्वान्निर्मूलत्वात्। अत्र तैलाभ्यंगो नित्यः। वत्सरादौ वसंतादौ बलिराज्ये तथैव च॥ तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यत इति वृद्धवसिष्ठवचना
त्॥ अत्र स्नानादिनित्यकर्मानंतरं गोवर्धनपूजादि कार्यं। तदुक्तं हेमाद्रौ भविष्ये। प्रातर्गोवर्धनः पूज्यो द्यूतं चापि समारभेत्। भूषणीयास्तथा गावः
पूज्याश्चावाहदोहनादिति। गोवर्धनपूजामंत्रः। गोवर्धन धराधार गोकुलत्राणकारक। विष्णुबाहुकृतोच्छ्राय गवां कोटिप्रदो भवेति। अथ गो
पूजनमंत्रौ। लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता। घृतं वहति यज्ञार्थे मम पापं व्यपोहतु। अग्रतः संतु मे गावो गावो मे संतु पृष्ठतः। गा
वो मे हृदये संतु गवां मध्ये वसाम्यहमिति। अपराह्णे मार्गपालीबंधनादि कार्यं। तद्विधिस्तु पूर्वमेवोक्तः। अन्यच्च आदित्यपुराणे। कुशका
शमयीं कुर्याद्यष्टिकां स्तंभदं नवां। तामेकतो राजपुत्रा हीनवर्णास्तथान्यतः। गृहीत्वा कर्षयेयुस्तां यथासारं मुहुर्मुहुः। जये त्र हीनजातीनां जयो
राज्ञस्तु वत्सरं। जयार्थिनं हीनमिदं राज्ञा विद्धीत प्रयत्नतः। कृत्वैतत्सर्वमेवेह रात्रौ दैत्यपतेर्बलेः। पूजां कुर्यात्ततः साक्षाद्भूमौ मंडलके कृते। बलि
मालिख्य दैत्येंद्रं वर्णकैः पंचरंगकैः। सर्वाभरणसंपूर्णं विंध्यावल्या सहोषितं। कूष्मांडवाणजंभोरुमुरदानवसंवृतं संपूर्णहृष्टवदनं किरीटोत्क

दकुंडलं॥ द्विभुजं दैत्यराजानं कारयित्वा नृपः स्वयं॥ गृहस्य मध्ये शालायां विशालायां ततोर्चयेत्॥ भ्रातृमातृजनैः सार्द्धं संतुष्टो बंधुभिस्ततः॥ कमलैः
ःकुमुदैः पुष्पैः कल्हारैः पंकजोत्पलैः॥ गंधपुष्पान्ननैवेद्यैरक्षतैर्गुडपूपकैः॥ मद्यमांससुरालेह्यदीपवस्तुपहारकैः॥ मंत्रेणानेन राजेंद्र समंत्री सपु
रोहितः॥ बलिराज नमस्तुभ्यं विरोचनसुत प्रभो॥ भविष्येंद्र सुराराते पूजेयं प्रतिगृह्यतां॥ एवं पूजां नृपः कृत्वा रात्रौ जागरणं ततः॥ कारयेत्प्रेक्षणीया
दिनटनर्त्तकनाटकैः॥ लोकश्चापि गृहस्यांतः शय्यायां शुक्लतंडुलैः॥ संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत्॥ बलिमुद्दिश्य दीयंते दानानि
कुरुनंदन॥ यानि तान्यक्षयाण्याहुर्मयैतत्संप्रदर्शितमिति॥ बल्युद्देशे नदीपदानमुक्तं वामनपुराणे॥ वामनकर्तृकबलिवरदानव्याजेन॥ वीरप्र
तिपदं प्राप्य तत्र भावी महोत्सवः॥ तत्र नरशार्दूल हृष्टाः पुष्टास्सलंकृताः॥ अर्घ्यदीपप्रदानेन त्वर्चयिष्यंति मानवा इति॥ ब्रह्मपुराणे॥ एवं पूजां
नृपः कृत्वा रात्रौ जागरणं व्रतमिति॥ इति कार्त्तिकशुक्लप्रतिपत्कृत्यं॥ ॥ अथ मार्गशीर्षशुक्लप्रतिपद्यारभ्य वाराहपुराणोक्तं धन्यव्रतं॥ अगस्त्य
उवाच॥ अथातः संप्रवक्ष्यामि धन्यव्रतमनुत्तमं॥ येन सद्यो भवेद्धन्यो अधन्योपि हि यो भवेत्॥ मार्गशीर्षे सिते पक्षे प्रतिपद्यातिथिर्भवेत्॥ तस्यां नक्तं सम॰
प्रकुर्वीत रात्रौ वह्निं च पूजयेत्॥ वैश्वानराय पादौ च अग्नये चोदरं तथा॥ हविर्भुजेन थोरश्च द्रविणोदाय वै भुजौ॥ संवर्त्तायेति च शिरो ज्वलनायेति

103A सर्वतः। अभ्यर्च्यैवं विधानेन देवदेवं जनार्दनं। तस्यैव पुरतः कुंडं कारयित्वा विधानतः। होमं तत्रैव कुर्वीत एतैर्मंत्रैर्विचक्षणः। एतैर्मंत्रैर्वै
श्वानरायेत्यादिभिः प्रागुक्तैः। ततस्तु पावकं चान्नं भुंजीत घृतसंयुतं। कृष्णपक्षेप्येवमेव चातुर्मास्ये तु या वका। चैत्रादिषु तु भुंजीयात्पायसं स
घृतं त्वघः। आश्वयुजादिषु सत्कृत्य तत्त्वश्चैव समाप्यते। समाप्तौ च व्रतेवह्निं कौन्तेय कारयेन्नृप। रक्तवस्त्रयुगछन्नं रक्तपुष्पानुलेपनं। कुंकुमे
न तथा लिप्ते ताम्रास्यां त्वेवमेव तु। सर्वावयवसंपूर्णां गुणाढ्यां प्रियदर्शनां। पूजयित्वा विधाने नरक्तवस्त्रयुगेन च। पश्चात्प्रदद्यात्तं तत्स मंत्रेणाने
न मंत्रवान् धर्मोस्मि धर्मकामोव धर्मसेवासि मिस्त धर्मस्त्वानः। धर्मेणानेन वीरोसि नव्रतेनस्याः सदा सुखी। एवं कृत्वाप्येतं विप्रेभ्यस्य कोशमिवात्मनः। मघो
धनत्वमाप्नोति पापैस्माद्भ्रागपवर्जितः। इह जन्मनि सौभाग्यं धनं धान्यं वपुष्कलं। अनेन कृतमात्रेण ताजायते नात्र संशयः। प्राक् जन्मसंचितं पा
पं च हि दहति तस्यवै। दारुपापैः सस्तु ह्यात्मा अस्त्रे हव्यनं दति। इति वाराहपुराणोक्तं धर्मव्रतं। अथ चैत्रशुक्लप्रतिपत्त्रिराया पः। तत्र संवत्सा
वत्सरादयिकी ग्राह्या ब्रह्मकृते माधवेमासि प्रतिपच्छुद्धि नैरवादितिभविष्योक्तेः। दिनद्वये तथात्वे पूर्वा। वत्सरादौ वसंतादौ वलिराज्ये तथैव च। पूर्व
विद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैरिति वृद्धवसिष्ठवचनादिति केचित्। निर्णयामृते तु। चैत्रशुक्लप्रतिपदि पूर्वविद्धायां नीराजनादि कर्म

जयसिंह
१०४
104

कर्त्तव्यं ॥ अस्मिन् होलिकानंतरं कर्त्तव्यत्वाद्धोलिकायाश्च पूर्वविद्धा एव प्रशस्तत्वादेतदपि पूर्वविद्धायामेवेत्समामतद्युक्तं अत्र प्रतिपदि प्रातरुत्थाय श्व
पचं स्पृष्ट्वा स्नानादिकं कुर्यात् ॥ तदुक्तं हेमाद्रौ भविष्योत्तरे । चैत्रे मासि महाबाहो पुण्या प्रतिपदा परा ॥ यस्तस्यां श्वपचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमः । न त
स्य दुरितं किंचिन्नाधयो व्याधयो नृप ॥ भवंति कुरुशार्दूल तस्मात्स्नानं समाचरेत् ॥ दिव्यं नीराजनं तद्धि सर्वरोगविनाशनम् इति ॥ तत्रैवायं विधिरुक्तो
वा ॥ प्रभाते विमले जाते ह्येवं कर्त्तव्यं सह स्वमीपस्तुभिः प्रवृत्ते माधवे मासि प्रतिपद्युदिते रवौ ॥ कृत्वा चावश्यककर्माणि संतर्प्य पितृदेवताः ॥ वंदये
द्धोलिकाभूतिं सर्वदुःखोपशांतये ॥ विभूतिवंदनं मंत्रश्च ॥ वंदितासि सुरेंद्रेण ब्रह्मणा शंकरेण च ॥ अतस्त्वं पाहि नो देवि भूते भूतिप्रदा भवेति ॥ अत्र
तैलाभ्यंगो नित्यः ॥ वत्सरादाविति पूर्वोक्तवचनात् ॥ अस्यामेव वसंतोत्सवः ॥ मंडिते च विविधैर्वस्त्रैरुपलिप्ते गृहाजिरे ॥ वस्त्रैश्च कारयेत्कुर्युर्वर्णकैश्चा च्छ
तैः शुभैः ॥ तन्मध्ये स्थापयेत्पीठं शुक्लवस्त्रोत्तरच्छदं ॥ अथ तत्र कलशं स्थापयेत्सह वै युतं ॥ साक्षतं सहिरण्यं च सितचंदनचर्चितं ॥ वस्त्रधान्यघृतश्री
रेभिं च दधिदूर्वाक्षतान्वितं ॥ वह्निपर्युक्ताश्रीकं ठमायुरारोग्यदं द्विमे ॥ वस्त्रधाघमिति पादादसम्मृद्धीतं चंदनेन च वर्चयेद्धि त्वयूथैः ॥ तच्चंदनं वह्निपर्युक्ता प्राश्रं
किं विदवशेषं ॥ पश्चाच्च प्राशयेद्विद्वान्चूतपुष्पं सचंदनं ॥ मनोभवसमाप्सुजाऋषिभिः संप्रदर्शितं ॥ सुतातासमसुद्वयेपि ॥ वृत्ते तुषारसमये सितपंच १०४

104A

दर्शांप्रातर्वसंतसमयेसुपस्थिते॥ संप्राशयन्नंकुसुमं सह चंदनेन मर्त्यं हि यार्थेगुरुपोथ समां सुखी स्यात्॥ समां संख्यां संवत्सरं इत्यर्थः। गोमयो
पलिप्तेवसुधैकदेशे वितानकेनाराघ्रुज्वले रचिते च देशे उपेत्य आसने प्राङ्मुख उपविष्टोब्राह्मणोः कृतस्वस्त्ययनः शुभलक्षणाया सुवासिन्या कृतचंदनतिल
कनीराजनादिमंगलः सचंदनमाम्रमुकुलं प्राश्नीयादित्यर्थः॥ एषा हस्तस्य का मत्स्ज्ञा तदुक्तं हेमन्युधिष्ठिरं प्रति। ये पिबंति वसंतादौ चूतपुष्पं सचं
दनं॥ सत्यं हस्तस्य का मसज्ञेयं क्रियते जनै॥ इति वसंतादौ चैत्रकृत्यप्रति पदि इत्यर्थः॥ - प्राशनमंत्रश्च॥ हुतमग्न्य वसंतसमाकंदकुसुमंतवा
सचंदनं पिबाम्य घनं विकामसमृद्धये॥ अनंतरं द्विजेभ्यो गोसहसमागा धवं हितो। दद्याद्यानं यथाशक्त्या कामो मे प्रिपतामिति॥ ततो भोजनवेलायां स्वतं
पाकेन तेन हि प्राशयेद्भोथ मंत्रालंततो भुंजीत कामतः॥ एवं कुरुते पार्थ शास्त्रोक्तं फाल्गुनोत्सवं॥ अनाशामे नास्ति धौनितस्य सर्वेम नोरथा इति
एतदनंतरं द्वितीयाकृत्यमुक्तं निर्णयामृते॥ ततः प्रातर्द्वितीयायां पुच्चमिचादिसंयुतः। नृपतिर्वितते देशे वितानवरशोभिते॥ सर्वतश्च समास्तीर्णे
रक्तकंवलशोभिते॥ उपविश्यासने रम्ये पौरजानपदैः सह॥ सिंदूरकुंकुमक्षोदपवासैः सचंदनैः॥ विकीर्यलोकांस्ताम्बूलैः संमान्य च पृथक् पृ
थक्॥ नृत्यगीतविनोदैश्च कुर्यात्काममहोत्सवं॥ एवं कुर्वन्नवाप्नोति भावत्संवत्सरं सुखमिति॥ इति चैत्रकृत्यप्रतिपन्निर्णयः॥ अन्यमासप्रतिपत्सु क

जयसिंहक
१०५
105

स्थिद्भूतादिविशेषो न प्रसिद्धः। यद्दिक्कि वित्साल्लहासो ऽपि युग्मवाक्येन पूर्वविद्धायामेव कार्यः। नक्तादिव्रतविशेषे॥ तत्तु तत्कालव्यापिनीयाह्येति सिद्धांत
ः॥ अत्रैव प्रतिपद्वर्ज्यप्रसंगात्सर्वतिथिषु वर्ज्यमुच्यते। तत्र मुहूर्त्तदीपिकायां। कूष्मांडं बृहती फलानि लवणं वर्ज्यंति लाबुं तथा तैलं वामलकं दिवं
प्रवसत्त्वाशीर्षं कपालांत्रकं निष्पावाश्च मसूरिकाफलमथो वृंताकसंज्ञं मधु घृतं स्त्रीगमनं क्रमात्प्रतिपदादिष्वेवमाषोडश॥ शीर्षं नारिकेलं। कपा
लं अलाबु। अंत्रं पटोलं। भूपालः। कूष्मांडं बृहती शारं मूलकं पनसं फलं॥ धात्री शिरः कपालांत्रं नखचर्मतिलानि च। क्षौरकर्माङ्गनासेवां प्रति
पत्प्रभृति त्यजेत॥ अथ सिद्धविद्धादिकं लिख्यते। प्रतिपत्शुक्रवारे गायत्रा सिद्धोच्यते। तदुक्तं शुक्रे राप्रतिपत्षष्ठी एकादश्यां त्रयोदशी॥ सि
द्धा भाद्यांत्रां षाढ़ा हस्त श्रवणा रेवती। अत्र सर्वाणि शुभकर्माणि कार्याणि। इयं भौमवारे सेता बुधवारेण च विरुद्धा तदुक्तं॥ कुजे तु वैश्वदेवार्द्रा प्रति
पत्पूर्वभाद्रपात्। बाहुलां वसुदेवं च षष्ठी याम्यसह वर्जयेदिति॥ तथा बुधे धनिष्ठा भरणी दास्त्रमूलसमन्विता॥ तृतीया नवमी प्रतिपच्चैव तीनि वि
वर्जयेदिति। सामान्यतः स्पर्शोऽपि प्रतिपदादि बवह्यादयः स्थिथिपाः स्वस्वतिथौ पूज्याः तेच रत्नमालायां। वह्निर्विरंचिर्गिरिजागणेशः फणीविशाखः
शारवोदिनकृन्महेशः। दुर्गांतको विश्वहरिः स्मरश्च शर्वः शशी चेति पुराणदृष्टाः इति। कालादर्शेऽपि। अग्निर्विरिंचिर्गिरिजा गुहः। शिवं चंद्रं प्रति २०५

105A पदाघास्तति थिशुक्रमात । शुक्ले कृष्णेपि वा पक्षे विधिवत्सूजयेदिति । रत्नमालायामेकादशीद्वादश्यो विष्णुरेव देवता प्रोक्ता । तत्रत्वेकादश्याः शि
वः द्वादश्या विष्णुरिति यान्भेदः । अतः पक्षद्वयगतासु सर्वप्रतिपत्तिथिषु तिथिपतेन वार्च्यः पूज्यः तदुक्तं ब्रह्मपुराणे प्रतिपद्यग्निपूजास्यादिति
। प्रतिपदादीनां त्रिंशत्त्वस्यानंदाभद्राजयारिक्ताः पूर्णेति चसंज्ञा भवति । तदुक्तं रत्नमालायां । नंदा च भद्रा च जया च रिक्ता पूर्णेति सर्वास्तिथयः क्रमा
त्स्युः । कनिष्ठमध्येष्टफलास्तु शुक्ले कृष्णे भवंत्युत्तममध्यहीनाः । अथ प्रतिपत्कार्यमुच्यते । सर्वास्तु प्रतिपत्सु विवाहदेवत्वावास्तुविन्नोत्सवारंभं
कर्म कार्यं । यथाह भोजः । विवाहं प्रतिपत्सु छेदेने वास्तुतथोत्सवमिति । अत्र प्रतिपदि स्त्रीकाष्ठं एवं दिगामनं च वर्जयेत् । तदुक्तं । नष्टेंदुषष्ठी
प्रतिपत्सु धीमान्न जातु दंतोलूखलाविदध्यादिति । तथा । क्रमास्सर्वोत्तरायणे पन्नैऋत्ये याम्ययाश्रियो वा यक्ष्येशान योगिन्यः स्युः प्रतिपदा
दिषु । प्रतिपदहिनं चम्पाच पूर्वस्यां योगिनी । अतस्तत्संमुखे नयात्रा निषिद्धेत्यर्थः । रविभौमशनीनां मासृतमेष्वयहे मेषस्थे सति प्रतिपत्पंच
मी च दुष्टा भवति । श्रीमद्दिल्लीशस्तेनोद्दिष्टेति श्लोकः । श्रीमत्संडिजेत्यादि । स्त्रपाधूर्वं च तत्प्रत्ययं प्रतिपत्तिथेः स मकरो तु छंदस्तु निर्णायकं इति दे
वभट्टात्मजवाजपेययाजिरत्नाकरविरचिते जयसिंहकल्पद्रुमो घोते प्रतिपत्प्रकरणं समाप्तम् ॥ अथ द्वितीयानिरूपणं ॥ तत्रादौ शुक्लकृष्णद्विती

जयसिंहक॰ पाप्यानं ॥ हेमाद्रौ ॥ द्वितीयाहंसगासुभ्रापात्रपुस्तकधारिणीति ॥ द्वितीयाऽऽकुसुदाभामाचपथ्यामाज्ञकुंडिकेति । अथ द्वितीयानिर्णयः । तत्र कृष्णा
१०६ पूर्वा शुक्लोत्तरेति हेमाद्रिः । कृष्णद्वितीयादिमापूर्वा स्यात् यादिमासितात्वपरतः सर्वेतिदीपिकोक्तेः । सा द्वितीया परोपोष्या पूर्वविद्धा न तोन्यथेति
106 स्मृत्यंतरात् ॥ एकादश्यष्टमीषष्ठी द्वितीया च चतुर्दशी त्रयोदश्यमावास्योपोष्याः स्युः परान्विता इति विष्णुधर्मोत्तराच्च । मदनरत्नेपि । शुक्ल
द्वितीया परया ग्राह्याशुग्मायीतिवचनात् । कृष्णद्वितीयात्तु पूर्वविद्धैव ग्राह्या । द्वितीयाप्रतिपद्युक्ते त्याज्यमं च वचनात् । प्रातिपत्संमुखी कार्या
द्वितीया द्विजसत्तमेति ब्रह्मवैवर्तेश्च नाद्य । प्रातिपत्संमुखी प्रतिपत्संगनात् द्विद्वेसर्पोद्युक्तं मन्वेते पूर्ववचने शुद्धद्वितीयामात्रश्रवणात्त
यं द्वितीयाविशेषविषयत्वमेषामिति चेत् उच्यते । युग्मवाक्ये कृष्णप्रतिपदोमावास्यायुक्तत्वासंभवात् शुक्लप्रतिपदमावास्यायुग्मस्य प्रा
शस्त्यमुक्तं । तथा च शुक्लप्रतिपद्द्वितीयायुग्ममेतद्घ्नमिति दोषाभिधानेन निषिद्धत्वान्निगमवाक्यस्याविषयः । एवं च प्रतिपत्सद्वितीयेत्यादि
वाक्यस्य शुक्लप्रतिपद्द्वितीयान्यतीयायुग्मविषयत्वे निगमवाक्यविरोधः ॥ निगमवाक्यस्य च कृष्णद्वितीयाविषयत्वे निरवकाशापत्तं च च राम॰
वचनविरोधश्च इति ययोः कविषयत्वमेवं गीकर्त्तव्यं विशेषश्चात्र तत्र तत्र कारणो वक्ष्यते ॥ इति द्वितीयासामान्यनिर्णयः ॥ अथ द्वितीयाविशेषकृत्या १०६

106A नि॥ निर्णयामृते। चैत्रशुक्लद्वितीयायामुमापूजाग्निपूजा च कार्या। तदुक्तं भविष्योत्तरे॥ चैत्रशुक्लद्वितीयायामुमापूजा फलार्थिभिः। शिवपूजाग्नि
पूजा च कर्त्तव्या मुनिसत्तमेति। देवीपुराणे। उमां शिवं हुताशं च द्वितीयायां प्रपूजयेत्। हविष्यमन्नं नैवेद्यं देयं धान्येनाग्निवृत्तं। फलमाप्नोति
विप्रेंद्र सर्वक्रतुसमुद्भवमिति। अस्यामेवारभ्य विष्णुधर्मोक्तं बालेंदुव्रतं॥ मार्कंडेय उवाच। उमां तथान्यां वक्ष्यामि द्वितीयां सर्वकामदां। यामुपो
ष्य नरः कामान् सर्वानाप्नोत्यभीप्सितान्॥ चैत्रशुक्लद्वितीयायां संप्राप्य नृपमानवः। दिनावसाने कुर्वीत सम्यक् स्नानं नदीजले। दिनावसाने सं
ध्यासन्निहितकाले॥ बालेंदुमंडलं कृत्वा पूजयेच्छुक्लवर्णकैः॥ मंडलं कृत्वा तत्रैव चंद्रदर्शनकाले चंद्रमा वा प्रपूजयेत्सितपुष्पैः। श्वेतैः सुगंधैः फलैश्चै
व परमान्नेन भूरिणा॥ रक्तोत्थे विकारे श्वशुद्धेन लवणेन च। दिनावसाने देवेशं पूजयेद्वा निशाकरं॥ दिनावसाने चंद्रदर्शनकाले गगनस्थ
मेव वा चंद्रं मंडलं विनापि पूजयेदित्यर्थः॥ घृतेन हवनं कृत्वा नक्तं भुंजीत वाग्यतः॥ प्रणावादि नमोंतेन स्वाहांतेन च मेनात्रा नाममंत्रेणापू
जाहोमौ। ततस्तैलेन पक्वं भक्षयेत्सर्वदैव न॥ ततस्तद्दिनमारभ्य सर्वदैव व्रतावसानं यावत् तदहं तैलपक्वं न भुंजीतेत्यर्थः॥ एतद्व्रतं नरः कृत्वा
सम्यक्संवत्सरं सुधीः। सौभाग्यं महदाप्नोति स्वर्गलोकं च गच्छति॥ संवत्सरं वर्षपर्यंतं॥ प्रतिमासं शुक्लद्वितीयायां पूजाहोमनक्तभोजनानिका

योतिथिः। एतत्तु विदितं रिपुनाशकारि सौभाग्यदं रोगहरं च राजन्। प्रोक्तं व्रतं यादववंशमुख्य कार्यं प्रयत्नेन कुलस्त्रियापि। इति विष्णुधर्मोक्तं बालेंदु
द्वितीयाव्रतं॥ अथ तस्यामेव विष्णुधर्मोक्तं नेत्रव्रतं। मार्कंडेय उवाच। नासत्यौ देवभिषजावश्विनौ परिकीर्तितौ। तावेव कथितौ लोके सूर्यतना
श्विनौ रूपा सूर्यता राज्ञि यौ सूर्यचंद्ररूपौ॥ अश्वयानरतौ यस्मादश्विनौ परिकीर्तितौ। चैत्रशुक्लद्वितीयायां सोपवासो जितेंद्रियः। नासत्यौ देवभिषजौ
पूजयेत्प्रयतः शुचिः। गंधमाल्यनमस्कारैर्धूपदीपान्नसंपदा। कृत्वा च मूर्तिनिर्माणं नासत्यौ पूजयेन्नरः। नासत्ययमूर्तिस्तु विश्वकर्मोक्ता। द्विभुजौ दे
वभिषजौ गौरांगौ वाहलोचनौ। तयोर्दोषधेयः कार्यो दिव्यो दक्षिणहस्तयोः। सव्ययुक्तकरौ कार्यौ दर्शनीयौ तथा द्विज। दीपमालां तथा दद्यात्त
योर्निशि विशेषतः। कनकं रजतं चैव भेदद्या द्विजेषु दक्षिणां। संपूज्य नेत्रयुगलं विष्णोः संवत्सरं नरः। प्रदीप्ततेजा भवति चक्षुष्मांश्चैव जाय
ते॥ प्राणायाद्यांतु कुर्वीत दध्ना सुतघृतेन च॥ नेत्रव्रतं द्वादशवत्सराणि कृत्वा भवेद्भूमिपयाति प्रदीपः। हरूपरूपो रिपुगणप्रमाथी धर्माभिरामोऽनु
पवर्गमुख्यः॥ इति विष्णुधर्मोक्तं नेत्रव्रतं। ज्येष्ठकृष्णद्वितीयासमानकृत्साद्विः। ज्येष्ठस्य शुक्लद्वितीया कल्किजयंती। तदुक्तं। ज्येष्ठस्य शुक्लद्वितीयायाम
याबोद्धः कल्कीभविष्यति। नभस्ये चाद्वितीयायां बलभद्रोभवत्तदेति। इयं सोपपदा। तदुक्तं कालादर्शे॥ सिताज्येष्ठद्वितीयाच्च। श्रीनेद १०७

107A

शमीसिता। चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः। अत्र देवशयननिषेधो नारदीये। युगादिषु च सर्वासु तथा मन्वंतरादिषु। अयनद्वा
यं प्रकुर्वीत तथा सोपपदास्वपीति। आषाढशुक्ला द्वितीया पारणमयात्रोत्सवः कार्यः। तथा च स्कांदे। आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता
तस्यां रथे समारोप्य रामं वै भद्रया सहेति॥ यात्रोत्सवं प्रवर्त्त्य प्रीणयेत द्विजान्बहून्। भद्रा सुभद्रा। श्रावणशुक्लद्वितीया वृहत्तपेत्यु
च्यते। अस्यामेवारभ्य भविष्यपुराणोक्तमशून्यशयनव्रतं। तत्र मासपूर्वविद्धा ग्राह्या। तदाह संवर्तः। कृष्णाष्टमी वृहत्तपा सावित्री वटपैतृकी
। कामचतुर्दशी रंभा उपोष्याः पूर्वसंयुता इति केचित्। मदनरत्ने निर्णयामृतादिषु तु यद्दैवं चंद्रोदयव्यापिनी तद्दैव कार्या। एकभक्ते दिवा
नक्ते निशि चंद्रोदयव्रते। तिथिस्तात्कालिकी ग्राह्या पारणान्ते परा तिथिरिति स्मृतिसंग्रहवचनात्। चंद्रोदयव्रतत्वं चास्य चंद्राय चार्घ्यो
दातव्यो हव्यकव्यफलादिभिरिति पुराणांतरवचनात्। दिनद्वये तत्र सत्वे असत्वे वा परा। चतुर्थी सितपक्षे तु मासेषु श्रावणादिषु अ
नया स्वव्रतं कुर्याज्जययात्फलाधिकामिति। अथ कथा। सुमंत्र उवाच॥ अशून्यशयनं नाम द्वितीयां श्रावणे तथा। सुपोष्य न वैधव्यं
स्त्री प्रयाति नराधिप। पत्नीवियुक्तस्तु नरो न कदाचित्प्रजायते। यासु पोष्य यस्यां देवतामुपास्य उपासनमेवात्रोपवासोभिमतो न भोज

जयसिंहक नाहूतिः। नक्तं भुंजीते स्वत्तरवाक्यविरोधात्। शेते जगत्पतिः हंसः। श्रियायामाईय दानृप। अशून्यशयना नाम तद्वितीयास्यात्तु सा तिथिः। कृष्णपक्षे द्विती
१०८ पायां श्रावणो मासि भारत। यदा शेते तदा याह्या शयनी सान्निहिता द्वितीया ग्राह्यै सर्वः। अत एवं श्रावणोत्र पौर्णमासंमतः। वामनपुराणे एकादश्यां
108 जगत्स्वामी शयनं परिकल्पयेत्। शेषाहिभोगपर्यंकं कृत्वा संपूज्य केशवं। अनुज्ञां ब्राह्मणेभ्यश्च द्वादश्यां प्रयतः शुचिः। लब्ध्वा पीतांबरधरः
स्वस्तिनिद्रां समानयेत्। त्रयोदश्यां ततः कामः स्वपते शयने शुभे। चतुर्दश्यां ततो यक्षाः स्वपंति सुखशीतले। पौर्णमास्यामुमानाथः स्वपते
चर्मसंस्तरे। वैयाघ्रे च जटाभारं समुद्ग्रथ्यान्यचर्मणा। ब्रह्मा प्रतिपदि तथा नीलोत्पलमये न घ। तल्पे स्वपिति लोकानां दर्शयन्मार्गमुत्तमं। वि
श्वकर्मा द्वितीयायां तृतीयायां गिरेः सुता इति। आषाढ्यवव्हितोत्तरद्वितीयायां विश्वकर्मस्वापमभिधायापस्मातिथ्याम्प्रस्वापिति विश्वकर्मा प्रजापति
ः। द्वितीया मासमुमा पुराणापुराणपरेशयनो विः। तस्यां तिथावच्येहरिं श्रीवत्सांकं चतुर्भुजं॥ पर्यंकस्थं समं लक्ष्म्या गंधपुष्पादिभिर्मुने। ततो देवाय शय्या
यां फलानि प्रक्षिपेत् क्रमात्। द्वितीयादिनात स्वापमेवातिथावशून्यशयन व्रतविधानात् इमं मंत्रमुच्चारयेत्। मंत्रं प्रणम्य च जगन्नाथं श्रीवत्सधारि- श्रीकां राम
त श्रीधाम श्रीपतेव्यय। गार्हस्थ्यं मा प्रणाशं मे यातु धर्मार्थकामदं। अग्नयो मा प्रणश्यंतु मा प्रणश्यंतु निर्जराः। पितरो मा प्रणश्यंतु मत्तो दांप १०८

108A ऽस्मभेदतः। श्रुवृपोग्रपः निर्जराः देवाः याम्यगाः पितरः। लक्ष्मा वियुज्यते देव न कदाचिद् यथा भवान्। तथा कलत्रसंबंधो देव मा मे वियुज्यतां॥
लक्ष्म्या न शून्यं वरद यथा ते शयनं सदा। शय्या ममाप्यशून्यास्तु तथात्र मधुसूदन॥ विह्नुर्हसेपु नरि मेमंत्राः पत्नी भर्तृवियोगं च भर्ता
भार्यासमुद्भवं नाप्नुवंति यथा दुःखं दंपत्यानि तथा कुरु। यथा श्रिया युतो विभुर्लक्ष्मी देव त्वया यथा। प्रसादात्तव देवेश मक्तिरस्तु
तथा वयोः। मासमस्तु त्राः परा श्रपतु मा भवने मा कुलक्रमः। अश्रयो माघ राशुप तुग्रहभंग स्तु मान यो। शेषोयं योर्भविष्यपुराणात् उक्ता
र्थः। एवं प्रसाद्य पूजां च कृत्वा लक्ष्मास्तथा हरेः। फलानि दद्यात् शय्यायां समभीष्टानि जगत्पतेः। अत्र चंद्रार्घ्यदानमुक्तं पुराणांतरे। चंद्रा
यवार्घो दातव्योदध्यक्षत फलादि भिरिति। अर्घ्यमंत्रश्च। गगनांगणसंदीप क्षीराब्धिमथनोद्भव। भाभासितदिगाभोग रमानुज नमोस्तु
ते इति। नक्तं प्रणम्यापयेत नेह रिं भुंजीत वाग्यतः। हरिं प्रणम्य नक्तं भुंजीतेत्यन्वयः। ब्राह्मणाय द्वितीये ह्नि शक्त्या देया च दक्षिणा। यानि तत्र
महाबाहो काले संति फलानि वा। मधुराणि नतीक्ष्णानि नवापि कटुकानि वा। दातव्यानि नृपश्रेष्ठ स्वशक्त्याशयने नृप। मधुराणी वदत्त्वा तु म
नो वल्लभतां व्रजेत्। तस्मात् कटुकतीक्ष्णानि स्त्रीलिंगानि च वर्जयेत्। स्वर्ज्जूर पानस लिंगानि स्थिते नाशिरस्मासह फलानि दद्यात् शय्यायां

मितिज्ञापने दानव्रततयासामासेनोयाज्ञानां फलानांयानीसादिनाविशेषाभिधानं॥ फलानिशापनेराज नूपद्रमामगहरसन्तु।एतानेवतु वि
प्रसगांगेयसहितानिच।द्वितीयेन्हिप्रदेयानिभक्त्याश्यामचभारत।तथासोदानंतथाघानसफलदानसमन्वितं।एतानियज्ञमामगहरसज्ञायने
उपकल्पितानि फलानि।द्वितीयेन्हिगांगेयसहितानिविप्रसप्रदेयानीत्यन्वयः।तथासोदानंकार्यमितिशेषः।यज्ञभा गहरःयज्ञपुरुषः
।गांगेयमन्त्रस्तुवर्णोच्छिते नाशिरसाविधुमानेनवंतेन।एवं करोतियःसम्यक्रोमासचतुष्टयं।तस्यजन्मत्रयंचौरग्रहभंगोनजायते।मास
चतुष्टयंकृत्स्नंद्वितीयास्वितिशेषः।बोधिन्यनंतरद्वितीयायांसमापनीयमितसर्वःसमाप्तोकर्त्तव्यताविशेषः५ पद्मपुराणे॥ ॥तसहेवस
सकुलेमंत्रादिकमभिधाय।शंकरउवाच।गीतवादित्रनिर्घोषंदेवदेवस्यकारयेत।घंटाभवेदशक्तस्यसर्ववाद्यमयीयतः।स्नंतस्नअगोविंदमश्री
पाल्तैलवर्जितं।नक्तमक्षारलवणांयावन्मासचतुष्टयं।ततःप्रभातेसंजातेलक्ष्मीपतिसमन्वितां।दीपान्नभाजनेपूर्णांशय्यांदद्याद्विलक्षणां
।इमासचतुष्टयंतेनतुप्रतिमासंकार्तिकेत्वथसंप्राप्तेशय्यांश्रीकांतसंयुतां।सोपस्कारांसोदकुंभांमासान्नांदद्याद्विजातये।इतिभविष्योत्तरारम्भः
त।पादुकोपानहछत्रचामरासनसंयुतां।अभीष्टोपस्करैर्युक्तांशुक्लपुष्पांबरावृतां।सोपधानकविश्रामांफलैर्नानाविधैर्युतांतथाभरणधान्ये १०९

109A

स्त्र यथाशक्त्या समन्वितां। अत्रं गां सायविशाय वैश्याय कुटुंबिने। दातव्या वेदविदुषे न च कुत्रांति ने काचित्। दातव्येति श्रुवौ क्त दानानुवादेन सं श्रद्धनावि
वेचनं। तत्रोपवेश्य दांपत्यमलंकृत्य विधानतः। पत्न्याश्वमाजने दघाङ्कक्ष्यमो उसमन्विता। ब्राह्मणस्यापि सौवर्णीं स्वयस्कारसमन्वितां। प्रतिमां
हे व देवस्य सोदकुंभां निवेदयेत्॥ एवं यस्तु पुमान्कुर्याद् अशून्यशयनं हरेः॥ वित्तशाठ्येन रहितो नारायणपरायणाः। पत्नी न तस्य विरहः कदा
चिदपि जायते। नारी वा विधवा व्रतमनयाव चंद्रार्कतारकं। मत्स्यपुराणे॥ न विरूपं न शोकार्त्तो दांपत्यं जायते क्वचित्। न पुत्रपशुरत्नानि क्षयं यांति
नृपोत्तम सप्तकल्पसहस्राणि सप्तकल्पशतानि च। कुर्वन्नशून्यशयनं विष्णुलोके महीयते। भविष्यपुराणे। अशून्यशयनं सोयधर्मकामा
र्थसाधकः। भवत्यव्याहतैश्वर्यः पुरुषो नात्र संशयः। नारी वा राजधर्मज्ञा व्रतमेतद्यथाविधि। या करोति न शोच्यासौ बंधुवर्गे स जायते। वैधव्यं दु
र्भगत्वं च भर्तृत्यागं च सत्तम। नाप्नोति जन्मत्रितयमेतत्कृत्वा महाव्रतं। इत्येषा कथिता राजन् द्वितीयातिथिरुत्तमा॥ यासु पोष्य नरो राजन्नृद्धिं
वाद्धिमव्ययं व्रजेत्॥ इत्यशून्यशयनद्वितीयाव्रतं। अथाश्विनशुक्लद्वितीया स्कांदे पुराणे। आश्विने मासि वैशाखादि तीया शुक्लपक्षगा। दा
ने प्रदत्तमेतस्यामनंतफलमुच्यत इति। कार्त्तिकशुक्लद्वितीयायमद्वितीया। सा चापराह्णव्यापिनी ग्राह्या एतत्तु कं निर्णयामृतादौ॥ मध्यान्ह

जयसिंहक
११०
110

व्यापिनी पूर्वविद्धा चेति हेमाद्रिः। इयं या कर्मकालव्यापिनी सैव ग्राह्या। द्वि। न द्वये कर्मकालव्याप्तौ द्वितीयासामान्यनिर्णयोऽवगन्तव्य इति मदनः। अ
ष्टधाविभक्ताह्निनपंचमभागव्यापिनी ग्राह्येति स्मार्त्तः। अपराह्णस्तु द्वेधाविभक्तदिनोत्तरार्धभागो गौण इति तत्प्रक्रमिति कृत्यरत्नावल्यां अत्र
कृत्यमुक्तं स्कान्दे। ऊर्जे शुक्लद्वितीयायामपराह्णेऽर्चयेद्यमं। स्नानं कृत्वा भानुजायां यमलोकं न पश्यति। ऊर्जे शुक्लद्वितीयायां पूजितस्तर्पितो यमः। म
हिषासनमारूढो दण्डमुद्गरधारिभिः। वेष्टितः किंकरैर्हृष्टैस्तस्मै यच्छति वाञ्छितं। यमुनायां स्नानं कृत्वा यमं पूजयेत्तर्पयेद्वा। अस्यां भगिनीभिः
भ्रातृपूजनं कार्यं तथा च लिंगपुराणे। कार्त्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजनं। या न कुर्याद्विनश्यन्ति भ्रातरः सप्तजन्मसु। तस्मादिति शे
षः। भविष्योत्तरेऽपि। कार्त्तिके शुक्लपक्षे तु द्वितीयायां युधिष्ठिर। यमो यमुनया पूर्वं भोजितः स्वगृहे स्वयं। अतो यमद्वितीया सा प्रोक्ता लोके युधिष्ठि
र। अस्यां निजगृहे पार्थ न भोक्तव्यमतो बुधैः। यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्धनं। दानानि च प्रदेयानि भगिनीभ्यो विशेषतः। स्वर्णालंका
रवस्त्राणि पूजासत्कारभोजनैः। सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः। प्रतिपन्नकाः प्रतिपन्नाः भगिनीत्वेन व्यवहृता इत्यर्थः। मित्रभगि
न्य इति हेमाद्रिः। पितृव्यभगिन्य इत्यपि हेमाद्रिः। ब्रह्मांडे। या तु भोजयते नारी भ्रातरं युग्मके तिथौ। अर्चयेच्चापि तांबूलैर्न सा वैधव्यमाप्नुयात्॥ ११०

110A भ्रातुर्गृहः क्षयो राजन्न भवेत्तत्र कर्हिचित्। तावित्रगुप्तस्य पूजां च कुर्याज्ज्ञानस्य वृद्धये। मषीपात्रं लेखनीं च संपूज्य तु प्रयत्नतः। सर्वान्कामानवाप्नोति
यमलोकं न पश्यति। गौडग्रंथेत्। यमं च वित्रगुप्तं च यमदूतांश्च पूजयेत्। अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयैः। भ्रातृभगिनीभिरित्यर्थः। अर्घ्यमं
त्रः। एह्येहि मार्तंडज पाशहस्त यमांतकालोकधरामरेश। भ्रातृद्वितीयाकृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते। पूजानंतरं प्रणाममंत्रः। धर्मराज
नमस्तुभ्यं नमस्ते यमुनाग्रज। पाहि मां किंकरैः सार्द्धं सूर्यपुत्र नमोस्तु ते। यमस्वसर्नमस्तेस्तु यमुने लोकपूजिते। वरदा भव मे नित्यं सूर्यपुत्रि नमोस्तु ते
कनिष्ठात् भोजनदाने मंत्रः। भ्रातस्तवानुजाताहं भुंक्ष्व भक्तमिमं शुभं। प्रीतये यमराजस्य यमुनायाः विशेषतः। ज्येष्ठात्तत्वाग्रजाताहमिति पठे
त्। इति यमद्वितीयाव्रतं। अथ भविष्योत्तरोक्तं यमद्वितीयाव्रतं। श्रीकृष्ण उवाच। संत्येतास्तिथयः पार्थ द्वितीयाश्च विश्रुताः। मासे मासे तु मिश्रितत्वः प्रा
वृट्काले मलापहाः। गोपितास्ताः सदा पार्थ न प्रोक्तास्त्व मयाक्वचित्। प्रकाशयाम्यहं ताः सम्यक् शृणु सर्वाः समाहितः। प्रथमा श्रावणे मासि तथा
भाद्रपदे परा। तृतीयाश्वयुजे मासि चतुर्थी कार्तिके भवेत्। श्रावणे कलुषा नाम तथा भाद्रे च गीर्मला। आश्विने प्रेतसंचारा कार्तिके याम काम
नामुपिष्ठिरुवाच। कस्मात्सा कलुषा प्रोक्ता कस्मात्सा गीर्मला मता। कस्मात्सा प्रेतसंचारा कस्माद्याम्या प्रकीर्तिता। श्रीकृष्ण उवाच। पुरा वृत्रवधे

जयसिंहक.

१११

वृत्रेपापमासाद्येपुरंदरो। ब्रह्महत्यापनोदार्थमश्वमेधेप्रकीर्तिते। क्रोधादिंद्रेणावैब्रह्महत्यासाविनिसृदिता। षड्विधासाक्षितौक्षिप्तावृक्षेतोयेमहीतले
।नार्योवन्हौब्रह्महत्यांसंविभज्ययथाक्रमं। तत्पापंश्रावणोवृदं द्वितीयायांदिनोदये। नारीवृक्षेनदीभूमिंवन्हिब्रह्महणांतथा। निर्मलीकरणाज्ज्ञा
तापतः साकलुषाभूता मधुकैटभयोर्न्नेपुरामन्यातुमेदिनी। अश्रुपातपविश्वासान्नारीणांतुरजोमलं। नघोजलमलाः सर्वेवन्हेर्धूम
मिवामलं। कलुषाश्चिरंतसंसातेनेषाकलुषामता। विवरंतिहतपापाश्चितापीत्यज्याकृतपापाश्चितानुगृहीतंविवरंति। अतएवतत्सांप्र
तिसंवत्सरंप्राप्यप्रायश्चित्तंकर्तव्यं। गौर्गिराभारतीवाणीवाग्मेधासरस्वती। गौर्मलंवहतेयस्माद्वितीयागौर्मलामता। देवर्षिपितृधर्माणांनिंद
कानास्तिकाः खलाः। तेषांसावाङ्मलंब्रूद्वितीयातेनगौर्मला॥ अनध्यायेषुशास्त्राणिपाठयंतिपठंतिवा। शास्त्रविक्रेतारिकाश्रोता
तेषांयेशब्दजाः स्मृताः। ताद्वितीयायांततोयगौर्मलावसा। अतस्तस्यांसरस्वतीपूजाकार्येतिसर्गः। प्रेतास्तुपितरः प्रोक्तास्तेषांतत्संस्तुसं
चरः। द्वितीयायांयतोलोकेतेनसाप्रेतसंचरा। अग्निष्वात्ताबर्हिषदः आज्यपाः सोमपास्तथा। पितामहादयः सर्वेयेचान्येप्रेतसंचराः। पुत्रैः पौत्रैः राम.
दौहित्रैः स्वधामंत्रैस्तुपूजिताः। श्राद्धदानमखैस्तृप्तायांतिनः प्रेतसंचरा। अतस्तस्यांपार्थश्राद्धंकार्यमितिसर्गः। कार्तिकेशुक्लपक्षस्यद्वि १११

|||

111A

तीयायां युधिष्ठिर।यमो यमुनया पूर्वं भोजितः स्वगृहे तदा।द्वितीयायां महोत्सर्गे नारकीयाश्च तर्पिताः।पापेभ्योपि विनिर्मुक्ता मुक्ताः सर्वे विबंधनात्
।अंतं शिताश्च ते तुष्टाः स्थिताः सर्वे यदृच्छया।तेषां महोत्सवो वृत्तो यमराष्ट्रसुखावहः।अतो यमद्वितीया सा प्रोक्ता लोके युधिष्ठिर।अस्यां नि
जगृहे पार्थ न भोक्तव्यमतो बुधैः।स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनं।दानानि च प्रदेयानि भगिनीभ्यो विधानतः।।स्वर्णालंकारवस्त्राणि पूजा त
सत्कारभोजनैः।सर्वा भगिनीभ्यः संपूज्या अभावे प्रतिपन्नकाः।पितृव्यभगिनीहस्तात्प्रथमायां युधिष्ठिर।पितृव्यभगिनी पितृव्यसंबंधभगिनी पि
तृव्यकन्येत्यर्थः।मातुलस्य सुताहस्ताद्द्वितीयायां तथान्यया।।पितृमातृस्वसुः कन्ये तृतीयायां तयोः करात्।भोक्तव्यं सहजायाश्च भगिन्या हस्ततः परं।
सर्वासु भगिनीहस्ताद्भोक्तव्यं बलवर्द्धनं।सर्वासु सर्वद्वितीयासु।धन्यं यशस्यमायुष्यं धर्मकामार्थसाधकं।व्याख्यातं सकलं पार्थ सरहस्यं मया त
व।यस्यां तिथौ यमुनया यमराजदेवः संभोजितो जगति सस्नेहसौहृदेन तस्यां स्वसुः करतलादिह यो भुनक्ति प्राप्नोति वित्तमथ भोगमनुत्तमं स
ः।इति भविष्योत्तरोक्तं यमद्वितीयाव्रतं समाप्तं।मार्गशुक्लद्वितीयायां पितृपूजनं कार्यं तदुक्तं हेमाद्रौ लिंगपुराणे।वृश्चिके च द्वितीयायां शुक्लायां
पितृपूजनं।यो न कुर्याद्द्विजश्रेष्ठ पतंति पितरः सप्तजन्मगाः।अथ पौषशुक्लद्वितीयायां विष्णुधर्मोत्तरोक्तमारोग्यव्रतं।।पुष्कर उवाच।पौषशुक्लाद्वि

जपकल्प·
११२
112

तीयायां गवां श्रृंगोदकेन तु। स्नात्वा शुक्लांबरो भूत्वा सूर्ये लक्ष्म्युपागते। बालेंदोः पूजनं कृत्वा गंधमाल्यानुलेपनैः। धूपदीपनमस्कारैस्तथा चैवान्नसंप
दा। दध्ना च परमान्नेन गुडेन लवणेन वा। पूजने ब्राह्मणानां च पूजयित्वा निशाकरं॥ यावदस्तं न याति इंदुस्तावद्देवसमाचरेत्। आहारं गोरसप्रायमध
ःशायी निशां नयेत्। एवं संवत्सरे पूर्णे सौम्ये मासि द्विजोत्तम॥ एवमिति प्रतिमासं शुक्लद्वितीयासु चंद्रपूजनविधिनेत्यर्थः। सौम्ये मार्गशीर्षे। बालेंदो
ःपूजनं कृत्वा पूर्वं संस्मृत्वा विशेषतः। वासांसि रजतं कुंभं च कांचनं च द्विजातये। दत्वा तु पूर्ववत् स्नात्वा व्रतपारगतो भवेत्। व्रतेनानेन धर्मज्ञो रोगमेवं
अपोहति। सौभाग्यं प्राप्नोति तथा पुष्टिं च मनुजोत्तम। कामं समाप्नोत्य च चैकमिष्टं यशस्तथाग्र्यं प्रचुरं च धैर्यं। अभ्यासतस्तस्य समस्तकामान्
रस्तथाप्नोत्यथवापि नारी॥ इति विष्णुधर्मोक्तमारोग्यद्वितीयाव्रतं। बृहस्पतिवारयुक्तद्वितीयासु विधिपूजनमुक्तं ब्रह्मपुराणे। बृहस्पतौ द्विती
यायां विधिवद् विधिपूजनं। कृत्वा नक्तं समश्नीयात् लभते भूतिमुत्तमां। विधिर्ब्रह्मा। तत्पूजनं च गायत्र्यापोशाणमंत्रेण वा। अन्यमासद्विती
यासु काश्चिद् व्रतविशेषः प्रसिद्धो नास्ति। यदि कश्चित्स्यात्तर्हि युग्मवाक्येन परविद्धायामेव कार्यः। नक्तव्रतविशेषे तु तत्कालव्यापिन्यामेवेति सि ताम·
द्धांतः। अथ सिद्धविरुद्धादिकं। द्वितीया बुधवारे शस्ता सिद्धा। ज्योतिषे बुधवारे द्वितीया च द्वादशी सप्तमी पुनः। मृगोत्तराषाढहस्तश्रवणान्विका सिद्धि ११२

112 A

हारिकेति। अत्र कार्यो ऽभ्यंगः सिद्धो भवति। इयं शुक्रवारे त्वविरुद्धा। अत्र शुभकार्यं न कार्यं। मार्गे विरोहिणी ज्येष्ठा द्वितीया सप्तमी पुनः॥ पुष्यो मघा त
था श्लेषा सर्वकार्येषु वर्जितेति। द्वितीयायां वैवाहिकं कर्म भूषणाकर्मेत्यादीनां मार्गगमनं नवतारंभं पौष्टिकं कर्म च कुर्वीत। तदुक्तं भास्करेण॥ व्रतपौष्टि
कोद्वितीयाद्वादश्योः सप्तमीषु कुर्वीत। पूर्णगृहनृपादेशपनशकटयानाश्व कर्माणीति। द्वितीयायां श्राद्धविट्क्षत्रियैर्मलापहस्नानं न कार्यं तदु
क्तं भास्करेण। त्रयोदश्यां द्वितीयायां दशम्यां च विशेषतः। शूद्रविट्क्षत्रियाः स्नानं न नरेषु कुर्युः कथं वनेति॥ स्नानं तु स्वनुज्ञानं दशमी त्रयोदश्यर्थं
द्वितीयादित्रयं निहंति। मलापहस्नाननिषेध एवं नित्यनैमित्तिककाम्य बाधते ति। अत्र उत्तरस्यां दिशि यात्रा न कार्या। धर्मे नस्थेर वो द्विती
याध्यायो भवति॥ श्रीमद्दिलीशेत्यादिश्रीमत्पंडितादिपादोन्मोकद्वयंस्वविवत्॥ गुणं भाषते ये स्वतीयम करोन्निर्णायकं सद्गुणामः॥ इति देव
महात्मज पौण्डरीकयाजिरत्नाकरविरचिते जपसिंहकल्पद्रुमे द्वितीयाप्रकरणं समाप्तम्॥ अथ तृतीया निर्णयः। तत्रादौ शुक्लकृष्णपक्षभे
देन तृतीयाख्यानं। तृतीया वृषगा गौरीशूलपन्नघ रामता। तृतीया तत्र्यै गानीलाशंखयात्र धरा हिदोरीति। रंभाव्यतिक्रांत तृतीया यावव्रतदर्थीयुतेवो
पवासादिषु ग्राह्या। एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी। अमावास्या तृतीया च ता उपोष्याः परान्विताः इति विष्णुधर्मोत्तर वचनात्। युग

ज प कल्प॰

११३

113

वाक्यं रंभाव्रतविषयं। रंभाख्यं वर्जयित्वा तु तृतीयां द्विजसत्तम। अन्येषु सर्वकार्येषु गणायुक्ता प्रशस्यते इति ब्रह्मवैवर्त्तात्। गणायुक्ता चतुर्थीयुक्ता। आपस्तं-
बोपि। चतुर्थीसंयुतायां वै सा तृतीया फलप्रदा। अवैधव्यकरी स्त्रीणां पुत्रसौभाग्यदायिनी। द्वितीयावेधनिषेधो ब्रह्मवैवर्त्ते। द्वितीयाशेषसंयुक्तां या करो-
ति विमोहिता। सा वैधव्यमवाप्नोति प्रवदंति मनीषिणः। दीपिकायामपि। रंभां विहाय तत्र जनस्तृतीयामित्याहि। अत्र यद्यपि द्वितीयावेधः। स्वल्पोपि गौ-
रीव्रतेषु त्याज्यो न मुहूर्त्तत्रयपरिमित एव। अत एव मदनरत्ने स्कंदपुराणे। कलाकाष्ठापि वा चैव द्वितीया संप्रदृश्यते। सा तृतीया न कर्त्तव्या कर्त्तव्या
गणसंयुतेति।। तेनैतेषु गौरीव्रतेषु उत्तरदिने स्वल्पापि तृतीया ग्राह्या न त्रिमुहूर्त्तत्वकर्मकालव्यापित्वाद्यादरः। मुहूर्त्तमात्रसत्वेपि दिने गौरीव्रतं परे।
शुद्धाधिकायामप्येवं गणायोगप्रशंसनादिति माधववचनात्। यदा तु उत्तरदिने स्वल्पापि न लभ्यते तदा द्वितीयाविद्धापि ग्राह्या तथा च वृद्धवसिष्ठः। ए-
कादशी तृतीया च षष्ठी चैव त्रयोदशी। पूर्वविद्धा तु कर्त्तव्या यदि न स्यात्परेहनीति। रंभाव्रतविषये तु पूर्वैव ग्राह्या। कृष्णाष्टमी बृहत्तपा सावित्री वट-
पैतृकी। अनंगत्रयोदशी रंभा उपोष्या पूर्वसंयुता इति निगमवचनात्। इति तृतीयानिर्णयः। अथ तृतीयाकृत्यानि।। तत्र चैत्रशुक्लतृतीयायां रामः
होलोत्सवो रामार्चनं चंद्रिकायां।। गारुडो मधौ शुक्लतृतीयायां जानकीरमणां प्रभुं। राजोपचारैः संपूज्य मासमांदोलयेत्कलौ। दक्षिणाभिमुखं दे- ११३

113A वंदोल मानंस्तु योश्वरं। सुपूजितं स्कंदृष्ट्वा सर्वपापैः प्रमुच्यते॥ चैत्रे मासि सिते पक्षे तृतीयायां रमापतिं। दोलारूढं समभ्यर्च्य मासमांदोलयेत्कलौ। दो
लारूढं प्रपश्यंति ये कृष्णं मधुमाधवे। अपराधसहस्रैस्तु मुक्तास्ते नात्र संशयः। दोलारूढस्य देवस्य ये ये कुर्वंति जागरं॥ सर्वे पुण्यफलावाप्तिं निमिषेनि
मिषे भवेत्। इयमेव गौरीतृतीयेत्युच्यते। तत्र सहर्जे मात्रापि परिपुत्ताया ह्येसुत्तं॥ अथासामासंगौरीव्रतं। गौरीव्रतमथो वक्ष्ये सर्वस्त्रीणां सौभाग्यवर्द्ध
नं। चैत्रे शुक्लतृतीयायां गौरीव्रतं समाचरेत्। उपोष्य तु प्रयत्नेन विधानमिदमाचरेत्। रक्तांबरधरो भूत्वा क्रोधलोभविवर्जितः। स्थंडिले हस्तमात्रे
तु कर्त्तव्यं गंधमंडलं। कुंकुमेंदुसमीतेन वर्तुलं च विवर्जयेत्। इंदुः कर्पूरः समीतं चंदनं। तत्र मध्ये प्रजितव्या प्रतिमा हेमसंभवा। मधुजा तदभावे तु पु
रा केनापि निर्मिता। रक्तचंदनजा वाथ कर्त्तव्या सा प्रमाणतः। पंचकृत्वाथवा पूज्या तत्र मासं विधानतः। पंचकृत्वापं चापिंडमपीत्यर्थः। रक्तपुष्पैः सुसं
पूज्या जातीचंपकसंयुतैः। पाटलाकरवीरैश्च रक्तपद्मैर्यथातथा। पारिजैर्मल्लिकाकुंदैस्तथा रक्तोत्पलैस्तथा। स्थलपद्मैः किंशुकैश्च तथा दमनोत्पल
केतकैः। एवं पुष्पैस्तथा नैवेद्यं पूजनीया प्रयत्नतः॥ पारिजः पारिजातः। इंदुना कुंकुमेन वस्त्रयोर्भूयः समालभेत्। नानाविधानि रत्नानि मुकुटाग
दकानि च। कुंडलाभरणान्यत्र रशनादीनि दापयेत्। रशना क्षुद्रघंटिका। भक्ष्याणि पत्रान्नान्निघृतकुंड्युतानि च। शीतलं च घनं दुग्धं सुगं

जय·कल्प· नवदधिपिष्ठिलं।घनं क्वाथेन घनीकृतं॥सुस्वादुं मनोहरं॥पिष्ठलं विकृतं।कांभेन नवनीतं तत्र याशी खरिणी पुनः।कर्पूरमोदयिसतंत्रवः।शीखरिणीरसा
११५ लामध्यदेशे प्रसिद्धा।पानकं चैव पानीयं सर्वं द्रव्यं दापयेत्ततः।पानकं मशर्करास्त्रफलादिरसः।सुवर्णं स कर्पूरं।रक्तवस्त्राणि देया निसंभाग्रदीनि
114 वाद्यतः।आचार्यश्चैव संपूज्यं तेषूज्यनीयः प्रयत्नतः।हेमवस्त्रान्नपानैश्च विजशाद्यं विनाशुतं॥रात्रौ जागरणं कार्यं कुमारीभोजयेत्तथा।देवीनामा
निवक्ष्यामि मासिमासि यथाक्रमं।प्राशनं तु विशेषेण।यथा वदनुपूर्वशः।गौरी उमा च ललिता सुभगा भगमालिनी।मनोन्मनी भवानी च कामम
दा भोगवर्द्धिनी।अंबिका चेत यात्रहस्ता रुद्राणी पूजयेत्क्रमात्।द्वेनांताः सितपक्षे तु कृष्णपक्षे तथा शृणु।रतिः प्रीतिर्धृतिर्बुद्धिर्मतिः पुष्टिश्च कीर्तिताः
प्रज्ञा मेधा तथा वायोश्रीरकाकीर्तिरेव च।सितासिता भेषा पक्षाभ्यां ब्रतं यत्नात्समाचरेत्।अशक्तत्वाद भावाद्वा द्रव्याणां तु स्थितं हितं।प्राशनं तत्र क
र्तव्यं शास्त्रोक्ते नैव वर्त्मना।तत्र स्नात्वा तु मासाभे रोगादिजनकत्वेन प्राशनाशक्तौ चक्रमे गोक्षाद शतु मासेषु यत्स्थितं लक्ष्यं पञ्चाहे तंततत्
प्राशनीयमिति अशक्तत्वादेरर्थः।प्रतिमासि प्रवक्ष्यामि शुक्लपक्षे क्रमेण तु।क्षीरं दधि घृतं चैव गोमूत्रं च कुशोदकं॥बिल्वपत्रोदकं चैव तथा न्य राम·
वं दनोदकं॥जातीपत्रोदकं चैव पद्मके शरमेव वा नागकेसरसंज्ञं तं वलवंगं चंद्रमेव वा।शुक्लपक्षे तु कथितं चैत्रात्प्रभृति षण्मुखा प्राशनं कृष्णपक्षे ११५

114A तु रूप्यमानं भ्रमणु ष्वतत्र । वलां कंकोलकं चैव प्राशयेत्तु शतावरी ॥ घनं लघुसूरं हारसमारि वांशं खपुष्पि कां । श्वैरीषं स्तुरसीयत्नेन संजवमौ त्रिकं तथा ।
धारोदकं सहदृशकं प्राशने कथितं तव ॥ इति गौरीव्रतं ख्यातं सौभाग्यस्त्री सुपुत्रदं । आयुरारोग्यदं स्त्रीणामिह लोके परत्र च । इमं व्रतं वंशपत्का स्त्री
षु नान्य इन्द्र तु हितं । तस्मात्सर्वप्रयत्नेन गौरीव्रतमुपाचरेत् । अंजनं रक्तसूत्रं च तांबूलं कुंकुमं तथा । दर्पणी यजने छत्रमासनं पानमुत्तमं । गृहोप
करणी सर्वं हेमजं वाथ ताम्रजं । व्रती तेनैव दद्यात् व्रममावापो यपमयत्नतः । स्त्रीणां चैव कुमारीणां विद्वांगणभाग्यानि च । दातव्यानि प्रयत्नेन यदिच्छेद्वृ
तिमात्मनः । इत्येतत्सारहस्यं तु गौरीव्रतमुदाहृतं । इति कालोत्तरोक्तं गौरीव्रतं ॥ इयं दोलनतृतीये त्युच्यते ॥ तत्र पार्वतीमीश्वरं च संपूज्या दोलये
त् । रात्रौ जागरणं तत्र क्षिपाद्दानं च कुर्यात् । तदुक्तं देवीपुराणे । तृतीयापां यजेद्देवीं शंकरेण समन्वितां । कुंकुमागुरुकर्पूरमणीवस्त्रसुगंधकैः
स्रग्गंधधूपदीपैश्च दमनेन विशेषतः । आंदोलयेत्ततो वत्स शिवोमातुष्टये सदा । रात्रौ जागरणं कृत्वा प्रातर्दद्याच्च दक्षिणां । हेमवस्त्रान्नपानानि
ताम्बूलानि स्रजस्तथेति । शंकरोमामूर्जिंस्वरूपं च तत्रैवोक्तं । सौवर्णी तूमा कार्या राजतः शंकरस्तथा । वत्सभूर्जस्तु देवेशो द्विभुजा तु उमा भवेत्
। इति दोलनतृतीयाव्रतं । अथ चैत्रमासे पदमाघशुक्लतृतीयास्तु भविष्योत्तरोक्तं गौरीव्रतं । सुधिष्ठिर उवाच ॥ चैत्रे भाद्रपदे माघे रूप सौभाग्यपदो

जय·कल
११५
115

स्पदं ॥ तृतीयात्रयमेतन्मे कृष्ण कस्मान्न कीर्तितं ॥ किमहं भक्तिरहितस्तत्रयी मार्गातिगोथवा ॥ स्तुभ्रासि इदं जगत्सेत ज्ञोपितं केन हेतुना ॥ श्रीकृष्ण
उवाच ॥ भवान्धर्मार्थकुशलः सर्वज्ञ इति मे मतिः ॥ व्रतं चैतज्जगत्ख्यातं नाख्यातं तेन ते मया ॥ पघुनिश्रवणो बुद्धिः शृणु यत्नात्पांडुनंदन ॥ कोमेः श्रोताज
गत्यास्मिन्नृषवतासदृशो मम ॥ ज्याव विजयाचैव उमायाः परिचारिके ॥ आगत्य मुनिकन्याभिः पृष्टेभीष्टफलेच्छया ॥ भवत्यौ सर्वदा देव्याश्चित्तवृत्ति
विदे किल ॥ केन व्रतोपवासेन कस्मिन्नहनि पार्वती ॥ पूजिता तोषमायाति मंत्रैः कैश्च वरानने ॥ तासां तद्वचनं श्रुत्वा जया प्रोवाच सादरं ॥ श्रूयता
मभिधास्यामि सर्वकामफलप्रदं ॥ व्रतमुत्सवसंयुक्तं नरनारीमनोरमं ॥ चैत्रे मासि तृतीयायां दंतधावनपूर्वकं ॥ उपवासस्य नियमं गृहीत्वा याङ्ग
क्तिभावतः ॥ अंजनं वसनं तांबूलं सिंदूरं रक्तवाससी ॥ विभूषाल्सोपवासापि त्रवैधव्यकरं परं ॥ विधवा पतिमार्गेण कुमारी वा यदृच्छया ॥ कुर्या
द्धार्यार्चनविधिं शृणुतां मत्रवक्रमः ॥ विचित्रपट्टवस्त्रैश्च कुर्यान्मंडपिकां शुभां ॥ कारयेत्कुसुमामोदवासितां भूषितां शुभां ॥ प्रवालालंबित
प्रांतां मंजरीदिव्यवितानकां ॥ विन्यस्तपूर्णकलशां पीठसंविष्टसद्विजां ॥ पुरतः कारयेत्कुंडं हस्तमात्रं समेखलं ॥ ततः स्नात्वा शुचिर्भूत्वा परिधा राम
यस्तु वाससी ॥ देवान्पितॄन्समभ्यर्च्य ततो देवीगृहं व्रजेत् ॥ नामाष्टकेन संपूज्य गौरीं शंकरवल्लभां ॥ नामाष्टकेन वक्ष्यामि येन ॥ तोभर्तुर्वल्लभा ११५

115A मितिपार्श्वेऋषभध्वजवृक्षभामिरैर्याः। तत्कालप्रभवैः पुष्पैर्गंधाढ्यैर्बकुलाकुलैः। कुंकुमेन समालभ्य कर्पूरागरुचंदनैः। एवं संपूज्य विधिवत्तद्धू
पेनाधिवासयेत्। पार्वती ललिता गौरी गायत्री शांकरी शिवा। उमा सती समुद्दिष्टं नामाष्टकमिदं शुभं। लड्डुकैः खंडवेष्टैश्च गुडाकैः सिंहकेसरैः।
सोहालकैश्च हृद्यैश्च दधिभक्तैः सुसूपकैः। घृतपक्वैर्बहुविधैः सुविभिः परिकल्पितैः। दृष्टिप्राणप्रियैर्हृद्यैर्नैवेद्यैः पूजयेदुमां। सिंहकेस
रैः सिंहकेशरवृद्धलेकृतोः श्वान्यकं जीरकं मंथकुंकुमं लवणं गुडं। कुष्टं भंवेक्षुकांडवहरिद्रां च पुरो न मेध्य। भव्यं सुत्वक्छं नारिकेलं सनारिंगं बी
जपूरं सदाडिमं। कूष्मांडं त्रपुसं कर्कं दधित्थं पनसं तथा। कदलं वंत्तवत्। नातिपक्वमिश्रथः। त्रपुसं वालुकं। दाक्षिणात्यं कपित्थं। कालोद्भवानि वा
न्यानि फलानि पुरतो न्यसेत्। यंत्रकोल्हूखलं शिलाश्च पुंसांतति मिः सह। नेत्रांजनशलाकां वनखसाधनकानि च। दर्पणांनि मंल्लं घंटां भ
वानि वै निवेदयेत्। शंखतूर्यनिनादैश्च गीतमंगलनिःस्वनैः। भक्त्या शक्त्या च संपूज्य देवीं शंकरवल्लभां॥ ततोऽस्तसमये भानोः कुमार्यः करकैः
र्नवैः। स्नानं कुर्युर्मुदायुक्ताः सौभाग्यारोग्यसिद्धये। कुमार्यस्तिव्रतं वारीणि नाप्युपलक्षणं। यामे यामे गते स्नानं देवीपूजनमेव च। ते रक्तामामिहेर्द्धे
मास्तिलाज्येन प्रशस्यते। पञ्चामासनास्थिता साध्वी तेनैवाद्धैः तावास स्याः। गौरिवत्केशस्तापप्रात्तांरात्रिम तिवाहयेत्। काश्चिज्जायंति संहृष्टाः काश्चि

नृत्यंति हर्षिताः। कथयंति कथाः काश्चिद्धर्मकामार्थसंश्रयाः। गीततालानुसंबद्धमनुद्धतमनाकुलं। नृत्यंतीव पुरो देव्याः काश्चिद्विलासितभ्रुव
ः। नृत्येन तुष्यति हरो गौरी तेन च तुष्यति। सद्भावेनाथवा सर्वे गंधर्वा इति विश्रुताः। सुवासिनीभ्यस्तांबूलं कुंकुमं कुसुमानि वा। प्रदेयं जागरव
ताम्नेषाम प्रवारितं। नदैर्विविधैर्भद्रैर्भेरीशंखपटहादिभिः। प्रेक्षणीयैस्तथा सखाभिः सहिता रात्रिं गीत नृत्य हर्षेर्नयेत॥ एवं प्रभातसमये स्नात्वा संपूज्य
पार्वतीं। शक्त्या तुलां समारोहेद्वस्त्रालंकारभूषितां। तोलये त्सितया त्मानं गुडेन लवणेन वा। सितया शर्करया॥ कुंकुमेनाथवा शक्त्या कर्पू
रागुरुचंदनैः। पर्वतानामपीच्छंति हानं के चिद्विचक्षणाः। कुंडमंडपसंभारसंभ्रमेर सिवमेक्त॥ लवणेन महात्मानं तोलयंत्सा गुडेन वा। कर्पू
रेशक्तिरतयासौभाग्यमतुलं ह्मतं। शक्तिरत या देवीभक्तया॥ एवं देवीपराम्नायीक्षमाप्य ग्रहमाविशेत्त॥ आमंत्र्य द्विजदंपतींवासोभि
र्भूषणैस्तथा। संपूज्य भोजयित्वा यद्द्यात्ते भ्यो थ दक्षिणां। यद्यद्धात्मभी ष्टतमं शयनं यानमेव वा॥ वस्त्रमाभरणं गावः सर्वं तेभ्यो निवेदयेत्।
हेमं पत्रं रत्नफलं मुक्ताचूर्णं वचूर्णितं। तांबूलं के विदिष्ठं तिद्दीयमानं सर्वजने। पत्रस्थाने सुवर्णपत्राणि। क्रमस्थाने रत्नानि चूर्णस्थाने एम
मुक्ताफलानि। एवंविधं तांबूलं सर्वजने देयं। अन्नं च मधुरप्रायं भोजयित्वा सुवासिनीः। स्वयं भुंजीत सहिता ज्ञातिबंधुजनैः स्वकैः। यत्र देव्याः ११६

116A पुरोदत्तं नैवेद्याद्विस्तु शोभनं प्रतिगोहं नयेत्सर्वं विभज्याभ्रांतमानसा। दत्त्वा यन्मया हृष्टा कृतकृत्या भवेत्ततः। वायनकं वाराणायीति लोके प्रसिद्धं। विधि
र्भोद्द्वयदेहे षष्ठोत्सवसंपत्प्रदायकः। सप्तधान्यविरूढेश्च सूर्यस्थं प्रजयेद्गुमां। पूर्णकलशसंस्थाने सूर्ये इति शेषः। गोमूत्रप्राशनं यस्मात्तस्मात् गोमू
त्रसंस्थिता। माघमासे तृतीयायां विशेषः श्रूयतां मम। पूर्वोक्तं सकलं कृत्वा प्रभाते यवसंस्तरे। स्थापयित्वा कुंकुमेषुः प्रजयेत्सस्तुता शुमां। ए
तेन कारणेनोक्ता वस्तुर्थीं कुर्यात्संज्ञिता। पूर्वोक्तं सकलं तृतीयायां कृत्वा प्रभाते चतुर्थी द्विभुजसंयुता विनायकसहिता शुमां प्रजयेदित्यर्थः। उमा
रूपं तु कर्त्तव्यं गोधाम नागतं शुभं सौवर्णं च महाराज साक्षसूत्रकमंडलुं। विनायकश्च कर्त्तव्यो गजवक्त्रश्चतुर्भुजः। तृतीयात्रयमेतत्ते कथितं स
र्वकामदं। जयया मुनिकन्या नां यत्सुरासु दाहृतं। एवं या कापि कुरुते नारी व्रतमिदं शुभे। सा रूपसौभाग्ययुक्ता मर्त्ता स्वर्गे महीयते। न दुर्भ
गा कुले तस्याः काचिद्भवति भारत। न दुर्विनीतश्च सुतो न भर्त्तापि विघ्नकृद्भवेत्। नदारिद्र्यं गृहे तस्मिन्न व्याधिरूपजायते। पत्र सा रमते सा
ध्वी धौतचामीकरप्रभा। अन्यास्त्वया कारिष्यंति ब्राह्मणा मनुमते व्रतं। संप्रसव्य वृषकं भक्त्या भक्ष्य षट्भक्षाच्छादनाशने। तास्ताः सुस्वस्त्रसंपन्ना अ
विपन्नमनोरथाः। भविष्यंति कुरुश्रेष्ठ कुलजेष्ठ नमोस्तु ते। माघे महाहेममणिमण्डितपादपीठं वैत्रैविविचित्रकुसुमोत्करसर्वितांगी। रूपं यंप्रदूय

जय·कल्प वृशघमन यो नम स्येसं स्रज्नशंभुद यित्तं । प्रभवंति नार्यः । इति भविष्योत्तरोक्तं गौरीतृतीयाव्रतं ॥ अस्यामेव तृतीयायामारभ्यं मत्स्यपुराणोक्तं
११७ सौभाग्यशयनव्रतं । मत्स्य उवाच । तथैवान्यत्प्रवक्ष्यामि सर्वकामफलप्रदं । सौभाग्यशयनं नाम यत्पुराणविदो विदुः । पुरा दग्धेषु लोकेषु भूर्भु
117 वःस्वर्महादिषु ॥ सौभाग्यं सर्वलोकानामेकस्थमभवत्तदा । तच्च वैकुंठमासाद्य विष्णुवक्षःस्थलेऽस्थितं । ततः कालेन महता पुनः सर्गविधौ नृप
॥ अहंकाराद्वृते लोके प्रधानपुरुषान्विते । विवादे संप्रवृत्ते च कमलासनकृष्णयोः । लिंगाकारा समुद्भूता ज्वाला तीव्राग्ररूपिणी । तयाभितप्त
देहस्य विष्णोर्वक्षःस्थलाश्रितं । सौभाग्यं तद्द्रवीभूतं न्यपतत्तस्य वक्षसः । रसरूपेण तद्धावद्याप्नोति वसुधातलं ॥ उत्क्षिप्तमंतरिक्षस्थं ब्रह्मपुत्रेण
धीमता । दक्षेणापीतमात्रं तु रूपलावण्यकारकं । बलं तेजो महज्जातं दक्षस्य परमेष्ठिनः । शेषं तदापतद्भूमावष्टधा तदजायत । इक्षवस्तंवरा
जं च निष्पावा जाजि धान्यकं । विकारवच्च गोक्षीरं कुसुंभं कुसुमं तथा । लवणं चाष्टमं तत्र सौभाग्याष्टकमुच्यते । स्तवराजमसुत्तमशकेन ॥ किंचि
रक्तविकारसहितं ॥ पीतं यद्ब्रह्मपुत्रेण योगज्ञानविदा तथा । दुहिता साभवत्तस्मात् या सतीत्यभिधीयते दुहितास्ये गतिस्स दोरूपं लोकानती राम·
त्य ललिता लालिता तेन चोच्यते । त्रैलोक्यसुंदरीं तामुपयेमे पिनाकधृक् ॥ पा सौभाग्यैकनिष्पन्नाभुक्तिमुक्तिफलप्रदा ॥ तामाराध्य ११७

117A उमांभक्त्यानारीवाकिंनविंदति।मनुरुवाच।।कथमाराधनंतस्याःज्ञाज्ञात्वाजनार्दन।।तद्विधानंचजगतोजायतेतद्वदस्वनः।मत्स्यउवाच।
वसंतमासमासाद्यतृतीयायांजनप्रिय।शुक्लपक्षस्यपूर्वाह्णेतिलैःस्नानंसमाचरेत्।तस्मिन्नहनिसादेवीकिलविश्वात्मनासती।पाणिग्र
हणकैर्मंत्रैरुद्रेणवरवर्णिनी।तयासहैववदेवेशंतृतीयायांसमर्चयेत्।फलैर्नानाविधैर्धूपैर्दीपैर्नैवेद्यसंयुतैः।प्रतिमांपंचगव्येनतथागं
धोदकेनच।स्नापयित्वार्चयेद्गौरीमिंदुशेखरसंयुतां।प्रतिमास्मिन्नेकवचनोक्तावपिगौरीशयोःसौवर्णीमेवप्रतिमाद्वयंकर्तव्यं।।उप
रिष्टात्सौवर्णप्रतिमाद्वयंप्रतिपादयिष्यतिविवक्षमाणत्वात्।।नमोस्तुपाटलायैतुपादौदेव्याःशिवस्यतु।।शिवायेतिचसंकीर्त्यजयायैगुल्फ
योर्द्वयोः।त्रिपुरघ्नायेतिरुद्रस्यभवान्यैजंघयोर्युगं।शिवंरुद्रेश्वरायेतिजयायैइतिजानुनी।।संकीर्त्यहरिकेशायतथोरूवरदेनमः।।ईशा
यैशंकटिंदेव्यैशंकरायेतिशंकरं।।कुक्षिद्वयेचकोटव्यैशूलिनंशूलपाणये।मंगलायैनमस्तुभ्यमुदरंचाभिपूजयेत्।सर्वात्मनेनमोरुद्रमी
शान्यैचकुचद्वयं।शिवंवेदात्मनेतद्वद्रुद्राण्यैकंठमर्चयेत्।त्रिपुरघ्नायविश्वेशमनंतायैकरद्वयं।त्रिलोचनायेतिहरंबाहूकालानलप्रिये।सौ
भाग्यभवनायेतिभूषणानिसमर्चयेत्।।भूषणाहिंशिवं।।स्वाहास्वधायैचमुखमीश्वरायेतिशूलिनः।अशोकमधुवासिन्यैपूज्यावोष्ठौ

चकामदौस्थाग्नावेवहरंतद्वाद्दास्संवंद्धमुखंप्रिये।नमोर्द्धनारीशहरमसितांगीति नासिकां।अर्द्धनारीशायनमइतिहंसध्वजयोर्दिव्यर्थः।नमउग्रायलो
केशांललितेतिपुनर्भ्रुवौ।शर्वायपुरहंतारंगोष्ठदेवैतथालकं।नमःश्रीकंठनाथायशिवंकेशांतथार्चयेत्।तथाजलकपूजामंत्रास्माःसुमेशयोःदे
शानर्चयेदिव्यार्थः।भीमोग्रसौम्यारूपिणेशिरःसर्वात्मनेनमः।शिवमभ्यर्च्यविधिवत्सौभाग्याष्टकमग्रतः।स्थापयेद्धुतानिष्पावकुसुंभक्षीरजीरकं
।।तवराजेक्षुलवणंकुस्तुंबुरुमथाष्टमं।दत्तंसौभाग्यकृद्यस्मात्सौभाग्याष्टकमित्यतः।अत्रघृतक्षीरयोरेककोटिता।विकारवद्गोक्षीरमितिसौ
भाग्याष्टकमध्येमत्स्यपुराणेएवंपूर्वत्राभिधानात्।कुस्तुंबुरुधान्यकं।एवंनिवेद्यतत्सर्वमग्रतःशिवयोःपुरा।चैत्रेशृंगोदकंप्राश्यस्वपेत्भू
मावरिंदम।पुनःप्रभातेतुतथाकृतस्नानजपःशुचिः।।संपूज्यद्विजदांपत्यंमाल्यवस्त्रविभूषणैः।सौभाग्याष्टकसंयुक्तंस्वर्णप्रतिमाद्वयं।प्री
यतामत्रललिताब्राह्मणायनिवेदयेत्।।एवंसंवत्सरंयावत्तृतीयायांसदामनो।प्राशनेदानमंत्रेचविशेषोयस्तिबोधमे।गोशृंगोदकमादौ
स्यात्द्वैशाखेगोमयंपुनः।ज्येष्ठेमंदारकुसुमंबिल्वपत्रंशुचौस्मृतं।श्रावणेदधिसंप्राश्यंनभस्येचकुशोदकं।क्षीरमाश्वयुजेमासिकार्त्तिके
पृषदाज्यकं।पृषदाज्यंदधिमिश्रंघृतं।मार्गशीर्षेतुगोमूत्रंपौषेसंप्राशयेद्घृतं।माघेकृष्णतिलांस्तद्वत्पंचगव्यंचफाल्गुने।ललितावि

118A जयाभद्राभवानीकुमुदाशिवा वा वासुदेवी तथा गौरी मंगला कमला सती। उमा वदानकाले त्वप्रीयतामिति कीर्त्तयेत्। मल्लिकाशोककमलकुन्दं बो-
त्पलमालती। कुङ्कुमं करवीरं च वाराम म्लानकुंकुमं।। सिंदुवारं च सर्वेषु मासेषु क्रमतः स्मृतं। वाराणी लकुरुंढं। कं। अम्लानं मरुमहायुष्पं।। सिं-
दुवारं निर्गुंडीपुष्पं। जपाकुसुमकुसुमं।। मालतीशतपत्रिका यथालाभं प्रशस्तानि करवीरं च सर्वदा। एवं संवत्सरं यावत्तु उपोष्य विधिवन्नतः।
स्त्रीवा भक्त्या कुमारी वा शिवामभ्यर्च्य शक्तितः। व्रतान्ते शयनं दद्यात्सर्वोपस्करसंयुतं। उमामहेश्वरं हैमं वृषभं च गवा सह।। स्थापयित्वा च शयने ब्रा-
ह्मणाय निवेदयेत्।। अलंकारउपधानादि भोगो मिथुनमपि हैममेव। मुख्यस्य शयने स्थापनासंभवात्। अन्यान्यपि यथाशक्त्या मिथुनान्यंबरादि-
भिः। धान्यालंकारगोदानैरभ्यर्च्य धनसंचयैः। वित्तशाठ्येन रहितः पूजयेद्गतविस्मयः। एवं करोति यः सम्यक् सौभाग्यशयनव्रतं। सर्वान्कामानवा-
प्नोति पदमानंत्यमश्नुते। फलस्यैकस्य त्यागमेतत्कुर्वन्समाचरेत्। यश्च कीर्तिं समाप्नोति प्रतिमासं नराधिप। सौभाग्यारोग्यरूपायुर्वस्त्रालंकार-
भूषणैः। न वियुक्तो भवेद्राजन्नवार्बुदशतत्रयं। यस्तु द्वादश वर्षाणि सौभाग्यशयनव्रतं। करोति सप्त वाष्टौ वा श्रीकंठभवनेमरैः। पूज्यमानो व-
सेत्सम्यग्यावत्कल्पायुतत्रयं। नारी वा कुरुते या पि कुमारी वा नरेश्वर। सापि तत्फलमाप्नोति देव्यनुग्रहलालिता। शृणुयादपि यश्चैवं प्रदद्यादथ

जय·कल्प·
११९
119

वामतिं। सोपि विघाधरो भूत्वा स्वर्गलोके विरं वसेत्। इति सौभाग्यशयनव्रतं। इयं च मन्वादिः सा चापराह्णव्यापिनी ग्राह्या। स्नानदानादावुज्जणा। अत्र श्राद्धमुक्तं मात्स्ये कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु॥ हायनानां द्विसाहस्रं पितॄणां तृप्तिदं भवेत्। अधिकमासेष्वप्येवापीदं कर्तव्यं। योगा दिकं मासिकं च श्राद्धं वापरपाक्षिकं। मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेपि वेति स्मृतिचंद्रिकोक्तेः। अपरपक्षो नाम कृष्णपक्षो वर्ग्यवते। नतु महालयः। मलमासे महालयस्य निषेधात्। मदनरत्ने मरीचिः। प्रतिमासं मृताहे च श्राद्धं प्रतिवत्सरं। मन्वाद्यं च युगाद्यं च वत्तमासोक्रमयोरपि ति प्रति वत्सरं किं पमाराणां कल्यादिश्राद्धमिति तित्त्रैव व्याख्यातं। अत्र पिंडदानं नास्ति तथा च कालादर्शे। विषुवापनसंक्रांति मन्वादिषु युगादिषु। विहाय पिंडनिर्वापं सर्वं श्राद्धं समाचरेदिति॥ मन्वादिश्राद्धं वनित्यं। एतदकरणे प्रायश्चित्तविधानात् यथा कात्यायनः। त्वक्षुवः प्रतिमंत्रं च शतं वा रंजले जपेत्॥ मन्वादयोयदाम्सनाः कुरुते नैव वा यदि। मंत्र स्तुतं त्वं भुवः प्रतिमानं पृथिव्या ऋषवीरस्य बृहतः पतिर्भूः। विश्वमाप्रा अंतरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान्। एवं षण्णवतिश्राद्धान्यपि नित्यानि तेषाम यं संग्रहः। अमा १२ मनु १४ युग ४ क्रांति १२ धृति १३ पात १३ महालयाः १६ अन्वष्टक्य ४ च पूर्वेद्युः ४ षण्णवती ष्टका ४ स्तथेति॥ अथ मन्वादिसंख्या न्युक्ता निर्णयामृते मत्स्यपुराणे। अश्वयुक्कृष्णे ११९

119A क्लनवमी द्वादशी कार्तिके सिता। तृतीया चैत्रमासस्य तथा भाद्रपदस्य वा। श्रावणे वाष्टमी कृष्णा पौषे चैकादशी तथा। तथा शुक्ले इत्यर्थः। सिताषा
ढस्य दशमी माघमासस्य सप्तमी। श्रावणे वाप्यमावास्या ज्येष्ठे पंचदशी तथा। आषाढी कार्तिकी माघी चैत्री चैव विशेषतः। एता मन्वादयः प्रोक्ता
मुनिभिः पूर्वदर्शिभिः। हेमाद्रौ मदनरत्ने स्मसर्थसारे चैवं। अश्वयुक्शुक्लनवमी द्वादशी कार्तिके सिता। तृतीया चैत्रमासस्य तथा भाद्रपदस्य
वा॥ फाल्गुनस्यत्वमावास्या पौषस्यैकादशी सिता। श्रावणस्याष्टमी कृष्णा तथाषाढस्य पौर्णिमा। आषाढे शुक्लदशमी तथा माघस्य सप्तमी। का
र्तिकी फाल्गुणी चैत्री ज्येष्ठी पंचदशी तथा। मन्वंतरादयस्त्वेता दत्तस्याक्षयकारकाः इति दीपिकायामपि। तिथ्यग्नीभूतिस्तिथ्याशे कृष्णमीनलो
ग्रहं॥ तिथ्यर्कौनशिवोऽश्वोऽमातिथीमन्वादयो मघोरिति। तिथिः पौर्णिमा अग्निस्तृतीया नेति वैशाखे नास्तीत्यर्थः। आशा दशमा कृष्णेभः कृष्णा
ष्टमी। अनलस्तृतीया। ग्रहो नवमी। अर्को द्वादशी। शिव एकादशी। अश्वः सप्तमी। मघोश्चैत्रादारभ्येता मन्वादय इत्यर्थः। अत्र विशेषो युगादि
निर्णये वक्ष्यते। चैत्रशुक्लतृतीया मत्स्यजयंती चैत्रशुक्लपंचमी तन्ये। आषाढशुक्लैकादशी तु परे। अत्रैव प्रसंगाद्दशावतारजयंत्य उच्यंते
। पुराणसमुच्चये। मत्स्यो भूद्धुतभुग्दिने मधुसिते कूर्मो विधौ माधवे वाराहो गिरिजासुते नभसि यद्भूते सिते माधवे। सिंहो भाद्रपदे सिते हरिति

यौष्ठी वामनो माधवे रामो गौरीति याव तः परमभृङ्गामी नवम्यां मघोः। कृष्णोष्टम्यां नभसि सितपरे चाश्विनेयद्दशम्यां बुद्धः कल्की नभसि समभूच्छु
क्लेषष्ठ्यां क्रमेण॥ अन्ये मध्ये वामनो रामभृगुमो मत्स्यः क्रोडश्चापरान्हे विभागे कूर्मः सिंहो बौद्धकल्कीच सायं कृष्णो रात्रौ कालसाम्येन पूर्वेति। कै
क्वित्तु सकृत्चानमूर्त्तौ कान्तपठंति। यथा॥ चैत्रे तु शुक्लपंचम्यां भगवान्मीनरूपधृक्। ज्येष्ठे तु शुक्लद्वादश्यां कूर्मरूपधरो हरिः। चैत्रे कृष्ण नवु
म्यां तु हरिर्वाराहरूपधृक्। नारसिंहश्चतुर्दश्यां वैशाखे शुक्लपक्षके। मासि भाद्रपदे शुक्लद्वादश्यां वामनो हरिः। राधशुक्लतृतीयायां रामो भार्ग
वरूपधृक्॥ चैत्रे शुक्ले नवम्यां तु रामो दशरथात्मजः। नभसे तु द्वितीयायां बलभद्रो भवद्धरिः। श्रावणे बहुलेष्टम्यां कृष्णोभून्लोकरक्षकः। ज्येष्ठे
शुक्ले द्वितीयायां बौद्धः कल्की भविष्यतीति॥ अन्ये तु वाराहपुराणस्थत्वेन वाक्यानि पठंति॥ आषाढे शुक्लपक्षे तु एकादश्यां महातिथौ। जयंती
मत्स्यनाम्नीति तिथिः सा कार्या सुपोषणा। नभोमासि तृतीयायां हरिः कमठरूपधृक्। नभस्य शुक्लपंचम्यां वराहस्य जयंतिका। वैशाखे तु चतुर्दश्यां
नृसिंहः समपद्यत। वैशाखे शुक्लपक्षे तु तृतीयायां भृगूद्वहः। मासि भाद्रपदे शुक्ले एकादश्यां वामनो हरिः। चैत्रे नवम्यां रामोभूत् कौशल्यायां परात्पर रामः
:उमानन्। श्रावणे बहुलेष्टम्यां वासुदेवो जनार्दनः। पौषशुक्ले तु सप्तम्यां कृपीदोषस्य पूजनं। माघशुक्लतृतीयायां कल्किनः पूजनं हरेः १२०

120A

ःप्रातःप्रातस्तु मध्याह्ने सायंसायं तथा निशि। मध्याह्ने मध्यरात्रे च सायंप्रातरनुक्रमादिति। अत्र समूलत्वनिर्णयेऽस्ति कल्पभेदेन व्यवस्था द्रष्ट
व्या। एताश्च तत्तदुपासकानां नित्या अन्येषां काम्याः। अत्र विशेषः तत्तत्प्रकरणे ज्ञेयः। वैशाखशुक्लतृतीया अक्षय्यतृतीया। इयं गौरीव्रते क
लाकाष्ठादियुक्तापि उत्तरा कार्या। तदुक्तं निर्णयामृते नारदीये। वैशाखे शुक्लपक्षे तु तृतीयायां रोहिणीयुता। दुर्लभा बुधवारेण सोमेनापि युता तथा। रो
हिणीबुधयुक्तापि पूर्वविद्धा विवर्जिता। भक्त्या कृतापि मांधातः पुण्यं हंति पुराकृतं। गौरी विनायकोपेता रोहिणी बुधसंयुता। विनापि
रोहिणीयोगात्पुण्यकोटिप्रदा सदेति। गौरी तृतीया। विनायकः चतुर्थी। यत्तु वचनं तृतीयायुता न लभ्यते तदा गौरीव्रते त्रिमुहूर्त्तालाभेऽपरत्र व्रते प
पि हि तीया विद्धापि ग्राह्या। एकादशी तृतीया चेति वृद्धवसिष्ठवचनात्॥ इयं च त्रेतायुगादिः। तदुक्तं रत्नमालायां॥ माघे पंचदशी कृष्णा नभ
स्ये च त्रयोदशी। तृतीया माधवे शुक्ला नवम्यूर्जे युगादयः। भविष्योत्तरेऽपि। नवम्यां शुक्लपक्षस्य कार्तिके निरगात्कृतं। त्रेता सिततृतीयायां वै
शाखे समपद्यत। दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगं। कलिः कृष्णत्रयोदश्यां नभस्ये मासि निर्गत इति। हेमाद्रौ। एताश्चतस्राः युगानां
प्रभवाः स्मृताः युगाद्यस्तु कथिताः तेनैताः पूर्वसूरिभिः। उपवासस्तपो दानं श्राद्धं होमो जपस्तथा। यदत्र क्रियते किंचित्सर्वं कोटिगुणं भवे दि

जय॰कल्प तिमनुः स्मृतस्य गुणितं दानं भवेद्दत्तं युगादिषु। कर्म श्राद्धादिकं चैव यदा मन्वन्तरादिषु इति। हेमाद्रौ नागरखंडे। अश्वनाशृणु राजेंद्र युगाद्याः पि
१२१ तृवल्लभाः। यासां संकीर्त्तनेनापि क्षीयते पापसंचयः। नवमी कार्त्तिके शुक्ला तृतीया माघवे सिता। अमावाश्पी नृप। सनभस्ये च त्रयोदशी
121 । त्रेता कृतकलीनां तु द्वापरस्यादयः क्रमात्। स्नाने दाने जपे होमे विशेषात् पितृतर्पणे। कृतस्याक्षयकारिण्यः सुकृतसमहाफलाः। यत्तु
ब्रह्मपुराणे। वैशाखमासि शुक्लायां तृतीयायां जनार्दनः। ब्रह्मलोकात्त्रिपथगां पृथिव्यामवतारयत्। यवांश्चोत्पादयामास युगं चारब्धवान्
कृतमिति। यदपि हेमाद्रौ माघस्य पौर्णमास्यां तु घोरं कलियुगं तथेति। यत्तु बृहन्नारदीये। कार्त्तिके नवमी शुक्ला माघमासे च पौर्णमेति तदपि
कल्पभेदेन व्यवस्थाप्यं। अत्र च श्राद्धं नित्यं काम्यं च। युगाद्यादीन्यत्र कम्प्यता द्विधाना संभवे पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो म
नुष्यः। श्राद्धं कृतं तेन समाः सहस्रं रहस्यमेतत्पितरो वदंति इति विष्णुपुराणोक्तकल्पविधानात्। युगादयः स्मृत्ता ह्येताः पितृणां तृप्तिहेतवः इति म
त्स्यपुराणाच्च। भारतेपि। याम न्वाद्या युगाद्याश्च तिथयस्तासु मानवः। स्नात्वा हुत्वा च दत्त्वा च जप्त्वानंतफलं लभेदिति। भविष्ये पाद्मे च। कुरुशा राम॰
र्दूल वैशाखे तु महातिथिः। तृतीया साक्षया लोके गीर्वाणैरभिवंदिता। यत्किंचिद्दीयते दानं स्वल्पं वा यदि वा बहु। तत्सर्वमक्षयं यस्मात्तेने १२१

121A

यमक्षया स्मृता इति । इयं च विष्णुधर्मोक्ता मन्वादिषु पूर्वाह्णव्यापिनी ग्राह्येति निर्णयामृते । दैवे शुक्ले दैत्तथा कृष्णे युगाद्याः कवयो विदुः । शु
क्ले पूर्वाह्णिके कार्ये कृष्णे चैवापराह्णिके इति भविष्योत्तरात् । आद्ये पि पूर्वाह्णव्यापिनी ग्राह्येति स्मृत्यर्थसारगोविंदार्णवादयः इति क्षद्रो जिद्दी द्वि
ताः । एताश्च मन्वादियुगादयो हेमाद्रिमते शुक्लपक्षस्थाः पौर्वाह्णिक्यः कृष्णपक्षस्था आपराह्णिक्यो ग्राह्याः । पूर्वाह्णे तु सदा कार्याः शुक्ला म
नुयुगादयः दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिके इति पाद्मोक्तेः ॥ दैवे शुक्ले दैत्तथा कृष्णे इति नारदीयवचनाद्दीपिकायामपि । अथो मन्वा
दियुगादिकर्मतिथयः पूर्वाह्णिकाः स्युः सिते विज्ञेयाश्च पराह्णिकाश्च बहुले इति स्मृत्यर्थसारे पि । युगादिमन्वादिश्राद्धेषु शुक्लपक्षे उदयव्या
पिनी तिथिर्ग्राह्या । कृष्णपक्षे पराह्णव्यापिनीति निर्णयामृते धावपूर्वं । दिवोदासीये गोभिलः । वैशाखस्य तृतीयां यः पूर्वविद्धां करोति वै । हव्यं देवा
न गृह्णन्ति कव्यं च पितरस्तथेति । तेनेयं पूर्वाह्णव्यापिनी ग्राह्या द्विनद्वये तत्त्वे परैवेति हेमाद्र्यादिमतं निरवद्यः ॥ उपवासे तु पूर्वा । अनंतभट्टो
पि मैवं ध. ति व्रतापातो युगमन्वादयस्तथा मन्वंतराद्याः पर्वावास्तु दानादावंतिमाः स्मृता इत्याह । दानादाविति श्राद्धसंग्रहः ॥ अत्र शुक्लपक्षे युगा
दिश्राद्धं पूर्वाह्णे कार्यमिति शूलपाणिः । शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः । कृष्णपक्षापराह्णे तु रोहिणं तु न लंघयेदिति मार्कंडेयवच

नात्॥रौहिणो नवमो मुहूर्त्तः। यत्तु कैश्चिदुक्तं दानं तु शुक्ले पूर्वाह्णे कृष्णेऽपराह्णे। शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके इत्युक्तत्वाद्दितीत त
त्राहेमाद्र्यादिभिर्दानस्य प्रातरेव कर्त्तव्यत्वाभिधानात्। कृत्स्नलावत्वात्तु द्वयं श्राद्धेऽपराह्णव्यापिनी ग्राह्या तस्याऽपराह्णकालत्वात्। काल
व्याप्तिशास्त्रस्य च सर्वापेक्षया प्रबलत्वाच्च। अत एवामावास्याश्राद्धनिर्णयमुक्तोक्तकालादर्शे एवं मन्वन्तरादीनां युगादीनां विनिर्णयः। म
हालयस्यापक्षस्य अष्टकानामपि स्मृत्त इतीयत्तु देवे शुक्ले तादिवचनं तदुपक्रमकालपरं शुक्लपक्षस्य पूर्वाह्ण इति वचनवत्। यद्वा शुक्ल
पक्षगतायुगादितिथिः पूर्वदिने कुतपोत्तरार्द्धमेवारभ्य प्रवृत्तोत्तरदिने कृष्णापराह्णेपि किंचिद्वर्त्तते तदा संपूर्णाऽपराह्णव्यापित्वेन पूर्व
दिनगतायाएव ग्राह्यत्वे प्राप्ते तदपवादत्वेन कुतपपूर्वार्द्धरूपपूर्वाह्णव्यापिनी अल्पापराह्णस्पर्शिन्यप्युत्तरा ग्राह्येति विधीयते। न च तदा अ
पराह्णे श्राद्धस्यासंभवबाधः। अपराह्णेपि किंचित्सत्वाः विद्यमानत्वात्। हेमाद्रेस्तु मन्वादिषु पूर्वयं निर्णयः संमृत्तः यथा मन्वादेतिवचना
द्दानादौ तु नरेतिः केचित्तु वैशाखस्य तृतीयायां इति वचनात् पूर्वाह्णे तु सदा कार्यैति नारदवचनाच्च श्राद्धेपि पूर्वाह्णव्यापिन्युत्तरा कार्ये राम.
ति वदंति तन्न कालादर्शविरुद्धमप्युक्तं च। अपराह्णः पितृणां। अपराह्णे तु पैतृकं। अपराह्णे पितृक्रिये त्यादिवचनैरपराह्णकालत्वाभिधाना १२२

122A

त्कर्मणो यस्येति वचनात्। श्राद्धे पराह्णव्यापिन्या एकस्या ह्यलाभात्। गोभिलवचनं तु तर्पणविषयं। नारदवचनं तु देवशुक्ले इति वचनवदे

वव्याख्येयमिति रामभट्टाः॥ निर्णयामृतेपि अतश्च युगादिप्रयुक्तं विहितश्राद्धविषये मावास्यावदपराह्णिकी ग्राह्येति। एतच्च श्रा

द्धमपिंडकं कार्यं। तथा च हेमाद्रौ मत्स्यपुराणे। वैशाखस्य तृतीयायां नवम्यां कार्तिकस्य च। श्राद्धं कार्यं च शुक्लायां संक्रांतिविधिना नरैरिति

। तत्रैव पुलस्त्योपि। अयनद्वितये श्राद्धं विषुवद्द्वितये तथा। युगादिषु च सर्वासु पिंडनिर्वपणादृत इति। इदं च युगादिश्राद्धं युगादितिथि

मध्याह्न एव कर्तव्यं॥ मन्वादौ च युगादौ च ग्रहणे चंद्रसूर्ययोः। व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रियेति स्कांदवचनात्। अत्र विशेषो हे

माद्रौ भविष्ये। वैशाखशुक्लपक्षे तु तृतीयायां तथैव च॥ गंगातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः॥ तयापोसां ददाति करकान्वारि वा जम

न्वितान्। स याति पुरुषो वीर लोकान्वै हेममालिनः॥ तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत्। यवान्दद्याद्द्विजातिभ्यः प्रयतः प्राशये

घवान्स्नानं दानं तथा श्राद्धं जपहोमादिकं च यत्। श्रद्धया क्रियते तत्र तदानंत्याय कल्पत इति। दानविशेषस्तत्रैव भविष्ये। इमां घटकुम्भ

उदकुंभान्सकरकान्सान्नान्सर्वरसैः सह। यवगोधूमचणकान्सक्तून्दध्योदनं तथा। ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यत इति। अपरार्के

जय·कल्प· १२३ 123 यमः कृतोपवासा स्नात्वा लिलं ये युगादिदिनेषु वा ह्यासंतत्वादिसहितं तते षां लोकामहोदया इति। देवीपुराणेऽपि गौरीपूजां प्रकृत्य तत्तीर्थायां तु
वैशाखे शोहिशापक्षे प्रपूज्य तु। देवीमिति शेषः। उदकुंभप्रदानेन शिवलोके महीयते। मंत्रस्तु एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः। अस्य
प्रसादात्सकला मम संतु मनोरथाः। गंधोदकतिलैर्मिश्रं सान्नं कुंभं फलान्वितं विप्रवेसंप्रदास्यामि ब्रह्मविष्णुप्रतिष्ठितेति। पितृदेश्य
कदाने तु। एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः। तस्य प्रसादात्तृप्यंतु पितरोऽपि पितामहाः। गंधोदकतिलैर्मिश्रं सान्नं कुंभं फलान्वितं। पि
तृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठतु इति। अत्र रात्रिभोजने प्रायश्चित्तमुक्तं मत्स्यविधाने। रात्रौ भुंक्ते वत्सरे तु मन्वादिषु युगादिषु। अमिस
कृष्टिं मंत्रं वजयेद्दशनपातकमिति। मंत्रस्तु अमिषवद्वृष्टिं महे अस्य युध्यतो रध्वीरिव प्रवणे ससुः कृतपः। इंद्रो यद्वज्री धृषमाणो अंधसा
भिनद्वलस्य परिधीरिव त्रितः। वैशाखे मलमासे सति तत्रैव युगादिः कार्या तथा च हेमाद्रौ ऋष्यशृंगः। दर्शहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु उ
पाकर्मणि चोत्सर्गे ह्येतदिष्टं वृषादित इति। अब्दोदकुंभमन्वादिमहालययुगादिष्विति कालादर्शे मलमासकर्तव्येषु परिगणनाच्च। राम·
अत्र महालयशब्देन मघात्रयोदश्युच्यत इति माधवः। स्मृतिचंद्रिकायां तु योगादिकमिति वचनेन मलद्वयेऽपि कर्तव्यमित्युक्तं। अत्र श्रा १२३

123A

स्नाकरणोप्रायश्चित्तमुक्तमघविधाने। नयस्य घावामंत्रं शतवारं तदाजपेत्सुमाह्नमोयदन्मूनाऽकृतेनैवचापि पठति मंत्रस्तु। नयस्य
घावाष्टधिवीनध न्वंतांतरिक्षंनाद्भयः सोमोश्वा। पद्मसमर्पुराक्रिनीयमानःश्वएगातिवीक्षुहुजतीस्थिताशी॥ अथप्रसंगाद्युगांनाउ
च्यंते। हेमाद्रौब्रह्मपुराणे। सूर्यस्यसिंहसंक्रांत्यामंत्तः कृतयुगस्यतु। अयनश्चिकसंक्रांत्यामंतस्त्रेतायुगस्यतु। वृषस्तुवृषसंक्रांत्यांद्वापरां
तस्तुमंस्यघातधातकुंभसंक्रांत्यामंत्तः कलियुगस्यतु। आदित्यपुराणे दिनक्षंरेवतीयत्रगमनंवैवाणशिषु। युगांतदिवसं विद्धितक्ष्मा
नमनंतकं। ग्रहणोविषुवेचैवसौम्येवामिहिरोयदि। सप्तमीशुक्लकृष्णावायुगांतदिवसंविदुः। सौम्येउदगयने ब्रह्मपुराणे। सुगाद्येषुयु
गांतेषुश्राद्धमक्षयमुच्यते। ब्रह्मपुराणे। युगादिषुयुगांतेषुस्नानदानजपादिकं। यत्किंचित्क्रियतेतस्ययुगांतफलमाक्षितं। अत्रसमु
द्रस्नानंप्रशस्तं। तदुक्तं पृथ्वीचंद्रोदयेसौरपुराणे। युगादौतुनरःस्नात्वाविधिवल्लवणोदधौ। गोसहस्रप्रदानस्यकुरुक्षेत्रेफलंहियत्।
तत्फलंलभतेमर्त्योम्ह्मामिदानस्पवश्रुवामित्ति। नेरायामूते। अत्रैवलक्ष्मीसहितविष्णुपूजाभविष्योत्तरे। वितहिनाचैशाखस्पतृतीयायांश्री
समेतंजगद्गुरुं॥ नारायणंपूजयेथाः पुष्पधूपविलेपनैः। वस्त्रालंकारसन्नाद्यैर्नैवेद्यैर्विविधैस्तथा। ततस्तुसायतोधेनुंलवणस्याढ

जय॰कल्प॰
१२४
124

केनचित्। कार्योऽस्त्रकुलश्रेष्ठस्तुर्यभागेन वत्सकः। अविरमौ परिस्थाप्य कल्पयित्वा विधानतः। शास्त्रोक्तक्रमयोगेन ब्राह्मणायोपपादयेत्॥ श्रीधरः श्रीरि
ति श्रीमान्कृष्णो शः संप्रीयतामिति। अनेन विधिना दत्वा धेनुं विप्राय भारत। मोसहस्रप्रदानस्य पुण्यमाप्नोत्यसंशयमिति। अत्र त्रिलोचनयात्रोक्ता का
शीखंडे। राधशुक्लतृतीयायां स्नात्वा पैलिप्पिलेह्रदे॥ संतर्प्य पितृदेवांस्त्रिलोचनमथार्चयेदिति॥ इयमेव तृतीया परशुरामजयंती। सा च प्रदोष
व्यापिनी ग्राह्या। तदुक्तं भार्गवार्चनचंद्रिकायां स्कांदभविष्ययोः। वैशाखस्य सिते पक्षे तृतीयायां पुनर्वसौ। निशायाः प्रथमे यामे रामाख्यः समये हरि
ः। स्वोच्चगैः षड्ग्रहैर्युक्ते मिथुने राहुसंस्थिते। रेणुकायास्तु यो गर्भादवतीर्णो हरिः स्वयमिति। दिनद्वये तद्व्याप्तावंशतः समव्याप्तौ वा पूर्वा। अन्यथा पू
र्वैव। तदुक्तं भविष्ये। शुक्लातृतीया वैशाखे शुद्धा ग्राह्या दिनद्वये। निशायाः पूर्वयामे चेदुत्तरान्यत्र पूर्विकेति। अथ परशुरामध्यानं वीरमित्रोदका
यस्तु भगवान्रामो जटामंडलमंडितः। हस्तेस्य परशुः कार्यः कृष्णाजिनधरस्तु। हेमाद्रौ। क्षत्रांतकारं घोरं च दृश्यपरशुं करे। जामदग्न्यः प्रकर्त
व्यो रामो रोमारुणेक्षणः। अध्यात्मरामायणे। नीलमेघनिभः प्रांशुर्जटामंडलमंडितः। धनुःपरशुपाणिश्च साक्षात्काल इवांतकः। कृतानु
वितकंकपत्रमासिनं नृपादिहयं ग्रहे तो भस्मस्निग्धपवित्रलांछिततनुर्धृतेन्द्व वंशौरवी। मौंज्या मेखलया वयंत्रितमनोवासश्च मांजिष्ठकंपा राम॰ १२४

124A

रौ॥ कार्मुकमक्षसूत्रं वलयं दंडोपरः पैप्पलइति रक्तं प्रआत्ता श्रीजनं कुर्याद्व्रत ॥ इति परशुरामजयंतीविधानं ॥ अथ अक्षय्यतृतीयाव्रतं ॥ भविष्योत्तरे ॥ युधि
ष्ठिरं प्रति कृष्णवाक्यं ॥ बहुनात्र किमुक्तेन किं बहुक्षरमालया ॥ वैशाखस्य सिता मे का तृतीयाक्षय्या स्मृता ॥ तस्यां स्नानं जपो होमः स्वाध्यायः पितृत
र्पणं ॥ दानं च यत्क्रियते किंचित्तत्सर्वं स्यादिहाक्षयं ॥ आदिः कृतयुगस्येयं युगादिस्तेन कथ्यते ॥ सर्वपापप्रशमनी सर्वसौख्यप्रदायिनी ॥ पुरा महो
दयेपार्श्वे वणिगासीत्स निर्धनः ॥ प्रियंवदः सत्यवृत्तिर्देवब्राह्मणपूजकः ॥ पुराणपाख्याने कथितो भूत्कुटुंबव्याकुलोपि सन् ॥ तेन श्रुता वाच्यमाना
तृतीया रोहिणीयुता ॥ यदा स्याद्बुधसंयुक्ता तदा सा वै महाफला ॥ तस्यां यद्दीयते किंचित्तदक्षयं स्यात्तद्देव हि ॥ इति श्रुत्वा स गंगायां संतर्प्य पितृदेवताः ॥ ग
हमागत्य करकान्स्नानात्रुदकसंयुतान् ॥ अन्नपूर्णान्स्वहस्तेन भानुजलेन विमलेन वा ॥ यवगोधूमचणकान्सक्तुदध्योदनं तथा ॥ इक्षुक्षीरविका
रांश्चापि हिरण्यं च स्वशक्तितः ॥ शुचिः शुद्धेन मनसा ब्राह्मणेभ्यो ददौ वणिक् ॥ भार्यया वार्यमाणोपि कुटुंबासक्तचित्तया ॥ तावज्जस्थौ स्थिरे सत्वे म
त्वा सर्वं विनश्वरं ॥ धर्मासक्तमतिः पार्थ कालेन बहुना ततः ॥ जगाम पंचत्वं मर्त्यो वासुदेवमनुस्मरन् ॥ ततः स क्षत्रियो जातः कुशावत्यां युधिष्ठिर ॥ ब
भूव चाक्षया तस्य समृद्धिर्धर्मसंयुता ॥ इयाज स महायज्ञैः समाप्तवरदक्षिणैः ॥ स ददौ गोहिरण्यादि दानान्यन्यान्यहर्निशं ॥ बुभुजे कामतो भोगा

जय·कल्प न्हीनां श्रांस्त र्पयं च्छनैः। तथाप्यक्षयमेवास्य कर्मयांत्रिनृतद्धनां। श्रद्धापूर्वं तृतीयायां यद्दत्तं विभवं विना। इत्येतत्ते समाख्यातं श्रूयताम त्रपो वि

१२५ षिः। तृतीयां तां समासाद्य स्नात्वा संतर्प्य देवताः। एकभक्तं तदा कुर्याद्दास्तुद्देवं प्रपूजयेत्। उदकुंभान्सकरकान्सान्नान्सर्वरसैः सह। ग्रैष्मिकं स

125 र्वमेवात्र सस्यं दाने प्रशस्यते। छत्रोपानत्प्रदानं च गोभूकांचनवाससां। यद्यदिष्टतमं चान्यत्तद्देयमविशंकया। एतत्ते सर्वमाख्यातं किमन्यत्श्रो

तुमिच्छसि। अनाख्येयं न मे किंचिदस्ति स्वस्त्यस्तु तेऽनघ। अस्यां तिथौ क्षयमुपैति हुतं न दत्तं तेनाक्षयेति कथिता मुनिभिस्तृतीया। उद्दिश्य यत्सु

रपितॄन्क्रियते मनुष्यैस्तच्चाक्षयं भवति भारत सर्वमेव। इति भविष्योत्तरोक्तमक्षयतृतीयाव्रतं। अथास्यामेव विष्णुधर्मोत्तरोक्तमक्षयतृती

याव्रतं। वैशाखे शुक्लपक्षे तु तृतीयायामुपोषितः। अक्षयं फलमाप्नोति सर्वस्य सुकृतस्य तु। सा तथा कृत्तिकोपेता विशेषेण सुपूजिता। तत्र द

त्तं हुतं जप्तं सर्वमक्षयमुच्यते। अक्षया सा तिथिस्तस्मात्तस्यां सुकृतमक्षयं। अक्षतैः पूज्यते विष्णुस्तेन साप्यक्षया स्मृता। अक्षतैस्तु नरः स्नातो वि

ष्णोर्दत्वा तथाक्षतान्। सक्तून्सुसंस्कृतांश्चैव हुत्वा चैव तथाक्षतान्। विप्रेषु दत्वा तानेव तथा सक्तून्सुसंस्कृतान्। यवान्नं तु महाभाग फलम राम·

क्षयमश्नुते। एकामप्युक्तवत्कृत्वा तृतीयां भृगुनंदन। एतामब्दतृतीयानां सर्वासां तु फलं लभेत्। इति विष्णुधर्मोत्तरोक्तमक्षयतृतीयाव्रतम्। १२५

125A

ज्येष्ठशुक्लतृतीयायां भविष्योत्तरोक्तं रंभाव्रतं तदुक्तं माधवीये भविष्ये। भद्रे कुरुष्व यत्नेन रंभाख्यं व्रतमुत्तमं ज्येष्ठशुक्लतृतीयायां स्नाता नियम
मतत्परे। तिसास सर्वं मतेपि पूर्वाग्रास्या। ब्रह्मज्ञपातथा रंभा तृतीया वटपैत्रकी। कृष्णाष्टमी च भूतानां कर्त्तव्या संमुखवीति तिथिरीतिः काहोक्तेः। अथ
रंभाव्रतकथा॥ युधिष्ठिर उवाच। स्त्रीणां संपद्यते येन मर्त्युलोके गृहं शुभं। सर्वोपस्कर संयुक्तं सुतसौभाग्यवर्द्धिदं। सपत्नीरहितं कांतम
हिमानमनुत्तमं। एतदाचक्ष्व मे कृष्ण मम माहात्म्य सुखो भव। श्रीकृष्ण उवाच। कैलासशिखरे रम्ये नानाधात्वविचित्रिते शंकरः पार्वतीं प्राह कि
न्नमास्तीत्स्थितं व्रतं। येन सौभाग्यमसंतं प्राप्नासि वरवर्णिनी। देव्युवाच। पुराहं देवविर्थामिकुमारी पितुरं शिके॥ तत्र एष मया नाथ जननी सुव
मास्थिता। कथयस्व मे किं विद्व तं सौभाग्यवर्द्धनं। एवमुक्ता मया देवी जननीमाम थाब्रवीत्। भद्रे कुरुष्व यत्नेन रंभाख्यं व्रतमुत्तमं। मनो
मिलषितं कांतं येन प्राप्स्यसि शंकरं। ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परा। कुरु पार्श्वेषु पंचाग्नीन् ज्वलमानोज्वलाहुतीन्। गार्हपत्यं
दक्षिणाग्निं सभ्यमाहवनीयकं। पंचमं भास्करं तेज इत्येते पंचवह्नयः। एतेषामध्यगा भूत्वा तिष्ठत्वं पूर्वदिङ्मुखी। चतुर्भुजां ध्यानपरां पंक
जोपरि संस्थितां। मृगाजिनछत्रकुंडां जटावल्कलधारिणीं। सर्वाभरणसंयुक्तां देवीमभिमुखीं कुरु। महाकाली महालक्ष्मी महामाया महा

जय·कल्प

१२५

126

ननामहामाया माहादेवी महामाहिषनाशिनाः गंगा च यमुना सिंधुः शतद्रुर्नर्मदा तथा। सरस्वती वैतरणी सैव प्रोक्ता महामती। तदा स्वप्रेन्द्रणा
पराभवतज्ञा च भाविता। होमं कुर्यान्महाह्वानो ब्राह्मणाः सर्वतो दिशं। देव्याः पूजा च कर्त्तव्या गुग्गुलधूपादिना ततः। बहुप्रकारं नैवेद्यं दातव्यं घृ
तपाचितं स्यात् यये दद्यतो देव्याः सौभाग्याष्टकमेव चाक्कुलत्थुल्लकं जीरकं च कुसुंभं कुंकुमं तथा निष्पावाः पंचमाः प्रोक्ता लवणं शर्कराष्टकं। ध
ष्यमंडपिका कार्या गंधधूपादिवासिताः। ततः संपूजयेद्देवीं शक्त्या स्वर्णादिनिर्मितां। पद्मासनस्थां संतिष्ठेत्स्या च स्वरिणा तोरविः। ततः प्रणा
मरुद्राणांमंत्रमेतमुदीरयेत्। वेदेषु सर्वशास्त्रेषु दिविभूमौ रसातले। दृष्टः श्रुतश्च बहुशो न शक्त्या रहितः शिवः। त्वं शक्तिस्त्वं स्वधा स्वाहा त्वं
सावित्री सरस्वती। पतिं देहि गृहं देहि सुतान्देहि नमोस्तु ते। एवं क्षमापयेत् तां देवीं प्रणिपत्य पुनः पुनः॥ देहि शक्त्या गृहे सौम्यं विविधं बहु
भूमिकं। छायकल्पकेदारप्रतोलाभिरलंकृतं। कुड्यस्तंभगवाक्षाद्यं मणिमंडिततोरणं। पद्मरागमहानीलमेरा वैडूर्यशोभितं। गृहदानसु
धानेन ब्राह्मणाय यशस्विने। सपत्नीकाय संपूज्य सर्वोपस्करसंयुतं। प्रयच्छ प्रणतात्मा त्वा मनोवांछितदायकं। सुवासिनीभ्यस्तद्देयं नैवेद्यं ह्रूपितं राम·
स्थितं। निर्वर्त्य विधिनानेन ततः पश्चात्क्षमापयेत्। कांपत्सा निवनो अनिसं पत्यामधुरैरसैः। देव्युवाच। इत्युक्त्वा मयानीर्गिदेवरंभा च १२६

126A

नंधुरा। व्रतंतेदेवदेवेशदत्तंगृहवरंमया। सोपास्यज्ञासपतिकात। स्मिन्नेश्मनिरंजिता। व्रतेनतेनदेवेशभर्त्रालब्धोत्रिशंकरः। त्र्यर्द्धकायेस्थितातेहंसो
भाग्यबलगर्विता। एवमेतन्मयाख्यातंयाश्चरिष्यंतियोषितः। पुरुषास्त्वथकौंतेयरम्यांतरंभाव्रतंभुवि। भार्यापुत्रगृहंभोगान्कुलवृद्धिमवाप्नुयुः
स्त्रीणांचातुलसौभाग्यंमाहेश्यंभावकामिकं। बालमध्यस्थवृद्धानांरूपलावण्यवहरां। अनेनव्रतधर्मेणपरलोकेयुधिष्ठिर। कामगेन
विमानेनवांछितार्थप्रदेनतु। इंद्रलोकेमहाभोगान्भुक्त्वापांडवनंदन। मर्त्यलोकेशुभेदेशेधनधान्यसमाकुले हिमवद्विंध्ययोर्मध्येआर्या
वर्त्तेमनोरमे। कुलेचधर्मशीलानांपार्थिवानांचपांडव। उत्पत्स्यतेनसंदेहोरूपसौभाग्यसंयुतः। नारीचैवमहाभागमाप्नोतिविकलंधनं। व्र
तस्यास्यप्रभावेनशिवधर्मपरोभवेत्। भुक्त्वाभोगांस्तुविपुलान्रुद्रलोकगतमानसः। ज्ञानीचकर्मनिर्मुक्तोरुद्रस्यानुचरोभवेत्। सद्यंभवोद्भ
वभयापहरंत्रिलोकेगौर्याःस्वमातृभवनस्थितयावचीर्णं। यास्त्रीव्रतंभुविकरोतिरतास्वधर्मेब्रह्मेशकेशवसमंपतिमालभेत्सा॥ इतिरं
भाव्रतं। अथश्रावणकृष्णतृतीयाकज्जलीसंज्ञासापरेतिदिवोदासीयइतिकृष्णपक्षेश्रावण्यां। श्रावणकृष्णतृतीयायांश्रवणायुक्तायांपांवि
ष्णुपूजाकार्या। तदुक्तंहेमाद्रौविष्णुधर्मोत्तरे। तृतीयाश्रावणेकृष्णेयायास्याच्छ्रवणासंयुता। तस्यांसंपूज्यगोविंदंतत्रदृष्टिमग्र्यामवाप्नुयादिति।

श्रावणशुक्लतृतीयामधुश्रवाख्यागुर्जरेषुप्रसिद्धामापरयुतायाह्येतिदिवोदासइतिनिर्णयसिंधौ।अस्यामेवतृतीयायांस्वर्णगौरी
व्रतंतन्नाहेगौरीपूजा।देविदेविसमागच्छप्रार्थयेहंजगन्मते।इमांमयाकृतांपूजांगृहाणसुरसत्तमे।आवाहनं।भवानित्वंमहादेविसर्व
सौभाग्यदायिके।अनेकरत्नसंयुक्तमासनंप्रतिगृह्यतां।आसनं।सुचारुशीतलंदिव्यंनानागंधसुवासितं।पाद्यं।गृहाणदेवेशिमहा
देविनमोस्तुते।पाद्यं।श्रीपार्वतिमहाभागेशंकरप्रियवादिनि।अर्घ्यंगृहाणकल्याणिभर्त्रासहपतिव्रते।अर्घ्यं।गंगातोयंसमानीतंसुव
र्णकलशेस्थितं।आचम्यतांमहाभागेरुद्रेणसहितेनघे।आचमनं।गंगासरस्वतीरेवाकावेरीनर्मदाजलैः।स्नापितासिमयादेवितथा
शांतिंकुरुष्वमे।स्नानं।सर्वसत्वाधिकेसौम्येलोकलज्जानिवारणे।मयोपपादितेतुभ्यंवाससीप्रतिगृह्यतां।वस्त्रं।कर्पूरकुंकुमैर्युक्तंहरिद्रा
दिसमन्वितं।कस्तूरिकासमायुक्तंचंदनंप्रतिगृह्यतां।चंदनं।माल्यादीनिसुगंधानिमालत्यादीनिवैप्रभो।मयाहृतानिपुष्पाणिपू
जार्थंप्रतिगृह्यतां।पुष्पं।देवद्रुमरसोद्भूतःकालागरुघृतान्वितः।आदीयतामयंधूपोभवानीघ्राणतर्पणः।धूपं।आज्यंचवर्तिसंयुक्तंराम
वन्हिनायोजितंमया।दीपंगृहाणदेवेशित्रैलोक्यतिमिरापहं।दीपं।अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं।नैवेद्यंगृह्यतांदेविप्रसादं १२७

127A

कृतसर्वं दानैवेद्यं। कर्पूरैलालवंगादितांबूलदलसंयुतं। क्रमुकस्य फलं वैतत्तांबूलं प्रतिगृह्यतां॥ इदं फलं मया देव स्थापितं पुरतः स्त
व। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि फलं॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे॥
दक्षिणा॥ पुत्रान्देहि धनं देहि सौभाग्यं देहि सुव्रते। अन्यांश्च सर्वकामांश्च देहि देवि नमोस्तु ते। प्रार्थना। भवान्याश्च महादेव्या व्रत
संपूर्त्तिहेतवे। प्रीतये द्विजवर्याय वायनं कं प्रददाम्यहं। वायनमंत्रः। नानाषोडशपक्वान्नैर्वंशपात्राणि षोडश। कुर्याद्वस्त्रादिभि
र्युक्तान्याहूय द्विजदंपती॥४॥ व्रतस्य परिपूर्त्यर्थं ब्राह्मणेभ्यो ददाम्यहं। स्वलंकृताः सुवासिन्यः पातिव्रत्येन भूषिताः। मम कामसमृ
द्ध्यर्थं प्रतिगृह्णंतु भूषिताः। इति शूर्पदानमंत्रः॥ इति गौरीपूजा। अथ कथा॥ कैलासशिखरे रम्ये सिद्धगंधर्वसेविते। उमया सहि
तं स्कंदः पप्रछ शिवमव्ययं। स्कंद उवाच। करुणासागरेशान लोकानां हितकाम्यया। व्रतं कथय देवेश पुत्रपौत्रप्रवर्द्धनं। श्रीशंक
र उवाच॥ साधु पृष्टं महाभाग कथयामि षडानन। स्वर्णगौरीव्रतं नाम सर्वसंपत्करं नृणां॥ पुरा सरस्वतीतीरे विमलाख्या महापुरी॥
तत्र चंद्रप्रभो नाम राजाभूद्धनदोपमः। तस्य स्त्री रूपलावण्यसौंदर्यस्मरविभ्रमा। महादेवी विशालाक्ष्यो द्वे भार्ये वै मृगेक्षणे त

योः प्रियुतरा ज्येष्ठा तस्यासीन्नृपतेर्मता। स कदाचिद्वनं भेजे मृगयासक्तमानसः। तत्र शार्दूलवाराहवनमाहिषकुंजरान्। हत्वा वभ्राम
तृष्णार्तः सरसीं विपिने महत्। चकोरचक्रकारंडखंडरीकशताकुलं। उत्फुल्लबहलोज्ञोलकुमुदोत्पलमंडितं। अपूर्वमवनीशो
सौ ददर्शाप्सरसां सरः। समासाद्य सरस्तीरं पीत्वा जलमनुत्तमं। भक्त्या गौरीमर्चयंतीं ददर्शाप्सरसां गणां। किमेतदिति पप्रच्छ राजा राज्ञी
व लोचनः। स्वर्णगौरीव्रतमिदं क्रियतेस्माभिरुत्तमं सर्वसंपत्कारं न्हणां तत्कुरु भूपोत्तम। राजोवाच। विधानं कीदृशं ब्रूत किं फलं वि
स्तरान्मम। तादृग्रुवुर्योषितः सर्वा नभोमासि सिते तृतीयके। प्रारब्धव्यं व्रतमिदं गौर्याः षोडशवत्सरान्। तच्छ्रुत्वा सोपि जग्राह व्रतं नियत
मानसः। गुणैः षोडशभिर्युक्तं दोरकं दक्षिणे करे। बबंधानेन मंत्रेण सौख्यसौभाग्यवृद्धये। गुणैः षोडशभिर्युक्तं षोडशग्रंथिसं
युतं। बध्वा तु दक्षिणे हस्ते करिष्येहं व्रतं तव। एवं कृत्वा व्रतं देव्या जगाम स्वगृहं पुनः। एका ज्ञा सा महादेवी मदिरामदविह्वला।
मध्य तं दोरकं हस्ते दृष्ट्वा सपत्निकोपना। त्रोटित्वा सा च विक्षेप वाह्ये शुष्कतरूपरि। न कर्त्तव्यं न कर्त्तव्यमिति राज्ञिवदत्यपि तेन सं एम·
स्पृष्टमात्रेतरुः पल्लविता गतः। हिती या तु ततो दृष्ट्वा विस्मयाकुलिताभवत्। तन्मूले दोरकं छिन्नं गृहीत्वा सा बबंध ह। ततस्तद्व्रत १२८

128 A

महात्म्यात्पतिप्रियतराभवत्॥ देवीव्रतापचारेणास्मासंतंदुःखिताव ने। प्रययौ सा महादेवी गौरीध्यानसमन्विता॥ मुनीनामाश्रमे पुण्ये निवसं
ती ततः क्वचित्। निवारिता मुनिवरैर्गच्छ पापे मया सह। धावती विपिने घोरं गता व्याघ्रं ददर्श ह। तया दृष्टः स गतरायो गौरीं दृष्ट्वा त्वया क्वापि
त्वा। ततो ददर्श सा व्रतं कुर्वती वसरो वृदं। ततो वनस्त्रियं चाग्रे सर्वाभरणभूषितां। पश्यंती शनकैस्तद्वद्व्रजंतीवैव मातुः पुरी। तैः सा निराकृता
दृष्ट्वा विषमां निषसाद ह। ततस्तत्र तपसा गौरी पाडुराम्री न्महासती। तां दृष्ट्वा देवदुर्बलगौ नताप्तुत्ता नृपप्रिया॥ जय देवि नमस्तुभ्यं नमो भ
क्तवरप्रदे। जयशंकरवामांगे मंगले मंगलेम वैमंगले। ततो लब्ध्वा वरं भक्त्या गौरीमभ्यर्च्य तद्व्रतं। चक्रे देवी प्रदत्तस्याः दहोमो भाग्यसंपदः। इति
तस्याः प्रसादेन सर्वान्भोगान्नवाप्य वा। अंते शिवपुरं प्राप्य कांताभ्यां सहितो नृपः। यः शोभनं व्रतमिदं कथितं शिवाया उर्यान्नमप्रियतरो
भविताननगौर्याः लब्ध्वा श्रियं सुविपुलां भुवि शत्रुसंघान्निर्जित्य निर्मलपदं न मतः प्रयाति॥ इति स्कंदपुराणे गौरीखंडे स्वर्णगौरीव्रतं गौ
॥ अथ पुंडरीकापनं॥ प्रविष्टिसुखार्थ॥ उद्यापनविधिं ब्रूहि तत्तीर्थयात्रा: स्वरे श्वरभक्तितः श्रोतुमिच्छामि व्रतसंपूर्णहेतवे। श्रीकृष्ण उवाच। उद्या
पनविधिं वक्ष्ये सविधानेन वैष्णवः। त्रिंशद्दंडप्रमाणेन कालितं द्विसोत्तरो प्रत्यक्षं प्रागपि राजेंद्र नव गोवर्ष मिष्यते। गोवर्मे मात्रं सलिप्य गो

जय-कल्प.
१२९
129

मयेन विचक्षणाः ॥ मंडलं कारयेत्तत्र नानावर्णैः सुशोभनं । गृहमंडलपार्श्वे तु पद्ममष्टदलं लिखेत् । तन्मध्ये स्थापयेत्कुंभमव्रणं मृण्मयं सुभं । ता
म्रपात्रं प्रकुर्वीत फलैः षोडशभिस्सघा । तदूर्द्धेन वा कूपी छिन्नशाखं विवर्जयेत् । कर्षमात्रसुवर्णेन प्रतिमां कारयेद्बुधः । तदर्धेन मध्यमं प्रो
क्तं तदर्धं तु कनिष्ठकं । कृत्वा रूपं प्रयत्नेन पार्वत्या सह हरस्य च । च घृताख्यमये पात्रे प्रतिमां तत्र विन्यसेत् । प्रतिमायुगलं तत्र स्थापयित्वा वि
धानतः । वेदोक्तेन प्रतिष्ठा च कर्त्तव्या तु यथाविधि । पंचामृतेन स्नपनं कृत्वा देवस्य वोक्तमं । स्नानं च कारयेत्पश्चात्ततः पूजां समारभेत् । चं
दनेन सुगंधेन सुपुष्पैश्च प्रपूजयेत् । धूपं च कल्पयेत्तस्य चंदनागुरुसंयुतं । नानाप्रकारनैवेद्यं घृतपादीपं च कारयेत् ॥ भवानीं पूजयेद्भक्त्या गं
धपुष्पैः फलाक्षतैः । आवाहनादिकं कर्त्तव्यं पुराणागमसंभवैः । कार्यो विधानतः पूजा भक्तिश्रद्धासमन्वितैः । हे देव देव समागच्छ प्रार्थये हं ज
गत्पते । इमां मया कृतां पूजां गृहाण सुरसत्तम । एवं पूजां च कर्त्तव्या रात्रौ जागरणं ततः । गीतनृत्यादिसंयुक्तः कथापुस्तकवाचनैः । प्रातस्तु पू
जयेद्देवं पूर्वाह्णे होमं च कारयेत् । स्वगृह्योक्तविधानेन कृत्वाग्निस्थापनं ततः । प्रारभेत ब्रती होमं नवग्रहपुरःसरं । तिलांश्च यवसंमिश्रांश्च आ राम.
ज्येन च परिप्लुतान् जुहुयाच्छिवमंत्रेण शिवायाश्च ततः परं । एवं समाप्य होमं तु तत्राचार्यं प्रपूजयेत् । अर्घ्यपुष्पप्रदानैश्च वस्त्रालंकारभू. १२९

129A पत्नौ ॥ भक्त्या पदद्वितीयां द्याराधयन्तो पूजयेत्तथा ॥ धेनुं सदक्षिणां दद्यात्सुशीलां च पयस्विनीं ॥ हेमवर्णां स्वर्णशृंगीं रौप्यखुरीं कांस्यदोहनसंयुतां
॥ लपुच्छां वस्त्रसंयुतां तां तथा एच्छामलंकृतां तु ब्राह्मणेन समोपेताम् आचार्याय च माधवे ॥ षोडशभिः प्रकारैश्च पक्वान्नैः प्रीणयेत्सदा ॥ षोडशप्रमितैर्दद्या
द्धविराशि पयसा तत् संप्रयलतः ॥ वंशपात्रस्थितैः पश्चात्पक्वान्नैः रायतैः शुभैः ॥ अन्येभ्यो ब्राह्मणेभ्यश्च दक्षिणां च प्रयत्नतः ॥ प्रयत्नपरया भक्त्या प्रदद्या
द्द्विजसमाः ततः ॥ बंधुभिः सह भुंजीत नियतश्चपरेहनि ॥ एवं कृत्वा मवेसार्थं पुरिष्टाव्रतीयतः ॥ इति भविष्योत्तरे पुराणे सौभाग्यगौरीव्रतोद्याप
नं समाप्तं ॥ ॥ भाद्रपद कृष्णतृतीयायां विशालाक्षीयात्रोक्ता काशीखंडे ॥ भाद्रकृष्णतृतीयायामुपवासपरैर्नरैः ॥ कृत्वा जागरणं रात्रौ
विशालाक्षीसमीपतः ॥ इति ॥ अत्र रात्रिव्यापिनी ग्राह्या रात्रौ जागरणविधानात् ॥ निर्णयामृते ॥ भाद्रशुक्लतृतीयायां कोटनीगौरीं कृत्वा
संपूज्य गुडेश्वपनैवेद्यं दद्यात् ॥ तदुक्तं निर्णयामृते भविष्योत्तरे ॥ गुडाद्यायाश्च दातव्या मासि भाद्रपदे तथा ॥ तृतीया शुक्लपक्षस्य सर्वपापहरा
स्मृता ॥ इति ॥ इयं मन्वादिः ॥ असामे तृतीयायां हरितालिकाव्रतं ॥ तत्र परा ग्राह्या ॥ मुहूर्तमात्रसत्त्वेपि दिने गौरीव्रतं परे ॥ शुद्धाधिकायामप्येवं ग
णयोगप्रशंसनादिति माधवोक्तेः ॥ ग्राह्या मघुश्रावणी काकज्जलीह गीतालिका ॥ चतुर्थीमिश्रिता ग्राह्या निर्दिवानको विधीयते ॥ तृतीयान

जय·कल्प·
१३०
130

मसः शुक्ला मधुश्रावणी का स्मृता ॥ भाद्रस्य कज्जलीकृष्णा शुक्ला च हरितालिकेति । दिवोदासोदाहृतवचनाच्च द्वितीयायोगनिषेधकानि
तृतीयायोगफलाधिक्यबोधकानि वचनानि पूर्वमेवोक्तानि । अथ हरितालिकाव्रतपूजाविधिः । तत्र मंडपादिकं कदलीस्तंभयुक्ते सुशो
भिते गृहे पूजास्थानमये सिं पाद्यस्तु प्रक्षालितपाणिपादा सौभाग्यवती विधवा वा पूजां कुर्यात् । आद्येत्यादि मम समस्तपापक्षयपूर्वकसप्तज
न्मराज्यसौभाग्यादिवृद्धये उमामहेश्वरसायुज्यसिध्यर्थं हरितालिव्रतं करिष्य इति संकल्पयेत् । तत्र आदौ गणपतिपूजनं कृत्वा उमाम
हेश्वरपूजनं करिष्य इति संकल्पं कृत्वा महीद्यौरित्याघ्राजिघ्रेतियथाशाखं पठित्वा कलशस्थापनादि कृत्वा तत्र सौवर्णीं मृन्मयादि निर्मि
तां वा प्रतिमां प्रतिष्ठापयेत् । ततो मंदारमालेति ध्यात्वा प्राणप्रतिष्ठां कृत्वा । आगच्छ देवदेवेश मर्त्यलोकहिताय च । यावद्व्रतं समाप्येत तावत्वं
सन्निधौ भवेति पठेत् । सहस्रशीर्षेति भवानीशंकरयोः आवाहनं । सिंहासनं जगन्नाथ कृतं रत्नैः सुशोभनं शोभायै शुभसंयुक्तं आसनं
प्रतिगृह्यतां । पुरुषएवेत्यासनं ॥ नानाभरणविचित्रांग सर्वदेव नमस्कृत । पाद्यं गृहाण देवेश गंधपुष्पाक्षतैः सहेति । एतावानस्येति पाद्यं । राम·
गंगोदकेन पुष्पेण चंदनेन समन्वितं । अर्घ्यं गृहाण देवेश उमया सह शंकर त्रिपादूर्ध्वेत्यर्घ्यं । गंगाजलं समानीतं सुवर्णकलशे स्थितं । आ १३०

130A

वम्पतं। महादेवि मया दत्तं हिमन्वितः। तस्माद्दिशा लज्जापेतत्पावमनं॥ सितासितजलद्भुतां पुता पत्र महेशशिवे। मया भक्त्या समानीतं स्नानार्थं
प्रतिगृह्यतां॥ पत्तुरुषेणोति स्नानं॥ पंचामृतं समानीतं पयो दधि घृतं मधु। शर्करायुक्तसंयुक्तं स्नानार्थं प्रतिगृह्यतां॥ तत्र मंत्रैः पंचामृतस्ना
नं॥ पुरुषसूक्तेन शुद्धोदकस्नानं। सूक्ष्मा सा पती वस्त्रा रोहिता विनवानिव। मया दत्तानि देवेशि प्रीत्यर्थं प्रतिगृह्यतां॥ तं यज्ञमिति
वस्त्रं। स्वर्णसूत्रे तं तद्वारान्वितं ओदार्यं सासमन्वितं। उपवीतं गृहाणेदं देवदेवजगत्पते॥ तद्यज्ञात्सर्वं यज्ञोपवीतं॥ श्रीखंडं कामदं हिचीकर्परागं
रुकासितं। शीतलं बहुधामोदं चंदनं प्रतिगृह्यतां॥ तस्माद्यज्ञात्सर्वहुत ऋचः। गंधं॥ नानासुगंधिद्रव्याणि। अक्षताः वस्त्रश्रेष्ठ। माल्यादी
नि। तस्मादश्वा अजायंते ति पुष्पं॥ अथ नामपूजा॥ उमायै नमः। गौर्यै। जगद्धात्र्यै। जगत्प्रतिष्ठायै। शांतिरूपिण्यै। हराय नमः। महेश्वराय। शं
भवे। शूलपाणये। पिनाकधृषे। शिवाय। पशुपतये। महादेवाय। वनस्पतिरसेति। यत्पुरुषमिति धूपं। आज्यं च वर्तिसंयुक्तं। ब्राह्मणोस्येति दी
पं। नैवेद्यं गृह्यतां देव वंदमामनमो जातइति नैवेद्यं। उत्तरापोशनं। हस्तप्रक्षालनं। श्रीखंडेन करोद्वर्तनं। इदं फलं मया देव इति फलं। पूगीफलं
महद्दिव्यं। तांबूलं। पूजाफलप्रसिद्ध्यर्थं तवाग्रे स्वर्णमीश्वरि। स्थापितं तेन मे देवि पूर्णाः कुरु मनोरथं दक्षिणा॥ श्रियेजातेति नीराजनं। नाम्ना

आसीद्दितिनमस्कारः सप्रास्नासम त्रिःतिप्रदक्षिणाय तेनेतिपुष्पांजलिः॥ देवि देवि उमे गौरि त्राहि मां करुणानिधे ममापराधाः क्षंतव्या भुक्ति
मुक्तिप्रदा भवेति प्रार्थना। ततो गंधपुष्पाक्षतवस्त्रालंकारादिभिर्दांतं कुटुंबिनं विप्रं वेदशास्त्रविशारदं। विधिज्ञं शिवदीक्षायां शिव
तत्वैकसाधनमिताहिलक्षणोपेतमाचार्यं संपूज्य सुवर्णादिभाजनयुगं मषोड्शायक्षान्नयुक्तं सौभाग्यद्रव्यवस्त्रसहितं सहिरण्यं व्रत
स्येदद्यात्। अद्यछन्नं सुवर्णपात्रस्थं सवस्त्रफलदक्षिणां। वायनं गौरि विप्राय ददामि प्रीतये तव। सौभाग्यारोग्यकामानां सर्वसंपत्समृ
द्धये गौरी गिरीशतुष्ट्यर्थं वायनं ते ददाम्यहं। प्रतिगृह्णातु द्विजश्रेष्ठ मं स्वर्गफलदायक। त्वत्प्रसादान्मुख्यश्रेष्ठ मुच्येऽहं सर्वपातकात्॥ इति
वायनदानं। आचार्यमन्यं गां दद्यात् सवत्सां च पयस्विनीं शक्त्या च दक्षिणां दद्याद्व्रतसंपूर्तिहेतवे॥ अथोपवासनिवेदनं। निराहारा स्थिदे
वेश उमाकांत जगद्गुरो। भोक्ष्यामि श्वो जगन्नाथ स्मिन्हरितालिकाव्रते॥ कथां श्रुत्वा तदनंतरं प्रतिमादानं। अथ कथा॥ नारायणं नम
स्कृत्य॰ सूत उवाच॥ मंदारमालाकुलितालकायै कपालमालांकितशेखराय। दिव्यांबरायै च दिगंबराय नमः शिवायै च नमः शिवाय॥ याम॰
य॥ कैलासशिखरासीनं गौरी पृच्छति शंकरं। गुह्याद्गुह्यतरं गुह्यं कथयस्व महेश्वर। सर्वेषां च मम सर्वस्व मल्पायासं महाफलं। प्रसन्नोसि १३१

जगंन्नाथत पंन्नू हिमम प्रभो। केनव्रतप्रभावेनतपोदानेनशंकर। अनादिमध्यनिधनो भर्त्ता त्वं जगतः प्रभुः। मयाप्राप्तोसि देवेशनजाने तत्त्वहाशि
य व। कथं त्वत्प्रसादेन यथाहं तव वल्लभा। ईश्वर उवाच। शृणु देवि प्रवक्ष्यामि तस्याग्रे व्रतमुत्तमं। येन व्रतप्रभावेन प्राप्तमर्द्धासनं प्रिये। प्रभुत्वं मम सर्व
131A स्वं कथयामि तव प्रिये। यथाहं चोडुगणो चंद्रो यहाणां भानुरेव च। वर्णानां तु यथा विप्रो देवानां विष्णुरुत्तमः। नदीनां तु यथा गंगा पुराणानां तु
भारतं। वेदानां तु यथा साम इंद्रियाणां मनो यथा। पुराणावेदसर्वस्वमागमेषु यथोदितं। तदेकाग्रेण मनसा शृणुष्वेदं सनातनं। भाद्रेमासि सि
तेपक्षे तृतीया हस्तसोमयुक्। तदनुष्ठानमात्रेण सर्वान्कामानवाप्नुयात्। शृणुष्व त्वय देवि त्वया तस्मामनुष्ठितं। तत्सर्वं कथयिष्यामि पर्वताद्य
त्वं हिमाचले। श्रीपार्वत्युवाच। कथं पूर्वं मया पार्वती व्रतानामुत्तमं व्रतं। तत्सर्वं श्रोतुमिच्छामि त्वत्सकाशाद् वृषध्वज। ईश्वर उवाच। अस्ति त
त्र महानद्दिव्यो हिमवान्पर्वतेश्वरः। नानासिंहसमायुक्तो नानाद्रुमसमाकुलः। नानापक्षिगणोपेतो नानामृगनिषेवितः। यत्र देवाः सगं
धर्वाः सिद्धचारणगुह्यकाः। विहरंति यथा सौख्यं गंधर्वा गीततत्पराः। स्फाटिकैः कांचनैः शृंगैः मणिवैडूर्यभूषितैः। भुजैर्लिखन्निवाकाशं सु
हृदो मंदरो यथा। हिमेनापूरितः सर्वो गंगाध्वनिविराजितः। नदंतस्त्रस्वरसो यत्र शोभमानो नगेश्वरः। तत्र त्वं पार्वती बाल्ये आचरंती महत्तपः।

जप॰कल्प॰ द्वादशाब्दानि देवेशि धूमपानमधोमुखी भूत्वा त्वं प्रतितिस्त्वेवं महाराधनतत्परा॥ संवत्सरं चतुःषष्टिं पक्वपर्णाशिनं त्वया दृष्ट्वा तातस्तु ते कष्टं दुःखि
१३२ नि ताश्चिंतो भृशं॥ इत्येवं चिंतयाविष्टे देवर्षिर्नारदोभ्यगात्॥ पाद्यार्घ्याचमनैः स्नानं नारदाय ददौ हरिः॥ हिमवानुवाच॥ अद्य मे सफलं जन्म अद्य
म मे सफलाः क्रियाः॥ गतं वाद्य जडत्वं मे यज्ञातं चैव दर्शनं॥ गता घमानसी चिंता पश्चाद्दुःखितो भृशं॥ कन्यारत्नमिदं कस्मै देयं तद्ब्रूहि मे मुने
132 ॥ नारद उवाच॥ शृणु॥ चतुर्वर्गप्रदश्चैव दीयतां मम संमतं॥ हिमवानुवाच॥ वासुदेव समो हे वः कन्यां प्रार्थयते यदि॥ तस्मै देया मया कन्या
त्वद्वागमनतोर्थं शैलेंद्र महाकांविष्णु नाप्रेषितो ग्रहं॥ योग्यं योग्यामदातयं कन्यारत्नमिदं तपा॥ वासुदेव समो नास्ति ब्रह्मसूर्यशिवादिषु
वात्र॥ इत्येवं गाहितं श्रुत्वा वैकुंठं नारदो ययौ॥ सीतः पीतांवरधरं शंखचक्रगदाधरं॥ चतुर्भुजं वासुदेवं नमस्कृत्याभ्यभाषत॥ शृणु हे वाविवाहा
र्थं गतवं शैलजां प्रति॥ तेन दत्तं प्रतियाह्यं कन्यारत्नं सुशोभनं॥ हिमवांस्तु तदा गौरीमुवाचातीव हर्षितः॥ दत्तासि त्वं मया देवि देवाय प्रभवि
ष्णवे॥ श्रुत्वा वाक्यं पितुर्देवी सखीमाहर्द्ववनांतरं॥ गता घनं शनैर्गत्वा तपस्तमुं सदुःखिता॥ सख्युवाच॥ किमर्थं नगपुत्री त्वं दुःखिता तप राम॰
से पुनः॥ को वा कामो भिलषितः सखि त्वा तोन वै शुभे॥ पार्वत्युवाच॥ मा खिद्यस्व महान्कामो मनसा चिंतितो मया॥ जलेन न तपसा किं संप्राप्यते १३२

132A माहशैः खलु॥ जातोमयासहपुनश्चलतस्तुभ्यंनांतरो सखेवाचको वा कामो भिलषितो यो स्येन तप्स्यानरैः॥ नप्राप्यते समेन्द्र हि उपायश्चिं
तयामि वै। पार्वत्युवाच। कैलासशिखरासीनं देवदेवं वृषध्वजं॥ भर्तृत्वे नैव मनसा कामयेहं न संशयः। पार्वत्या वचनं श्रुत्वा महर्षीवचनमब्र
वीत् नग पुत्रि महद्भाग्यं प्रार्थिता विष्णुनायत्तः। संसेव्यो देवतैः सर्वैर्महेन्द्रादिषु रोगमैः। यस्यैकगुणलेशेन गुणावंतो भवंति हि। सर्वगुणानामनंत
त्वादनंत इति विश्रुतः। देवानां कन्यकामध्ये स्वकीयां वेष्टदेवतां। संपूज्य स्मयच्छंति प्रार्थयंति दिवानिशं। अतिभाग्यवशात्वं देवि माहिष्यं प्रा
प्स्यते यथा॥ किं त्वया यमंतत्काभिक्षार्थं गम्यते न्यतः। प्राप्यापि कामहं देवं प्रार्थ्यते कामदाहकः॥ अस्ति कावित्क विद्मा त्रिलोक्यां त्व
द्विना प्रिये। नरोत्तमाय दत्तासि तव पित्रा शुभं कृतं। माशोचस्व मिव तेस्वजानासि त्वं गुणान् स्तयोः। भ्रामितास्यथ केन त्वं अप्रगुणैकमनानघे
।किरीटी केशवो नित्यं जटी मस्तुंजयो नघे। केशवः सुमुखो भद्रे सच्चभीमसुखः सदा। सुपंक्तिरक्तदंतश्च विपंक्तिर्दीर्घदंष्ट्रकः। सत्कुंडलवान्
विष्णुर्नागकुंडलवान् शिवः। विष्णुः कमलनेत्रश्च ज्वलन्नेत्रः सदाशिवः। चतुर्भुजधरो विष्णुः सर्वदेशभुजो महान्। श्रीवत्सलांछनो विष्णुः शि
वस्य ब्रह्मणः शिरः। पीतांबरधरो विष्णुः सच्चर्मांबरः सदा। पद्मपाणिर्यथा विष्णुः सर्वदः खलपाणिधकः॥ अम्लानपद्ममालः सर्मुंडमालापि

यः सर्वत्र किं चेत्स्य कौस्तुभं रत्नं तस्य कंठे विषं सद्या। वाहनं गरुडो यस्य जरठोक्षाः शिव सर्व। शेषपर्यंकशायी स चिन्तामस्मशायः सर्वा धर्वध्व नि नाहस्ते
भृतां नारोदनेनसः। विष्णुर्भोगीव योगीव कथं कामयसे शिवं॥ पार्वत्युवाच॥ नजानासि विमूढात्वं योगिनं शूलपाणिनं॥ यस्याज्ञा साधको विष्णुस्त्रि
लोकीं पाति नान्यथा। राजसे ब्रह्मरूपेण अस्यास्य सृष्टिं विधाति वा। तामसेन स्वरूपेण रुद्रो निखिलं हरा। यस्य नांतस्य वै शंभो महत्त्वं वेत्ति कः सुभे। य
स्याज्ञा कामगो भृत्यो विष्णुः पृथ्वीं दध्यार यो। पुनः सप्तकरोभूत्वा तां च दंते दधार वै। यहत्ता भुंजते भोमानवे विष्णुर्भोगी तिच्छ्रपते। सहस्रकमलैः पू
र्वं विष्णुनाराधितः शिवः। वैकुंठसंभ्रयं तेजः सोनदत्तेनिजं क्षणात्। इंद्रादीनां तु यो दाता सहेवो नशुनस्त्वयाय हत्तं देवराज्यं तु इंद्राद्या भुंजते
स्वर्गं। कुबेरेणापि महती श्रीरवाप्ता वरानने। वरुणो न जले शस्त्वशेषः पाताल संस्थितः। सूर्यस्तपति भीत्या वै वायुर्वाति दिवानिशं। यमः संयमनी
शास्त्वं तं देवं किं न वेत्सि। यस्याज्ञया स्वकाले न मेघा वर्षंति सर्वतः। पावकः सर्वदेवानां वहने वर्त्तते न घो। पितरः पितृलोकत्वं मसिता पूर्वं ते श्वराः। नं
द्रो हुडुगणो शास्त्वं समुद्रो वेगमीरत्तो॥ सोमः सापौषधीशस्त्वं वंदन श्च द्वुगंधितां। यस्याज्ञया स्वकालेपि मत्वं सादेशवर्तिनः। वह्निः शीतं च घर्मेश्च राम·
स्वकाले वा गमागमं। शक्राद्याश्चापि दिक्पालाः स्वां दिशं पालयंति ते। येषु ह्नसेषु ये देवाः योजिता स्ते मदनत्सराः। अन्यथा करणे नेषां सर्वदं उं वि १३३

133A

षास्यति॥ परात्परः स वै देवो निर्गुणः सगुणोपि वा॥ निराकारश्च साकारो योगी भोगी स एव हि। केवलो निर्गुणः साक्षी क्षरश्चाक्षर एव च। को वेद
तस्य तद्रूपं यद्ब्रह्मेति प्रचक्षते। ब्रह्माद्या देवताः सर्वाः ऋषयश्च तपोधनाः। योगिनो ज्ञाननिष्ठा ये पदार्थे त्यक्तबंधनाः। तेपि तस्य न जानंति
स्वरूपं सखि मन्मलिनः। अतस्तं कामये हं वै विपत्तिपतिता शुभे। सख्युवाच। सम्यक्कामोभिलषितस्त्वदर्थे त्यक्तजीविता॥ किं विहितं तु मि
छामि त्वयाचे ककूपतेवचः। अविकाष्टजनं कायंतन्मया का मदं श्रुतं। तवेष्टदात्री या देवी सापि ऋज्वा प्रयत्नतः। तस्मिन्नत्र ग्रहं देवि मयि प्री
ति मनुत्तमां। अनुज्ञादानमात्रेणानि तं संफलतां नय। कारिष्याम्यहमप्येतज्ज्योयाः सृजनमुत्तमा। तथेति संमतं कृत्वा याता यत्र महाबनं॥ पि
ता निरीक्षयामास हिमवांस्त्वां गृहे गृहे। केन नीता तु सा पुत्री देवदानवकिन्नरैः। सत्यं वृत्तं वक्षयेकिं दास्ये गृहउ ध्वजे इसे वं विंतया विष्टो
महर्षिको निपपात ह। हाहा कृत्वा ततो लोकाः सर्वे वंगो गिरिं प्रति। आगत्य मुनयः सर्वे पप्रच्छुस्तं हिमालयं। किमर्थं पृष्टे नो प्रासः कथयस्व ह
हि स्थितं। हिमवानुवाच। यदर्थे दुःखसंभ्रांतः कन्यारत्नं हृतं मम। दृष्ट्वा कालसर्पेणाथ सिंहव्याघ्रेणापहृता। पतितः शोकसंतप्तो वातेनेव
पातरुः। निर्गतो गिरिराजस्तु द्रष्टुं हित्वा गवेषणो भ्रातृथा विपिनं घोरं सिंहशार्दूलसंकुलं। व्याघ्रसिंहैश्च भल्लूकैर्येष्यमानैर्महागजैः। तस्मि

जयकल्प.
१३४
134

न्वनेमहाघोरेगतात्वंमया विभिर्युता। दृष्ट्वा तत्र नदीरम्यां वनमध्ये गुहांतरे। उपविश्यालिभिः सार्द्धमन्नाहारविवर्जिता। संस्थाप्य वालुकापिंडं पार्व
त्या सहितं मम। हस्तनक्षत्रसंयुक्ता मासि माद्रे सिता जया। तत्र वा घोनगौ तेन रात्रौ जागरणं कृतं। तेन व्रतप्रभावेन आसनं चलितं मम। प्राप्तोहं दे
वि तत्रैव यत्र त्वं सखिभिः सह। प्रकटोस्मि मम प्रीत्या मद्दगंधानुलेयनं। युरूपादिष्टमार्गेण तेन तुष्टोस्मि शंभुदा। प्रसन्नोस्मि वरं ब्रूहि मया प्रोक्तं वरा
नने। पार्वत्युवाच। प्रसन्नोसि यदा देव देवदेव मम नसोऽश्चितां सर्वज्ञमनवाप्ता तं किंविदास्ति महीतले॥ महादे०। अहं भर्त्ता भवे पंचेद्य इति हेतोः कृतं व्र
तं। तस्मात्प्राप्तासि त्वं शुभगे न वृथा मम दर्शनं। व्रतमेतत्करिष्यंति या नार्यो हृदमानसाः। प्राप्यापि सकलान्कामा मत्सायुज्यं तेव्रजस्त्यणसह। इत्युक्त्वा न
नतो देवि कैलासमहमागतः। ततः प्रभातसमयेन घामे वविसर्ज्जयतां। पारणां तु ततः कृत्वा पत्याप्रंवनमध्यगां। पुनस्तत्रैव तिष्ठन्नासि सख्या सार्द्धे
स रिक्तदे। हिमवानपि तत्रैव संप्राप्तस्त्वद्गवेषणात्। पश्यन्न्यपोवत् दुःखितुर्त्र अन्नपानविवर्जितः। स्तुन्नं दृष्ट्वं नद्यास्तीरे हरतः कन्यकाद्वयं। उत्था
यो तस्यामानीय रुदंतीत्वामुवाच ह। सिंहव्याघ्रादिभिर्जुष्टे सेवितां हि महावनं। पुत्रि पापात्किमर्थं त्वं प्रियं किं कारणागते। पार्वत्युवाच। शृणु
तात मया ज्ञातं तं मां दास्यसि शूलिने। तद्न्यथा कृतं तात तेनाहं वनमागता। तथेत्युक्त्वा हिमवता त्वमानीता गृहं प्रति। तेनाप्युक्तस्तवाहं देवि

राम.
१३४

134A विवाहार्थं त्वया सह ।श्रीपार्वत्युवाच ।किं कृतं गिरिणा तत्र विवाहो मत्कृते मम ।त्वया तत्र किं कृतं नाथ श्रोतुमिच्छामि विस्तरात् ।महादेव उ० ।ऋषय
ः सप्त मो देवि त्वदर्थं प्रेषिता मया ।हृष्टास्तेन गराजेन प्रपृच्छ मुदितान नारद ।कुत आगमनं जातं भवतां ज्ञानचक्षुषां ।अन्यथा महतां प्राप्ति
र्जेज्ञानां वै कथं भवेत् तं ऋषय उ० ।नगराज वयं तावच्छंकराज्ञाविधायिनः ।त्वत्समीपे तु कन्यार्थं दीयतां यदि रोचते ।गिरिरुवाच ।।महादेवा
य ह्यसमत्तः कन्यां प्रार्थयते तदा ।कन्या चक्रतं सम्यक् यदर्थं दुःखरं तपः ।अतस्तेन प्रसादो स्याः कर्त्तव्यः शूलपाणिना ।ऋषिभिर्बहुभिर्गीतं
सहे वो भक्तवत्सलः ।इति श्रुत्वा गता विप्राः महादेवस्य सन्निधौ ।तद्वृत्तं समाकर्ण्य आजगाम महेश्वरः ।आजग्मुस्तत्र वै सर्वे देवा इंद्रपु
रोगमाः ।पातालादागतः शेषः क्षीराब्धिशयनाद्विभुः ।यत्र यत्र स्थिता देवा गंधर्वाः सिद्धचारणाः ।ते तत्स्थानात्समाजग्मुः तन्महोत्सवं
प्रमाः ।विष्णुना वघृतं छत्रं श्वेतं शतशलाकजा ।इंद्रो वै चामरे दिव्ये कुवेरः कोशधारकः ।स्वफणाफणिभिः शेषो द्वीपमालां विभर्त्ति सः ।स
हस्त्रयोजनायामं तेनाकारि हि मंडलं ।एकस्तंभमयं प्रोक्तं योजनानां शताधिकं ।ब्रह्माद्या देवताः सर्वे मंत्राशिषमचीकरन् ।जयशब्दं क्र
ता देवाः ऋषयश्च तपोधनाः ।नृत्यंति स्म रसस्तत्र गंधर्वा ललितं जगुः ।वाद्यानां स्वनितं मेघो मंदं मंदं स्वगर्जति ।विकिरंश्च नतु हर्षैस्तुषा

रक्तसुमानिभैः॥ देवकन्यानागकन्यालाजाभिः कृतमंगलः। सरस्वती रमा देवी शच्याद्या देवतास्त्रियः। स्वर्णपात्रे निधायाशु पुष्पं चंदनमक्षताः। द
धिदूर्वा च सिद्धार्थाः हरिद्रा रत्नदीपिका। नीराजनं प्रकुर्वंति गिरिजायाः शिवस्य च। पुष्पवृष्टिं प्रकुर्वंति देवं संख्यापसंख्यतः। महोत्सवः प्रवृत्तोभूद्धि
मालयगिरौ तथा। गिरिराजस्तदा तस्मै हृष्टं जामातृतोषकं॥ गजानां दशसाहस्रं अश्वानां नियुतं तथा। अनर्घ्यमपि रत्नानि ददौ तस्मै गिरीश्व
रः। सुवर्णानां दशकोट्यश्च शतकोट्यश्च विद्रुमाः। हिरण्यं कोटिकोटिस्तु पारिबर्हं ददौ गिरिः। असंख्याताश्च वै दास्यो मनःसंतुष्टिकारिकाः। मैना
कः तत्प्रियार्थं वै गिरिणा प्रेषितः स्वयं। एवं गिरिजया सार्द्धं कैलासमहमागतः। आगत्य देवतानां सर्वे स्वे स्वे स्थाने समादिशत्। शिव उ॰। तेन व्रतप्र
भावेन सौभाग्यमतुलं त्वया। प्राप्तं महोत्सवं देवि साधितं शुभमुत्तमं। त्वया धारणं व्रतं देवि न कस्यापि निवेदितं। यज्ञोपं परमं देवि यन्नोक्तं कस्यचिन्म
या। तदुक्तं तव सामीप्यं तु त्वत्सौभाग्यविमोहनात्। व्रतराजस्य नाम्नापि शृणु देवि यथाभवत्। आलिभिर्हरिता यस्मात्तस्मात्साहरितालिका। पा
र्वत्युवाच केन पूर्वं कृतं नाथ विधिश्चास्य वद प्रभो। किं पुण्यं किं फलं चास्य केन चैव क्रियते नरैः। महादेव उवाच॥ शृणु देवि विधिं वक्ष्ये नारीणां राम॰
व्रतमुत्तमं। कर्त्तव्यं तु प्रयत्नेन यदि सौभाग्यमिच्छति। तोरणादि च कर्त्तव्यं कदलीस्तंभमंडितं। आच्छाद्य पट्टवस्त्रैश्च नानावर्णविचित्रकैः। वं १३५

135A

स्नानिशु गंधैर्विलेपयेद्गृह पंडपे। शंखभेरीमृदंगैश्च वादित्रैर्बहुनिस्वनैः। नानामंगलवारस्त्रीकृतैर्घोषमहाध्वनिः। स्थापयेत्प्रतिमां तत्र
पार्वत्या सहितां मम। नानाकारैश्च नैवेद्यैर्नानाभक्ष्यैः पचारकैः। नानोपहाररतां बूले रूपवासप्रजागरैः। नालिकेरैः पूगफलैर्दाडिमैः कन
काह्वैर्मिः बीजपूरैः सनारिंगैरन्यैश्च ऋतुभवैस्तथा। कालदेशोद्भवैः सर्वैः फलैश्च विविधैः शुभैः। गंधपुष्पैस्तथा दीपैर्मंत्रेणानेन पूजयेत्
। पूर्वोक्तेन विधानेन पूजयेद्वृषया सह। कथां श्रुत्वैकचित्तेन ह्यघा स्नानिशि शिशः। आचार्याय प्रदातव्यं सस्वर्णं धेनुर्हिरण्यकं। अन्येषां दी
यते दानं स्त्रीणां वा भूषणादिकं। ततो वाद्येन गीतेन महानिशा कौतुकादिना। नयेदत्ताद्दिता देवि यदि सौभाग्यमिच्छति। तस्मिन्नहनि या नारी
भोजनं कुरुते पादि। सप्तजन्मभवेद्वंध्या वैधव्यं च पुनः पुनः। दारिद्र्यं पुत्रशोकं च कर्कशा दुःखभागिनी। पतेत्सा नरके घोरे नो पवासकरोति या
। कांचनं रुक्मताम्रं वा वेणुजं वापि मृन्मयं। संपुटीकृत्य तन्मध्ये फलानि विविधानि वा हरिद्राकुंकुमं चैव अंजनादि प्रकल्पयेत्। वस्त्राण्या
भरणादीनि तांबूलं सहिरण्यकं। कृत्वा संछाद्य वस्त्रेण प्रदद्याद्ब्राह्मणाय वै। प्रीयतां शंकरो देवो शिवदानं ददे यं स्वशक्तितः। दत्वा तेन विधाने
न पारणं तद्दिने जरं।। एवं विधिं या कुरुते व नारी भक्त्या समं सा रमते सुखेन। विनाशकाले यमदूतलक्षसंसारयुक्त्वा मुक्तिं लभते सुखेन अश्वमेधसहस्रा

जयकल्प· १३६ 136

णीवाजपेयफलानि च। कथाश्रवणमात्रेण तत्फलं लभते नरः। एतत्ते कथितं देवि विधानं सरहस्यकं॥ उद्यापनविधिं वक्ष्ये येन सांगफलं लभेत॥ प्रा
प्ते भाद्रपदे मासि सिततीयाहस्तसोमयुक्। तस्यां रात्रौ प्रयत्नेन यथोक्तं सर्वमाचरेत्। सर्वतोभद्रसंज्ञं वा लिंगतोभद्रमेव वा कारयेद्विविध दृ विमंडल
सप्तसूजनं। तस्याग्रे स्थापयेत्कुंभं व्रणछिद्रविवर्जितं। तस्योपरि न्यसेद्धैमं पार्वत्या सहितं शिवं। वस्त्रयुग्मेन संवेष्ट्य पूर्ववत्पूजनं चरेत्। ततः प्र
भातसमये युग्मान्यष्टौ निमंत्र्य मेतत्को विप्रषोडश द्विजयुग्मांश्च पक्वान्नाद्यैः। भोजयेत्। सौभाग्यद्रव्यवस्त्राणि वेणया नारीणां षोडशेभ्यः कं त
द्वृत्तपरत यानेयं। आचार्यं वरयेत्तत्र व्रतं सर्वं च ब्राह्मणैः सह। स्थंडिले तु प्रकर्त्तव्यं हस्तमात्रं सुशोभनं। ततो होमं प्रकुर्वीत घृतं हवींषि समि
लैः। पृथक्पृथक् शतं हुत्वा मंत्रेण जातवेदसे। पातयित्वा वसोर्द्धारां पुनः पूजनमाचरेत्॥ नमः प्रणतपालाय नमः कैलासवासिने। नमो वे
दांतवेद्याय उमादेहार्द्धधारिणे। उत्पत्तिस्थितिसंहारकर्त्रे नेत्रे नमोस्तु ते। येन कामेन भो देव पूजितः सोमया सह। व्रतं संपूर्णतां यातु तत्र त्वत्प्रसा
दाज्जगद्गुरो इति स्तुत्वा महादेवं प्रणिपत्य पुनः पुनः। गोभूहिरण्यदानानि वस्त्रदानान्यनेकशः। निमंत्रितानि युग्मानि भोजयेद्धृतपायसैः। राम·
पृथक्पृथक्शय्यायुग्मं सौभाग्यद्रव्यपूरितं। सहिरण्यं सवस्त्रं च ततो मोहयात्तु भक्तितः। उमामहेश्वरो देवः प्रीयतां मेन मो नमः। ततः कुर्यात्स्वयं दे १३६

136A

द्वि बंधुभिः सह भोजनं। सर्वान् कामान् अवाप्नोति सौभाग्यं लभते ऽक्षयं। मृत वत्सा तु या नारी पुत्रं प्राप्नोति सा चिरायुषं न पुनर्गर्भमायाति सा गौर्या सह ली
यते। इति स्कंदपुराणे उमामहेश्वर संवादे सोपापनहरितालिकाव्रतकथा संपूर्णा। अस्यामेव भाद्रपद शुक्ल तृतीयायां भविष्योत्तरोक्तं ह
रिकालीव्रतं। युधिष्ठिर उ०॥ भगवन् हरिकालीति का देवी प्रोच्यते मुने। आदौ वा केन संस्थिता कस्मात्संपूज्यते स्त्रीजनेन सा॥ एतज्जिज्ञासितं हृ दाती
हसर्वं मे ब्रूहि केशव॥ श्रीकृष्ण उवाच॥ पार्थ पौराणिकीं दिव्यां मत्तः शृणु कथामिमां। आसीद्दक्षस्य दुहिता काली नामा तु कन्यका॥ व
र्णेनापि च सा कृष्णा नवनीलोत्पलप्रभा। अंबिका यत्नतो दत्ता महादेवाय शूलिने॥ विवाहिता विधानेन शंखतूर्यनिनादिना। यज्ञपात्राग
र्नदैर्वेदाध्ययनानां च निस्वनैः। निर्वर्तिते विवाहे तु कालात्सार्द्धं त्रिलोचनः। क्रीडते विविधैः कामैर्मनसः प्रीतिवर्द्धनैः। अथ देवसमाजे
तु कदाचिद्वृषभध्वजः। आस्थानमंडपे रम्ये आसीनो विभुसहायवान्। तत्र स्व आहूय मामसनमेनां त्रिपुरांतकः। कालीं नीलोत्पलश्या
मां गणमातृगणान्वितां। प्रहसन्नाह स्मितः कालि भिन्नांजनप्रभे॥ कालमप्यति सौंदर्यां जव रूपं मम प्रियं॥ इत्येवमुक्ता सा देवी व्रीडिता
क्रोधमानसा॥ निःश्वासोच्छ्वसिता साक्षाद्बाष्पगद्गदया गिरा॥ हरो देव त्वया नं वा लाप्रो वा चसूरिता ध रा॥ किं देवनाम्नाया या गौरी सा गौरीत्यभि

जयरूप.
१३०
137

धीपते। यस्मात्वमोपमा दत्ता निन्त्वहमंभोजनं विभो। समाजे देवसंघानां वा स्वदेवसमान्निधौ। तस्माद्देहमिमं त्वसंजुहोमि ज्वलितेनले॥ इत्युक्त्वावा
पि माराणां पिहरिकाली रुषान्विता। सुमोच हरितछायाकातिं हरित्तशाद्वले। विक्षेप देहं रोषेण ज्वलिते हव्यवाहने। पुनः पर्वतराजस्य गृहे गौरी
बभूव सा॥ महादेवस्य देहार्द्धं स्थिता संपूज्यते सुरैः। या मुक्ता शाद्वले देव्या कालकांतिः स्वदेहजा। सा बभूव महावीर्या देवी कात्यायनी पुनः।
तया कृता निभ्रूरीरादेवकार्याणि पांडवा। तुष्टे देवगणे दत्तो वरस्तस्यै स्वयंभुवामे। ये त्वां शाद्वलसंस्थां वै कालीति वरदायिनी। पूजयिष्यं
ति पुरुषा नार्यो वापि विशेषतः। सर्वपापविनिर्मुक्ताः सुखसौभाग्यान्विताः। विरापुषो भविष्यंति भर्तृपुत्रसमान्विताः। एवं सा हरिकालीति गौ
रीसस्यैव्य वास्थिता। श्रीकृष्ण उवाच। शुक्ले भाद्रपदस्यैवं तृतीयायां समाचरेत्। समभ्यानैः स्तु वैहू दैः कृत्वा हरितशाद्वली। खर्जूरै नारि
केलैश्च फलैश्च मधुरैस्तथा। मातुलिंगाक्षुस्तुंमेश्च धासकैर्जीरकैस्तथा। गंधैः पुष्पैः फलैर्धूपैर्नैवेद्यैर्मोदकादिभिः। प्रीणयित्वा समा
ख्याघपग्रागेणाभ्यस्वता। घंटावाद्यादिभिर्गीतैः शुभैर्द्दिव्यकथानकैः। एवं नीया महाराजे मंत्रेणानेन भक्तितः। हरेनीत्रिसमुत्पन्ने एमः
हरिकालि हरिप्रिये। सर्वदा मम मूर्तिस्थे प्रणाता तिहरे नमः। इत्थं संपूज्य तां देवीं दद्याद्विप्राय दक्षिणां कृत्वा जागरणं रात्रौ प्रभाते किं १३०

विडुद्धतेय रवौष्टवा सिनीमिश्चमानेयात्तुजलाशये। ततोजलाशयेरम्ये मंत्रेणैवं विसर्जयेत्॥ अर्चितासिमयाभक्त्यागच्छदेवि स्वरालयं। मम
137A हो भोगपनाशाय पुनरागमनाय च। एवं यः पांडवश्रेष्ठ हरिकालिव्रतं चरेत्। प्रतिवर्षं विधानेन नारी वा भक्तितत्परा। नीता यत्फलमाप्नोति त
हन्येन न चाप्यते॥ मर्त्यलोके चिरं जीवेत्सर्वकामैः सुपूजिता। पुत्रपौत्रसुहृन्मित्रनप्तृदौहित्रसंकुलं साग्रं वर्षशतं बाला वेद्भोगान्भुक्त्वाम
हीतले। ते तोवमानेन देवमाशिवलोके महीयते। वीरभद्र महाकाल नंदीश्वरविनायकाः। सर्वैः प्रसादं सुस्त्वाभवंति व्रतयोगतः। सं
पूज्य पशुपं गतसमाविष्टः स्ससा देवी हिमाद्रितनया हरिकालिकाख्या। नैवेद्यजागरसमुद्भवगीतवाद्यैः संप्राप्नुवंति मनुजाः स्वर्दिवं सुखा
नि॥ इति भविष्योत्तरोक्ते हरिकालीव्रतं॥ अथ स्वस्त्यगौरीव्रतं॥ सूत उवाच॥ कुंत्यां सुतो पाविष्टो यां हस्तिनापुरमुत्तमं॥ मानितायां नरेंद्रैश्च
तनयैः पंचभिः सह। तस्याः कुशलमन्विष्टुमाजगाम माधवः। अभिनंद्य सुतां सो नंदेवदेवं जनार्दनं। उवाच कुंती सानंदा स्वयमागत्य मि
दं वचः। कुंत्युवाच। धन्यास्मि कृतकृत्यास्मि सनाथास्मि परंजय। सहसंभाविता यास्मि त्वया सर्वजगद्गुरो। यदिमे सुप्रसन्नोसि तदा वक्ष्य
व्रतं विभो। येन दीर्घायुषस्सर्वे राज्यं प्राप्नुयां तनयैः सह॥ कृष्ण उवाच॥ कुंति ते कथयिष्यामि व्रतानामुत्तमं व्रतं। यत्कृत्वा सुखसंतानं धनधान्य

जय कल्प०
१३८
138

समन्वितां। विधूतदुष्कृता पुण्यापासतत्त्वनारीडसमाप्स्यसि॥ हस्तगौरीव्रतं मद्देकुरुष्वश्रु विमानसा॥ कुंती०॥ यत्त्वोक्तं तेव्रतं नाथविधानं तस्य कीदृशं। केनच

र्वहितं देवतन्मे ब्रूहि जनार्दन॥ श्रीकृ०॥ कैलासशिखरे देवि हस्तस्थे च दिवाकरे। दिवा प्रसुप्ता सा गौरी हरसान्निध्यमानसा॥ सा स्वप्ने देवदेवेशं स्वप्ने शंभु

दृदृशेह। अर्द्धेंदेहं दधा धत्वस्यम धेर्वेदकलाधरं॥ उत्थाय सहसा गौरी प्रोवाच शंकरं प्रति। किमिदं तन्ममाचक्ष्व न यन्मे मानसं मम॥ ईश्वर उ०॥ देवि दृ

ष्टं निषिद्धासि हस्तन्यस्तगते रवौ। न स्वप्तव्यं दिवा तत्र लस्येदं विहितं फलं॥ श्रृणु देवि त्वपाये नखंडितो हं विलोकितः। त्वया रथ्यं व्रतं देवि मदाराधन

कामया॥ अद्य प्रभृति सम्मन्नसन्नो स्मि त्वया च समनुस्थितं। अद्य प्रभृति व्रतवारेण दृष्टो हं तादृशः त्वया। तत्कुरुष्वाधुना देवि हस्तगौरीव्रतं शुभं। पार्वत्यु

वाच॥ आदिशस्व तां व्रतं नाथ विधानेन महेश्वर। आरंभो स्य कदा कार्यः को विधिः कस्य पूजनं। ईश्वर उ०॥ मंडपे स्थापनं कुर्यात्स वा लंकारभूषि

ते। अन्वहं कारयेत्पुष्पैः फलमुक्तान्वितैः शुभैः। नैवेद्यैः पंचसाधैश्च श्रृणु यात्त्वमहं कथां॥ दिने च तद्दशे प्राप्ते स्थापयेत्प्रतिमां शुभां। पक्वान्नैः पू

रितैः शुभ्रैः सर्वसुस्वैश्च योदृशैः। मासि चापोदशदिनं नैवेद्यमुपकल्पयेत्॥ फलमूलानि धान्यानि तावंति समुपाहरेत्॥ पूजयेत्सस्त्रगोत्रस्य पुष्पैश्चागम

नैः सुगंधविधिभिः॥ चंदनैर्धूपदीपैश्च तांबूलैश्च फलादिभिः॥ ध्यायेत्तु हृदये गौरीं हरदेहार्द्धसंयुतां। दक्षिणां ततो दत्वा नत्वा देवीं विसर्जयेत्॥ मासि द्वितये १३८

138 A दृशतथादीपकी ऋोलिकान्वितान् । सुवासिनीभ्यो द्विये दत्वा तावत: स्वयमाहरेत् ॥ व्रतं समाचरेद्देवि यावद्वर्षं त्रयोदश । स्वर्णभाजनगौर्यादि प्रतिवर्षं वि
सर्जयेत् । ततश्चतुर्द्दशे वर्षे तदुद्यापनमाचरेत् ॥ संस्थाप्य गणपं गौरीं काञ्चनीं काञ्चने गते । पूर्वोक्तविधिना पूज्य वासरांस्तु त्रयोदश ॥ चतुर्द्दशेथ
दिवसे संजाते प्रातरुत्थिता ॥ कृत्वोपवासनियमं गौरीं प्रपूजयेत्तत् । पक्वान्नं स्वर्णपात्रेषु त्रयोदशसु निक्षिपेत् । स्त्रीभ्यः सकंचुकी दत्वा भोज
यित्वा विसर्जयेत् । एवं देवि व्रतं कृत्वा सर्वान्कामानवाप्नुयात् । अश्वकोटिसहस्राणि कार्यप्रतिमानि कामपी । पात्राणि वेणावान्येव पीतरुष्याणि वै वाहि ।
रुक्मउ । ततनश्वके व्रतं गौरीप्राप्ता साद्यां छिन्नं फलं । त्वमप्येतद्व्रतं कुरु । तिकुरुपत्तु सुसमन्विता । अथ मत्या व्रतं कृत्वा तीसविधानं तदा करोत्तरां गांधा
रीवापितृछत्वा व्रतं च श्रेय यथाविधि ॥ द्वावस्मकि मा वेन पुष्टा गौरी तततो ब्रवीत् । पार्वत्युवाच । कुंति ते परितुष्टास्मि वरं वरय सुव्रते । कुंत्युवाच । देहि
मे सर्वसंपत्तिं सर्वसौख्यं सदोदयं । प्रयच्छ मम पुत्राणां महद्राज्यमनामयं । व्रतमेतत्तु यः कुर्यात्तद्वल्लोकमवाप्स्यति । न दारिद्र्यं न वैधव्यं न शोको ना
पि दुष्कृतं । कृष्णो नोपहन्तं देवि कदाचित्सं भविष्यति । तथेत्युक्त्वा ततो गौरी तत्रैवान्तरधीयत । एतद्व्रतं सकलदुःखविनाशहेतु सौभाग्यपरमफलभावन
पावनं ति । या योषितः सुखमनंतमिहापि प्राप्य गौरीपतिं पतिरतास्तु ततो लभंते । इति भविष्योत्तरोक्तं भाद्रपदशुक्लतृतीयायां हरगौरीव्रतं ॥ अथ भाद्रशु

अथकल्प०
१३९
139

कृत. तीयामां कोटीश्वरव्रतं। मदनरत्ने स्कांदे।। रंभोवाच।। देवलोके महादेवि नारी का सौख्यसंयुता। मर्त्यलोके तथा सर्वाः स्त्रियः सौभाग्यवर्जिताः। कथं
भाग्यं स्वभोगांश्च लभंते परमेश्वरि। पार्वत्युवाच।। शृणु भद्रे परं गुह्यं सर्वकामफलप्रदं। दुर्भगाणां च नारीणां सौभाग्यकरणं परं।। लक्षेश्वरीति विख्यातं
ततः कोटीश्वरीव्रतं। तृतीयायां शुक्लपक्षे तु मासि भाद्रपदे शुभे तत्।। तस्यां व्रतं तु संग्राह्य यावद्वर्षचतुष्टयं। उपवासेन कर्त्तव्यं वर्षे वर्षे तु सुंदरि।। अखं
डानां तंडुलानां तिलानां वा सुलोचने। लक्षमेकं विविच्याथ क्षिपेत्स यमि शोभने। क्षीरसंमिश्रितैः कार्या देव्या मूर्त्तिः सुलोचना।। कृत्वा तु पुष्प
प्राकारं पुष्पमालाभिर्मंडितं संस्थाप्य पार्वतीं देवीं पूजयेद्भक्तिशक्तितः।। पूजयेद्विविधैः पुष्पैः कुंकुमागुरुचंदनैः। गंधैर्धूपैश्च नैवेद्यैः फलैश्च
विविधैस्तथा।। वस्त्रेणाच्छादयेत्तेन पूजयेत्परमेश्वरी।। नमो नमस्ते देवेशि लक्षेश्वरि नमोस्तुते। कोटीश्वरि नमस्तुभ्यं नमस्ते हरवल्लभे।। उमादेवि न
मस्तुभ्यं कात्यायनि नमोस्तुते। नमः कालि महाकालि महादुर्गे नमोस्तुते। नमः शर्वाणि रुद्राणि अपर्णे शंकरप्रिये।। सर्वभूतहिते देवि त्राहि सं राम.
सारसागरात्।। पूजामंत्रः।। नमो लक्षेश्वरी देवि कोटीश्वरि नमोस्तुते। गृहाणार्घ्यं मया दत्तं शंकरेण समं मम।। अर्घ्यमंत्रः। पुरा व्रतमिदं भद्रे इंद्राण्या
यत्कृतं शुभं। विधाय च लावलेः पत्न्या अरुंधत्या कृतं पुरा। दमयंत्या च रोहिण्या कृतं व्रतवरं शुभं।। गौरिणा मोद्यये स्त्रिया विप्रा श्रीवत्स दीक्षिता।। गो १३९

139A रिणीः सुतामिनीः। एवं विधविधानेन करोति नियतव्रतं। न तस्याः स्यात्सदारिद्र्यं न चैवेष्टवियोजनं। अथ पुत्रा भवेन्नारी भर्तारं च गुणाधिकं। सुरूपं गु
णिनं कांतं पंडितं प्रियदर्शनं। ईश्वरं चैव राज्ञानं लभे दीर्घमायुषं प्रियं॥ दातारं चैव भोक्तारं समस्तजनवल्लभं। सुशीलं धार्मिकं स्वच्छं चंद्रवत्प्रियदर्श
नं॥ सुरूपा सुभगा चैव सदा पत्युः प्रिया भवेत्। सहपत्नीवरारोहा कुरुते राज्यमुत्तमं। अंतकाले समं तेन मोदते त्रिदिवे तथा। षष्टिवर्षसहस्राणि
षष्टिवर्षशतानि च। इदं कृत्वा पुरेंद्राणींद्रं लेभे पतिमुत्तमं। रोहिणी प्रतिमा लेभे चंद्रं व्रतनिषेवणात्। गणादेवी तु भर्तारमादित्यं प्राप सत्स
तिं। इदं ते कथितं भद्रे व्रतं कोटीश्वरीपूर्णं। लक्ष्मीश्वरीति विख्यातं कुरु रंभे मनोहरं॥ इति कोटीश्वरीव्रतं॥ मार्गशीर्षशुक्लतृतीयायामारंभं भविष्योत्तरो
क्तं रंभातृतीयाव्रतं। कृष्ण उ। रंभातृतीयां वक्ष्यामि सर्वपापप्रणाशिनीं। सुखसौभाग्यफलदां सर्वकामप्रदायिनीं। सर्वदुःखहरां पुण्यां पुत्रपौत्र
प्रदां तथा। सपत्नीदर्पदलनीं रूपैश्वर्यकरीं शुभां। शंकरेणापुरा ख्याता पार्वत्यै प्रियकाम्यया। तामिमां शृणु भूपाल भूतानां परमं हितं। मार्गशी
र्षे शुभेमासि तृतीयायां नराधिप। शुक्लायां प्रातरुत्थाय दंतधावनपूर्वकं। उपवासस्य नियमं गृह्णीयाद्भक्तिभाविता। देवि संवत्सरं यावत्तृतीयायामु
पोषिता। प्रतिमासं करिष्यामि पारणं चापरेहनि। तदविघ्नेन मे यातु समाप्तिं व्रतमुत्तमं। शरण्यां त्वां प्रपन्नास्मि देवी भोगपादद्वरस्व मां। एवं संकल्प्य वि

जयकल्प॰
१४०
140

वं तेजोनान्यथा बलमीदृशं॥ इति प्रसाद्य देवेशं ददौ मणिं स्यमंतकं॥ सुतां जांबवतीं नाथ भार्यार्थं वरवर्णिनीं। पाणिं जग्राह पाणिमा सदेव देवकीजांब १५८

159A

नाय मणिमादाय देवोपि जांबवत्या समं युतः ॥ तद्दर्शनोत्थसंमोदे द्वारकावासिनां ततः । सत्राजितस्य मणिं दत्तवान् संसदि स्थितः ॥ मिथ्याभिशा
पसंशुद्धिं प्राप्तवान्मधुसूदनः ॥ सत्राजितोपि तं रत्नं कृष्णाय प्रददौ स्तुतः ॥ सत्यभामां महाबुद्धिर्ददौ प्रेम्णा गुणान्वितां ॥ शतधन्वाक्रूरमुख्या याद
वा दुष्टमानसाः ॥ सत्राजितेन ते वैरं चक्रुर्लाभाभिलाषिणः ॥ दुरात्मा शतधन्वाथ निगतेच्छोपि कुत्रचित् । सत्राजितं निहत्याशु मणिं जग्राह पा
पधीः ॥ कृष्णस्य पुरतः सत्या समावेद्य विचेष्टितं ॥ अंतर्दुःखो बहिः कोपी कृष्णः कपटनायकः । बलदेवपुरो वाक्यमुवाच धराधिपः ॥ हत्वा स
त्राजितं हन्ता मणिमादाय गच्छति । निहत्य शतधन्वानं गृहीता रत्नमाश्रमो ॥ मम भोग्यं च तद्रत्नं भविष्यति न संशयः । एतच्छ्रुत्वा भयत्रस्तः श
तधन्वापि यादवः ॥ आहूयाक्रूरनामानं मणिं तं प्रददौ च सः । आरुह्य वडवां वेगात् निर्गतो दक्षिणां दिशं ॥ रथस्थावनुगच्छेतां तं तदा रामजना
र्दनौ ॥ शतयोजनमात्रेण ममार वडवा तदा । पलायमानो निहतः पद्भ्यां विष्णुपदातिना । रथस्थे बलदेवे तु हरिणा रत्नलोभिना ॥ अदृष्टं तत्र तद्रत्नं
बलदेवं स्तुतो वदत् । तदा कृष्णं महारोषाद् दुर्वाचं वचनं बली: कपटी त्वं सदा कृष्ण पापी लोभी तु निश्चितं ॥ अधीयस्वजनं हंसि कस्त्वां बंधुं समाश्रयेत
॥ अनेकशपथैः कृष्णो बलदेवं प्रसादयत् ॥ सोपि धिक्कृत्य रामस्तु कृष्णं ययौ विदर्भमंडलं । कृष्णोपि रथमारुह्य द्वारकामययौ पुनः । तथैवोद्वेजिताः

सर्वैनसाध्वीयाश्चयं हरिः। निष्कासितो रसलोकात्तु अवछोप्याताबलोबली। तच्छ्रुत्वा दीनवदनः संतप्तोनैवभाषितः। तथापि शापसंतप्तो ब्रह्मन् तस्य जगत्पति
ः अङ्गुलिपिशिनिष्क्रमती यत्रीयात्रामिपात्ततः। कार्मिणं गत्वा तु वैनासावपज्जन्यमुमीश्वरं॥ तो यस्य त्वा हयामास तेन अथ वेला बुद्धिमानाम्मरालमग
हेष्विनेनेगारं स मकुलायत। नहोमिंडं न वै रोगाईतयोन्मविश्वरं। श्रुत्वि नाधापैतैनचमारीः हृ पैसा निश्चिनेजानन्नपि हिसर्वेज्ञोमानुषभावमा
श्रितः। लोकाचारंतु यामायामज्ञानेनचसमाश्रितः। वं छुवैरं म सुमन्नं लांछनं समुपास्थितं तथापवाद बृहं लज्जायमानं अथ संसहेर इतिविं
तातुरं हरिं नारदः समुपास्थितः। गृहीत्वा तत्त्वतां परजां सुखासीनस्ततोब्रवीत्। नारद उवाच। किमर्थं विघ्नसे देव किं वा ते शोककारणं। यथा
वत्तं समाचक्ष्व नारदायच केशवः। जानामि कारणं देवयदर्थं लांछनं तव। तत्पामाद्य हे सुरश्रेष्ठ पश्येद्धदर्शनं कृतं। तेन समुसन्न लां
छनं तव वर्त्तते विहि॥ श्रीकृष्ण उवाच॥ वद नारद मे शीघ्रं को दोषश्चेन्द्रदर्शने। किमर्थं तद्वितीयायां तस्य चन्द्रस्य दर्शनं॥ नारद उवाच। गणाना
येन मंत्रा प्रचंद्रमाः रूपदर्पितः। तद्दर्शनेन नराणां हि वृथा निंदा भविष्यति। श्रीकृष्ण उवाच। किमर्थं गणनाथेन शप्तश्चंद्रः सुधामयः। इदमाख्या तुम॰
न केशवे यथावद्वक्तुमर्हसि। नारद उवाच। गणानामाधिपत्येन रुद्रेणाब्रह्मणा पुरा। अणिमा महिमा चैव लघिमा गरिमा तथा। प्राकाम्येशि १६०

160A वाशिलं च अर्थे कामो दमायिता। भार्यार्थे प्रदद्दौ देवो गतो शसप्रजापतिः। सृजापित्वा गणाध्यक्षं स्तुतिं कर्त्तुं प्रचक्रमे। ब्रह्मोवाच॥ गजवक्त्र गणाध्यक्ष
लंबोदर खर्वग्रहा। विघ्नप्रसिच्छर देवेश सृष्टिसंहारकारक। एकरूपेषु गणाध्यक्षं मोदकाद्यैः प्रयत्नतः। येषां प्रजायते मे सिद्धिर्निर्विघ्नेन न संशयः। अस्मं
दृजगणाध्यक्षं ये वा स्तुवंति सुरासुराः। न ते पांडयतो सिद्धिः कल्पकोटिशतैरपि॥ त्वं कर्ता तु गणाध्यक्ष विष्णुः पालयते सदा। रुद्रोपि संहरस्या सुतास्थ गोपेत क
रोम्यहं। इत्युक्ते संस्तूयमानो सौ देवदेवो गजाननः। उवाच परमप्रीतो ब्रह्माणं जगतां पतिं॥ गणेश उवाच॥ वरं ब्रूहि महाप्राज्ञ यं मनसि वर्त्तते। ब्र
ह्मोवाच॥ क्रियमाणा तु मे सृष्टिर्निर्विघ्नं जायतां प्रभो॥ एवमस्त्विति देवोसौ गतो हीतामोद कानने। मत्स्यलोकात्समागच्छत् स च पापगणेश्वरैः। चंद्रलो
कं समागम्य स च लितो गणनायकः। अथ दृष्ट्वा स्वयं महद्वक्त्रो लोमोदरः मदान्वितः। तं दृष्ट्वा कोपताम्राक्षो गणनाथः शशाप ह। दर्शनीयः सुरूपोहं
हसस्याहं निरयथा। गर्वितोसि शशांक हंत फलं प्राप्स्यसि मत्त्वरं। अद्य प्रभृति लोकास्त्वां नहि पश्यंति पापिनं। ये पश्यंति प्रमादेन ते तान् राम गलोछं नामिथ्या
भिशापमेषं कृत्वा अदृश्यो तिष्ठते अभूत् हाहाकारो महान्जातः श्रुत्वा शापं हि मीषणं॥ अंतस्तम्लानवदनो जलं चंद्रः समाविशत्। कुमुदं कौमुदीना
यः स्थितस्तत्र च कृतालयः। ततो देवर्षिगंधर्वा निराशा दीनमानसाः। त्वरा साहं प्रशोक्षाय जग्मुस्तोपितामहं। दृष्ट्वा पितामहं देवं शशांकस्यैव चेष्टितं च द

जयकल्प
१६१
161

नः शापो गणेशेन कथयामास तद्वरान् ॥ वीर्यं भावात्वस्मात्तान्सुरानिदमब्रवीत् ॥ गणेश शापो देवेंद्र शक्यते केन वान्यथा ॥ कर्तुं मिंद्रेण न मया विष्णु
नापि विनिश्चितं ॥ तमेव देवदेवेशं व्रजध्वं शरणं सुराः ॥ स एव शापमोक्षं स्मारिष्यति न संशयः । देवा ऊचुः । केनोपायेन वरदो गजवक्त्रो गणेश्वरः । पि
तामह महाप्राज्ञ नन्दस्मा कं वद प्रभो ॥ पितामह उवाच ॥ पनतुष्यो देवदेवो सौ सूजनीमः प्रयत्नतः । कृष्णपक्षे विशेषेण तत्कंकुर्यां व्रतमिदं ॥ अपूपै
र्घृतसंपुक्तैर्मोदकैः परितोषयेत् ॥ मधुरान्नं हविष्यं वस्त्रयुग्मं जीतकामतः । स्वर्णरूपं गणेशस्य दातव्यं द्विजसत्तमे ॥ शक्त्या वदक्षिणां दद्यात वि
त्तशाठ्यं न कारयेत् ॥ गीष्पतिं प्रेषयामासुः समेत्य त्रिदिवेश्वराः । स गत्वा कथयामास सर्वं वो ब्रह्मोदितं व्रतं ॥ व्रतं चक्रे न तद्वच्चं ज्ञेयं यथोक्तं ब्रह्मणा
पुरा ॥ आविर्बभूव भगवान्गणेशो व्रततोषितः । तं क्रीडमानं गणनायकं वटुं दृष्ट्वा वृहस्पतिस्तु कलानिधानः । चंद्र उवाच ॥ नमः कारणकारणकारणा
नां वेत्तासि वेधं न विभो प्रसीद । प्रसीद देवेश जगन्निवास गणेश लंबोदर वक्रतुंड । विरिंचिनारायणपूज्यमान क्षमस्व मे गर्वकृतं च हासं । येत्वां प्रस
न्नं गणेशमन्नं वांछंति मूढा विदितार्थसिद्धिं । ते दैवनष्टा निभृतं च लोके ज्ञातो मया ते सकलः प्रभावः । ये वाप्युदासीनतरास्तु पापा यास्ते पतंति रामः
पापं नरकं सदैव । एवं संस्तूयमानो सौ चंद्रेणाथ गजाननः । उवाच महसन्वाक्यं मेघगंभीरया गिरा ॥ गणेश उवाच । तुष्टोहं तव दास्यामि वरं च १६१

161A

हि निशाकर। चंद्र उवाच। लोकानां दर्शनीयोऽहं भवानि पुनरेव हि। विपापोऽहं विशापोऽहं त्वत्प्रसादाद्गणेश्वर। गणेश उ०। वरमन्यं प्रदास्यामि नैतद्देयं
मयाऽनघ। विघ्नेशवचनं श्रुत्वा ब्रह्माद्याः सभयाकुलाः॥ देवं विज्ञापयां चक्रुर्गणेशं भक्तवत्सलं। देवा ऊचुः। विशापं कुरु हेरंब शमार्थयामो वयं तव॥
विशापमकरोच्चंद्रं कमलासनगौरवात्। शुक्लपक्षे चतुर्थ्यां तु ये पश्यंति सदैव हि। मिथ्याभिवादमायां ते प्राप्स्यंति न संशयः। मासादौ पूर्वमेव
त्वां ये पश्यंति सदा जनाः। भाद्रायां शुक्लपक्षस्य तेषां दोषो न जायते। तदा प्रभृति लोकोऽयं द्वितीयायां कृतादरः। चंद्रस्य दर्शनार्थाय गणनाथस्य भा
षितं। भाद्रे शुक्लचतुर्थ्यां तु पश्यंतां पश्यति पापधीः। मिथ्यापवादमालिन्यं आ वर्षं तस्य जायते। पुनरेव तु पप्रच्छ कैलासे नगजा नायकं। केनो
पायेन देवेश तद्दोषः प्रशमितो भवेत्। गणेश उवाच। सदा ह्यस्मिंश्चतुर्थ्यां तु मोदकाद्यैः प्रपूज्य मां। रोहिणीसहितं तां च समभ्यर्च्य विधानतः। यथाशक्त्या
च मद्रूपं स्वर्णेन परिकल्पितं। दत्त्वा द्विजाय भुक्त्वाथ कथां श्रुत्वा विधानतः। सद्दानं संकष्टिमिमं कष्टस्य निवारणं। भाद्रशुक्लचतुर्थ्यां तु म
न्मयी प्रतिमा शुभा। हेमाभावे तु कर्त्तव्या नानापुष्पैः प्रपूज्य मां ज्ञात्वा। भोजयेत्सद्विजान् जागरं च विशेषतः। स्थापयेद्वर्णकुंभेषु न्यस्योपरि शोभितं। य
थाशक्त्या तु मद्रूपं शातकुंभेन निर्मितं। वस्त्रद्वयसमाच्छन्नं मोदकाद्यैः प्रपूज्य मां। रक्तांबरधरो मत्सौम्य नवरात्रं ततः श्रुतिः। रोहिणीसहितस्त्वं च पूजां

जय॰कल॰
१६२
162

माप्यवमस्तु रः। रजतस्य तु हृप्यंतेय घाश नया विनिर्मितं। वह्न्यंशि वपि पाये तिगणाधिपनमोस्तुते।। गंधं लंबोदरायेति पुष्पं सिद्धिप्रदायच। धूपं
गजमुखायेति दीपं मूषकवाहने। विघ्ननाशाय नैवेद्यं फलं सर्वार्थसिद्धिदे।। तांबूलं कामरूपाय दक्षिणां धनदाय च।। इत्थं हेरंब सदा कृत्स्ननाम्ना
शोभाकरं शुभे। विसर्जनं समारंभैः सर्वसिद्धिप्रदायकः। एवं संपूज्य विघ्नेशं कर्पास्कन्दत्वा विधानतः। मंत्रेणानेन तत्सर्वं ब्राह्मणाय निवेद
येत्।। दानेनानेन देवेश प्रीतो भव गणेश्वरः। सर्वत्र सर्वदा देव निर्विघ्नं कुरु सर्वदा। मानोन्नतिं च राज्यं च पुत्रान्पौत्रान्प्रदेहि मे।। गावो धान्यं च वासां
सि दद्यात्सर्वं स्वशक्तितः। दत्त्वा तु ब्राह्मणेभ्यस्तु स्वयं भुंजीत कामतः। मोदकापूपमधुरं लड्डुकाद्याहारवर्जितं एवं करोति यः स्थं दत्तस्माहं सर्वयज्ञ
यां सिद्धिं धनधान्यं च ददामि विपुलां प्रजां।। इत्युक्त्वांतर्दधे देवो गणानां योवि नायकः। तद्व्रतं कुरु कृष्ण त्वं ततः शुद्धिमवाप्स्यसि।। नारदेनै
व मुनिना स्यव्रतं चक्रे हरिः स्वयं।। मिथ्यापवादसंशुद्धिं प्राप देवो जनार्दनः। ये शृण्वंति नवाख्यानं स्यमंतकमणीयकं। चन्द्रस्य चरितं सर्वं तेषां
दोषो न जायते।। भाद्रे शुक्ले चतुर्थ्यां तु चंद्रस्य दर्शनं क्वचित् ज्ञानतस्तत्परिहारार्थं श्रोतव्यं सर्वमेव तु। यदा यदा हि मनः कष्टं संदेह उपजायते। त रामः
दा तदा च श्रोतव्यमाख्यानं कष्टनाशनं।। एवमुक्त्वा ततो देवो गणेशः स्कंदतोषितः। यदा यदा पृच्छति कार्यमुद्यतं नारी नरश्चा घ करोति सद्व्र १६२

162A तंसिध्यंतिकार्याणिसमीप्सितानिकिंदुर्लभंविघ्नहरेप्रसन्ने।इतिस्कंदपुराणोक्तमंत्रकाख्यानंसंपूर्णं॥अथसिद्धिविनायकपूजनं॥एकदंतंशूर्पकर्णं
गजवक्त्रंत्रिलोचनं।पाशांकुशधरंदेवंध्यायेत्सिद्धिविनायकं॥इतिध्यानं।आगच्छजगदाधारसुरासुरवरार्चित।अनाथनाथसर्वज्ञगौरीगणपरिपूजि
त।आवाहनं।स्वर्णसिंहासनंदिव्यंसर्वमंगलसंयुतं।तवार्हस्थापयिष्यामिगणाध्यक्षनमोस्तुते।आसनं।गौरीसुतनमस्तेस्तुशंकरप्रियनंदन।
पाद्यंगृहाणदेवेशगंधपुष्पाक्षतैःसह।पाद्यं।अर्घ्यंगंधोदकैर्दिव्यंसर्वमंगलसंयुतं।गृहाणदेवदेवेशभक्तानांवरदायक।इत्यर्घ्यं।गंगाजलंस
मानीतंसुवर्णकलशेस्थितं।आचम्यतांगणाध्यक्षसर्वविघ्नहरोभव।इत्याचमनं।दधिक्षीरघृतंचैवमधुखंडविमिश्रितं।मधुपर्कंत्वदेवेशमधु
पर्कंददामिते।इतिमधुपर्कं।स्नानंपंचामृतैर्देवगृहाणवरदायक।अनाथनाथसर्वज्ञसर्वसिद्धिप्रदोभव।इतिपंचामृतस्नानं।रक्तवस्त्रद्वयंदेवदे
वानांसदृशंप्रभो।गणेश्वरत्वंसर्वज्ञभक्तानांवरदायक।इतिरक्तवस्त्रद्वयं।राजतंब्रह्मसूत्रंचकांचनंचोत्तरीयकं।गृहाणदेवदेवेशगणाध्यक्ष
नमोस्तुते।इतियज्ञोपवीतं।श्रीखंडचंदनंदिव्यंकर्पूरेणचसंयुतं।गंधंददामिदेवेशगणाध्यक्षनमोस्तुते।इतिगंधं।अक्षतान्धवलान्द
त्तगृहाणद्विरदानन।सर्वदेवैर्नमस्त्वंहिचाक्षयंकुरुमेफलं।अक्षतान्।सुगंधीनिसुपुष्पाणिगृहाणगणनायक।विनायकनमस्तेस्तुसुरासु

सिंदूरी३ चंपक५

जयकल्प· स्तुपजितः। इति पुष्पं। अथांगपूजा। गणेशाय नमः पादौ पूजयामि। विघ्नराजाय नमः जानुनी पू०॥ आखुवाहनाय ऊरू। हेरंबाय कटिं। गणाधिपाय ना
१६३ भिं। गणनाथाय हृदयं। गुहाग्रजाय स्कंधौ। स्थूलकंठाय कंठं। पाशहस्ताय हस्तौ। गजवक्त्राय वक्त्रं। विघ्नराजाय नेत्राणि। सर्वेश्वराय शि
163 रः। अथ पत्रिका। सुमुखाय नमः काकमाचीपत्रं समर्पयामि। गणाधिपाय भृंगराजपत्रं। उमापुत्राय बिल्वपत्रं। गजाननाय दूर्वां। लंबोद
राय बदरीपत्रं। हरसूनवे धत्तूरपत्रं। गजकर्णाय तुलसीपत्रं। गुहाग्रजाय अपामार्गपत्रं। एकदंताय कंटकारिकापत्रं। वक्रतुंडाय नमः शमी
पत्रं। विकटाय नमः करवीरपत्रं। इभतुंडाय अश्मांतपत्रं। विनायकाय अर्कपत्रं। कपिलाय अर्जुनपत्रं। भिन्नदंताय नमः विष्णुक्रांतापत्रं
बकुल४ पत्नीहीनाय नमः दाडिमीपत्रं। बटवे देवदारुपत्रं। भालचंद्राय मरुवकपत्रं। शूर्पकर्णाय जातीपत्रं। सुराग्रजाय गांधारीपत्रं। सिद्धिविना अगस्त्य४
यकाय केतकपत्रं। एवं एकविंशतिपत्राणि समर्पयेत्। अथवा। करवीरजातीचंपकबकुलकमलकल्हारमंदारकर्णिकारसिंगणीकंदवकुंदमा
लतीद्राडिमपामार्गबिल्वविष्णुक्रांताशतावरीभृंगराजशमीदूर्वा इत्येतान्येकविंशतिपत्राणि। अथ दूर्वापूजा। दूर्वायुग्मं गृहीत्वा गंधपु राम·
ष्पाक्षतैर्युतां। पूजयेत्सिद्धिविघ्नेशं प्रत्येकं सर्वनामभिः। एकां समर्पयेदिति शेषः। गणाधिपाय नमः दूर्वायुग्मं। उमापुत्राय। अघनाशिने। विना १६३

163A

यकाय॰ ईशपुत्राय। सर्वसिद्धिप्रदायकाय॰ एकदंताय॰ इभवक्त्राय। मूषकवाहनाय॰ कुमारगुरवे। दशांगं गुग्गुलं धूपं सुगंधं च मनोहरं। गृहाणोश्वर
सर्वज्ञ उमासुत नमोस्तु ते॥ धूपः॥ सर्वज्ञ सर्वलोकेश त्रैलोक्यतिमिरापह। गृहाण मंगलं दीपं रुद्रप्रिय नमोस्तु ते॥ दीपः॥ नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां
कुरु। ईप्सितं मे वरं देहि परत्र च परां गतिम्॥ नैवेद्यमंत्रः॥ तांबूलं गृह्यतां देव नागवल्लीदलैर्युतं कर्पूरेण च संयुक्तं देवतानां परं प्रियं॥ तांबूलमं
त्रः॥ इदं फलमिति फलं॥ हिरण्यगर्भमिति दक्षिणा॥ विघ्नेश्वर विशालाक्ष सर्वाभीष्टफलप्रद। प्रदक्षिणां करोमि त्वां सर्वान् कामान् प्रयच्छ मे॥ प्रदक्षि
णा॥ नमस्ते सिद्धिविघ्नेश सर्वविघ्नहरो भव। ईप्सितं मे वरं देहि नमस्ते भक्तवत्सल। देवदेव जगन्नाथ भक्तानां वरदायक। अविघ्नं कुरु मे देव सर्व
कार्येषु सर्वदा॥ नमस्कारः॥ विनायक नमस्तेस्तु विघ्नेश सुरपूजित ईप्सितं मे वरं देहि नमस्ते करुणाकर॥ प्रार्थना॥ पुष्पांजलिं प्रयच्छामीति पुष्पां
जलिः॥ गणाधिप नमस्तेस्तु सततं मोदकप्रिय। अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥ दाता विश्वेश्वरो देवो गृहीता च सदा विघ्नराट्। तस्मादिदं म
या दत्तं संपूर्णं च नमस्तु मे॥ इति वायनदानं॥ न्यूनातिरिक्तानि परिस्फुटानि यानीह कर्माणि मया कृतानि। क्षम्यानि चैतानि शुभप्रदायक प्रयाहि
तुष्टः सुवरां गमाय॥ अथ कथा॥ ऋषय ऊचुः॥ निर्विघ्नेन तु कार्याणि कथं सिध्यंति सूतज। अर्थसिद्धिः कथं नृणां पुत्रसौभाग्यसंपदः॥ दंप

जयकल्प॰
१६४
164

सोऽकल्पहे वै सर्वंबंधुभेदे तथान्तरां।। उदासीनेषु लोकेषु कथं संस्तवता भवेत्। विद्यारंभे तथान्येषां वा तीज्यायां कृषौ तथा। नृपतेः पु[illegible]र वक्रस्य जयसि
द्धिः कथं भवेत्। कां देवतां नमस्कृत्य पूजा सिद्धिकरी नृणां।। सूत उवाच। मन्त्रद्वयोः पुरा विप्राः कुरुपांडवसेनयोः। श्रुत्वा नन्देवकीपुत्रं धर्मरा
जो युधिष्ठिरः। युधिष्ठिर उवाच।। निर्विघ्नेन जपो होमो वद देव कथं भवेत्। कां देवतां नमस्कृत्य सम्यग्राज्यं लभेमहि। श्रीकृष्ण उ॰।। पूजय त्वं गणाध्य
क्षं विघ्नेशं सिद्धिदायकं। तस्मिन् संपूजिते राजन् सर्वान्कामानवाप्स्यसि। युधिष्ठिर उवाच। हे देव केन विधानेन पूजनीयो गणाधिपः। पूजितस्तु तिथौ
कस्यां सिद्धिदो गणपो भवेत्। श्रीकृष्ण उ॰। राजन्वक्ष्ये तव शुक्लायां चतुर्थ्यां पूजयेन्नृप।। यदा वा सप्तमे भक्तिस्तदा पूज्यो गणाधिपः। प्रातः शुक्ल
तिलैः स्नात्वा तामध्याह्ने पूजयेन्नृप। निष्कमात्रसुवर्णेन तदर्धार्द्धेन वा पुनः।। स्वशक्त्या गणनाथस्य स्वर्णरौप्यमयाकृतिं। अथवा मृन्मयीं कुर्या
च्चित्तशाठ्यविवर्जितः। कृत्वा पूजां प्रयत्नेन स्नापयेत्पंचामृतैः पृथक्। गणाध्यक्षेति नाम्ना वै गंधं दद्याद्भक्तितः। विनायकेति पुष्पाणि धूपं वो
मासुतेति च। हेरंबप्रियायेति नैवेद्यं विघ्ननाशिने। वस्त्रं सर्वप्रदेत्यंके सुगंधं दद्यान्त्उमावितं। लोहद्वीं कृत्वा न गन्धान्विंशति वैकमेव वा। पूजयेत्तत्राम॰
प्रयत्नेन एभिर्नामपदैः पृथक्। गणाधिपनमस्तेस्तु उमापुत्राघनाशन। विनायकेशपुत्रेति सर्वसिद्धिप्रदायक। एकदंतेभवक्त्रेति तथा मूषक १६४

164A वाहनः। कुमार गुरवे तुभ्यं पूजनीयः प्रयत्नतः॥ दूर्वायुग्मं गृहीत्वा तु गंधयुक्तं प्रपूजयेत्। एकैके न च नाम्ना वै पूजा वै केन सर्वतः। एकेन दूर्वांकुरेण युग्मा
नामिष्टेन सर्वतः। सर्वैर्नामभिः पूजा कार्या। दत्वैकां सर्वनामभिरिति यागेवीरमित्रोदये। तथैकविंशतिं गृह्य मोहकानघ तपाविताना। स्थापयित्वा गणाध्य
क्षमभीप्स कुरुनंदन। दश विप्रा महातव्याः स्वयं वा घात्र या दश। एकं गणाधिपे दद्यात्तैनैवेद्यं नृपोत्तम। गणेशः प्रतिगृह्णाति गणेशो वै द
दाति च। द्वीपतेगणनाथाय प्रीपतां मे गणाधिपः। मोरवं सोमन संनिस्सकरोतु गणनायकः॥ इति मंत्रमनुच्चार्य दश दद्यात् द्विजातये॥ गुरुं व्रतोप
देष्टारमलंकृत्य प्रयत्नतः। दद्याद् दक्षिणां सम्यक् यथाविभवविस्तरं। जातरूपमयं देवं ब्राह्मणाय निवेदयेत्। कृत्वा नैमित्तिकं कर्म पूजयेदिष्टदे
वतां। ततः प्रार्थनां कुर्यात्। विघ्नानि नाशमायांतु सर्वाणि सुरनायक। कार्यं मे सिद्धिमायातु पूजिते त्वयि धातरि॥ प्रार्थनामंत्रः॥ विप्राय भोजनं
दद्यात् भुंजीयात्तैलवर्जितं। एवं कृते धर्मराजगणानाथस्य पूजने। विजयस्ते भवेन्नित्यं सततं सत्यं मयोदितं। त्रिपुरं हन्तुकामेन पूजितः शूल
पाणिना॥ शक्रेण पूजितः पूर्वं तथा वृत्रवधे नृप॥ रामेण राघवित्तः पूर्वं सीतामन्वेषता पुरा॥ दृष्टा सीता महाभागा वानरेण हनूमता। भगीरथे
न तद्वद्गंगामानयता पुरा॥ अमृतोत्पादनार्थो यतथा देवासुरैरपि। अमृताहरणात् पूर्वं वैनतेयेन पक्षिणा। आराधितो गणाध्यक्षो ह्यमृतं तेन ऊ

तं बुद्धा तायद्दा पूर्वं हि दैत्ये न हतो हाकिरणी नंदनः। आराधितो मया तत द्दृष्ट्वा विप्रशापसहितेन च। कुष्ठव्याधियुतेनाथ मांबेनाराधितः पुरा। जयकाम स्तथा
ते हि तमाराध्य यशोंकषीं। प्राप्स्यसि तं निजं राज्यं। हत्वा शत्रून् रणाजिरे। सिध्यंति सर्वकार्याणि तस्मिन् संपूजिते यतः। तेनाख्यातिं गतो लोके। नाम्ना
सिद्धिविनायकः। पूजयित्वा महाभाग गणेशं सिद्धिदायकं। सिध्यंति सर्वकार्याणि नात्र कार्या विचारणा। सूत उवाच। एवमुक्तस्तु कृष्णेन सानुज
:पांडुनंदनः। पूजयामास हेरंबं शत्रुवंत्रिपुरघातिन४॥ शत्रुसंघं निहत्याशु प्राप्तवान् अमोजसा। सिध्यंति सर्वकामाणि मनसा चिंतितानि पि
। विद्यारंभे पूजनीयो विद्यालाभो भवेन्नृणां। विवाहे क्रियमाणेतु पूजयस्वामी विनायकः। सिध्यंति सर्वकार्याणि अर्थसिद्धिर्भवेद्ध्रुवं। कृषिप्रारंभ
समये कर्षकेण विनायकः। पूजनीयः प्रयत्नेन धान्यं तस्याक्षयं भवेत्। पुत्रकामैस्तथा श्रद्धैः पूजनीयो गणाधिपः। विद्याकामो लभेद्विद्यां धनकामो
लभेद्धनं। जयं च जयकामश्च पुत्रार्थी लभते सुतं। पतिकामा च भर्त्तारं सौभाग्यं च सुवासिनी। विधवा पूजयित्वा तु वैधव्यं नाप्नुयात्क्वचित्। यं यं चिं
तयते कामं तं तं प्राप्नोति लीलया। वैश्यर्षे दिशुद्रोक्ष्यास्तु आद्यौ पूज्यो गणाधिपः। यस्मिन् संपूजिते विष्णुरीशो मानुस्तथा ह्युमा। हरिब्रह्ममुखा देवाः पू। राम·
जितास्युर्न संशयः। चंडिकाद्या मातृगणाः परितुष्टा भवंति वा यस्मिन् संपूजिते भक्त्या विघ्नः सिद्धिविनायके। यददं कृणु पाण्डित्यं श्रावयेद्वा समाहि १६५

165A नः। सिध्यंति मर्त्यकार्याणि सिद्धिदस्य प्रसादतः। इति स्कंदपुराणोक्तं सिद्धिविनायकव्रतं। इयमेव चतुर्थी शिवासंज्ञा॥ सुमंतुरुवाच। शिवा शांता सुखा राजन् चतु-
र्थी त्रिविधा स्मृता। मासि भाद्रपदे शुक्ला शिवलोकेषु पूजिता। भाद्रशुक्लचतुर्थी शिवा। माघशुक्लचतुर्थी शांता। भौमवारे शुक्लचतुर्थी सुखा। तस्यां स्ना-
नं तथा दानं उपवासो जपस्तथा। क्रियमाणं शतगुणं प्रसादाद्दंतिनो नृप। दंतिनो विनायकस्य। गुडलवणघृतानां दानं शुभकरं स्मृतं। गुडापूपैस्तथा
वीर पुण्यं ब्राह्मणभोजनं। चतुर्थ्यां नरशार्दूल पूजनीयाः सदा स्त्रियः। गुडैर्लवणापूपैर्जाभिः श्वश्रूः श्वशुरमातरः। ताः सर्वाः सुभगाः स्युर्वै विघ्नेश-
स्यानुमोदनात्। कन्यका च विशेषेण विधिनानेन पूजयेत्॥ इति भविष्यपुराणोक्तं शिवाचतुर्थीव्रतं। इति भाद्रपदशुक्लचतुर्थीव्रतानि॥ अथा-
श्विनशुक्लचतुर्थी निर्णयामृते। भाद्रपदस्य प्रबोधिताया देव्याः अश्वयुक्चतुर्थ्यां मंगलादिसंस्कारैः केशान्विशोधयेत्। तच्छुक्लपंचम्यां नवम्यां स्न-
पूर्वाह्णे गंधोदकैः स्तां देवीं स्नापयेत्॥ तत्सप्तम्यां तां बिल्वपत्रैः पूजयेत्। अष्टम्यामुपोषणं जागरणं कृत्वा प्रतियामं देवीं पूजयेत्॥ तन्नव-
म्यां विधिवत्तं पूज्य बलिदानं कुर्यात्। तद्दशम्यां देवीं रथमारोप्य गीतवादित्रशब्दैः सह नगरे भ्रामयेत्। तदुक्तं देवीपुराणे। कन्यायां कृष्णपक्षे तु पूजयि-
त्वार्द्रभेपि वा। कन्यायां दर्शनं तस्या द्वादश्यर्धः। इति मदनः। नवम्यां बोधयेद्देवीं गीतवादित्रनिःस्वनैः। शुक्लपक्षे चतुर्थ्यां तु देवीकेशविशोधनं। प्रातरे

जयकल्प
१६६
166

चतुर्पंचमणीह्यापयेत्सलिलैः शुभैः नं ॥ येः । मम मयांपत्रिका पूजा अष्टम्यामसुपोषणां । पूजा जागरणां चैव रथमारोपणं चैव रोध्नामयेदि स्यादि ॥ ॥ इत्याश्विन
शुक्लचतुर्थी । कार्तिककृष्णचतुर्थी करकचतुर्थी । सा चंद्रोदयव्यापिनी ग्राह्या । अत्र स्त्रीणामेवाधिकारः ॥ तासामेव फलश्रुतेः । अथ व्रतविधिः । आत्मन
मासपक्षाद्युल्लिख्य सौभाग्यपुत्रपौत्रादिसुस्थिरश्रीप्राप्तये करकचतुर्थीव्रतं करिष्य इति संकल्प्य अश्वत्थं विलिख्य तदधस्तात् शिवं षण्मुखसुतं
गौरीं च लिखित्वा षोडशोपचारैः पूजयेत् । पूजामंत्रः ॥ नमः शिवायै शर्वाण्यै सौभाग्यं संततिं शुभां । प्रयच्छ भक्तियुक्तानां नारीणां हरवल्लभे ॥ इति ततो नामो
त नाममंत्रेण शिवषण्मुखयोः पूजा कार्या । ततः पक्वान्नाक्षतदीपयुक्तकरकान् ब्राह्मणेभ्यो दद्यात् । ततः पिष्टकनैवेद्यं मोदकं सर्वं निवेदयेत् । ततश्चंद्रो
दयोत्तरं चंद्रायार्घ्यं दद्यात् । अथ कथा । मांधातोवाच ॥ अर्जुने तु गते तत्र भूमिं इंद्रकीलगिरिं प्रति । विषण्णमनसा सुभ्रूः द्रौपदी समचिंतयत् । अहो कि
रीटिना कर्मेतुमारब्धं महत्किल । विघ्नप्रचुरा मे तद्धि बहवः परिपंथिनः ॥ चिंतयित्वेति सा देवी कृष्णं कृष्णं जगद्गुरुं । महेशः प्रियं चिकीर्षंती सा पप्रच्छ द्वि
ग्रवारणां ॥ द्रौपद्युवाच । कथयस्व जगन्नाथ व्रतमेकं सुदुर्लभं । यत्कृत्वा पांति विघ्ना निर्विजय से मदाप्रियः । कृष्ण उवाच ॥ एतदेव महाभागे पाम·
शंभुः पृष्टः किलोमया ॥ पृष्टोहं तया कृष्णे जगद्धितमनुत्तमं । तस्मात्स्त्वं नं श्रुत्वा प्राह देवो महेश्वरः । शृणु देवि वरारोहे वक्ष्यामि त्वां महेश्वरि पार्वति १६६

166A

ग्रहंति स्वेष्टां कथयामास तां व्रतं चतुर्थिकां ॥ पार्वत्युवाच ॥ भगवन्कीदृशी प्रोक्ता व्रतं चतुर्थी करकान्विता ॥ विधानं कीदृशं प्रोक्तं केनेयं च पुराकृता ॥ ईश्वर उवाच ॥ शाक
प्रस्थपुरे रम्ये विद्वज्जनसमाकुले ॥ स्वर्णरूप्यसमाकीर्णे रत्नप्राकारशोभिते ॥ दिव्यनारीजनालोकवशीकृतजगत्त्रये ॥ वेदध्वनिसमायुक्ते स्वर्गादपि
मनोहरे ॥ वेदधर्मा द्विजस्तत्रावसद्देशे विदांवरः ॥ पत्नी तस्यैव विप्रस्य नाम्ना नीलावती शुभा ॥ सा तस्मै जनयामास सप्त पुत्रान्समप्रभान् ॥ मितौजसः ॥ कन्यां वीरव
तीं नाम्नीं सर्वलक्षणसंयुतां ॥ नीलोत्पलाभनयनां पूर्णेंदुसदृशाननां ॥ ततः काले शुभदिने विधिवद्द्विजोत्तमः ॥ ददौ तां वेदविदुषे विप्राय विधिपूर्वकं
॥ अत्रांतरे च संप्राप्ता व्रतं चतुर्थी करकाभिधा ॥ वीरवत्या समारब्धं व्रतं कामप्रदं शुभं ॥ कुड्ये वटं विद्रुमवक्त्रे गौरीं तस्य तले लिखित्वा शिवेन विघ्ननाथे
न षण्मुखेन सममन्वितां ॥ गंधपुष्पाक्षतैर्गौरीं पूजयामास मंत्रतः ॥ नमः शिवायै शर्वाण्यै सौभाग्यं संततिं शुभां ॥ प्रयच्छ भक्तियुक्तानां नारीणां हर
वल्लभे ॥ तस्याः पार्श्वे महादेवं विघ्ननाशं षडाननं ॥ पुनः पुष्पाक्षतैर्धूपैरानर्चे पृथक्पृथक् ॥ पक्वान्नाक्षतसंपन्नान्सदीपान्करकान्दश ॥ तथा
पिष्टकनैवेद्यभोज्यं सर्वं न्यवेदयत ॥ प्रतीक्षंत्यस्त्रयः सर्वे चंद्रमर्घ्यपराः स्थिताः ॥ सा बाला विकला दीना क्षुत्तृषापरिपीडिता ॥ निपपात
महीपृष्ठे रुरुदुर्बांधवास्तदा ॥ समाश्वास्य तां ते तु मुखमभ्युक्ष्य वारिणा ॥ तज्ज्ञाता तु विविंच्यैव मारुरोह महावटं ॥ हस्ते नोल्कां समादाय ज्वलंतीं स

जयकल्प. हपीडिता। भगिन्यै दर्शयामास त्वं दंष्ट्राजो दितं तदा। तं दृष्ट्वा चार्तिसुतप्ता ज्वलभुजे सुमनात तदा। चंद्रोदयं समाज्ञाय यत्नार्घ्यं दत्वा विधानतः। तद्दोषेण समुत्तम
१६७ स्याः पतिश्च मस्त्वद्दूषितः। पतितं धावि धं दृष्ट्वा शिवमम्ब्यर्चमासु नः। व्रतं निरशनं चक्रे यावत्तं स्वमरोमातः। चक्रुः संवत्सरं तति व्रतं न स्नात्वा योषितः। पूर्वोक्तेन
167 विधानेन सापि च चक्रे शुभानना। तदा यानाग्जी कन्यासखीभिः परिवारिता। एतदेव व्रतं कर्तुमागता स्वर्गलोकतः। वीरवत्यास्तदा प्याश्रममगमद्द्रागपतः स्वयं
। दृष्ट्वा तां मानुषीं देवी पप्रच्छ सकलं शची। वीरवती तदा पृष्टा प्रोवाच विनयान्विता। अहं पितृगृहं प्राप्ता मम तातो यं मे पतिः प्रभुः। न जाने कर्मणः कस्य फलं प्रा
प्तं मया धुना। मम भाग्यवशा देवी आगतासि महेश्वरि। अनुगृह्णीष्व मां मातर्जीवयाशु पतिं मम। इंद्राण्युवाच। त्वया पितृगृहे पूर्वं कुर्वंत्या करकाव्र
तं। वृथैवार्घ्यं त्वया दत्तो विना चंद्रोदयं शुभे। तेन ते व्रतदोषेण स्वामी लोकांतरं गतः। इदानीं कुरु यत्नेन करकाव्रतमुत्तमं। पतिं ते जीवयिष्यामि व्रत
स्यास्य प्रभावतः। व्यास उवाच। तस्यास्तद्वचनं श्रुत्वा व्रतं चक्रे विधानतः। प्रसन्ना साभवद्देवी शक्रस्य प्राणवल्लभा। तया व्रते कृते देवी जलेनाभ्युक्ष्य
तत्पतिं जीवयामास इंद्राणी देववद्भवत्सः। तत आगात्गृहं स्वीयं रेमे सा पतिना सह। धनं धान्यं सुपुत्रांश्च दीर्घमायुश्च लब्धवान्। तस्मात्त्वयापिप्य राम.
लेन व्रतमेतद्विधीयतां। सूत उवाच। द्वैपायनवचः श्रुत्वा चकार द्रौपदी व्रतं। तद्व्रतस्य प्रभावेन जित्वा तान् कौरवान् रणे। लेभिरे राज्यमतुलं धनधान्यसमम १६७

167A न्वितं करकं क्षीरसंपूर्णं तोयपूर्णमथापि वा। दद्यान्मिरलसंयुक्तं चिरंजीवतु मे पतिः। इति मंत्रेण करकान्प्रदद्यात् द्विजसत्तमे। सुवासिनी मोदयाद्व्रा
दद्यात्ताम्र एव वा। एवं व्रतं या कुरुते नारी सौभाग्यकाम्यया। सौभाग्यं पुत्रपौत्रादि लभते सुस्थिरां श्रियं। इति श्रीवामनपुराणे करकचतुर्थी व्रतं॥ कार्तिक
कृष्णचतुर्थ्यां कृष्णस्य विशेषः संवत्सरप्रदीपे। आश्विने कृष्णपक्षस्य चतुर्थ्यां रात्रियोगतः। अन्नमयं वास्थितः पुण्ड्रो राजा दशरथः स्त्रिया। दुर्गा व्रतत्रयं
जामदग्न्यो व्यविद्रूपे। आश्विनी चमुख्ये नान्द्रेशेति तत्रैवोक्तं। इयं प्रदोषव्यापिनी ग्राह्या। उभयत्र तद्व्याप्तौ परे ति तत्रैवोक्तं। अथ कार्तिकशुक्लचतु
र्थ्यां कूर्मपुराणोक्तं नागव्रतं मदनरत्ने॥ कार्तिके शुक्लपक्षस्य उपक्रम्य। तिथौ सुगाह्यायां तु समुपोष्य यथाविधि। शंखपालादिनागानां शेषस्य च म
हात्मनः। पूजा कार्या पुष्पगंधक्षीराप्यायनपूर्वकं इति। सुगाह्यायां चतुर्थ्यां एतद्व्रतमध्याह्नव्यापिन्यां कर्तव्यं। यथा वस्ते दवराणो। सुगाम ध्यंदिने
यत्र तत्रोपोष्य फलाशी भवान्। क्षीरेणाप्यायन्प्रयं संपारयेत् प्रयतो नरः। विषाणीतस्य नश्यंति नतं हिंसंति पन्नगाः॥ ॥इति नागव्रतं॥ अ
थ मार्गशीर्षशुक्लचतुर्थ्यां स्कन्दचतुर्थीव्रतं। स्कंदपुराणे। केन मोगानवाप्नोति निर्विघ्नं असुरान्। पुत्रपौत्रांस्तथा भोगं व्रतेनाप्नोति शंकर। ईश्वर उ
वाच। पुरा देवासुरे युद्धे असुरैर्निर्जितारणे॥ शक्राद्या देवताः सर्वा त्रिपुरावासिभिर्जिताः। तदाविवशा वहुनास्ते सर्वे मामुपागताः। त्राहि त्राहि व

जयर.ल.
१६८
168

हंतस्मेमयाप्याश्वासितास्तदा।विघ्नैरुपहतानांवसमादिष्टंव्रतंमम॥तत्कृतंतैस्तदास्कंदतेषांतुष्टोगणाधिपः।४ गणेशेनतुतुष्टेनविघ्नानांसंक्ष
यःकृतः।स्कंदउ.।विघ्नविनाकेनहेदेवेशव्रतमेतन्महाफलं।कृतंभवतिदेवेशतन्मेब्रूहिवृषध्वज।ईश्वरउवाच॥मार्गशीर्षेशुभेमासिसितप
क्षेतुषण्मुख ६ चतुर्थ्यांनियमंकुर्यात्विघ्नेशंपूजयेत्ततः।पुष्पैर्गंधैश्चनैवेद्यैर्लड्डुकैश्चसुसंस्कृतैः ७॥पललोंडेरकैश्चैवतथामोहालकैःप्रभुः।प
ललंतिलपिष्टं।उंडेरिकापिष्टादिमयावत्तुलाकाराः।पूजयित्वाविधानेनप्रार्थयेत्समानवः॥त्वत्प्रसादेनहेदेवेशव्रतंवर्षचतुष्टयं।९ निर्विघ्ने
नतुमेयातुप्रमाणांमूषकध्वज।प्रमाणांमर्यादासमाप्तिमितियावत्। १० प्रमाणंहेतुमर्यादाशास्त्रेषुप्रमात्वविसन्निधानात्।संसार
र्णवदुस्तारंसर्वंविघ्नसमाकुलं।तस्माद्दीनंजगन्नाथत्राहिमांगणनायक।११ एवंप्रार्थ्यगणाध्यक्षंभुंजीयाद्वाग्यतस्ततः।एवंकृमेणसंपूजयेत्
क्रमतीनरोत्तमः१२ गणेशंमनसाध्यायन्ततोरात्रौस्वपेद्बुधः।एवंसंवत्सरंकृत्वाचतुर्थींप्रतिषण्मुख १३ ततोमार्गशिरेमासिविधिनानेनपूजनं
।नक्ताशीचभवेत्तद्वद्द्वितीयेवत्सरेपुनः।१४ मार्गशीर्षेतुसंप्राप्तेतृतीयेवाप्ययाचितीभवेत्।अयाचितेनाब्दमेकंततोमार्गशिरेपुनः राम.
१५ आरभ्योपवसेदब्दमेकंतद्वत्पूजनं।एवंकृमेणविधिवद्व्रतार्थव्यानिमानवः।समाप्यतुततोयंतेव्रतस्नातोमहाव्रती।कार्येद्धेमध १६८

168A ष्ठितं स्वशक्त्याखुरथं शुभं। १७ आखुरथं गणेशं। कारयेद्दर्भिकैः शुभ्रैररविंदं सुयन्त्रकं। तस्योपरि घटं स्थाप्य ताम्रपात्रेण संयुतं। स्थापयेत्कुम्भशालेपैस्तं
डुलैर्वस्त्रयुग्मसुरस्व १९ तस्योपरि न्यसेद्देवं मासोमिर्वेष्टसद्व्रत। पूजयेत्सुपुष्पधूपदीपैर्नैवेद्यैर्विविधैस्तथा २० मोदकैश्च ततः शुभ्रैः पक्वान्नैर्घृतपाचि
तैः। अनेन विधिना कल्पयेत्तत्र गणेशः प्रीयतामिति तामिति। जागरं कारयेद्विद्वान् गीतवादित्रनिस्वनैः। पुराणश्रवणकैश्चैव ततो रात्रिं क्षपयेद्बुधः। २२
प्रभाते विमले स्नातो होमकार्याणि कारयेत्। तिलव्रीहियवैश्चैव तथा सिद्धार्थकैः शुभैः २४ होमश्चैतैर्मन्त्रैः कार्यः। ॐ गणाय स्वाहा। ॐ
गणाधिपतये स्वाहा २ मेघवर्णाय स्वा०। ॐ कूष्माण्डाय स्वा०। त्रिपुरान्तकाय स्वाहा ५ ॐ एकदन्ताय स्वाहा। ६ ॐ लम्बोदराय स्वाहा ७ ॐ कद्दंष्ट्रा
य स्वाहा। ॐ विघ्नेश्वराय स्वाहा। ॐ ब्रह्मणे स्वाहा। १० ॐ इन्द्राय स्वाहा ११ ॐ यमाय स्वाहा १२ ॐ वरुणाय स्वाहा। ॐ सोमाय स्वाहा। ॐ सूर्याय
स्वाहा १५ ॐ गणेशाय स्वाहा। ॐ परमेष्ठिने स्वाहा। अष्टोत्तरशतं हुत्वा ततो व्याहृतिभिर्हुनेत्। यावच्छक्त्या महाबाहो ततो होमः समाप्यते २४
। ततस्तु अर्चयेद्विद्वान् नानाविधभक्तिभावतः। वस्त्रैराभरणैर्दिव्यैः पूजयित्वा क्षमापयेत्। २५ ततस्त्रीपुरुषो भक्त्या स्वलंकाराभरणैः शुभैः। शय्यां दद्यात्त
तो राजन्सोपधानां सगेंडुकां। गां सवत्सां ततो दद्यात्सवालंकारभूषितां। प्रीयतां गणनाथो मे इति मन्त्रमुदाहरेत् २७ ब्राह्मणान्भोजयेद्भक्त्या वस्त्रैर्वि

व्रतकल्प
१६९
169

शति संख्ययोः तेभ्यस्तु कारकान्द घाल्तिलपात्रसमन्वितान्॥२८ अनेन विधिना यस्तु करोति व्रतमुत्तमं॥ न विघ्नैरभिभूयेत गणनाथप्रसादतः॥ यं करोति
समारंभे निर्विघ्नं तत्फलप्रदं॥ एवं तथा कृतं सर्वैरिंद्राद्यैस्त्रिदशैर्विभो ३० रुद्रेण ब्रह्मणा चैव विष्णुना च कृतं पुरा॥ अन्यैश्चैव महीपालराजभिर्वेदु
मिः कृतं॥ ३१ एतद्देवव्रतं वीर्यमानुषैर्भूतले मुने॥ अनेन क्रियमाणेन न विघ्नैरभिभूयते॥ ३२ स्वर्गलोकात्सरिश्च ष्ठस्ततो याति परां गतिं॥ इति स्कंद
पुराणोक्तं मोघापनं कृष्णचतुर्थीव्रतं॥ मार्गशुक्लचतुर्थीवरचतुर्थी॥ तस्मां सर्वार्थसाधकमद्य चतुर्थ्यां साध्यं व्रतमुक्तं स्कंदपुराणे॥ चतुर्थ्यां
मार्गशीर्षे तु शुक्लपक्षे नृपोत्तम॥ प्रारभ्य प्रतिमासं च चतुर्थ्यां गणनायकं॥ संपूज्य विधिना कुर्यादेकभक्तं समाहितः॥ अक्षारलवणां तैवं एष्यां संवत्सरेत
तः॥ द्वितीये वत्सरे चाथ नक्तं प्रतिचतुर्थिकं॥ कुर्याद्धराणशमभ्यर्चत तीयेयाचितं तथा॥ एवमेव प्रकुर्वीत चतुर्थे स्यादुपोषणं॥ ततश्चतुर्थेसे पूर्णे तु
घापनमाचरेत॥ इदं वरचतुर्थ्याख्यं व्रतं सर्वार्थसाधकमिति॥ इति स्कंदपुराणोक्तं वरचतुर्थीव्रतं॥ अत्र प्रथमवर्षे एकभक्तमुक्तं तत्स्वरूपं तु
दिनार्द्धसमये तादिना एवमेवोक्तं॥ यत्तु केनचिदुक्तं भोजनं तु विधिप्राप्तं द्वात्रिंशद्ग्राससमान्वितं तेन एकभक्ते एकोनत्रिंशद्ग्रासा इति फलितोर्थः इति राम·
॥तत्तुच्छं॥ भिक्षुकस्य एकभक्ते कदाचित्स्वल्पभिक्षाप्राप्तौ एतन्नियमस्यासंभवात्तवचनाभावाच्च॥ स्वल्पउमुक्षावत एकोनत्रिंशद्ग्रासादनासंभवा १६९

169A ज्ञानवत्त्वसौ ग्रामात्तु नेर्भक्ष्याः षोडशारण्यवासिनः। द्वात्रिंशतं गृहस्थस्य सापरिमितं ब्रह्मचारिणा इ तत्र नियमो विधीयत इति चेत्सत्यमेतन्नियमस्य परिगृही
तानियतमात्रं प्रातरनुष्ठेयं प्राणाग्निहोत्रविषयत्वात् एतत्तद्वचनस्य तद्विषयत्वं च बोधायनसूत्रे स्पष्टं। ग्रामलक्षणं तु कुक्कुटोड्डुसमो ग्रामो सोपधावासुरवमाविशन्तद्
तियावद्देवयसितं दशसमितिया ज्ञवल्क्यभूर्मप्रभ्रपोहन्तं तस्मान्न्यूने ग्रासत्र्येराान्तित्सत्र्यशास्त्रतएवार्थो ग्राह्यः॥ माघशुक्लस्य चतुर्थी विकृतं दुर्ग चतुर्थी
तिम हेनाडि दीक्षिता॥ माघशुक्लस्य चतुर्थ्यां संकष्टचतुर्थीव्रतारंभ इति काश्चित्। माघमासे कृष्णपक्षे चतुर्थ्यां व्रतमुत्तमं। प्रतिमासं प्रकुर्वीत व्रतं संकष्टनाश
नमिति भविष्योत्तरवचनात्। माघकृष्णचतुर्थ्यां व्रतारंभं कृत्वा प्रतिमासं कार्यमित्यर्थः॥ इयं चंद्रोदयव्यापिनी ग्राह्या पूजाविधूदये कार्येति तत्रैवोक्तेरिति। मा
घशुक्लचतुर्थी वरदाख्या कुंदचतुर्थीति च हेमाद्रौ निर्णयामृते चोक्तं तत्र सा प्रदोषव्यापिनी ग्राह्या॥ अत्र कुंदपुष्पैः शिवमभ्यर्च्य नरो नक्तभोजी श्रियमा
प्नोति। तदुक्तं कूर्मपुराणे। कुंभे शुक्लचतुर्थ्यां तु कुंदपुष्पैः सदाशिवं संपूज्य यो हि नक्ताशी स प्राप्नोति श्रियं नर इति। अस्यामेव ब्रह्मपुराणे गौरीचतुर्थीव्रतं उ
माचतुर्थ्यां माघे तु शुक्लायां योगिनीगणैः॥ आरभ्य स्थापयित्वा महाशवभूयः सांगात्लवके यशोः। समजुःसहिता यस्मात्तस्मात्सा प्रोक्ता सुभगा उमा। तस्मात्सा तत्र
संपूज्या नरैः स्त्रीभिर्विशेषतः। कुंदपुष्पैः प्रयत्नेन समभ्यर्च्या समाहितैः। कुंकुमालक्तकाभ्यां च रक्तसूत्रैः सकंकणैः। अर्घ्यैः पुष्पैस्तथा धूपैर्दीपैर्वलिभिरे

जयकल्प·

१७०

170

वृत्वा गुडार्द्रकां भांपयसा लवणो नाथ पालकैः।पूजा स्त्रियश्चाविधवास्तथा विप्राश्च शोभनाः।सौभाग्यमेव दद्युःपेप श्राद्धोक्तमेवं क्षुभिः सहेति।।पालकैः कुंडकैः म
ण्डाविशेषैरित्यर्थः।।ओं विधवाऽस्त्रनेन सधवाः कुमार्यश्च संगृहीताः इति गौरीवतुर्थीव्रतं।देवीपुराणोक्तं पंकुंडवतुर्थीमुक्तं।माघमासे तु संप्राप्ते वतुर्थीं कुं
उसंज्ञिता उपोष्या मासा सुरश्रेष्ठ ततो राज्यं भविष्यति।सर्वोपहारसंयुक्तं सर्वोपस्करमाहरेत्।पुष्पपत्रफलं नालेकं इमत्लानि यानि वा वन्यानि चैव
धान्यानि तदन्यानि विशेषतः।लक्षसारवारबीजानि नवानि फलानि र।वल्लवं दुर्लभं शाकं लवणं गुडशर्करा।।वंजीरकं कुसुंभधान्यानि विविधानि
।।दातव्यानि सुरश्रेष्ठ कन्यकानां तु भक्तितः।।सूर्पपात्रं तथा भांडं मन्मयानि विशेषतः।उद्दिश्य दापयेद्देवी प्रीयतां मे सदा इति।अनेन विधिना शक्र सौभाग्यं
पुत्रसंततिः वर्द्धते लात्र संदेहो नान्यथा मम भाषितं।।इति देवीपुराणोक्तं कुंडवतुर्थीव्रतं।माघशुक्लवतुर्थ्यां तु ढिंढिजोक्ता काशीखंडे।इयमेव तिल
वतुर्थीसूच्यते।माघशुक्लवतुर्थ्यां तु नक्तव्रतपरायणाः।ये त्वां ढुंढेर्चयिष्यंति ते र्च्याः सुरासुरैर्दुहां।।विधाय वार्षिकीं यात्रां वतुर्थीं प्राप्य तापसी।शुक्लां शु
क्लतिलैर्बध्वा प्राश्नीयाल्लडुकान्वती।तां यात्रां नाचरयः कुर्यान्नैवेद्यं तिललडुलैः।।उपसर्गसहस्रैस्तु सहंतमो ममाज्ञया।होमं तिलाज्यद्रव्येण यः करि ष्यम·
ष्यति भक्तितः।तस्यां वतुर्थ्यां मंत्रज्ञस्तस्य मंत्रः प्रसेत्स्यतीति।माघमासे वतुर्थ्यां तु तस्मिन्काल उपोषितः।अर्चयित्वा तु यो देवि जागरं तत्र कारयेत्।इतिवि १७०

१७१

170A

स्थली मे तौ लैंगे पि। तिथितत्वे भविष्योत्तरे माघशुक्लमधिकृत्य चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता। सौभाग्यं मंगलं कुर्यात्तस्मं मां श्रीरपि श्रियं। माघशुक्ल
चतुर्थ्यां भविष्यपुराणोक्तं शांतिचतुर्थीव्रतं। स्नानं तु वानाम। माघेमासि तथा शुक्ला या चतुर्थी महीपते। सा सर्वशांतिदा नित्यं शांतिं कुर्यात्सदैव हि। स्नानं दानं तथावि:
कं मे मृवं मस्यां कृतं विभो। मंत्रेत्सहस्रगुणितं प्रभावात्तद्ददंति नः सदा। कृतोपवासं यस्तस्यां पूजयेद्विघ्ननायकं॥ तस्य होमादिकं कर्म भवेत्साहस्रकं नृप। लवणं गुडश्च पायसं घृ
तालकं मोदकांश्च भारत। दत्ता भक्त्येव विघ्नेशे फलं सा हस्रकं लभेत। विशेषस्तु तथा राजन्पूजयेत्कर्तुरुं नृप। पायुडल्लगाघृतैर्वीरमदास्मां कुरुनंदन इति भविष्यपुरा
णोक्तं शांतिचतुर्थीव्रतं। सौमवारयुक्तचतुर्थ्यां विशेष उक्तो लैंगे। अंगारकचतुर्थ्यां ये स्नानो नर वहांभसि। अथ चांगारके शानं नमस्यंति नरोत्तमाः। नूतेषां ग्रह
पीडा च कदाचित्क्वापि जायत इति। अन्यत्रापि। अंगारकदिने प्राप्ते चतुर्थी वा चतुर्दशी। षष्टिवर्षसहस्राणि तत्कर्त्ता विंदते फलं। चतुर्थी भूमिपुत्रेणेत्यादि
व्रतमसाप्रकृतोद्दष्टव्यं। अथ मत्स्यपुराणोक्तमंगारकचतुर्थीव्रतं। शुक्र उवाच। चतुर्थ्यंगारकदिने यदा भवति दानव। मृदा स्नानं तदा कुर्यात्पद्मरागविभूष
ितः। अग्निर्मूर्द्धा दिवो मंत्रं जपंस्तिष्ठेदुदङ्मुखः। शूद्रस्तु भक्तिमान्मौनमास्थितो भोगविवर्जितः। अथास्तमित आदित्ये गोमयेनोपलिप्य च। प्रांगणं पुष्पमा
लाभिरक्षताभिः समंततः। अभ्यर्च्याभिलिखेत्पद्मं कुंकुमेनाष्टपत्रकं। कुंकुमस्याप्यभावे तु रक्तचंदनमिष्यते। चत्वारः करकाः कार्या भक्ष्यभोज्यसमन्विताः।

जयकल्प
१७१
171

तंडुलैरक्तशालीयैः पद्मरागैश्च संयुताः । चतुःकोणेषु तान्न्यस्त्वा फलानि विविधानि च । ताम्रकरकान् गंधमाल्यादिकं सर्वं तथैवाधिनिवेदयेत् । सुवर्णशृंगी कपिला
मयाव्यैौ प्यैः खुरैः कांस्यदोहा सवस्त्रा । धुरंधुरं रक्तमतीवसौम्यं धान्यानि सप्तांबरसंयुता । निधुरंधरं वृषभं सप्तधान्यानि । यवगोधूमधान्यतिलकंगुश्यामाक
चीनकानि । अंगुष्ठमात्रं पुरुषं तथैव सौवर्णमत्यायतबाहुदंडं । चतुर्भुजं हेममयं निविष्टं पात्रे गुडस्योपरि सर्पिषायुतं । मासस्वरज्ञाय जितेंद्रियाय पात्राय
शीलान्वयसंयुताय । दातव्यमेतत्सकलं द्विजाय कुटुंबिने वेदवदंसयुक्ते । भूमिपुत्र महातेजः स्वेदोद्भव पिनाकिनः । रूपार्थी त्वां प्रपन्नोहं ग्रहाणार्घ्यं नमोस्तु ते
॥ मंत्रेणानेन दत्वार्घ्यं रक्तचंदनवारिणा । ततोर्चयेद्द्विजवरं रक्तमाल्यांबरादिभिः । दद्यान्मंत्रेणानेन भौमं गोमिथुनान्वितं । भौमं प्रवोक्ता सुवर्णामपी भौ
मप्रतिमां । गोमिथुनं पूर्वोक्तमेव । पूर्वोक्तगुणसंपन्नाय ब्राह्मणाय दद्यात् । इत्यर्थः । शय्यां च शक्तितो दद्यात्सर्वोपस्करसंयुतां । दद्यादिष्टतमं लोके यच्चास्य दयि
तं गृहे । तत्तन्महार्पते देयं तदेवाक्षतमिच्छता । ममापतिश्च भौमः प्रह्लादितोनंततः । रेतावित्सर्जयेद्द्विजपुंगवं । नक्तमक्षारलवणमश्नीयाद्घृतसंयुतं । शक्त्याय
सुकुमान्कुर्यात्स्वमंगारकाष्टकं । चतुरो वाथवा तस्य यस्तु रूपं तद्ददामि ते । रूपसौभाग्यसंपन्नः पुनर्जन्मनिजन्मनि । वैष्णवो यदि शैवो वा भक्तश्च सप्तद्वीपा
धिपो भवेत् । सप्तकल्पसहस्राणि रुद्रलोके महीयते ॥ अथात्रोपयुक्तो भौमपूजाविधिर्लिख्यते । अस्य मंत्रस्य विरूपाक्ष ऋषिः । गायत्री छंदः । मंगलो देव

एम.
१७१

171A

ता।ॐ वीजं ह्रां शक्तिः। खें कीलकं इष्टार्थे विनियोगः इति पठित्वा ऋष्यादीन् शिरःप्रभृतिषु विन्यस्य षड्भिर्बीजैः षडंगानि विधाय जपाभं शिवस्त्रे दजं हस्तपद्मे
दाशूलशक्ती वेदं धारयंतं। अवंतीसमुत्थं सुमेषासनस्थं धरानंदनं रक्तवस्त्रं समीडे इति ध्यात्वा मानसोपचारैः संपूज्य पुष्पांतोवास्य पूजां कृत्वा षड्वैरी
: षडंगानि संपूज्य एकविंशतित्रिकोणकोष्ठेषु मंगलादीन् पूजयेत्। तद्यथा। मंगलाय नमः। भूमिपुत्राय· ऋणहर्त्रे· धनप्रदाय· स्थिरासनाय· महाकायाय
· सर्वकर्मविरोधकाय· लोहिताय· लोहिताक्षाय· सामगानां कृपाकराय· धरात्मजाय· कुजाय· भौमाय· भूतिदाय· भूमिनंदनाय· अंगारकाय यमाय नमः। सर्व
रोगापहारकाय· वृष्टिकर्त्रे· वृष्टिहर्त्रे· सर्वकामफलप्रदाय नमः इति। ततः इंद्रादीन् वज्रादींश्च संपूज्य धूपादिशेषपूजां समापयेत्। ततो विशेषार्घ्यं दद्यात्। इ
ति मत्स्यपुराणोक्तमंगारकव्रतविधिव्रतं। अथ भविष्यपुराणोक्तं गणेशव्रतं॥ ब्रह्मोवाच। गणेशः पूजितः कुर्मो वत्वध्यो सर्वे कर्मसु॥ अविघ्नं स्व
लोके ख्यातिमिष्टां प्रयच्छति। कर्मस्व विदुषां विघ्नं करोत्येव न संशयः। अविदुषां स्मरणान्मुक्तवेतां। तेन कर्मकाले तु शंसमर्जयेः पूजा च। मूलमंत्रस्य तं ज्ञात्वामि
रां मंत्राश्च कीर्तिताः। पूर्ववत्समसंधा स्युः कर्त्तव्यश्च तिथीश्वरः॥ ब्रव्रातिथीश्वरोगणेशः गंधपुष्पोपहारैश्च यथाशक्ति विधीयते। पूजाशाठ्येन शाठ्यो
न तेनापि तत्फलप्रदः। आज्यधारा समिद्भिश्च दधिक्षीरान्नमादिकैः। पूर्वोक्तफलदो होमः कृतः शांतेन चेतसा॥ इति भविष्यपुराणोक्तं गणेशव्रतं॥

जयकल्प
१७२
172

स्ततऊ॰॥त्वत्थर्यो तुझ्यमर्खुजानः स्नात्वा न घान्त पोतमः पक्कांबरधरो भूत्वा रक्तगंधानुलेपनः ॥ रक्तवीतो गणाधीशं विनायकमथार्चयेत् ॥ रक्तचंदनतोयेन
स्नानपूर्वविधानतः ॥ विलिप्य रक्तगंधेन रक्तपुष्पैः प्रपूजयेत् ॥ ततो मौ हत्त्वा भूपमाज्ययुक्तं सचंदनं ॥ नैवेद्यं चैव हारिद्रं गुडखंडघृतप्लुतं ॥ एवं संवत्सरं
पूजयेद्विनायकमथोक्तवान् ॥ ध्यानं ऊरुवाच ॥ नमस्कृत्वा महादेवं स्तोष्येहं तं विनायकं ॥ महागणपतिं शूरमजितं जयवर्द्धनं ॥ एकदंतं द्विदंतं च चतुर्दंतं च
तुर्भुजं ॥ त्र्यक्षं त्रिशूलहस्तं च रक्तनेत्रं वरप्रदं ॥ आंबिकेयं शंकुकर्णं प्रचंडं दंडनायकं ॥ आरक्तं दंडिनं चैव वह्निवक्त्रं हुतप्रियं ॥ अनर्चितो विघ्नकरः सर्व
कार्येषु यो नृणां ॥ तं नमामि गणाध्यक्षं भीममुग्रमुमासुतं ॥ मदमत्तं विरूपाक्षं भववज्रसमुद्भवं ॥ सूर्यकोटिप्रतीकाशं भिन्नांजनसमप्रभं ॥ शुद्धं सुनिश्चलं शां
तं नमस्यामि विनायकं ॥ नमोस्तु ब्रह्मरूपाय विष्णुरूपाय ते नमः ॥ नमोस्तु गजरूपाय गजाननपतये नमः ॥ मेरुमंदररूपाय नमः कैलासवासिने ॥ नमो विघ्नवि
नाशाय नमस्ते ब्रह्मचारिणे ॥ भक्तस्तुताय देवाय नमस्तुभ्यं विनायक ॥ त्वमाद्यगणोस्थैर्षाद्देवानां कार्यसिद्धये ॥ गजरूपं समास्थाय त्रासिताः सर्वदानवाः
ऋषीणां देवतानां च स्तुतः सर्वैर्मनोरथाः ॥ पतस्ततः स्तुरेत्यैः पूज्यसेतं भवात्मजः ॥ त्वामाराध्य गणाध्यक्षं सर्वज्ञं कामरूपिणं ॥ कार्यार्थं रक्तकुसुमैः रक्त राम·
चंदनवारिभिः ॥ रक्तांबरधरो भूत्वा चतुर्थ्यामर्चयेज्जपेत् ॥ त्रिकालमेककालं वा नियतो नियताशनः ॥ राजानं राजपुत्रं वा राजमंत्रिणमेव वा ॥ राज्यं वा स १७२

172A

वैविघ्नेशवशीकुर्यात्सराष्ट्रकं। अविघ्नं तपसा मघं कुरु विघ्नविनायक। अमपालं समस्तं तो भक्त्या पूजितस्तु विशेषतः। यत्फलं सर्वतीर्थेषु सर्वयज्ञेषु यत्फलं
तत्फलं समवाप्नोति स्तुत्वा देवं विनायकं। विषमं न भवेत्तस्य न स गच्छेत्पराभवं। न च विघ्नो भवेत्तस्य जातो जातिस्मरो भवेत्। य इदं पठति स्तोत्रं षड्भिर्मासैर्वरं ल
भेत्। संवत्सरेण सिद्धिं च लभते नात्र संशयः। इति नरसिंहपुराणोक्तं गणेशचतुर्थीव्रतं। गणेशस्तोत्रं च। अथांगारकशुक्लचतुर्थ्यां भविष्यपुराणोक्तं सु
खचतुर्थीव्रतं। सुमन्तुरुवाच। शृणुष्वावहितो राजन् सौभाग्यकरणं परं। चतुर्थीकृतशार्दूल रूपसौभाग्यदं शुभं। सुखव्रतं महापुण्यं रूपारोग्यप्रदाय
कं। सुखसौभाग्यकरं धन्यमिदं पुण्यप्रभावहं।। परत्र फलदं वीर इह रूपप्रदायकं। विलासं विभ्रमाक्षेपं हसितं चेष्टितं शुभं सुखव्रतेन सर्वं स्यात्सु
भं कुरु कुलोद्वह। कृतपूजेन तु देवेशो विघ्नेशो शिवयोः सुते। यदा शुक्लचतुर्थ्यां तु वारो भौमस्य वा भवेत्। तदा सा सुखदा ज्ञेया चतुर्थी वै सुखेति च। पुरा
मैथुनमाश्रित्यास्थिताभ्यां तु हिनाचले। भीमोमाभ्यां महाबाहो रक्तबिन्दुश्च्युतः क्षितौ। मेदिन्या सम्प्रमलेन सुखेन तु धृतो जन्यः। नाम्नः स्तस्या महावी
र रक्तोऽरक्तसमुद्भवः। उमायाः क्षितिवासस्मात्स्मादंगारको ह्ययं। अंगदेंगारकोतिश्च अंगानां सुखदो नृप। सौभाग्यादिकरो यस्मात्तस्मादंगारको
मतः। भक्त्या चतुर्थ्यां नक्तेन यो वै श्रद्धासमन्वितः।। उपोषति नरो राजन्नारी वा नन्यमानसा।। पूजयेच्च कुजं भक्त्या रक्तपुष्पविलेपनैः। गणेशं प्रथ

जयकल्प. १७३ 173

मंपञ्जभक्त्याश्रद्धासमन्वितः। स तु तुष्टः प्रयच्छेत सौभाग्यं रूपसंपदं। एवं तु कृतसंकल्पः स्नानं कुर्याद्यथाविधि। गृहीत्वा मृत्तिकां वंदेन्मंत्रेणानेन भा
रत। इहत्वं विदिता पूर्वं कृष्णेनोद्धरता किल। तस्मान्मे दह पाप्मानं यो मया पूर्वसंचितः। इमं मंत्रं पठन् वीर आदित्याय प्रदर्शयेत्। आदित्यरश्मिभि
ः स्पृता गंगाजलकणोक्षिता। दत्वा मृदं शिरसि तां सर्वांगेषु नियोजयेत्। ततः स्नानं प्रकुर्वीत मंत्रपूर्वं जलेषु भोः। सूयमायः स्नुसर्वेषां दैत्यदान
व सेविताः। स्वेदांडजोद्भिजा नाव जरायुरगास्तयोनयः। स्नातोऽहं सर्वतीर्थेषु ह्रदप्रस्रवणेषु च। तथा काश्यपादितीर्थेषु मासा नदीसरस्सु च। नदीषु देव
खातेषु स्नातोऽहं तेषु तेषु वै। ध्यायन्नेनं मंत्रं ततः स्नानं समाचरेत्। ततः स्नातः शुचिर्भूत्वा गृहमागत्य च स्पृशेत्। दूर्वामश्वत्थशमीस्पृक्षां गां च मंत्रे
णामंत्रविता। दूर्वां नप समंत्रेणाश्वत्थशमपस्तथा। गां दृष्ट्वा तु ततो देव्यै दद्याद्वीरयदक्षिणां। समालभ्य तु हस्तेन ततो मंत्रमुदीरयेत्। सर्व
देवमयी देवी निर्मितिस्त्वं प्रपूजिता। तस्मात्स्पृशामि वंदे त्वां वंदिता पापहा भव। ततो मौनेन वाग्यतः सर्वं हित्वा गृहदेवताः। प्रक्षाल्य च मम पाया स्वावा
चांतोऽग्निगृहं विशेत्। होमं तत्र प्रकुर्वीत एतैर्मंत्रपदैर्वरैः। सर्वाय शर्वपुत्राय पार्वतीशसुताय च। कुजाय लोहितांगाय ग्रहेशांगारकाय च। ओंकाराम.
रक्षर्वैकैर्मंत्रैः स्वाहाकारसमन्वितैः। अष्टोत्तरशतं वीर अर्द्धमर्द्धमेव वा। एभिर्मंत्रपदैर्मंत्र्या कामतो कामतोन पाखादिरीभिः समिद्भिश्च आ १७३

173A

जामिश्रैर्यवैस्तिलैः। भक्ष्यैर्नानाविधैश्चान्यैः भक्त्याभक्तिसमन्वितैः। कृत्वाहोमं ततो वीरदेवं संस्थापयेत्ततो। सौवर्णं राजतं ताम्रं मृन्मदारुमयं नृप। देव
दारुमयं वापि श्रीखंडघटितं तथा। भद्रदारुः सुरलः। अंगारोपपात्रे तौ पेवाद्यर्घैः कुंकुमकेसरैः। अन्नैर्वा लोहितैर्गंधैः पत्रैः पुष्पैः फलैरपि॥ रत्नैश्च विवि
धैर्वीरं अथवा भक्तितोर्चयेत्। यावद्दिनं जातु वित्तं पुण्यं वा वा भक्तितः। तावद्दिव्यं देते पुण्यं स्यान्दं शतसहस्रकं। यद्दातात्रमये पात्रे वंशजे मृन्मये थवा
। पूजयेत्तु नरो भक्त्याश्रद्धया कुंकुमकेसरैः। ॐ अंगारकाय नमः पादयोः। कुजाय नमः वदने। भीमाय नमः स्कंदयोः। मंगलाय नमः बाह्वोः। वक्राय
नमः ऊर्वोः। वक्राय नमः जंघयोः। लोहिताय नमः शिरवायां। पुरुषाकृतिं कुजं पात्रे एतैर्मंत्रपदैर्यजेत्। भूमिपुत्र महातेज स्वेदोद्भव पिनाकिनः।
रूपार्थी त्वां प्रपन्नोस्मि गृहाणार्घ्यं नमोस्तु ते। अर्घ्यमंत्रः। महादेवांगसंभूत मेदिनीगर्भसंभव। अंगारक महाराज लोहितांग नमोस्तु ते। स्रग्गंधधू
पधूपदीपैर्वा ब्राह्मणोयः प्रपूजयेत्। गुडोदनघृतक्षीरगोधूमान्शालितंडुलान्। अपेक्ष्य शक्तिं दद्याद्दै ब्राह्मणे भोपतेंद्रियः वित्तशाठ्यं न कुर्वीत विध
मानेधुनेनृप। वित्तशाठ्यं हि कुर्वाणो नामुत्रफलभाक्भवेत्। शतानीक उवाच॥ अंगारकेण संयुक्ता चतुर्थी नक्तभोजनैः। उपोष्याः कति संख्यास्तु
उताहो मस्तदैवाहि। सुमंतुरुवाच॥ चतुर्थीं तु चतुर्थीं तु यदांगारकसंयुता। चतुर्थी तु तु चतुर्थीं तु विधानं प्राणुपाहृशां। एकश्चतुर्थी शक्तितो वि

जयकल्प:
१७४
174

शेषवचनः अपरस्तत्संख्यापरइसर्थः।उपोष्यात्तत्र तत्रैव प्रदेयो विधिवत्कुजः।या यास्वङ्गारकचतुर्थी सा साउपोष्या।उपोषनक्तेनविमोचनस्वः कुज
मंयुताः।सर्वास्वंगारकचतुर्थीषु सामान्यविधिनोपोषमाणा हतिस्मृतिसृमितितरितापां चतुर्थ्यां विशेषविधिं स्मरात्वन्तिसर्वेः।दशमो वार्षिकं सुवर्णं दशा
र्द्धे मयापिवा।सौवर्णपात्रे रौप्येवाभक्त्यातात्रमयेपिवा।विंशत्पलानिपात्राणि विंशत्यर्द्धमथापिवा।विंशत्कर्षाणि शीरत्नतोहीनंनकारयेत्।श
क्त्याविन्तस्पृभ्व्यात्तपात्रेताम्रमयेपिवा।प्रतिष्ठाप्यकुजं पात्रे रक्तवस्त्रेणवेष्टितं।पुष्पमंडपिकांकृत्वा दिव्यैर्धूपैश्च धूपितां तत्रस्थं पूजयेद्देवं पूर्वमं
त्रैःक्रमेणतु।भक्ष्यभोज्यैरनेकैश्च फलैरत्नैश्च संयुतैः।वस्त्रैःप्रावरणौर्यानैः शय्यापानद्गुरासनैः।छत्रैःपुष्पैर्गंधवरैः शक्त्याविन्तानुसारतः।ब्राह्म
णायवतांदद्याद्दक्षिणासहितां नृपा वाचकायमहाभागो गुणिने श्रेयसे नघ।अंगारकेण संयुक्ता धेनुः शीलसमन्विता।अनेनविधिनादत्वायथोक्तफ
लभाग्भवेतादृतिते कथितापुण्यपातिथीनामुत्तमातिथिः।यामुपोष्य नरो रूपं दिव्यमाप्नोति भारत।कांसात्रेय समं वीरं तेजसारविसप्रभं।प्रताषे हरितुल्यं
दुसर्वतोवलसाम्भितं ईदृक्रूपं वरं प्राप्य पातिभीमसदोनृप।भमन्नादादिघ्ननाशसमगणेशसंगणाय ने।पठतांश्रृण्वतां राजन्न कुर्वतां च विशेषतः।ब्रह्म राम:
हत्यादिपापानिक्षीयंते नात्रसंशयः।इति भविष्यपुराणोक्तमङ्गलवचतुर्थी।हेमाद्रौ भविष्यपुराणो।चतुर्थ्यां यम दास्य जननैग्रहो व्रतान्वितः।आरवारे १७४

174A इति निर्णयामृते पाठः। दत्वा तिलान्नं विप्राय स्वयं भुंक्ते तिलोदनं। दिवा निराहारो रात्रौ भुंक्ते इति विशेषपरिहारः। वर्षे द्वये समाप्ते हि व्रतस्यास्य उद्यापनं भवेत्। विना
युक्तस्य समस्तु शेषो ददाति फलमीहितं। इति भविष्यत्पुराणोक्तगणपतिचतुर्थीव्रतं। भरण्यां तु चतुर्थ्यां तु शनैश्चरदिने यमं। पूजयेत्सप्तजन्मोत्थैर्मुच्यते पात
कैर्नरः। इति कूर्मपुराणोक्तयमव्रतं। अथ फाल्गुनादिचतुर्षु मासेषु चतुर्थीव्रतमुक्तं वाराहपुराणे॥ अगस्त्य उवाच। अथ विघ्नहरं राजन् कथयामि तव
नघ येन समस्त कृत्ये नेह न विघ्नमुपजायते। चतुर्थ्यां फाल्गुने मासि गृहीतव्यं व्रतं त्विदं। नक्ताहारेण राजेंद्र तिलान्नं पारणं स्मृतं। तद्देवाग्नौ च होतव्यं तद्दे
यं ब्राह्मणेषु च। पूजामंत्रस्तु॥ हिताय शूराय गजाननाय दंष्ट्राकरालाय नमः शिवाय नगात्मजादेहमलोद्भवाय कुठारहस्ताय नमो वराय। ताम्रपात्रैः पा
यसाढ्यैः चतुर्भिः सहितं नृप। पंचमेन तिलैः सार्द्धं गणाः शांतिकरेण च निर्णयामृते तु। आयसैः पंचभिः पात्रैरुपेतं च विधिस्तथेति पाठः। मन्मया निर्द्दि
ष्टस्तु विधिनानेन कारयेत्। चातुर्मास्यव्रतं चैवं कृत्वैवं पंचमे तथा। अनेन मंत्रेण पूजां कृत्वा स्नाहोने न तिलान्नं हुत्वा ब्राह्मणेभ्यो दत्वा स्वयमपि तद्देव नक्त
मश्नीयात्। निर्णयामृते। एवं मासचतुष्टये व्रतं कृत्वा आषाढशुक्लचतुर्थ्यां सौवर्णं विनायकं दाममात्रं कुर्यादिति। सौवर्णं गजवक्त्रं तु कृत्वा विप्राय दाप
येत्। इत्थं व्रतमिदं कृत्वा सर्वविघ्नात्प्रमुच्यते। हयमेधस्य विघ्नं तु संजाते सगरः पुरा॥ एतदेव चरित्वा तु हयमेधं समाप्तवान्। एतदेव हरश्चक्रे त्रिपुरं येन घा

जयकल्प॰
१७५
175

तितः स्मिपासमुद्रमथनेले तदेव व्रतं कृतं। अन्यैरपि महीपालैरेतद्देवपुरा कृतं। ततो निर्विघ्नसिध्यर्थं विघ्नोपशमनं परं। अनेन कृतमात्रेण सर्वैर्विघ्नैः प्रमुच्य
ते। ततो रुद्रपुरीं याति वाराहवचनं यथा। विघ्नानि तस्य नश्यंति गृहे कद्याविद्धर्मार्थकाममोक्षसिद्धिविघातकानि। मः सप्तमे दुश कलाकृति कांतदंतं विघ्नेश
मर्चयति नक्तकृती चतुर्थ्यां। इति वाराहपुराणोक्तमविघ्नविनायकव्रतं। निर्णयामृते मत्स्यपुराणे चतुर्थ्यां नक्तभुग्दद्याद्दंतेहेमवारणं। व्रतं वैना
यकं नाम शिवलोकफलप्रदमिति। इदं व्रतं विशेषाभिधानात् द्वादशस्वपि मासेषु भवचतुर्थ्यां विधेयमिति गम्यते। एवं मनोरथविनायकचतुर्थ्यादि विना
यकव्रतानि कुंदचतुर्थ्यादि गौरीव्रतानि च तृतीयायुक्तचतुर्थ्यामेव कार्याणि। अन्यानि नागचतुर्थ्यादि व्रतानि पंचमीयुक्तायां चतुर्थ्यामिति सिद्धां
तः। पक्षद्वयगता सर्वास्वपि चतुर्थीषु तिथ्याविपोगरोशः पूज्यः चतुर्थ्यां गणनाथस्य सुक्तत्वात्। सर्वासु चतुर्थीषु ढुंढियात्रोक्ता काशीखंडोक्त
यीत्वमति चतुर्थीहयानां विघ्नशिवः सदा ब्राह्मणैः समस्तदुद्देशा देया वैमोदकामुदेति। अथ सिद्धविरुद्धादिकं। चतुर्थी शनिवारेणा मिश्राजीवेन सं
रुद्धा तदुक्तं। शनौ चतुर्थी नवमी चतुर्दशी पद्यरोहिणी। शततारास्वातिमघा मारणं चैव तत्सिद्धयः। इति। जीवे षष्ठी चतुर्थी च आर्द्रा चोत्तर फाल्गुनी राम॰
रोहिणी वा कृष्णा चैव विरुद्धं मृगशीर्षकमिति। अत्र च लक्ष्यमुच्यते। शत्रुवधाग्निविषप्रयोगाघातनिष्ठकर्म चतुर्थ्यादि रिक्तातिथिषु कार्यं। तदुक्तं भास्करे १७५

175A देशा। चतुर्थ्यां तु चतुर्दश्यां नवम्यां वाभिमर्दनं। दमनं वंदनं मेदमभिपोताभिचारकं। विषाग्निसंप्रयोगं च कुर्वीत कोपदानि वेति। चतुर्थ्यां नैर्ऋते तेपोगीन्यः प्रतिवसं
ति। अत्र तस्तस्तं सुखानत्रयाचानकर्त्तव्या। कमारवें त्तरायेपनैर्ऋस इत्युक्तत्वात्। रविभौमशनीनामन्यतमक्रूरग्रहे कर्कस्थे सति चतुर्थी शुभकार्येषु
वर्जिता। आपाशतत्त्वत्युक्तत्वात्। सूर्ये वृषमकुंभस्थिते सति चतुर्थी दाधा भवतीति॥ श्रीमद्दिल्लीशसेनोद्भटविकटभटप्राज्यमनेभसिंहस्यैकोनमाघतु
रुक्षक्षुद्धमितवसुमतीपालनेधर्मराजः। पौत्रः श्रीहरूसिंहक्षितिपकुलमणेर्विष्णुसिंहस्य पुत्रः श्रीमान्राजाधिराजो जपहरिरमणीधीश्वरकौस्तु
भोस्तात्॥ १॥ श्रीमत्पंडितदेवभद्रतनयः श्रीराघवांघ्रिद्वयध्यानावाप्तसमस्तकामनिवहः सम्राड्मरालाकरः। तुष्ट्यै श्रीजयसिंहवर्मनृपतेः कल्प
द्रुमे कामदं प्रत्यग्रं शरदस्तकं समकरोत्सद्व्रातनिर्णायकं॥ इति देवभट्टात्मजपौंडरीकयाजिरत्नाकरविरचिते जयसिंहकल्पद्रुमे घोते चतुर्थीनिर्णयः
॥ अथ पंचमी निर्णीयते। तत्रादौ शुक्लपंचमीध्यानं। ग्राहस्थां वंदे गौरांतां पंचमींसाक्षकुंडिकेति। पंकजस्थ। प्रवालाभा फणामस्तकभूषणा
। शंखमुद्रां तथा पाशं बिभ्राणा पंचमीमता १ पंचमी तु माधवमते सर्वापि पूर्वा। चतुर्थीसंयुता कार्या पंचमी परया न तु। दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथा
ऽसिते इति हारीतोक्तेः। स्कंदपुराणेपि॥ पंचमी च तथा कार्या चतुर्थीसंयुता विभो इति। तथा पद्मपुराणे भविष्योत्तरपुराणयोः सर्वे जरविद्धा विषयो

जयकस·
१७६
176

विधिनिषेधौ स्मर्येते। पंचमी च चतुर्थ्यां तु कार्या षष्ठ्या न संयुतेति। मदनरत्नेपि। पूर्वविद्धा यथा हेतु त्तं युगाभ्भृतानामिति युग्मवचनात्। पंचमी सप्तमी चैव दश
मी च त्रयोदशी। प्रतिपन्नवमी चैव कर्त्तव्या संमुखी तिथिरिति पैठीनसिवचनाच्च। संमुखी सायाह्नव्यापिनी। ब्रह्मवैवर्त्तेपि। प्रतिपत्पंचमी भूतसावित्री वटपूर्णिमा। न
वमी दशमी चैव नोपोष्याः परसंयुता इति। स्कंदोपवासव्रते तु माधवमते तूत्तरा कार्या। स्कंदोपवासे सा कार्या पंचमी परसंयुतेति ब्रह्मवैवर्त्तोक्तेः। मदनरत्ने नि
र्णयामृते तु स्कंदोपवासपंचमीव्यतिरिक्ता सर्वापि पंचमी उपवासे पूर्वविद्धैव ग्राह्या। प्रतिपत्पंचमी चैव उपोष्या पूर्वसंयुतेति जाबालिवचनात्। नागव्रते तु
पंचमी परविद्धा ग्राह्या। तदुक्तं स्मृत्यन्तरे। श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी। तां परित्यज्य पंचम्यश्चतुर्थीसहिता हिता इति हेमाद्रिमते तु। कृष्णा पूर्वाप
राश्रिता। द्वेपि ग्राह्यामपि। कृष्णा पूर्वयुता शस्ता परयुता स्यात्पंचमीति। यत्तु पंचमी तु प्रकर्त्तव्या षष्ठ्या युक्तात्र नारद। इत्यापस्तंबीयं तन्नागपूजाविषयमि
त्यनंतभट्टनिर्णयामृतादयः। चमत्कारचिंतामणौ च। पंचमी नागपूजायां कार्या षष्ठीसमन्विता। तस्यां तु तुषिता नागा इतरा सचतुर्थिकेति। तेन नागपूजा
द्येपरैव। इति पंचमीनिर्णयः। अथात्र कर्त्तव्यानि। पूजाव्रतानि। चैत्रशुक्लपंचमी मत्स्यजयंतीति केचित्। इयं च मध्याह्नव्यापिनी ग्राह्या। तदुपासकानां च निःसा राम.
अन्येषां कामा। अस्यामेव श्रीपूजोक्ता हेमाद्रौ विष्णुधर्मोत्तरे। चैत्रस्य शुक्लपंचम्यां पूजयित्वा तथा श्रियं। सकृद्देवाप्नुयाद्देवि तत्फलं संवत्सरोद्भवमिति। मा १७६

176A त्सेवब्रह्मपुराणोवा।शुक्लायामथ पंचम्यां चैत्रे मासि शुभानना ॥ श्रीर्वै त्रैलोक्यमातुर्षंसंप्राप्ता केशवाज्ञया। ततस्तां पूजयेत्तत्र यस्तं लक्ष्मीर्नमुंचति। ए
षा श्रीपंचमी प्रोक्ता विष्णुलोकगतिप्रदेति। इति मत्स्यब्रह्मपुराणद्वयोक्तं श्रीव्रतं। अथ हेमाद्रौ विष्णुधर्मोत्तरोक्तं श्रीव्रतं। मार्कंडेय उवाच॥ अथातः संप्रव
क्ष्यामि श्रीव्रतं नामतेव्रतं। चैत्रशुक्लतृतीयायां स्नानं मंगलपूर्वकं। कृत्वा शुक्लांबरो राजन्शुक्लमाल्यानुलेपनः। तिष्ठेत्तोदिनाहारो मौनस्त्वप्रान्नि
शां व्रती। वह्नौ यां च तत्याम्नानं वहिरेव समाचरेत्। पंचम्यां च विशेषेण शुक्लांबरधरः शुचिः। लक्ष्मीं संपूजयेत्सम्यक् हुतके हुतकेपि वा॥ अहुतकेप अत्र
ज्यासाक्रांते। शुक्लेन गंधमाल्येन घृतदीपेन वाप्यथ। हरिद्रया च धान्येन आर्द्रकेन गुडेन वा॥ इक्षुरसेक्षुविकारैश्च लवणेन च भूरिशः॥ स्वशक्त्या च
महाराज भूरिशः॥ बलिकल्पनं। श्रीसूक्तेन ततो वह्नौ पद्मानि जुहुयाच्छुचिः। तदलाभे च बिल्वानि तदलाभे तथा घृतं। आत्मनानगैरमशायं घृतम्पृ
पिष्टमाशयेत्। आशयेद्भोजयेत्सुवर्णमाषकं दद्याद्ब्राह्मणाय च दक्षिणां। अनाहारस्ततस्तस्यात्तच्छुचौ देशे यथाविधि। ततस्तु पंचमीप्राप्य पूर्वोक्तेप
मिनी जले स्नात्वा संपूज्य नेकुर्यान्माधवदेवतत्था श्रियः। भूय एव द्विजे दद्यात्पूर्वकनकमाषकं। पूर्वं दक्षिणालेन पूर्वोक्तेप आक्षमथवा बिल्वसा
श्रीयात्तदनंतरं। ततोहविष्यमश्नीयाद्वाग्यतो मानवोत्तमः। संवत्सरमिदं कृत्वा व्रतं पार्थिवसत्तम। फलमाप्नोति विपुलं राजसूयाश्वमेधयोः। विनाक

नकदानेनव्रतमेतत्समाचरेत्। व्रतांते माषकं सर्वैमाग्निष्टोमफलं लभेत्। समं पूज्य सोपवासस्तु शुक्लपक्षस्य पंचमीं॥ नित्यमेवाश्रियं देवी श्रियमाप्नोति चोत्तमां।
धनमुत्तममाप्नोति रूपमारोग्यमेव च। जगत्प्रधानां वरदां चतुर्भुजां विभावरीं सर्वगतां नरेंद्र। अखण्डितः पूजयती ह यस्तु कामानवाप्नोति स सर्वकालं
।इति विष्णुधर्मोत्तरोक्तं श्रीव्रतं समाप्तं। अथ संवत्सरपर्यंतं पंचम्यां लक्ष्मीव्रतं। लक्ष्मीमभ्यर्च्य पंचम्यामुपवासी भवेन्नृपः। समांते हेमकमलं दद्या
द्धेनुसमन्वितं। सर्वैः स्वर्वं पदं याति मानवः कुलनंदिनि। एतल्लक्ष्मीव्रतं नाम दुःखशोकविनाशनं। इति पद्मपुराणोक्तं लक्ष्मीव्रतं। अथामासामेव पं
चम्यां चव्रं इम पूजनं पृथ्वीपूजनं चोक्तं वीरमित्रोदये विष्णुधर्मोत्तरे। पंचम्यां पूजनं कृत्वा तथा चंद्रमसो नरः। आयुश्च विपुलां लक्ष्मीं स वैश्वर्यं च विंद
ति॥ इति विष्णुधर्मोक्तं सौभाग्यव्रतं॥ पंचम्यां पृथिवीं देवीं तथा संपूजयेन्नरः। तामेवाप्नोत्ययत्नेन नात्र कार्या विचारणा॥ इति विष्णुधर्मोक्तं पृथिवी
व्रतं। अस्यामेव चैत्रशुक्लपंचम्यां पद्मपुराणे पातालखंडे उक्तं हयपंचमीव्रतं। अस्या उमस्ता ज्जातो वातरंहा मनोजवः। उच्चैःश्रवाः पूजनी
य पंचम्यां चैत्रशुक्लके। तत्रैव पूज्या गंधर्वा वास्तुरंगा गणास्तु बांधवा इत्यादि। इति हयपंचमी॥ इयमेव चैत्रशुक्लपंचमी कल्पादिरपि। तथा चोक्तं हे राम०
माद्रौ मात्स्ये। ब्रह्मणो या दिनस्यादिः कल्पादिः सा प्रकीर्तिता। वैशाखस्य तृतीयायां कृष्णायां फाल्गुनस्य च। पंचमी चैत्रमासस्य तथैवांत्या तथा पर १७७

177A स्तु शुक्लात्रयोदशी माघे कार्तिके सप्तसप्तमी। नवमी मार्गशीर्षस्य सप्तैता। संस्मरास्पहं। कल्यानामादयो ह्येता दत्तस्याक्षय्यकारिका। इति। अत्रैताः शु
क्लाः पूर्वाह्णिकाः। कृष्णास्त्वापराह्णिका इति पुराणादिवचनस्था। शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः। कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तंगतो वि
रिति वाक्यात्। इति चैत्रशुक्लपंचमीकृत्यं। अथ श्रावणशुक्लपंचमीभा नागपूजायां परविद्धा ग्राह्या। तदुक्तं चमत्कारचिंतामणौ। पंचमी नागपूजा
यां कार्या षष्ठीसमन्विता। तस्यां तु हृषिता नागा इतरा सचतुर्थिकेति। प्रतापमार्तंडे मदनरत्नादावप्येवं। अत्र कृत्यमुक्तं काशीखंडे। पंचम्यां स्नातो नाग
पंचम्यां कुंडे वासुकिसंज्ञके। न तस्य विषसंसर्गो भवेत्सर्पसमुद्भवः। कर्तव्या नागपंचम्यां यात्रा वर्षासु तत्र वै। नागाः प्रसन्ना जायंते कुले तस्यापि
सर्वदेति। अत्र विशेषो हेमाद्रौ भविष्ये। श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप। द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः। पूजयेद्विधि
वद्वीर दधिदूर्वांकुरैः कुशैः। गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः। ये तस्यां पूजयंतीह नागान्भक्तिपुरःसरं। न तेषां सर्पतो वीर भयं भवति कु
त्रचित्। इयमेव गौरवकल्पादिः। अस्यां पंचम्यां स्कंदपु राणीयप्रभासखंडोक्तं सर्वविषापहपंचमीव्रतं। ईश्वर उवाच। श्रावणे मासि पंचम्यां
शुक्लपक्षे वरानने। द्वारस्योभयतो लेख्या गोमयेन वि षोल्बणाः। कृत्वा च कौसुमान्नागानिंद्राणीं च प्रपूजयेत्। घृतोदकाभ्यां पयसा स्ना

जयकल्प:
१७८
178

पयित्वावरान्नने। गोधूमैः पयसाघृतैर्लाजौ विविधैस्तथा। पूजयेद्विधिवद्देवि दधिदूर्वांकुरैः क्रमात्। गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्प

णैः। अयं चाश्वाचरणो मासि पंचम्यां श्रद्धयान्वितः। यस्तुलेख्य नरो नागान्कृष्णवर्णादिवर्णकैः। कुरुकुल्लां तथा वीथ्यां स्वगृहे विलिखेद्बुध

ः। पूजयेत्तं च धूपैश्च पयसा पायसेन च। तस्य तुष्टिं समायांति पन्नगास्तक्षकादयः। आसप्तमात्कुलात्तस्य न भयं नागतो भवेत्। अयं तु प्रो ख्याते

मंत्रः सर्वसर्पनिषेधकः। तस्मिन्नजन्ममात्रेण तु न विषं क्रमते सदा। ॐ कुरुकुल्ले हुं फट् स्वाहा। इत्येवं कथितं देवि नागव्रतमनुत्तमं। यत्कृ

त्वा च पठित्वा च मुक्तः स्यात्सर्वपातकैः। इति स्कांदे प्रभासखंडोक्तं सर्पविषापपंचमीव्रतं। सर्वोपंचमी नागपंचमी तदुक्तं हेमाद्रौ भवि

ष्यत्पुराणे। पंचमी दयिता राजन्नागानां नंदवर्द्धिनी। पंचम्यां स्नपयंतीह नागान्क्षीरेण ये नराः। तेषां कुले प्रयच्छंति अभयं प्राणदक्षिणां। अ

थ भाद्रपदशुक्लपंचमी इयं ऋषिपंचमी तु सा मध्याह्नव्यापिनी ग्राह्या। प्रजाव्रते सर्वेषु मध्याह्नव्यापिनी तिथिरिति हारीतोक्तेः। दिनद्वये

तत्त्वे हेमाद्रिमते पूर्वा। पंचमी तु प्रकर्तव्या षष्ठीयुक्ता तु नारदेति वाक्यात्। सितापरस्तु तस्मात्पंचमीति दीपिकोक्तेश्च शुक्लपक्षे तिथिर्ग्राह्या यस्याम् राम:

स्यामभ्युदितो रविः। इति वचनाच्च ऋषिपंचमी षष्ठीयुतैव तिथिदिवोदासीयेपि। माधवमदनरत्नादिमते तु पूर्वा सर्वत्र पंचमी पूर्वैव तूक्तेः। नि १७८

र्घं दत्त्वेति संकल्पं संकल्प्य तस्यविनिर्गतः। स्नानं कृत्वा प्रयत्नेन नद्यां तीर्थे पवा जले तडागे दीर्घिकायां वा गृहे वा नियतात्मवान्। देवदारुतथोसीरं कुं
कुमेलामनःशिला। पत्रकंपद्मकं पष्टीमधुगंधेन पेषयेत्। क्षीरेणालोड्य कल्केन स्नानं कुर्यात्समंत्रकं। आपस्त्वमसि देवेश ज्योतिषांपतिरेवच॥ पा
पंनाशयमेदेवबाङ्मनःकायकर्मजं। पंचगव्यं ततः स्नानः पंचभंगैस्तु माजयेत्। पंचभंगैः पंचपल्लवैः। आनयेन्मृत्तिकां शुद्धां स्नानार्थं तु प्रयत्नतः। मृत्ति
के त्वं मया ताभि काश्यपेनाभिमंत्रिता। पवित्रं कुरु मां नित्यं सर्वपापात्समुद्धर। मंत्रेणानेन वरुणां पूजयेद्बुद्धिमान्नरः। पाशायहस्तवरुणाय सर्वेवारीश्वरा नमः
नमो॥ अर्घाहंमा पर्यामित्वाश्शृते कुरु सुरेश्वर। आदित्यो भास्करो भानू रविः सूर्यो दिवाकरः। प्रभाकरो मितो वीरो देवः सर्वेश्वरो हरिः। गोमयेनोपलि १९७

197A

मायांस्थ स्थांयैडुं कुमे व्रतु। मंडलं सर्वतोभद्रमालिखेद्बुद्धिमान्नरः। तन्मध्ये लिखेत्पद्ममष्टपत्रं सकर्णिकं। पूर्वपत्रे न्यसेत्सूर्यं माग्नेये तपनं न्यसेत्। दक्षि
णारीतसं याम्ये नैर्ऋत्ये न्यसेद्रविं। आदित्यं वारुणे पत्रे वायव्ये च दिवाकरं। सौम्ये प्रभाकरं तत्र सहस्रमीशानपत्रके। तीव्ररश्मिं चरं देवं ब्रह्माणं
चैव विन्यसेत्। आधाररूपिणं देवं मध्ये चैव रुणं न्यसेत्। सहस्ररश्मिसंयुक्तं स्थूलं गुणान्वितं। सर्वांगं सर्वरूपं च मध्ये भास्करमेव च। सप्ताश्वरथ
मारूढं पद्महस्तं दिवाकरं। अक्षसूत्रधनुःपाणिं कुंडलैर्मुकुटेन च॥ लेखनीं नाविधैर्युक्तं सौवर्णं तत्र कारयेत्। शक्तितस्तु पलाद्र्ध्वं तदर्द्धं कर्षतो
पि वा। सौवर्णमरुणांशुपीड्येकं वै वतथा रथं। सप्ताश्वैर्भूषितं कृत्वा रथं तमाग्रतः स्थितं। अरुणं विनतापुत्रं गृहीताश्वमरुकं। एवं रूपं रथं कृ
त्वा पश्चात्पापरि विन्यसेत्। तस्योपरि न्यसेद्देवं रक्तवस्त्रविभूषितं। रक्तचंदनमाल्यादिमंडितं चातिशोभितं। अग्रतः सारथिं कृत्वा पूजयेत्करुणान्वितः।
रक्तपुष्पैः सुगंधैश्च तथान्यैरपि शक्तितः। ॐ विनतातनयो देवः कर्मसाक्षी तमोनुदः। सप्ताश्वः सप्तरज्जुश्च अरुणो मे प्रसीदतु। मंत्रेणानेन
संपूज्य सारथिं तदनंतरं। देवस्य चासनं कल्प्यमक्तादिकपंचकं। प्रभूतं विमलं सारमाराध्य परमं शुभं॥ दीप्तादिशक्तिभिश्चैव ततो भानुं प्रपूज
येत्। दीप्ता सूक्ष्मा तथा जया भद्रा विभूति विमला नघा। अमोघा वैद्युता चेति नवमी सर्वतोमुखी। अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा। यः स्म

जयक ल्प॰ रेखास्तं हे वंस वा ह्याभ्यंतरः शुचिः॥ शिखायां भास्करं न्यस्य ललाटे सूर्य मेव च॥ चक्षुर्मध्ये न्यसेज्ज्ञानं मुखे नत्वरविं न्यसेत्॥ कंठे न्यसेज्ज्ञानुमंतं पद्मगर्भे दिहस्तयो
१९८ ः॥ तिमिरक्षयकृद्देवं स्तनयो रविं न्यसेत्॥ जान्वेर्दोर्मिथं ताभ्यां कुक्षौ मातुं तथा न्यसेत्॥ उग्ररूपं गुह्य देशे तेजोरूपं द्विजं घ्राणोः॥ पादयोः सर्वरूपं
198 तु सूक्ष्मं स्थूलगुणान्वितं॥ एवं यथोक्तं विन्यस्य पात्रं गृह्य ततोर्चयेत्॰ वरवीरार्कं कुसुमैः रक्तचंदनचंपकैः॥ शुभैः सुगंधैर्धूपैश्च कुंकुमैः हृपशो
भितं॥ मार्जमान्तुमादिसंभास्करं तपनं रविं॥ हंसं दिवाकरं वेत्ति पादतो मुकुटावधि॥ पादौ जंघे तथा जानु हृदयं स्कंदांतथा॥ नाभिर्वक्षस्थलं शी
र्षं मेते घ्राणोष्ठे पूजयेत्॥ आनये दर्घ्यपात्रं तं ज्ञोपं वातास्त्र मेव वा॥ अर्घ्यार्थं दैवतं पात्रस्थं हृदके न प्रपूजयेत्॥ पूजये त्तत्र भागादि देवतास्ताः समाहि
तः॥ दिनेदेवतास्ततः स्वागंधपुष्पानुलेपनैः॥ पात्रे तोयं समादाय सपुष्पफलचंदनं॥ जानुभ्यामवनिं गत्वा सूर्याया र्घ्यं निवेदयेत्॥ वेदगर्भं नमस्तुभ्यं
देवगर्भ नमोस्तुते॥ अयं वक्त्रमूर्तये तुभ्यमर्घ्यं गृहाण नमोस्तु ते॥ ब्रह्मरूपि विरूपेश चतुर्वक्त्र सनातन॥ सृष्टि स्थिति संस्थिता यग्रहाणार्घ्यं नमोस्तु
ते विष्णुरूपधरो देवः पीतवस्त्र चतुर्भुजः॥ प्रभवः सर्व लोकानामर्घ्यं गृहाण नमोस्तुते॥ रुद्ररूपिणं देवं भगवंतं त्रिशूलिनं॥ यो हहे ब्रह्मत्रिलोकं वै अ राम.
र्घ्यं गृहाण नमोस्तुते॥ उदयं तमहद्भूतं तेजोराशि समुद्भवं॥ तिमिरक्षयकृद्देवं अर्घ्यं गृहाण नमोस्तुते॥ मंत्र पूतं तं जडा रोगशं नगतिं व्याधिविनाशनं॥ सप्त १९८

198A मिश्रैर्वजि स्वामिरर्घ्यंग्रहाण नमोस्तुते॥ त्वं ब्रह्मा त्वं च विष्णुश्च रुद्रश्च त्वं प्रजापतिः। त्वमेव सर्वभूतात्मा अर्घ्यं गृहाण नमोस्तु ते। कालात्मा सर्वभूता
त्मा वेदात्मा सर्वतोमुखः। जन्ममृत्युजराशोकसंसारभयनाशनः। दारिद्र्यव्यसनध्वंसी श्रीमान्देवो दिवाकरः। स्तुवर्ण स्फाटिकोमानुः स्वर्गा
रोजा दिवाकरः। हरिदश्वोंशुमालीव अर्घ्यं गृहाण नमोस्तु ते वत्सु र्भिर्ऋग्भिः संस्थाम यज्ञभिः परिगीयते। साम ध्वनिस्तु पोयस्ते अर्घ्यं गृहाण नमोस्तु ते
। अथ गंधं च पुष्पं च तत्र या धूपं प्रदीपकं। नैवेद्यं च यथा शक्त्या प्रार्थयेत्सूर्यदेवतां। अग्निमीलेनमस्तुभ्यं नमस्ते जातवेद से। इषे त्वैव नमस्तुभ्यं म
ये वैव नमो नमः॥ शंन्नो देवीनमस्तुभ्यं जगज्जन्मन नमो नमः। आत्मरूपिन्नमस्तुभ्यं विश्वरूपे नमो नमः। त्वं ब्रह्मा त्वं च वै विष्णुस्त्वं धाता त्वं हुताशनः। मु
क्तिकाममभीष्टप्राप्त्यै प्रार्थयामि सुरेश्वर। विश्वतश्चक्षुरा ख्यातो विश्वतश्चरणानन्नः। विश्वात्मा सर्वतो देवः प्रार्थयामि सुरेश्वर। इति मंत्रं समुच्चार्य नमः कु
र्वीत भास्करं। सवत्सं तिलपात्राणि यान्ती येन विमुञ्जेन्मुखं। मंत्रस्तु। सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं ॰ शिवेन। त्वष्टा नो अत्र विदधात्तु रायो नु मा
र्ष्टु तन्वो यद्विलिष्टं। हंसः शुचिषद्दिव्य चा सूर्य सेवावलोकनं। उदुत्यं चित्रमित्येतत्स्तकं द्वे वा प्रत्तो जपेत्। प्रशस्ते वै वकोणो च फलकं वैन्न कारयेत्। फले
: पुष्पे रक्तोमधे मक्ष्यैर्नानाविधै रपि। शयातं त्वं च देवस्य शुभे देशे प्रकल्पयेत्। षट्वानं षड्भुजं देवं रौप्यं चैव महाप्रभुं। पुरुषं सहस्र मंत्रकारयेद्बेवबु

ज॰यु॰
१९९
199

द्विमान्।वह्निपुत्रेमेन संछन्नं लवणोपरि विन्यसेत्।अनेनैव तु मंत्रेण स्नानमर्चार्व्वनं ततः।नमस्ते क्रोधरूपाय पयवर्द्धहस्ताय जिघांसवे।जिघांसुकामे तां दृष्ट्वा तु दु-
ष्टः सर्वदेवताः।त्वया प्राप्तं मे हृष्टं चंडमात्मकरं द्रुमम।अतस्त्वां पूजयिष्यामि अर्घं गृह्ण नमोस्तु ते।क्षपयित्वा तु तां रात्रिं गीतवादित्रनिःस्वनैः।त
तस्त्वभ्युदिते सूर्ये होमं कुर्यात्स्वशक्तितः।पूजयेत्तत्र शक्त्या च देवान्स्वविधिवद्गुरुम्।होमोर्कसमिद्भिश्च घृतमिश्रैस्तिलैस्तथा।सं सिद्धं चरुकं चैव
घृतं च जुहुयाद्द्विजः।आज्यस्मेनेति मंत्रेण शतमष्टोत्तरं क्रमात्॥होमो व्याहृतिभिर्वापि स्विष्टकृत्तदनंतरं।गां कपिलां पूजयेद्देवीं सवत्सां पापना-
शिनीं।वह्निपुत्रं मां सघंटां च स्रग्दाम्नीं गावि भूषितां।स्वर्णशृंगीं रौप्यखुरां कांस्यदोहनकान्वितां।मंत्रेणानेन तां दद्यात्तत्र ब्राह्मणाय वै शक्तितः।क-
पिले सर्वदेवानां पूजनीयासि रोहिणी।सर्वतीर्थमयी यस्मादतः शांतिं प्रयच्छ मे।या लक्ष्मीः सर्वदेवानां या च देवेषु संस्थिता।धेनुरूपेण सा देवी मम शां-
तिं प्रयच्छतु।देहस्था या च रुद्राणी शंकरस्य वया प्रिया।धेनुरूपेण सा देवी मम पापं व्यपोहतु।विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः।
चन्द्रार्कानलशक्तिर्या धेनुरूपास्तु सा श्रिये।चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च।लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे।स्वधा त्वं पि- राम॰
तृमुख्यानां स्वाहा यज्ञभुजामपि।वषड्याघोव्यते लोके सा धेनुस्तुष्टिदास्तु मे।गावो मे चाग्रतः संतु गावो मे संतु पृष्ठतः।गावो मे हृदये संतु १९९

199A

गवांमध्ये वसाम्यहं ।गोपूजनमंत्रः ।। गावः स्पृष्टा नमस्कृत्य यो वै कुर्यात्प्रदक्षिणां । सप्रदक्षिणीकृता तेन सप्तद्वीपा वसुंधरा ।। नमस्ते कपिले देवि सर्वपापप्र
णाशिनि संसारार्णवमग्नां गोमातस्त्रातुमर्हसि ।गोदाननमंत्रः ।हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।अनंतपुण्यफलदमतः शांतिं प्रयच्छ
मे ।रक्तवस्त्रयुगं यस्मादादित्यस्य च वल्लभं ।प्रदानात्तस्य मे सूर्य अतः शांतिं प्रयच्छतु ।हवर्णी वस्त्रयुग्मं च परिधानं स्वकायते ।एतैः प्रकारैः संपू
ज्यं दद्याद्वै द्विजातये ।भानुं सदक्षिणां दद्यान्मंत्रेणानेन यत्नतः ।भास्करो विविधितो नानाद्यस्थो भास्करः स्वयं भास्करस्य प्रदाता च तेन न वै भास्करो मम
माद्दाननमंत्रः ।भास्करः प्रतिगृह्णाति भास्करो वै ददाति च ।।भास्कर तारको भयं भास्कराय नमो नमः ।प्रतिग्रहमंत्रः ।।ब्राह्मणान्भोजयेत्पश्चात्ताय
सेन गुडेन वा ।शक्त्या च दक्षिणां दद्यात्तेभ्यश्चैव विशेषतः ।अल्पवित्तोपि यः कश्चित्सोपि कुर्यादिमं विधिं ।आत्मशक्त्यनुसारेण सोपि तत्फल
माप्नुयात् ।आचार्याय ततो भक्त्या सर्वपापौघविनिःक्षिपेत् ।गोक्षहिरण्यवासांसि स्त्री ह्यो वुगं तिलाः एतत्सर्वं प्रदत्वा च कपिलां प्रार्थयेत्ततः ।कपि
ले पुण्यकर्मासि निष्पापे पुण्यकर्मिणी ।मासमुद्धर दीनं च दत्तो स्वभपंकुरु ।दिवि वा दिव्यं शब्दैश्च सेव्यसे कपिले सदा ।तथा विद्याधराः सिद्धा भूत
नागगणाग्रहाः ।कपिला रोमसंख्याता नास्त्र देवाः प्रतिष्ठिताः ।पुष्पवृष्टिं प्रमुंचंति निस्समाकाशमास्थिताः ।ब्रह्मणोत्पादिता देवी अग्निकुंडात्स्वप्र

जय०
२००
200

मानमस्ते कपिले पुराणे सर्वदेवैर्नमस्कृते। जयानित्यमहासत्वे सर्वतीर्थादिमंगले। दातारं स्वजनोपेतं ब्रह्मलोकं नयाम्युवै। ततः प्रदक्षिणां कृत्वा नत्वा ब्राह्मणा
पुंगवान्। आशीर्वादान्वदेयुस्ते पुत्रपौत्रधनागमान्। आरोग्यं रूपसौभाग्यं सर्वदुःखविवर्जितः। अंते गोलोकमासाद्य चिरायुः सुखवान्भवेत्। य
द्यास्वर्गोत्पतति राजा भवति धार्मिकः। ससद्वीपवतीं भुंक्ते भुक्त्वा राज्यमकंटकं। अहो व्रतमिदं पुराणं सर्वपापप्रणाशनं। अतः परं प्रवक्ष्यामि दानस्य फ
लमुत्तमं। महादेवमयेप्रावेसद्वृत्ते वाह्यश्वमेधं भवेत्। व्रतं सर्वव्रतश्रेष्ठमिदं समग्रं महाफलं। तारयिष्यति दातारं नूनमक्षयमव्ययं। एवं देवगणाः सर्वे भूत
संघातहर्षिताः। आकाशस्थाः प्रनृत्यंति पुराणेस्मिन्दिवमागमे॥ पात्रभूताय ऋषये श्रोत्रियाय कुटुंबिने। एवं यः कपिलां दद्याद्विधिदृष्टेन कर्मणा। सया
ति परमं स्थानं यावन्नच्यवते पुनः। त्वां देवमासस्तवंडेत्वविशेषः। उपलिप्ते शुभे देशे पुष्पाक्षतविभूषिते। स्थापयेद्ब्राणं कुंभं चंदनोदकपूरितं। पंचरत्नसमायु
क्तं हेमपुष्पाक्षतान्वितं। रक्तवस्त्रयुगाच्छन्नं ताम्रपात्रेण संयुतं। रथोरौ कूर्पलसौवर्णं कृतं चक्रः सुविचित्रतः। सौवर्णं फलसंयुक्तं सुकृतं निसृत्यं सकारयेत्। कुं
भस्योपरि संस्थाप्य गंधपुष्पैस्तु पूजयेत्। आदित्यं पूजयेद्देवं नामभिः सौर्यपोदितैः। आदित्यभास्कर रवे भानो सूर्य दिवाकर। प्रभाकर नमस्तुभ्यं संसारान्मां राम०
समुद्धर। भुक्तिमुक्तिप्रदो यस्मात्तस्माच्छांतिं प्रयच्छ मे॥ प्रार्थनामंत्रः। नमो नमस्ते वरद ऋक्सामयजुषांपते। नमोस्तु विश्वरूपाय विश्वधाम्ने नमोस्तु ते॥ २ २००

200A

वं सुंमुखं त्रिविष्टवं तद्देवदेवं दिवाकरं ॥ पूजयेत्कपिलां धेनुं वस्त्रमाल्यानुलेपनैः ॥ दानमंत्रः ॥ दिव्यमूर्त्तिर्जगच्चक्षुर्द्वादशात्मा दिवाकरः ॥ कपिलासहितो देवो म
ममुक्तिं प्रयच्छतु ॥ तस्मात्त्वं कपिले पुण्या सर्वलोकस्य पावनी ॥ प्रदत्ता सह सूर्येण मम मुक्तिप्रदा भव ॥ इति स्कंदपुराणोक्तं कपिलाषष्ठीव्रतं ॥ इति भाद्रपद
षष्ठी ॥ आश्विनशुक्लपंचम्यां स्नापितायां देव्याः सप्तम्यां पूजायां षष्ठ्यां ज्येष्ठानक्षत्रयुक्तायां मसंभवे केवलायां बिल्ववृक्षे निमंत्रणं कार्यमित्युक्तं प्रा
क् ॥ इत्याश्विनषष्ठी ॥ अथ कार्त्तिकषष्ठी ॥ कार्तिकस्य शुक्लषष्ठ्यां भौमवासरयुक्तायां वह्निं संपूज्य वह्निमहोत्सवं कुर्यात ॥ तदुक्तं मत्स्यपुराणे ॥ वृश्चिका
र्के शुक्लषष्ठी भौमवारे समुपस्थिता ॥ महाषष्ठीति सा प्रोक्ता सर्वपापहरा तिथिः ॥ तस्यां संपूजितो वह्निः पूर्वैत्रोपोषवैद्दिने ॥ षष्ठ्यां वह्निं समभ्यर्च्य कुर्याद्व
ह्निमहोत्सवं ॥ वृश्चिकार्के कार्तिके मासीति कालादर्शे ॥ सर्वासु षष्ठीषु विशेषतः कार्त्तिकशुक्लषष्ठ्यां तु विशेषो भविष्योत्तरे ॥ षष्ठ्यां फलाशनो राजन्विशेषा
त्कार्तिके नृप ॥ राज्यच्युतो विशेषेण स्वराज्यं लभते चिरात् ॥ हत्वा षष्ठ्यां कार्त्तिके पापस्थितान्वै दानवान्सुराः ॥ दक्षाद्यतो हकैः सुषे मंत्रेणानेन संस्तुवंत ॥ स
मर्षिदारज स्कंद सेनाधिप महाबल ॥ रुद्रोमाग्निज षड्वक्त्र गंगागर्भ नमोस्तु ते ॥ प्रीयतां देवसेनानीः संपादयतु हृद्गतं ॥ हत्वा विप्राय वामान्नं पश्चात्स्व
यमपि वर्त्तते ॥ ये श्राद्धं कुर्वते तस्मै राज्यं भूमिं च ताद्भाजनमिति ॥ अब्दपर्यंतं षष्ठीषु राजन्तस्कंदं संपूज्य विप्राय दद्यादिति हिमाद्रौ वोद्धासः ॥ इति कार्त्तिकषष्ठी ॥

ज.प.
२०१
201

अथ मार्गशीर्षशुक्लषष्ठी स्कंदषष्ठी। सा च पूर्वविद्धा ग्राह्येति पूर्वमेवोक्तं। इयं चंपाषष्ठीति वाख्याता। तत्र स्कंदः तारकं हतवान्। अत्र तत्स्कंददर्शनं स्नानदानादि
कृतमक्षयं भवति। तदुक्तं भविष्योत्तरे। येयं मार्गशिरे मासि षष्ठी भरतसत्तम। पुण्या पापहरा धन्या शिवा शांता गुहप्रिया। निहत्य तारकं षष्ठ्यां गुहस्तारकरा
जतेजसा तारराजते न दीप्तिता कार्त्तिकेयस्य सा तिथिः। स्नानदानादिकं कर्म तस्यामक्षयमुच्यत इति। अस्यामेव षष्ठ्यां खंडेरायाख्यमल्लारिपूजाब्राह्मणभोज
नादि मल्लारिमाहात्म्ये उक्तं। दाक्षिणात्येषु चैतत्प्रसिद्धं।। नचोत्तरविद्धायां कार्या षष्ठ्यामुन्योरिति पुनम वाक्यात्। इयमेव योगविशेषेण चंपाभिधा। तदुक्तं
ब्रह्मांडपुराणे मल्लारिमाहात्म्ये। मार्गे भाद्रपदे शुक्ला षष्ठी वैधृतिसंयुता। रविवारेणसंयुक्ता सा चंपेतीह कीर्तितेति। विशाखाभौमयोगेन सा चंपेतीह
विश्रुतेति मदनाले। अस्यां विश्वेश्वरदर्शनमुक्तं तत्रैव। मार्गशीर्षे सिते पक्षे षष्ठ्यां वारेंशुमालिनः। शततारागते चंद्रे लिंगं स्याद् दृष्टिगोचरमिति। इयं
उक्तयोगयुक्ताऽपूर्वा परा वा कार्या। चंपाषष्ठी समप्रमाणं ते ति दिवोदासीय इति निर्णयसिंधौ। अथ चंपाषष्ठी कथा। स्कंद उवाच। पापुराअंवराजानं
धर्मपुत्रं युधिष्ठिरं। कदाचिद्दायर्योद्दष्टुं दुर्वासा मुनिसत्तमः। तं पप्रच्छ महातेजा धर्मपुत्रः कृतांजलिः। तद्वृत्तं श्रोतुमिच्छामि कथं च मुनिसत्तम। राम·
मातुर्वासा उवाच। शृणु राजन्महाभाग व्रतानामुत्तमं व्रतं। अस्तीहयव्रीरामात्रं सर्वकामांस्तु पूरयेत्। सर्वपापक्षयं कुर्याद्दारखंडितव्रतानापाय २०१

201A द्दिलभ्येतज्जीवद्भिर्हैवेनन्यपसन्तम॥षष्ठीभाद्रपदेशुक्ला वै ध्रुजेन समन्विता॥विशाखयामैभपोगेनसावं पेतीहविश्रुता॥देवासुरमनुष्याणां दुर्लभा षष्टि
हायनी॥ कृते त्रेतायां पं चैश द्वापनी द्वापरे पुनः। त्रेताविंशत्कलौ विंशद्वापिनी दुर्लभा ततः॥ आदौ कृतयुगे पूर्वं या नीराणि विश्वकर्मणा॥ तत्फलाद्वि
श्वकर्त्तृत्वं प्राजापत्यमवाप्नवान्। एतयुनाकार्त्तवीर्येण भुवि नारायणो नव॥ ईश्वरेणोमया साद्धे मितोरेतत्तलि भ्रमपा। यज्ञेनांविधिवत्कुर्यात्सो त्यंत्तं
फलमश्नुते। युधिष्ठिरउवाच। तद्विधिं श्रोतुमिच्छामि विस्तराद्वद तो मुने। केमंत्राः के च नियमाः स्नानं किं लक्षणाम वे ता। दुर्वासा उवाच। द्विदेवस्पर्क्ष
मौमे नैवेध्यजेन सम न्विता॥ नभस्येपासितां षष्ठीमासां प्रेतिनिगद्यते। द्विदेवस्पर्क्षे विशाखा। पंचम्यां नियमं कुर्यादुपवासमथव्रती। उपवासस्याशक्तु तं
नियममेकभक्तं कुर्याद्विस्त्तर्थः। वं पाषष्ठी व्रतं कुर्यात् यथोक्तवचनान्तराः। ततः प्रभाते विमले दंतधावनपूर्वकं॥ कृत्वाहमस्य व्रतं तस्य संकल्पं कुर्यात् तेन रः।
कृत्वेतिसकलां गोपे तं व्रतं समाधत्तेन मनसि निधार्य सर्थः। निराहारो घदेवे शंतव भक्त स्तत्परायणाः। पूजयिष्याम्यहं भक्त्या शरणं भव भास्कर। संकल्पमं
त्रः। ततः स्नानं प्रकुर्वीत नद्यादौ विमले जले। मृदमालभ्य मंत्रेणश्वतिलैः शुद्धेश्च मंत्रवित्। सावित्रः परमस्त्वं हि परं धाम जले मम। त्वत्तेजसा परिभ्रष्टं
पापं यातु सहस्रधा॥ प्रार्थनामंत्रः। आपस्त्वमसि देवेश ज्योतिषां पतिरेव च। पापं नाशय मे देव वाङ्मनःकर्मभिः कृतं। स्नानमंत्रः। ततः संतर्पयेद्देवा

जा॰प॰
२०२
202

न्नृषान्वितः गणानपि। ततश्चैत्यगृहं मौनी पाखंडालापवर्जितः। स्थंडिलं कारयेत्सुभ्रं चतुरस्रं सुशोभनं। स्थापयेद्द्वारतां कुंभं पंचरत्नसमन्वितं। रक्त
वस्त्रयुगच्छन्नं रक्तचंदनचर्चितं। तस्योपरि न्यसेत्पात्रं सौवर्णं ताम्रमेव वा। कुंकुमेन लिखेत्पद्मं द्वादशारं सकर्णिकं। तस्योपरि न्यसेत्सूर्यं सौवर्णं सत्था
रुणं। शक्त्या वा वित्तसारेण वित्तशाठ्यविवर्जितः। तमर्चयेद्गंधपुष्पैर्विधिमंत्रपुरस्सरं। पंचामृतेन स्नपनं कुर्याद्देवस्य संयतः। ततस्तु गंधतोयेन पू
र्णं पूजां समाचरेत्। गंधैर्नानाविधैर्दिव्यैः कर्पूरागरुकुंकुमैः। फलैस्सहतदंसंभूतैर्नैवेद्यैस्सुगंधिभिः। मंडपं कारयेत्तत्र पुष्पमालाविभूषितं। यथाशो
भं समकुर्वीत ध्वजश्चोपरि सर्वतः। ततस्तु पूजयेद्देवं भास्करं कमलोपरि। आदित्याय नमः। तपनाय नमः। रश्मये नमः। भानवे। भानुमते नमः। अर्यम्णो
। विश्वकर्माणे। अंशुमते। सहस्रांशवे। खनायकाय। सूराय। सूर्याय। खगाय नमः। एभिस्त्रयोदशभिर्नामभिः आदित्याय नमः इत्यनेन मध्ये
पूजनं। इतरैर्द्वादशभिः पूर्वादिदशक्रमेण पूजनं। जन्मांतरसहस्रेषु दुष्कृतं यन्मया कृतं तत्सर्वं नाशमायातु दिवाकर तवार्चनात्। प्रार्थनामं
त्रः। विनतातनयो देवः कर्मसाक्षी तमोनुदः। सप्ताश्वः सप्तरज्जुश्च अरुणो मे प्रसीदतु। अरुणपूजामंत्रः। ततः संपूजयेद्देवमग्नुं तत्तद्यथास्थितं राम०
। त्र्यष्टाक्षरेण मंत्रेण गंधपुष्पादिभिः क्रमात्। अष्टाक्षरोऽघृणिर्मंत्रः। कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः। जन्ममृत्युजरारोगसंसारभयनाशनः २०२

202A

शनः । मूर्यो दयेज्ञघ्ये मंत्रः । ततः संपूजयेद्धेनुं गां सवत्सां गां पयस्विनीं । सवस्त्र कंठाभरणां सुघंटाभिरलंकृतां । ब्रह्मणो स्वादिते देवि सर्वपापविनाशिनि
। संसारार्णवमग्नानां गोमातस्त्राहि मां महेशि । रुद्ररूपा बहुरूपाश्च मातरो लोकमातरः । गावो मामुपसर्पन्तु सरितः सागरं यथा । या लक्ष्मीः सर्वदेवानां या
च देवेषु संस्थिता । धेनुरूपेण सा देवी मम पापं व्यपोहतु । या लक्ष्मीर्लोकपालानां या लक्ष्मीर्धनदस्य च । चंद्रार्कशक्रशक्तिर्या सा धेनुर्वरदास्तु मे
। धेनुपूजामंत्रः ॥ तिलहोमं ततः कुर्यात्ताविद्याष्टोत्तरं शतं । ततस्तां कलये द्धेनुं मकौमे प्रीयतामिति । आचार्याय ततो दद्याद्दाहिरण्यसरथाहरणासकुं
मवस्त्रालंकृतां वैपस्करणैः सह । ददामि माझं भूतवैपस्कर संयुतां । मनोभिलषितावाप्तिं करोतु मम भास्करः । दानमंत्रः । गृहाण त्वमिमां भास्कर रवे मन
तं विश्वतोमुखं । मनोभिलषितावाप्तिसु मयोः कर्तुमर्हसि । प्रतिग्रह मंत्रः । सर्वतीर्थमयीं धेनुं सर्वयज्ञमयीं शुभां । सर्वदानमयीं देवीं ब्राह्मणाय ददाम्य
हं गोदान मंत्रः । गृहाणामि सुरभीं देवीं सर्वयज्ञमयीं शुभां ॥ उभौ त्रुनीहि वरदे उभयोस्तारिका भव । धेनुप्रतिग्रह मंत्रः । ततस्तु भोजयेद्विप्रान् दद्याद्दशै
व सशक्तितः । दद्याच्च दक्षिणां तेभ्यः प्रणिपत्य विसर्जयेत् । अवैकल्यं व्रते तस्य शंसंतु द्विजसत्तमाः । अभिनंद्य तमाशीर्भिः परिरेभुरनिंदिताः । ततस्तु
स्वयमश्नीयाद्विजानां शेषमिष्टकं । सहपुत्रैः कलत्रैश्च स्वजनैर्बंधुजनैर्वृतः । एवं यः कुरुते वं पापमोक्षं तत्फलमश्नुते । प्रश्नणाव विधिः प्रोक्तः स्वप्रश्नणां

जय०
२०३
203

वगोचरः।सर्वैश्चैतद्व्रतं कार्यं स्वशक्त्या पांडुःस्वभीहमिः।प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते विफलं तस्य तत्प्रसादनीशस्त्वानुकालिकः।पंचम्यां नि
यमं कुर्याद्दानायैव च नाद्भुती।षष्ठ्यां स्नानं प्रकुर्वीत संतर्प्य पितृदेवताः।अभ्येत्य स्वगृहं मौनी सूर्यं मनसि चिंतयेत्।स्थापयेदव्रणां कुंभं सप्तान्नं वत
चोपरि।तस्योपरि न्यसेत्ताम्रं यं पलेनैकेन निर्मितं।सौवर्णीं भक्तिसंयुक्तं वित्तसारं रथारूढां॥तमर्चयेज्जगन्नाथं गृहीतात्तांशुरोःस्वयं।षडक्षरेण
मंत्रेण गंधपुष्पानुसंभवं।ॐ नमः सूर्यायेति षडक्षरमंत्रः।संपूज्य विधिवद्देवं फलपुष्पादिकं च यत्।सूर्याय वेदयेत्सर्वं सूर्यो मे प्रियतामिति।त
तः प्रभाते विमले गत्वा गुरुगृहं व्रती।सर्वोपक रणैः सूर्यमाचार्याय निवेदयेत्।धान्यं पुष्पं फलं वस्त्रं रत्नं धेनादिकं च यत्।गवां कोटिसहस्रेण कु
रुक्षेत्रे कंपर्वणि।तत्पादानस्य राजेंद्र कलां नार्हंति षोडशीं।सर्वतीर्थप्रदानानि तथा मासापि षोडश।पचंम्यां तु लितान्यायैः चंपैकानतिरिच्यते।
आदित्यस्तपनः पूषा भानुमान्भानुरर्यमा।विश्वकर्मांशुमान्देवः सहस्रांशुः खनायकः।सूरः सूर्यः खगः पूज्यः पूर्वपत्रादिषु क्रमात्।देवइत्यं
शुभमन्तो विशेषणां।पंचमासि सादिनाङ्गुनर्भ्रंतविधिर्नहीनविषयः।इति स्कंदपुराणोक्तं चंपाषष्ठीव्रतं।माघशुक्लषष्ठ्यां भविष्योत्तरोक्तं मंदार राम०
षष्ठीव्रतं।श्रीकृष्ण उवाच।शृणु पार्थ प्रवक्ष्यामि सर्वपापप्रणाशनीं।सर्वकामप्रदां पुण्यां षष्ठीं मंदारसंज्ञितां।माघमासामलपक्षे तु पंचम्यां लघु २०३

203A

भुमरः।इंतकांथंततःकृत्वास्वपेद्भूमौजितेंद्रियः।सर्वभोगविहीनस्तुषष्ठीमुपवसेन्नरः।प्राप्यापूज्ञांद्विजश्रेष्ठान्मंदारंप्राशयेन्निशि।मंदारोराजार्की
ः।ततःप्रभातेउत्थायकृतस्नानःपुनर्द्विजान्।संपूज्यमंहतंकृत्वामंदारकुसुमाष्टकं।सौवर्णांपुरुषांतद्वत्पद्महस्तंसुशोभनं।पद्मंकृष्णतिलै
ःकृत्वाताम्रपात्रेदलाष्टकं।पूजममंदारकुसुमैर्भास्करायेतिपूर्वतः।नमस्कारेणतद्वत्सूर्यायेत्यानलेदले।दक्षिणेतद्वदर्काययज्ञेशायवनै
र्ऋते।पश्चिमेवसुधाम्नेतिवायव्येचंडभानवे।कृष्णायोत्तरतःपूज्यआनंदायेत्यतःपरं।कर्णिकायांचपुरुषंपूज्यसर्वात्मनाहरिं।शुक्लवस्त्रैःसमावेष्ट्यभक्ष्य
माल्यफलादिभिः।एवमभ्यर्च्यतत्सर्वंउपाध्यायेनिवेदयेत।भुंजीततैललवणवर्जितःप्राङ्मुखःक्षितौ।अनेनविधिनासर्वंसप्तम्यांमासिमासिवै।कुर्यात्तंव
त्सरंयावद्द्विजशाठ्यविवर्जितः।एतदेवव्रतांतेतुनिधायकलशोपरि।रविसुक्तेद्विजेन्द्रायदातव्यंभक्तिमिच्छता।रविसुक्तमितिसौवर्णारविसंयुतं।नमोमंदा
रनाथायमंदारभवनायच।त्वंरवेतारयस्वास्मानस्मात्संसारसागरात्।विधिनानेनयःकुर्यात्षष्ठीमंदारसंज्ञितां।विपाप्मासस्तुखीमर्त्योकल्पंतःस्वर्गेमहीपते।।
इमांममोहध्वदलध्वांतोद्धासनहीपिका।प्रगृह्यागच्छसंसारगर्त्तायांनपतत्वलेन्नरः।मंदारषष्ठीविख्यातामोक्षिताथैफलप्रदायःपठेच्छृणुयाद्वापिसोपि
पापैःप्रमुच्यते।षष्ठीमुपोष्यतिलपंकजकर्णिकायांसंपूज्यभास्करमहोस्तुरवक्षपुषैः।सुसंशोमंदारः।यथायामुतंतिपुरुषानहितत्करासाविज्ञोभहीराप

जय.
२०५
204

तिलद्याः फलमाप्नुवंति॥ इति भविष्योत्तरोक्तं मंदारषष्ठीव्रतं॥ अथ स्कंदपुराणोक्तं दारिद्र्यहरषष्ठीव्रतं। षष्ठी नाम तिथिः पूज्या सा मान्या देवतैरपि। एकभक्तेन नक्ते-
न तथैवायाचितेन च। उपवासेन दानेन तैलक्षारविवर्जितः। अयं च भगवान् देवो भास्करः स्वयमुद्युक्तिः। येन मे घृणा दृश्येत तत् ह्युक्तं कथयाम्यहं। गोपनीयं व्रतं दिव्य-
मिहलोकफलप्रदं॥ यस्मिन्कृते व्रते चैव दारिद्र्यं न भवेत्कुले। षष्ठीतिथिं समुद्दिश्य प्राश्य ग्रासस्य भोजनं॥ शालोदनं च पयसि कृत्वा शर्करया युतं। बहुलं घृतसंयु-
क्तं वर्षमेकं प्रदापयेत्॥ कुले तस्यैव ये जाता ये भविष्यंति मानवाः। अक्षयास्तेन महात्मानो व्रतेन पुण्यपावनाः। इह तस्यैव पश्यंति तद्दारिद्र्यं ध्रुवं गच्छति॥ इति दा-
रिद्र्यहरषष्ठीव्रतं। पक्षद्वयगता सुक्षर्वे मासषष्ठीषु तिथिषु पतितेन स्कंदं सम्यक् पूजयेत्। तदुक्तं षष्ठ्यां पूजा गुहस्यैवेति। अथ सिद्धविद्धादिकं। शुक्ले कृष्णे न प्र-
तिपत्षष्ठी स्यादिष्यति पल्लिर्णांयेऽक्तं भौमेनापि मिश्रा। भौमे षष्ठी तृतीया स्यादित्युक्तमेव। षष्ठी शनिवारे राविहद्धा। तदुक्तं। सौरे हस्तोत्तराषाढे रेवती चित्रया
सह। पंचमी चैव षष्ठी च अर्यम्णा सह वर्जितेति॥ षष्ठ्यां शनिवारे ताक्रकचाभिधो योगः। तदुक्तं रत्नमालायां तिथ्येश्वरा रसनवपंचसंख्यया त्रयोदश स्युर्मि-
लने कृते सति। स्मृतः सयोगः क्रकचाभिधानको विवर्जनीयः शुभकर्मसु ध्रुवमिति। अत्र दंतकाष्ठं तैलाभ्यंगस्नानं च निषिद्धं। यथा। दंतकाष्ठे कुलस्य राम.
च जातिनाशो यथाक्रमं। जायते षष्ठ्यमावास्याप्रतिपत्सु कृते सति। तथा च रत्नमालायां। षष्ठीषु तैलं पलमष्टमीषु क्षौरक्रियां चैव चतुर्दशीषु। स्त्रीसे- २०५

204A

वनं नष्टकुलास्तपुंसामायुःक्षयार्थसुनयो वदंति॥ अयं दंतकाष्ठादिनिषेधस्तात्कालिकतिथ्यामेव। तदुक्तं। स्नाने चाभ्यंजने चैव दंतधावनमैथुने। तिथिस्ता
त्कालिकी ज्ञेया पात्तथा मरणजन्मनोः। अत्र षष्ठी तैलमित्युक्तत्वात्तिलतैलमेव स्नाने निषिद्धं। न तु सर्वं तैलं। तदुक्तं स्मृतिमहार्णवे। यत्र तैलनिषेधः स्यात्तिलतैलं
निषिध्यते। अभ्यंगमात्रनिषेधेऽपि स्नानपादेरपीष्यते इति। पुष्पतैलं समस्तं सर्वं घात्र निषेधः। सार्षपं गंधतैलं च यत्तैलं पुष्पवासितं। अन्यद्रव्ययुतं तैलं न दुष्य
ति कदाचनेति स्मृतेश्च वचनात्। रविभौमदशमीनामप्यतमेकरस्यहे सिंहस्थिते षष्ठी उत्तमा भवति। पराः परेषामित्युक्तत्वात्। तथा कर्के मेषस्थे सूर्ये षष्ठी दग्धा भ
वति तत्र शुभकर्म न कार्यं। षष्ठ्यां पाश्चिमे योगिनीत्वात् सुमुख्या यात्रा न कार्या। इति सर्वषष्ठीनिर्णयः॥ श्रीमद्दिल्लीशमेनेत्यादि पादो न श्लोकद्वयं पूर्ववत्॥ अत्यु
ग्रं स्तुत्वकं शिवं समकरोत्तयुग्रायपरं सप्तमं॥ ॥इति श्रीदैवज्ञमहात्मजपौंडरीकयाजिरत्नाकरविरचिते जयसिंहकल्पद्रुमोद्योते षष्ठीनिर्णयस्तबकः सप्तमः समा
प्तः॥ अथ सप्तमीनिर्णयः॥ तत्रादौ सप्तमीध्यानं। तच्च वराहपुराणे माह यस्याः सप्तमीमतांतिक स्मपक्षे। नीलकुंतलकंचमाजदाख्यजेडुभूषिता। इभस्था
सप्तमी गौरी द्विभुजा च जपाविणीति। शुक्लपक्षे। सप्तमी तिथिरुपवासादिषु षष्ठीयुतैव ग्राह्या युग्मवाक्यात्॥ षष्ठ्या युक्ता सप्तमी चेत्कर्तव्या तात सर्वदा।
षष्ठी च सप्तमी यत्र तत्र संनिहितो हरिरिति मदनरत्ने पद्मवचनात्। षष्ठ्योक्ता हस्यपक्षा वासारुद्रे विद्धा तथाष्टमी। सप्तमीपरविद्धा च नोपोष्यं तिथिपंचकमि

त्रय० ग्निं दष्टुराणां च नवे परविद्धायाः सप्तम्या उपवासे निषेधात्। अत्र माधवः। पद्मपूर्वे पुरस्त्वमय पर्यंता षष्ठी परे ष्टात्तिथिक्षये। आस्तमयाद्दशीयगाष्टमी त्रिमुहूर्त्ता तद्धा
२०५ पूर्वविद्धाया अलाभाउत्तरविद्धायाश्च प्रतिषिद्धत्वात्कुत्रानुष्ठानमिति चेत्। निषेधमुल्लंघ्य पूर्वत्र विद्धायामिति क्रमः। यद्यप्यस्मिन्नर्थे वचनं नोपलभ्यते तथा
205 पि शेषविलोपस्यान्याय्यत्वादुत्तरविद्धायां गौणकालत्वेन सा कर्त्तव्येति। इति सप्तमीसामान्यनिर्णयः। अथ सप्तमीकृत्यानि चैत्रशुक्लसप्तम्यां दमनकादिभिः सू
र्यपूजा कर्त्तव्या। तदुक्तं निर्णयामृते देवीपुराणे चैत्रमासतिथिप्रक्रमे भास्करस्य तु सप्तम्यां पूजां दमनकादिभिः। कृत्वा प्राप्नोति भोगाढ्यान् विगतारिर्महा
शय इति। महातपा इत्यपि पाठः। अस्यामेव भविष्यत्पुराणोक्तमनोदनसप्तमीव्रतं हेमाद्रौ शुक्लपक्षे तु चैत्रे संस्थादि। अस्यां श्रीसूर्यमंडलव्यदक्षापायमे
नवा द्विजान्संतर्प्य तहे वस्त्रय मश्नीयाद्विज इत्यनोदनसप्तमीव्रतं। अस्यामेव भविष्यपुराणोक्तं नामसप्तमीव्रतं। तदुक्तं हेमाद्रौ। चैत्रात्प्रभृति कर्त्तव्या म
र्वघ नामसप्तमीत्यादि॥ अत्र चैत्रमासादारभ्य धाता अर्यमा। मित्रः वरुणः इंद्रः विवस्वान् पर्जन्यः पूषा। अंशुः। भगः। त्वष्टा। जिष्णुः। एतैर्नामभिः प्रतिमा
समं के के नना म्ने देवं क्रमेणा द्वादशादित्याः पूजनीयाः। इति नामसप्तमीव्रतं॥ अथास्यामेवारण्यं विष्णुधर्मोक्तं सूर्यव्रतं। मार्कंडेय उवाच। चैत्रशुक्लस राम०
पक्षे तु सप्तम्यां कृष्णपक्षस्य सुपोषितः। सप्तम्यामर्चनं कुर्याद्देवदेवस्य गोपतेः। बहिः स्नानं नरः कृत्वा गोमयेनोपलेपितं। लेपयेत्स्थंडिलं सम्यक् ततो गौरमृदा २०५

205A

रूपं तिव्राश्वपत्रं कमलं वर्णकैः शुभमालिखेत्। कर्णिकायां न्यसेत्तत्र देवदेवं विभावसुं। पूर्वपत्रे न्यसेद्देवौ द्वौ राजन्नृतुचारकौ॥ आग्नेये च न्यसेत्पत्रे गंधर्वौ ऋतुचारकौ
।दक्षिणे च न्यसेत्पत्रे तथैवाप्सरसां द्वयं। राक्षसौ द्वौ महाराज पत्रे नैर्ऋतिके न्यसेत्। कद्रवेयौ महानागौ पश्चिमे ऋतुचारकौ॥ वायव्ये यातुधानौ द्वौ त-
थैव न्यसेत्तम। उत्तरे व्रतपापघ्ने विन्यसेच्च ऋषिद्वयं। ऐशाने विन्यसेत्पत्रे ग्रहमेकं द्विजोत्तम। तेषां संपूजनं कार्यं गंधमाल्यानुलेपनैः। दीपधूपैः सनैवे-
द्यैः एथ क्षरयगारिं देमार वं संपूजनं कृत्वा सर्वेषां तदनंतरं। घृतेन होमं कुर्वीत सर्वेषामष्टशतेन तु। अन्येषां च तथाष्टाष्टाविंशेन जन्म। अन्येषां क-
मलविन्यस्तदेवानामष्टाविंशौ आहुती इति शेषः। नाम्नान्तथैव सर्वेषां एकैकं भोजयेद्द्विजं। शक्त्या च दक्षिणां देयात्तेषामेव यदुत्तम। एवं संवत्सरं कृत्वा
व्रतमेतन्नरोत्तम॥ पौराणिकाय विप्राय व्रतस्यांते प्रयत्नतः विधिवद्व्रतज्ञो दद्यात्सुवर्णगोयुग्मं मासर्वकामम दद्येत तत्र व्रतस्य तु कृते सर्वपंचत्वा व्रतेनानेन
नवीरेण सूर्यलोकमवाप्नुयात्। अथ द्वादशवर्षाणि करोत्येतन्महाव्रतं। भित्त्वार्कमंडलं राजन्विष्णोः सायुज्यतां व्रजेत्। एतद्व्रतं पापविनाशकारि
धन्यं यशस्यं रिपुनाशकारि॥ लोके ह्यमुष्मिंश्च परं च राजन्स्वर्गप्रदं मोक्षकरं तथैव॥ इति चैत्रशुक्लसप्तम्यां सूर्यव्रतं। अथास्यामेव सप्तम्यां वैशाखशु-
क्लसप्तम्यां वा कमलासप्तमीव्रतं। तदुक्तं पाद्मे। वसंतामलसप्तम्यां स्नातः सन्गौरसर्षपैः। तिलपात्रे तु सौवर्णं निधाय कमलं शुभं। वस्त्रयुग्मावृतं कृत्वा गं-

जय.
२०६
206

सवृषैरथार्चयेत्॥ नमस्तेस्य ब्रह्मरूपाय नमस्ते विश्वधारिणे॥ दिवाकर नमस्तुभ्यं प्रभाकर नमोस्तु ते इति संप्रार्थ्य॥ अस्तमये सोहं कुंभं सूर्येति प्राप दत्वा कपिलां वहंतो
पवासं कुर्यात्॥ ततः प्रातः द्विजान् संभोज्य मासं स्वयं भुंजीत एवं संवत्सरं कृत्वांते स्वर्णकमलान्वितं सूर्यं प्रतिशयनादि च दद्यात् सर्वसौख्यान्वितो भवतीति कमलस
प्तमीव्रतं॥ वैशाखशुक्लसप्तम्यां निंबसप्तमीव्रतं॥ भविष्योत्तरे तज्जीयासप्तमीवीरश्रेष्ठ गुणवगदत्तो मम॥ निंबपत्रैः समस्तापूजा पापघ्नी शोकनाशिनी॥ ॐ ख
खोल्काय नमः अनेन सूर्यपूजनं कुर्यात्॥ निंबपत्रभक्षणं च कुर्यात्॥ तदुक्तं हेमाद्रौ॥ वैशाखशुक्लपक्षस्य जितक्रोधो जितेंद्रियः॥ निंबपत्रं ततोश्नीयात्सप्त
म्यां मंत्रतो नृप॥ निंबपल्लव भद्रं ते सुभद्रं तेस्तु वै सदा॥ ममापि कुरु भद्रं वै प्राशनाद्रोगहा भवेति मंत्रः॥ इत्थं प्राश्य स्वपेद्भूमौ देवस्याग्रतो नृप॥ अष्ट
म्यां भानुं प्रपूज्य पितृन् ब्राह्मणान् संभोज्य स्वयं भुंजीतेति निंबसप्तमीव्रतं॥ अस्यामेव सप्तम्यां गंगोत्पत्तिः॥ तत्पूजा चोक्ता ब्राह्मे॥ वैशाखशुक्लसप्तम्यां जह्नुना जा
ह्नवी पुरा॥ क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात्॥ तां तत्र पूजयेद्देवीं गंगां गगनमेखलामिति॥ गंगापूजनप्रकारस्तु दशहराप्रकरणे द्रष्टव्यः॥
अत्र पूर्वाह्णव्यापिनी ग्राह्या॥ दिनद्वये साम्ये न पूर्वाह्णगामिन्यां पूर्वा॥ साम्यासाम्ये तु निर्णयामृते निर्णयसिंधौ तु॥ शिष्टाचारान्मध्याह्नव्यापिनी ग्रा राम.
ह्या दिनद्वये तद्व्याप्तावव्याप्तौ वैकदेशव्याप्तौ वा पूर्वा॥ युग्मवाक्यात्॥ भट्टोजिदीक्षितग्रंथकृत्यरत्नावल्योरप्येवं॥ अस्यामेव सप्तम्यां पद्मपुराणोक्तं शर्करासप्त २०६

206A

मीव्रतं। पुलस्त्य उवाच। शर्करासप्तमीं वक्ष्ये सर्वकल्मषनाशिनीं। आयुरारोग्यमैश्वर्यं ययानंतं प्रजायते। माधवस्य सिते पक्षे सप्तम्यां श्रद्धयान्वितः। प्रातः स्नात्वा
तिलैः शुक्लैः शुक्लमाल्यानुलेपनैः। स्थंडिले पद्ममालिख्य कुंकुमेन सकर्णिकं। तस्मै नमः सवित्रेति धूपं नैवेद्यं निवेदयेत्। स्थापयेदन्नरां कुंभं शर्करापा
त्रसंयुतं। शुक्लवस्त्रेण संवेष्ट्य शुक्लमाल्यानुलेपनैः। सहिरण्यं यथाशक्त्या मंत्रेणानेन पूजयेत्॥ विश्वदेवमयो यस्माद्वेदवादीति पठ्यसे। तमेवामृत सर्व
स्त्वमतः पाहि सनातन। पंचगव्यं ततः पीत्वा स्वपेत्तत्पार्श्वतः क्षितौ। सौरसूक्तं जपंस्तिष्ठेत् पुराणश्रवणेन वा। अहोरात्रे गते पश्चादष्टम्यां कृतनित्यकः। तत्स
र्वं वेदविदुषे ब्राह्मणाय निवेदयेत्॥ भोजयेच्छक्तितो विप्रान् शर्कराघृतपायसैः। भुंजीतातैललवणं स्वयमप्यथ वाग्यतः। अनेन विधिना सर्वं मासि मासि
समाचरेत्। वत्सरांते पुनर्दद्यात् ब्राह्मणाय समाहितः। शयनं वस्त्रसंवीतं शर्कराकलशान्वितं। सर्वोपस्करसंयुक्तं तथैकां गां पयस्विनीं। गृहं च शक्तितो
दद्यात् समस्तोपस्करान्वितं। सहस्रेणाथ निष्काणां कृत्वा दद्याच्छतेन वा॥ दशभिर्वाथ विभवे वापि निष्केणैकेन वा पुनः। पद्मं सशक्तितो दद्याद्वित्तशाठ्य
विवर्जितः। पद्मं सौवर्णं॥ अमृतं पिबतो वक्त्रात् सूर्यस्यामृतबिंदवः। निपेतुर्ये समुत्पन्नाः शालिमुद्गयवाः स्मृताः। शर्करा च पुनस्तस्मादिक्षुसारोऽमृतोप
मा। इष्टा रवेरतः पुण्या शर्करा हव्यकव्ययोः। शर्करासप्तमी चैषा वाजिमेधफलप्रदा। सर्वदुःखोपशमनी पुत्रसंततिवर्द्धिनी। यः कुर्यात् परया भक्त्या स

जय. वैसमहतिमाप्नुयात्।कल्पमेकंवसेत्स्वर्गेततोयाजाथवेत्परां।इदमपिचशृणोतियःस्मरेद्वापठतिसमातिस्तरेश्वरस्यलोकं।मतिमपिवददातियोजनानामसमरवधू
२०७ जनकिन्नरैःसपूज्यः।इतिपद्मपुराणोक्तंशर्करासप्तमीव्रतं।आषाढशुक्लसप्तम्यांकश्यपाद्विवस्वान्नामसूर्योजातइतिनिर्णयामृते।तत्रवर्तुलमंडलस्थितंसू
207 र्यंधूपदीपानुलेपनादिभिःसंपूज्यमोदकनैवेद्यंदद्यात्।तदुक्तंब्रह्मपुराणे॥आषाढेशुक्लसप्तम्यांविवस्वान्नामभास्करः।जातःपूर्वंस्तुतस्मात्तंतत्रो
पोष्ययजेत्सदा।रथचक्राकृतौरम्येमंडलेसर्वकामदं।भक्ष्यैर्भोज्यैस्तथापेयैःपुष्पैर्धूपविलेपनैरिति।अथश्रावणशुक्लसप्तम्यांअव्यंगसप्तमीव्रतं
॥तदुक्तंभविष्योत्तरे।श्रावणेमासिसप्तम्यांदेवाग्रेसप्तिवाहनं॥शुक्लपक्षेसमभ्यर्च्यपुष्पधूपादिभिःशुचिः।प्राप्नोहिविपुलंदेवधर्मानंतरमक्षयमि
ति।अस्यामव्यंगसमर्पणंनक्तभोजनंचकर्त्तव्यं।अव्यंगशब्देनकार्पाससूत्रनिर्मितःसर्पनिर्मोकाकृतिरंतःसुषिरःद्वाविंशत्यधिकशतांगुलपरिमितउ
त्कृष्टःविंशत्यधिकशतांगुलपरिमितोमध्यमः।अष्टोत्तरशतांगुलपरिमितोह्रस्वइतिबोद्धव्यमितिवीरमित्रोदयेभविष्यप्रतिवर्षसमर्पणमुक्तं।इत्य
व्यंगसप्तमीव्रतं॥अस्यामेवसप्तम्यांपापनाशनीव्रतं॥हेमाद्रौ।शुक्लपक्षस्यसप्तम्यांयदर्क्षेढकरोभवेत्तदासातुमहापुण्यासप्तमीपापनाश राम.
नीति।अयंचयोगोबहुलंश्रावणएवभवति।तस्यांसंपूज्यदेवेशंविचित्रमालंजगद्गुरुं।सप्तजन्मकृतपापात्कुहानिर्मुक्तोभवति।दानहोमादिकंचाक्षयं २०७

207A

भवतीति भविष्यत्पुराणोक्तं पापनाशनीव्रतं। इति श्रावणशुक्लसप्तमी॥ अथ भाद्रकृष्णसप्तम्यां वाराहपुराणोक्तं पुत्रव्रतं। तत्र विष्णुं संपूज्य गोपालमंत्रे
णाज्यघृतैः कृष्णतिलैरष्टशतं होमं कृत्वा ब्राह्मणान्संभोज्य बिल्वफलप्राशनपूर्वकं स्वयमपि षड्रसैर्भुंजीत। वत्सरांते गोयुग्मं दद्यादिति पुत्रसप्तमी
व्रतं। अथ भाद्रशुक्लसप्तम्यां भविष्यत्पुराणोक्तं फलसप्तमीव्रतं॥ तत्र दिवाकरं फलैः संपूज्य स्वयमपि तान्समवहते॥ तदुक्तं हेमाद्रौ मासि मासि
फलाहारः फलदायी फलार्थे नइसिद्धि। इति फलसप्तमीव्रतं॥ ॥अस्यामेव सप्तम्याममुक्ताभरणव्रतं॥ तत्र सप्तमी पूर्वविद्धा ग्राह्या। षण्मुन्योरि
तियुग्मवाक्यात्। अथ व्रतं कृत्स्नं हेमाद्रौ भविष्योत्तरे। श्रीकृष्णयुधिष्ठिरसंवादमधिकृत्य। भद्रे भाद्रपदे मासि सप्तम्यां सलिलाशये। स्नात्वा शिवं मंडल
के लेखयित्वा तत्र पार्वतिकां भक्त्या संपूज्य समयं कुर्याद्दध्यात्करेयुतां। यावज्जीवं मयात्मा त्वाशिवस्याविनिवेदितः। इत्येवं समयं कृत्वा ततः प्रभृति दोरकं। सु
वर्णादिसंभवं करे बध्वा मुंउकांश्च श्वश्रूपक्षे अथवा द्विजे दत्वा स्वयमपि तान्नेव भुंजीयात्। एवं प्रतिमासं सप्तम्यां आसंवत्सरं व्रतं कृत्वा पारितेमुद्रि
काबद्धो हेमी रूप्या स्वशक्तितः। ताम्रपात्रे परिस्थाप्य ब्राह्मणे विनिवेदयेत्। आचार्याय सौवर्णांगुलीयकं। पुष्पकुंकुमसिंदूरतांबूलांजनसूत्रकैः
सह दत्वा व्रतं समापयेत्। अनेन संतानसौख्यं शिवलोकादिप्राप्तिश्च भवतीति। इति अमुक्ताभरणव्रतं समाप्तं। अस्यामेव फलसप्तमीव्रतं हेमाद्रौ। अ

ज॰प॰

२०८

208

यथा माघ्यदेमासि सितपक्षे महीपत इत्यादि। अत्र स्वरवोल्लंसंप्रत्प्रातरष्टमां फलैर्द्विजान् संतर्प्य तैरेव पारणां कुर्यादिति फलसप्तमीव्रतं। त्रस्यामेवानं
तफलसप्तमीव्रतं। हेमाद्रौ शुक्लपक्षे तु सप्तम्यां मासि माद्रपदे स्मृते त्यादि॥ तत्र स्नायं स्नं पूजनं नक्तं भुंजीत। एवं संवत्सरं कुर्यादिति। इति अनंतफ
लसप्तमीव्रतं॥ अथ शुक्लादि श्रावणाकृष्णसप्तम्यां शीतलाव्रतं। तत्र मध्यान्हव्यापिन्यां कार्यं। तथा च माधवीये हारीतः। पूजाव्रतेषु सर्वेषु मध्या
न्हव्यापिनी तिथिरिति। अथ तद्विधिः। मासपक्षाद्युल्लिख्य मम सावेध ब्याद्यारिग्रभर्त्रे विपोगपुत्रसौख्यधनधान्यप्राप्तये शीतलाव्रतं करिष्य इति संकल्प्य त
त्र यथा मिलितोपचारैः शीतलां पूजयिष्य इति संकल्प्य कलशं संस्थाप्य तदुपरि शीतलां पूजयेत्। तत्र ध्यानं स्कांदे। वंदेहं शीतलां देवीं रासभस्थां
दिगंबरां। मार्जनीकलशोपेतां शूर्पालंकृतमस्तकामिति॥ कुंभे संस्थापयेद्देवीं पूजयेन्नाममंत्रतः। शीतले हर मे पापं पुत्रसौख्यफलप्रदे॥ धन
धान्यप्रदे देवी पूजां गृह्ण नमोस्तु ते इति प्रार्थनां विधाय। शीतले शीतलाकारे अर्घं मम गृहाण प्रदे। श्रावणस्यासिते पक्षे अर्घं गृहाण नमोस्तु ते इत्य
र्घं दद्यात्। शीतले न्नानि पक्वानि दध्ना समन्वितानि च। नैवेद्यं च प्रयच्छामि घृतमिश्रं च सुंदरि। गौरि सौभाग्यजये त्वमस्य जनीया प्रपलतञ्ज इति पूजाविधि शाम॰
ः। अथ कथा हेमाद्रौ भविष्यत्पुराणे। कृष्ण उवाच॥ प्रसिद्धं श्रूयतां रम्यं नगरं हस्तिनापुरं। इंद्रद्युम्नश्च राजाभून्नृपतिर्लोकपालकः। धर्मशर्मा वि २०८

208A धानामतस्यभार्यापापशालिनी॥ क्रियानाम्नश्चसाध्वीवदान्यशीलाप्रियंवदा। अभवत्प्रथमःपुत्रोमहाधर्मेतिनामतः। नंदनःपितृवाक्यस्यबाल्यात्कालादस्मा
त्ततोनवमृत। द्वितीयाचतथापुत्रीतस्यजातागुणोत्तमा। सर्वलक्षणसंपन्नाशुभकारीतिनामतः। ववृधेसापितृगेहेसर्वांगसुंदरी। नाम्नारू
पेणासाबालासर्वांग्या। बहुगुणाधिका॥ सामुद्रिकगुणोपेता पद्महस्ताप्रियंवदा। वरःकुलेनमानेनलक्ष्मीवानरूपवानगुणैः। समापयौवज्ञ
याहपाणिग्रहपापूर्वकं॥ कदाचित्सापितृगेहंजामातानपनायच। आजगामजनैःसार्धंतत्पुत्रीगमनोत्सुका। प्रणामंचपितुःपादौ
त्तरितंवाहहासिनी। तत्पुत्रींमंत्रयामाससजामाताकृतविग्रहः। रथमारुह्यहेस्वामिन्यामिस्वपुरेगृहं। तस्याःपिताहुवाचेदंदंपत्योःशु
भहेतवे॥ षष्ठितंतुस्थिराभूत्वादिनमेकंक्षमस्वमे। शीतलासप्तमीनामव्रतंकुरुसुतेशुभे॥ सौभाग्यारोग्यजननंअवैधव्यप्रदंतथा॥ कन्यावास
।तातनतत्रयरिज्ञातंयदुक्तंपप्रयोनिना॥ पतिव्रतासमोधर्मोनास्तीहभुवनत्रये॥ ततस्तांकारयामासशीतलाव्रतमुत्तमं। सुकन्यांप्रेषयामासव्रा
ह्मणोब्रह्मपारगः। भर्त्रासहैवसाबालाजगामश्वशुरालये। मार्गेपथ्यानिसंगत्यव्रतोपकरणांशुभं। शीतलापूजनार्थंतुतडागंसाययौमार्गे
यत्तानतडागंदृष्ट्वातयानैवतडागंविचिसाधनं। वभ्रामसावनेभ्रमस्मरंतीशीतलाव्रतं। अतिश्रांतापपातोर्व्यांरोदंकरुणांवहु। स्मरंतीशीतलां

जय०
२०९
209

वृद्धांभर्तृकानाम भयंकरी। एतस्मिन्नेव काले तु नारीरूपं ददर्श सा। सा नारी तामथापृच्छत् किं त्वं रोदिषि सुस्वरं। वृद्धायाश्च वचनं श्रुत्वा ब्राह्मणी वाक्यमब्रवी
त्। भर्त्तारं रक्षसंयुक्तं मार्गे संस्थाप्य शोभने। तडागं इष्टुमायाता शीतलापूजनाय वै। मया न दृष्टः का सा रंभर्त्ता दुःखमती वमे। इति बालावचः श्रुत्वा वृद्धा
तां प्रस्तुवाच ह। भविष्यति विरंजीवी भर्त्ता ते मङ्गलोचने। आगच्छ पूजनार्थाय दर्शयामि सरोवरं। तया सह गता साध्वी तडागं विधिपूर्वकं। पूजया
मास सश्वा रं तां तोषयामास शीतलां। पूजयित्वा च तां देवीं पंथानं गंतुमुद्यता। शीतला याव रं गच्छ समह सस्यान्न भास्थिता। चिंतयाभिप्रीतां गी
मज्ञर्त्ती किं तु वक्ष्यति। सरोवरे समायातो न्वेषयन्न शांति विग्रहः। ब्राह्मणो निद्रयाक्रांतः पूर्वकर्मप्रभावतः। दृष्टो भुजंगरूपेण सज्जनः पूर्वकर्मणा। वि
षाहतं पतिं दृष्ट्वा शीतलायाः पतिव्रता। वरं संस्मृत्य सा बाला पांसुरोदनं करुणां बहु। तयो रुदनं तदा दंपत्योर्योगपसौभाग्य दर्शनात्। वनदेवगणाः ऋषयो रु
रुदुर्दुःखकर्षिताः। शपंती करुणां बाला शोचयामास तद्वती। या वन्यपालोकस्थं जनं संयतया तल्कृते। कुशला कुशलं पश्यताव न्मे नास्ति निवृतिः। वन्हि
ना साधयिष्यामि आत्मानं पतिना सह। अद्यैव त्यक्ष्ये तथा दिव्यमक्षयं सुखमुत्तमं। इति तस्याः सुवाक्यं सा तं ज्ञात्वा देवी समुपस्थिता। शीतलोवाच। वत्से किमि राम:
दासि त्युक्तं न श्रुतं वरवर्णिनि। शीतलाव्रतचारिणा वैधव्यं नैव जायते। स्वयमुत्थाप्य कन्यारिपां पतिं स्वप्रं गृहे यथा। तो भयपाश्रुत्य यावीर्णं व्रतं वैधव्यना २०९

209A शनं॥ इत्युक्त्वा बोधयामास भर्त्तारं सा पतिव्रता। भर्त्तापि सुस्थितो दृष्ट्वा स्वां प्रियां प्रतिकर्मणा॥ दृष्ट्वा तु महदाश्चर्यं तद्वनस्थायिनो जनाः। सर्वे ते विस्मयं जग्मुस्त्वा
त्मणीपतिरक्षणात्॥ ओहो शशीहरिणीतां वृद्धां प्रणीपतस्पतिव्रता॥ या वै मातर्न स्वप्नो नो वैधव्यं च वियोगिता। अन्यापि शीतलायास्तु व्रतं नारी करिष्यति। अवै
धव्यमदारिद्र्यमवियोगं समश्नुते॥ इत्युक्त्वांतर्दधे देवी शीतला कामरूपिणी॥ शीतलाया वरं लब्ध्वा जगाम स्वीयवेश्मनि। पश्चान्निवासमप्रस्तु विप्रस्यं घ
समर्हणा मातिवितमर्वं मंगला॥ प्रमादमामाधवशीतलायाः निसोत्सवापावर्तितवद्धभूयइति हेमाद्रौ भविष्ये शीतलाव्रतं॥ अथाश्विनशुक्लसप्तमी॥
अस्यां मूलयुक्तायां केवलायां वा पूर्वं निमंत्रितां फलद्वययुक्तां शास्त्रवामानीयतधामसहपंचमास्नापितां देवीं पूजयेदित्युक्तं प्राक्॥ इयं सप्तमी देवीपूजा
यां सूर्योदयस्तुतापराग्राह्या स्तु गाघां वर्षवृद्धिश्चेति मतापमात्रेठे भविष्योत्तेः। वर्षवृद्धिर्जन्मतिथिः। सप्तमीकृत्यविशेषस्तु नवरात्रप्रकरणोद्दृष्टव्यः॥ अ
त्रैव मूलनक्षत्रे पुस्तकस्थापनमुक्तं रुद्रयामले मूलर्क्षे सुराधीश पूजनीया सरस्वती। पूजयेत्सहं देवयावद्धैष्णमक्षकं। नाध्यापयेन्न लिखेन्ना
धीयीत कदाचन॥ पुस्तके स्थापिते देवि विद्याकामो द्विजोत्तमाः॥ अथ पूजाप्रयुक्तं सरस्वतीध्यानं॥ वीरमित्रोदये देवी सरस्वती कार्या सर्वाभरणभूषिता
चतुर्भुजा सा कर्त्तव्या तथैव च समुच्छ्रिता॥ पुस्तकं चाक्षमाला च तस्या दक्षिणहस्तयोः॥ वामयोश्च तथा कार्या वैष्णवी च कमंडलुः। वैष्णवी वीणा॥

जय०
२१०
210

सप्तपादं प्रतिष्ठाच्च कार्या सौम्य सुखीतथैति। असामेव सप्तम्यां शुभ सप्तमी व्रतं॥ हेमाद्रौ पाद्मे। शुक्ला माघ्युजे मासि कृत। स्नान जपः शुचिः। वाचयित्वा
ततो विप्रानारभेच्छुभ सप्तमी तत्र कपिलां गंधादिभिः संपूज्य प्रार्थयेत। नमामि सूर्यसंभूतामशेषभुवनालयां। त्वामहं सर्वकल्याण शभीशांसर्वसिद्धये इ
ति। तां प्रपाने च वस्त्रेवेष्टितं सौवर्णां वृषभं तिलप्रस्थोपरि संस्थाप्य घृत्त पायसादि सुतं चार्यमा प्रीयतामित्युक्त्वा ब्राह्मणाय दद्यात्। स्व पंचगव्यं प्राश्नी
यात्। ततः द्वितीये ह्नि ब्राह्मणान्संभोज्य स्वयमपि भुंजीत। एवं सप्त वर्षपर्यंतं कृत्वा तदंते इक्षुदंडगुडान्वितं शय्यानादिद्यात्। इति शुभ सप्तमी व्रतं।
कार्तिक शुक्ल सप्तमी मारभ्य संवत्सरं साग्रशाक सप्तमी व्रतं। अत्र शाकाहार नक्तं नाराश्चौ शाकभोजनं कुर्यादिति मार्गशीर्ष शुक्ल सप्तमी त्रितय सप्तमी। स
न्तुल जन्मारोग्य धनत्रितय प्राप्यकत्वात्। तत्रैव हेमाद्रौ। पौ मार्गशीर्षे सित सप्तमे ह्नि हस्तर्क्षे योगे जगतः प्रसूतिं॥ संपूज्य मातुं विधिनोपवासी स्न
गंधधूपान्नवरोपहारैरिति एवं संवत्सरं संपूज्य तदंते घृतसुवर्णादिकं देयमिति। इयमेव सप्तमी मित्र सप्तमी। तस्यां मित्रनामक सूर्यपूजोक्ता नि
राधाम। ततश्चतुर्वेदिने उ पोषणकजवपनः स्नात्वा रविं सर्वोपचारैः संपूज्य ब्राह्मणान् भोजयेत। ततः स्वयं मधुप्लुतं मिष्टान्नं भुंजीत। तदुक्तं ब्रह्म राम:
आरोग्य द्विर्मोदं विशांने चं तदेव कृतिमस्तु नः॥ आदित्येः कश्यपाज्जज्ञे मित्रे नाम महिताकरः। सप्तम्यां तेन सा ख्याता लोकेस्मिन्मित्र सप्तमी। षष्ठ्यां २१०

210A

वस्त्रयनं कार्यं तस्मै मित्राय भानवे। तत्रोपवासः कर्त्तव्यो भक्ष्याण्यथ फलानि वा। रात्रौ जागरणं कार्यं गीतनृत्यपुरस्कृतं। सप्तम्यां वपनं कार्यं स्नात्वा संपूजयेद्रविं। नानाकुसुमसंभारैः भक्ष्यैः पिष्टमयैः शुभैः। मधुनाथ सभूतेन होमो जाप्यं समाश्रितैः। ब्राह्मणान्भोजयेत्सम्यक् दीनानाथांश्च मानवान्। अष्टमां संविभो ज्ञात्वा तथा वन्दनकाः। हि नन्दये वभोक्त्वा पिष्टमन्नं मधुसंयुतमिति। हिनन्दये सप्तमामष्टमां च। अथ मित्र ध्याने। वीरमित्रो दये। शूलं वामकरे यस्या दक्षिणे सामस्थ च। मित्रानाम त्रिनयना कुशेशयाविभूषिताइति। इयमेव नन्दा सप्तमी। अत्रापि पूर्ववत्पूजादि सर्वं कार्यं। अथ विष्णुधर्मोक्तं मित्रसप्तमीव्रतं। मार्गशीर्षे समासमस्य शुक्लपक्षे नरा विपाः। सोपवासस्तु सप्तम्यां मित्रादिततः कमलेरविं रक्तवस्त्रैर्गन्धपुष्पैर्वरदकैः। पूरणोनव पूजयेद्दिति। इति मार्गशीर्षसप्तमी। अथ पौषशुक्ल मारभ्य संवत्सरमासमुमय सप्तमीव्रतं। तत्र सप्तम्यां तु पौष शांकृत्वा त्रिसंध्यं सूर्यमभ्यर्च्य रात्रौ बुधः शयनं कृत्वा परेद्युर्भास्करं सप्तम्यां पृत्वा दिभिः भानुस पूज्य साक्षी रसिद्धं मोदकप्रस्थं निवेद्य द्विजान्भोजयित्वा कपिलां दद्यादेवं कृते सर्वकामानवाप्नोति। भविष्ये। अभयसप्तमीव्रतं। अस्यामेव सप्तम्यां मार्तण्डसप्तमीव्रतं। प्रतिमासं मार्तण्डं संपूज्य गवाह्निकं दद्यादिति। इति पौषशुक्लसप्तमी अथ माघकृष्णसप्तम्यां सर्वाप्तिसप्तमीव्रतं तदुक्तं हेमाद्रौ भविष्ये। कृष्णपक्षे तु माघस्य सर्वाप्तिसप्तमी शुभा। तस्यां पौष्य समाप्नोति सर्वान्कामान्नित्यादि। इति सर्वाप्तिसप्तमीव्रतं। मा

जय॰ २११ 211

घशुक्लसप्तमीञ्चचलासप्तमी॥ माजयंतीउक्तं भविष्योत्तरे माघस्यशुक्लपक्षेतुसप्तमीयात्रिलोचन।जयंतीनामसाप्रोक्तासर्वपापहरातिथिरिति।इ
यमेवरथसप्तमी॥ यस्यांमन्वंतरस्यादौरथमापदिवाकरः।जयंतीनामसाप्रोक्तामाघमासस्यसप्तमीख्यातस्माद्रथसप्तमीतिमत्स्यपुराणाच्चनात्र
।सास्नानादावरुणोदयव्यापिनीग्राह्या॥ दिनद्वयेअरुणोदयेवेत्पूर्वैव।षष्ठ्यासुग्मयोरितियुग्मवाक्यादितिमदोजिदीक्षिताः।सूर्यग्रहणतुल्यातु
शुक्लामाघस्यसप्तमी।अरुणोदयवेलायांतस्यांस्नानंमहाफलमितिविष्णूक्तेः।यत्तुतिथ्यर्के।अयंचस्नानकालोऽरुणोदयमाघेस्नातितन्नाव्य
पेवा।अमावास्यातिथौश्रीसूर्योदयः माघमासस्यसप्तम्यामुदयत्येवभास्करे।विधिवत्तत्रचस्नानंमहापातकनाशनमित्यपरार्केविष्णूक्तेरिन्दुक्तंतन्म
न्यु।मदनरत्नादिसर्वप्राचीननवीनग्रंथेष्वेतद्वचनस्यानुपलंभात्।तज्ज्ञेथविरोधाच्च।माघस्नानकालस्तुसूर्योदयएवमसुज्ञःस्तिमास्कर
इति।माघमासेरटंत्यापःकिंचिदभ्युदितेरवाविति।योमाघमासस्युषसिसूर्यकराभितप्तेस्नानंसमाचरतितान्यदिनारहीयपापमभविष्योत्तरस्वचनाड्डिंडिम
सजागरूकतात्तस्मान्माघस्नानंसूर्योदयेकर्तव्यं॥ अचलासप्तमीस्नानंतत्त्वरुणोदयएवेतिसिद्धांतः।यत्तुदिवोदासीये।अचलासप्तमीदुर्गाशि राम॰
वरात्रिर्महानरः॥ द्वादशीवत्सपूजायांपास्ववदाप्रारपुतामदेतिषष्ठीयुक्तत्वमुक्तं।तघटाशृवेंन्हिघटिकाद्वयंषष्ठीसप्तमीचपरेघुक्षयवशाद्दर्शणोद २११

यात्स्पूर्वं समाप्यते तत्तस्यां ज्ञेयं तत्र षष्ठ्यां सप्तमीव्रतं प्रवेशपारणो दये स्नानं कार्यं इयं प्रयागे प्रशस्ता ॥ अरुणोदयवेलायां शुक्ला माघस्य सप्तमी । प्रयागे यदि
लभ्येत कोटिसूर्यग्रहैः समेति वचनात् । तथा माघे मासि सिते पक्षे सप्तमी कोटिभास्करा । कुर्यात्स्नानार्घ्यदानाभ्यामायुरारोग्यसंपदः इति । इदं च स्ना
नं तिथ्यादिसंकीर्त्य सप्ताकेपत्राणि सप्त कदलीपत्राणि सुवर्णादिपात्रस्थतिलतैलकृतं भवर्तिप्रज्वालितदीपं चाशिरसि निधायेक्षुदंडेन जलं चाल
यित्वा भास्करं हृदये ध्यात्वा नमस्ते रुद्ररूपाय रसानां पतये नमः । वरुणाय नमस्तेस्तु हरिवास नमोस्तु ते इति श्लोकं पठित्वा दीपं प्रवाहे विसृज्य शुक्लति
लैरंगोद्वर्तनं कृत्वा कर्त्तव्यं । दीवोदासीयेमदनरत्ने तु । इक्षुदंडेन जलं चालयित्वा सप्तार्कपत्राणि बदरीपत्राणि च शिरसि निधाय वक्ष्यमाणैर्मंत्रैः
स्नात्वा तिलपिष्टमयादृष्टैः सं... पं... विप्राय दद्यादित्युक्तं । स्नानमंत्राश्च काशीखंडे यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु तन्मे रोगं च शोकं
च माकरी हंतु सप्तमी । एतज्जन्मकृतं पापं यच्च जन्मांतरार्जितं । मनोवाक्कायजं यच्च ज्ञाताज्ञाते च ये पुनः । इति सप्तविधं पापं स्नानान्मे सप्त सप्तिके । सप्त
व्याधिसमाकीर्णं हर माकरि सप्तमि । एतन्मंत्रत्रयं जप्त्वा स्नात्वा पादोदके नरः ॥ केशवादित्यमालोक्य क्षणान्निःकलुषो भवेत् । ततोर्घं दद्यात्स्वोक्तः सो
गमे । अर्कपत्रैः सबदरैर्दूर्वाक्षतसमन्वितैः । अष्टांगविधिना वार्घ्यं दद्यादादित्यतुष्टये । अर्घ्यदानमंत्रो मदनरत्ने । सप्तसप्तिवहप्रीत सप्तलोकप्रदीपन ॥ ॥

जय॰
२१२
212

सप्तम्यामसहितो देवगृहाणां घ्र्यं दिशा करेति। ततः सप्तमी प्रार्थनां। जननी सर्वलोकानां सप्तमी सप्तसप्तिके। सप्तव्याहृतिके देवि नमस्ते सूर्यमंडले इति अत्रोप
युक्तसप्तमीध्यानं तु शर्वमेवोक्तं। ततो निशि विधिं निर्वर्त्य चंदनेनाष्टपत्रं कमलं विलिख्य तत्कर्णिकायां प्रणवसहितं सपत्नीकं शिवं संपूज्य पूर्वादिदले
षु भानुं विवस्वंतं भास्करं सवितारमर्कं सहस्रकिरणां सर्वात्मानं च क्रमेण प्रणवादिनमोंतनामभिर्वस्त्रादिभिः संपूज्य स्वस्थानं गम्यतामिति विसृज्य
ततस्तस्मात्स्नादि पात्रे कांचनं करणीभरणां घृतयुतं तिलपिष्टसहितं अशक्तस्तिलपिष्टजं संस्थाप्य रक्तवस्त्रेण छादयित्वा पुष्पादिभिः संपूज्य ब्राह्मणाः
स्वस्तिवाचनं कारयित्वा ब्राह्मणाय दद्यात्। तत्र मंत्रः। आदित्यस्य प्रसादेन प्रातःस्नानफलेन च। दुष्टदौर्भाग्यदुःखघ्नं मया दत्तं तु तालकमिति। ततो गु
रुं संपूज्य सूर्यं ध्यायन्निशायां भोजनं नक्तं स्वयं भुंजीत। इति तालकदानविधिः। सप्ताश्वरथं रथं वर्णिकैर्विलिख्य तत्र यथाशक्त्या स्वर्णघटितं भानुं संपू
ज्य दद्यात्। इति रथदानविधिः। अन्यो विशेष इतिहासेंदुशेखरः। इति अचलासप्तमीकृत्यं। इयं मन्वादिः। शुक्लपक्षस्य सप्तम्यां सौर्वादित्त्वात्कीर्तिता शुभा। माघ
मासमलमासत्वे मन्वादिश्राद्धमुभयत्रापि कार्यं। मन्वादिकमिति पृथ्वीचंद्रोदयवचनात्। अस्यां काशीखंडे विशेष उक्तः। लोलार्के रथसप्तम्यां स्नात्वा गंगासिसंग
संगमे। सप्तजन्मकृतैः पापैर्मुक्तो भवति तत्क्षणात् इति। पद्मकयोगश्चात्र सति संभवे ज्ञेयः। एवं षष्ठीप्रकरणे अभिहितः। अथ भविष्यत्पुराणोक्ताऽचला २१२

212A सप्तमीव्रतकथा॥ युधिष्ठिर उवाच॥ कथं स्त्रियः सुरूपास्तु सुभगाः सुप्रजास्तथा। अपापस्य महत्त्वात्र सर्वमेतत्फलं यतः। अल्पायासेन सुमहद्येन स्तु
णपमाप्यते। यद्वीमिमिंघेम मत्र हि स्नानमेकं जगद्गुरो॥ श्रीकृष्ण उवाच॥ श्रूयतां भरतश्रेष्ठ रहस्यं मुनिभाषितं। पद्मपाक समाविश्नोक्तम बलासप्तमीव्र
तं। वेश्या चेंदुमती नाम रूपौदार्यगुणान्विता। आसीत्कुरुकुलश्रेष्ठ सगरस्य विलासिनी। सा वसिष्ठाश्रमं पुण्यं जगाम गजगामिनी॥ वसिष्ठमृषिमा
सीनं प्रणम्यानतकंधरा॥ कृतांजलिपुटा भूत्वा प्राह इदं जगतो हितं। मया न दत्तं न हुतं नोपवासव्रतं कृतं॥ मनसा संपूजितः शंभुः स्वामिन् शार्ङ्गधरो न
वा। मां प्रपन्नं तत्प्मानाया व्रतं किंचिद्दिश त्वमे। येन दुःखाद्युपकौघाद्दुत्तरामि भवार्णवं॥ एतत्तस्याः सुबहुशः श्रुत्वाति करुणार्णवः। कारुण्यात्कथयामा
स वाशिष्ठो मुनिसत्तमः। माघस्य सित सप्तम्यां सर्वकामफलप्रदं। रूपसौभाग्यजननं स्नानं कुरु वरानने॥ कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निश्चलं जलं गत्वा
ते चालये यास्त्व दत्वा शिरसि दीपकं। माघस्य सित सप्तम्यां अचलं चालितं च यत् जलं मत्वा नास वै पापस्म तत्प्रक्षालनं ततः। वसिष्ठवचनं श्रुत्वा ततस्मि
न्नह निमारत। वकारेंदुमती स्नानं दानं सम्यगपथाविधि। स्नानस्य सप्तमाभावेन भुक्त्वा भोगान्यथेप्सितान्। इंद्रलोके सुरः संघे नायकत्वमवाप सा॥ अचलास
प्तमी स्नानं कथितं ते विशांपते। सर्वपापप्रशमनं सुखसौभाग्यवर्द्धनं॥ युधिष्ठिर उवाच॥ सप्तमी स्नानमाहात्म्यं श्रुतं नरविशेषतः। संप्रतं श्रोतुमिच्छामि

जय०
२१३
213

विधिं मंत्रसमन्वितं। श्रीकृष्ण उवाच। नारदैकभक्तेन संतिष्ठेत् षष्ठ्यां संपूज्य भास्करं। सप्तम्यां तु व्रती प्रातः स्नात्वा गंभीरं जलाशयं। सरित्सरः तडागं वा देवखातमथा
पि वा। स्नात्वा गव्यं घृतं हंसतैलपुष्पं तुष्टमत्तैरदूषितं। वालांजुपक्षिभिश्चैव जलगौर्मत्स्यकच्छपैः। न केनचाप्यस्पृष्टेया वस्त्रावस्त्रानं समाचरेत्। सौवर्णे राजते पात्रे भक्त्या
ताम्रे मृण्मये वा। तैलवर्तिं तु सत्तया महारजनरंजिता। समाहितमना भूत्वा दत्वा शिरसि दीपकं। भास्करं हृदये ध्यात्वा इमं मंत्रमुदीरयेत्॥ नमस्ते रुद्ररू
पाय रसानां पतये नमः। वरुणाय नमस्तेस्तु हरिवास नमोस्तु ते। जलोपरि तरद्दीपं दत्वा संतर्प्य देवताः। चंदनेन लिखेत्पद्मम् अष्टपत्रं सकर्णिकं। मध्ये शि
वं सपत्नीकं प्रणवेन च संस्तुतं। शाक्रे दले रविः पूज्यो माहेश्वे वानले तथा। याम्ये विवस्वान्नैरृत्ये भास्करं पूजयेद्बुधः। पश्चिमे सविता पूज्यः पूज्योऽर्कश्चानिले
दले। सौम्ये सहस्रकिरणाः शैवे सर्वात्मने नमः। पूज्याः प्रणवपूर्वास्तु नमस्कारांतयोजिताः। पुष्पैः सुगंधधूपैश्च पृथक्लेन्नयुद्विष्ठि। विसर्जयेत्स्वस्त्रं संवीतस्तस्या
नं गम्यतामिति। विसर्जिते सहस्रांशौ समागम्य स्वमालयं। ताम्रपात्रे यथाशक्त्या मन्मयेवाथ भक्तिमान्॥ स्थापयेत्तिलपिष्टं च सघृतं सगुडं तथा। कांच
नं तालकं कृत्वा अशक्तास्तिलपिष्टजं। संच्छाद्य रक्तवस्त्रेण पुष्पैर्धूपैरथार्चयेत्। ततस्तं वाचयेद्विप्रे दद्यान्मंत्रेण तालकं। आदित्यस्य प्रसादेन प्रातःस्नानफ राम०
लेन च। दुष्टदौर्भाग्यदुःस्वप्नं मयाहत्तं तु तालकं। तालकं तालपत्रकर्णाभरणविशेषः। दीपदानमिति हेमाद्रिः। पूजयित्वोपदेष्टारं विप्रानन्यांश्च पूजयेत्। ततो हि २१३

213A

नंसमग्रं व भास्करध्यानतत्परः। तारयंव वकथाः श्रावयन्ममा वाधुर्मे संहिताः। पाखंडादिभिरालापं दर्शनस्पर्शनादिकं। वर्जयन्क्षपयेत्मा ज्ञस्ततो बंधुज
नैः सह। हानक्तं भुंजीत वनरो हीनान्नं भोजयेच्छक्तितः। एतत्ते कथितं पार्थ रूपसौभाग्यकारकं। अचलासप्तमीस्नानं सर्वकामफलप्रदं। इति पठति यइ
दं यः शृणोति प्रसंगात्कलिकलुषविनाशं सप्तमीस्नानमेतत्। मतिमपि वजनानां यो ददाति प्रयत्नात्स इह भवनगतो सौ सेव्यते वाप्सरोभिः। इ
त्यचलासप्तमीव्रतं था॥ अथ भविष्योत्तरपुराणोक्तरथसप्तमीव्रतकथा। युधिष्ठिर उवाच। कथं माक्रियते क्षय्यमनुष्ठेयं रथसप्तमी। चक्रवर्ति
त्वफलदायाविख्याता त्वया मम। श्रीकृष्ण उवाच। आसीत्कांबोजविषये यशोवर्मा नराधिपः। वृद्धे वयसि तस्यासीत्सर्वव्याधियुतः सुतः। तत्कर्मपा
कं मोष्टुहृदिनीतो द्विजपुंगवं। स चाह राजन्वैश्यो यं कृपणः पूर्वजन्मनि। ददर्श रथसप्तम्यां क्रियमाणां व्रतं नृप। व्रतदर्शनमाहात्म्यात्पुत्रस्ते जठरे
त्वाच्च दातावि भवेत्तस्मात्तेन व्याधितो भवत्। ततः स राजा पप्रच्छ किमेतस्य विधीयतां। द्विज उवाच। यस्य संदर्शनात्प्राप्तो लोभी तव निकेतनं। तदेव
क्रियतां राजन्रथसप्तमिसंज्ञितं। व्रतं पापहरं येन चक्रवर्तित्वमाप्यते। राजोवाच। ब्रूहि विप्र व्रतं कृत्स्नं सविधानं समंत्रकं। ईश्वराणां दरिद्राणां
सर्वसंपत्प्रदायकं। द्विज उवाच। शुक्लपक्षे तु माघस्य षष्ठ्यामामंत्रयेद्द्विजान्। स्नानं शुक्लतिलैः कार्यं न घमावेत्कुत्र चिता। विमले माले लेराजन्विधि

जय.
२१४
214

वह्नर्णां धर्मतः । हेन्नाह्यन्ह्स्जायित्वा तु गत्वा सूर्यालयं ततः । सूर्यं समभ्यर्च्य नमस्कृत्य पुष्पधूपाक्षतैः शुभैः । आगत्य भवनं पश्चात् संवयज्ञं वह्निं निर्वपेत् । संतो
ष्यातिथिभक्तांश्च बालवृद्धाश्रितांस्तथा । विघमाने हि दिने श्रीयाद्वाऽपतमैलवर्जितं । राज्ञो विप्रं समाहूय विधिज्ञं वेदपारगं । संपूज्यानियमं कुर्यात् सूर्य
माधाय चेतसि । समभ्यर्चा तु निराहारो भूत्वा भोगविवर्जितः । मोक्षेष्टमां जगन्नेत्र निर्विघ्नं तत्र मे कुरु । इत्युक्त्वा यं न्यपश्रेष्ठतो यं तो येषु निःक्षिपेत् । ततो
विसृज्य तं विप्रं स्वपेद्भूमौ जितेंद्रियः । ततः प्रातः समुत्थाय कृतावश्यः शुचिर्नरः । कारयित्वा रथं दिव्यं किंकिणीजालमालिनं । सर्वोपस्कारसंयुक्तं र
त्नैः सर्वांगचित्रितं । कांचनं राजतं वाऽपि हयसारथिसंयुतं । ततो मध्यान्हसमये कृतस्नानाह्निको व्रती । अतिथिक्षीक्षमाराणां तु पाखंडालापवर्जित
: । सौरसूक्तं जपन् प्राज्ञः समागच्छेत्त्वमालयं । निवृत्तानमकार्यस्तु कृत्वा ब्राह्मणावाचनं वस्त्रमंडपिकामध्ये स्थापयेत्तं रथोत्तमं । कुंकुमेन सुगं
धेनस्वर्चयित्वा समं ततः । माल्याभिः पुष्पदीपानां समं तासरिवेष्टयेत् । धूपेनागुरुमिश्रेण धूपयित्वा तथोपरि । रथे तु स्थापयेद्भानुं सर्वसंपूर्णलक्षणं
। वित्तानुरूपं हैमं च वित्तशाठ्यविवर्जितः । शाठ्याद्भजति वैकल्यं वैकल्पाद्विकलं फलं । ततो देवं समभ्यर्च्य सरथं सहसारथिं । पुष्पैर्धूपैस्तथा गंधैर्वस्त्रा
लंकारभूषणोः फलैर्नानाविधैर्भक्ष्यैर्नैवेद्यैर्घृतपायसैः । पूजयेद्भास्करं भक्त्या मंत्रैरेभिस्त्रिभिः क्रमात् । भानो दिवाकरादित्य मार्तंड जगतांपते । राम.
२१४

214A

अपांनिक्षेजगद्रक्षमक्तभावनभास्करामराणातार्तिहराविंत्यविश्ववितामगोविंदो ॥ विष्णो हंसा द्विभ्र तेश आदिम ध्वांतकारक ॥ भक्तिहीनं क्रियाहीनं मंत्रहीनं ज
गसते ॥ प्रसादात्तव संपूर्णमस्तु मे नयस्व देहास्तु मे ॥ एवंसंपूज्य देवेशं प्रार्थयेत्तमनोगतं ॥ ददाति प्रार्थितो भानुर्भक्त्या संतोषितो नरैः ॥ वित्तहीनोपि विधिना स
वैमेतत्प्रकल्पयेत् ॥ रथं समारुह्य थिंमांश्च वर्णकैर्भिन्नलेखितं ॥ सौवर्णं सितता भानुं यथाशक्त्या प्रकल्पितं ॥ आयुक्तेन विधानेन नयज्ञापयित्वा स्वविस्तरं ॥ जागरं कारये
द्रात्रौ गीतवादित्रनिस्वनैः ॥ प्रेक्षणीयैर्विचित्रैश्च पुराणाख्यानकथादिभिः ॥ यथा त्वां पश्यते भानो रायतनं श्रितः ॥ अनिमीलितनेत्रस्तु नयेत्तां रज
नीं बुधः ॥ प्रभाते विमले स्नातः कृतकृत्य स्ततो द्विजान् ॥ तर्पयेद्विविधैः कामैर्दीनैर्वा मोविमत्सरौः ॥ अश्वमेधेन तुल्यं तद्दिहं ब्रह्मविदो विदुः ॥ अन्नोद्देया
नि द्वानानि यथाशक्त्या विमत्सरौः ॥ रथं तुरगर्खेहघास्तवों पस्करसंयुतं ॥ रक्तं च वस्त्रयुगलं रक्तधेनुसमन्वितम् ॥ एवं चीर्णेव्रते राजन् किल्विषोऽतिजा
उपे ॥ तस्मात्सर्वप्रयत्नेन कुरु त्वं रथसप्तमी ॥ येनारोगो भवेद्धत्वन्न दीर्घायो नृप सन्नम ॥ व्रतस्यास्य प्रभावेन प्रसादाद्भास्करस्य च ॥ भविष्यति महातेजा
महाबलपराक्रमः ॥ भुक्त्वा भोगान्सुविपुलान्कृत्वा राज्यमकंटकं ॥ दत्वा सौरं रथं सप्तम्यां मृते त्वयि महाभुजः ॥ उत्साद्य पुत्रान्पौत्रांश्च सूर्यलोकं समा
साति ॥ तत्रास्थित्वा कल्पमेकं चक्रवर्ती भविष्यति ॥ श्रीकृष्ण उवाच ॥ इति सर्वं समाख्याय शक्षिति पापद्विजोत्तमः ॥ यथागतं जगामासौ नृपः सर्वं चकार ह ॥

अप·
२१५
215

यदा हि दृष्टं द्विजेंद्रेण तत्तत्सर्वं व्यवहत्। एवं स चक्रवर्तित्वं प्राप्तवान्नृपनंदनः। श्रूयते यत्तु मांधाता पुराणेषु परंतप। यद् दृष्टं स्य पुण्याढ्यं तथायश्चापि परिकीर्तयेत
। तस्मै वत्स उष्यते सा सूर्य षष्ठी सेवा मयं मया। एवं विधं रथवरं रथ वाजि युक्तं हैमं च हेमशतदीप्तिनिनामसमेतं॥ दद्यात्तु माघसित सप्तमिवासरे यः सोक्षं गतः चक्रग
ति रेव महीं भुनक्ति॥ इति रथसप्तमीव्रतकथा संपूर्णा॥ इयमेव महती संज्ञा। तदुक्तं हेमाद्रौ मत्स्यपुराणे॥ इत्येषा कथिता वीर रथाख्या सप्तमी यथा। महती
ति च विख्याता महापातकनाशिनी। तथा शुक्लपक्षे तु सप्तम्यां यदर्केस्तु करो भवेत्। तस्मात्सा स्तु महापुण्या सप्तमी पाप नाशिनी॥ तस्यां संपूज्य देवेशं त्रि
च भानुं दिवाकरं। सप्त जन्म कृतात्पापान्मुच्यते नात्र संशयः। यश्चोपवासं कुरुते तस्यां नियतमानसः। सर्व पाप विशुद्धात्मा स्वर्ग लोके महीयत इति·
अस्यामेव सप्तम्यां भविष्यत्पुराणोक्तं रथाक सप्तमी व्रतं हेमाद्रौ भविष्योत्तरे। माघे मासि इत्यादि सप्तम्यामुपोष्य भानुं पूजयित्वा संवत्सरांते स्वर्णरथे सूर्यं
संपूज्य ब्राह्मणाय दद्यादिति। इति रथाक सप्तमी। इयमेव महा सप्तमी। अस्यामेव ब्राह्मपुराणोक्तं पुत्र सप्तमी व्रतं। आदित्य उवाच। माघ मासे तु
शुक्लायां सप्तम्यां समुपोषितः। यः पूजयेत मां भक्त्या तस्याहं पुत्रतां व्रजे॥ एवं चोभय सप्तम्यां मासि मासि प्रयोत्तम। यस्तु मां पूजयेद्भक्त्या तु मे कामं राम·
कमाहराः। तस्मै क्रूःसंवत्सराः। प्रयच्छामि सुतं तस्य सात्मनो धारणं संभवं। वित्तं यशस्तथा पुत्रमारोग्यं परमं सदा। माघमासे तु यो ब्रह्मन् शुक्लपक्षे २१५

215A जितेंद्रियः।पाखंडान्पतितानंत्यान्जल्पन्विजितेंद्रियः।उपोष्यविधिवत्षष्ठ्यांश्वेतमाल्यविलेपनैः।पूजयित्वाद्रुमांभक्त्यानिशिक्षमोस्वपेद्बुधः।पुनःस्नात्वा
पसप्तम्यांकृत्वान्हिकक्रियां।पूजयित्वाद्रुमांब्राह्मणान्वी।होमंसमाचरेत्।पीताणपिताहरिंभक्त्याहविषायप्रलोचनं।वीरहोमंआग्नेहोमं।अ
घनोग्रमनोवीरःरेवत्रोवडवानलः।इतिहेमाम्मिधानात्।हरिरत्राहितः।हृष्योदनेनपयसापापमेनदिजांमृथा।तस्मैकृष्णपक्षस्यषष्ठ्यांस
म्यगुपोषितः।तस्येतिमाघमासस्येत्यर्थः।रक्तोत्पलैःसुगंधाद्यैःरक्तपुष्पैश्चपूजयेत्।एवंयःपूजयेद्भक्त्यानरोमांविधिवत्सदा।उभयोरपिदेवेंद्र
सपुत्रंलभतेवरं।इतिपुत्रसप्तम्यथसप्तमीभेदाःहेमाद्रौ।जयाचविजयाचैवजयंतीचापराजिता।महाजयाचनंदाचभद्राद्याचप्रकीर्तिता।।शुक्लपक्ष
ससप्तम्यांनक्षत्रंपंचतारकं।यदाभवेत्तदाज्ञेयाजयानामेतिसप्तमीपंचतारकमितिरोहिण्याश्लेषामघाहस्ताश्च।तस्यांहुत्तंहुतंजप्तंतर्पितांदेवपू
जनं।सर्वंशतगुणंप्रोक्तंपूजानापिदिवाकरे।चत्वपंचमासेकभक्तंषष्ठ्यांनक्तंसप्तम्यांउपवासंकृत्वा।रविंनत्वाहृत्वाद्विजान्संपूज्यअष्टम्यांपारणां
कुर्यादेतत्संवत्सरंसमापयेदिति।इतिजयासप्तमीव्रतं।माघमासस्यसप्तम्यांसूर्यवारोभवेद्यदिसप्तमीविजयानामतत्रदत्तंमहाफलं।।स्ना
नंदानंतपोहोमजपवासस्तथैवच।सर्वंविजयसप्तम्यांमहापातकनाशनं।वीरमित्रोदयेतुशुक्लपक्षस्यसप्तम्यामितिपाठः।चसांफलादिभिःप्र

जय॰
२१९
216

दक्षिणा कार्या॥ तानि द्रु। नारिकेल बीजपूरकं नारिंगं कदली फलं कूष्मांडं तिंदुकं वंताकं मौक्तिक पद्मराग गोमेद वज्र वैडूर्य रं गुडं बदरं बिल्वं करमर्दं आम्र
आम्रातकं जंबीरं जंबूक कर्कटिका खर्जूर पूगीफल पंचमोदकानि एभिर्विजयसप्तम्यां मानोः कुर्यात्सदक्षिणां॥ अष्टोत्तरमिति शेषः। ततः उपवासेन नक्ते
न भक्तेनायाचितेन वा॥ ये यानि यमयुक्ते नराजा निविजयसप्तमी। एवं संवत्सरं कृत्वा ज्ञं तेसु वर्णमहितान्सुमानूद्दघात् इति विजयसप्तमी। निर्णयामृते ह्य
अन्यापि भानुवारयुक्ता महाफलप्रदा। तदुक्तं। सोमवारे त्वमावास्या भानुवारे तु सप्तमी अंगारकदिने प्राप्ते चतुर्थी वा चतुर्दशी। चत्वचतुर्थीसाहवर्या
स्नासा चतुर्दशी शस्ता षष्ठिवर्षसहस्राणि तत्कर्त्ता विंदत्ते फलमिति। इति विजयसप्तमी। अथ जयंती सप्तमी। माघस्य शुक्लपक्षे तु सप्तमी या त्रिलोचन॥
जयंती नाम सा प्रोक्ता उग्रपापापहरा तथेति। सूर्यं पूजादिकं प्रतिमासं कृत्वा संवत्सरांते पारणां कुर्यादिति। इति भविष्योत्तरोक्तं जयंतीसप्तमीव्रतं। अथा
पराजिता। मासि भाद्रपदे शुक्ला सप्तमी या नराधिप। अपराजितेति विख्याता महापातकनाशिनी। स्नानदानादिकं सर्वमस्यामक्षयमुच्यते। अस्यामपि सू
र्यपूजनाद्यहानादि कार्यमिति। इति भविष्यपुराणोक्तमपराजिताव्रतं। अथ भविष्यत्पुराणोक्तं महाजयाव्रतं। ब्रह्मोवाच। शुक्लपक्षे तु सप्तम्यां यत्र संक्रामः
मते रविः। महाजया तदा सा दै सप्तमी भास्करप्रिया। स्नानं दानं जपो होमः पितृदेवाभिपूजनं। सर्वं कोटिगुणं प्रोक्तं तर्पणेन महोजसा। यस्तस्यां मानवो भ २१९

216A

तयाद्य तेन स्नापयेद्द्विजान्सो ऽश्वमेधफलं प्राप्य ततः सूर्यपदं व्रजेत् ॥ पयसा स्नापयेद्यस्तु भास्करं भक्तिमान्नरः ॥ विमुक्तः सर्वपापेभ्यो याति सूर्यसलोकतामिति ॥ इ
ति महाजयासप्तमीव्रतं ॥ मार्गशीर्षशुक्लसप्तमी नंदासप्तमी तदुक्तं ॥ पाद्मे मार्गशिरे मासि शुक्लपक्षे तु सप्तमी ॥ नंदा सा कथिता वीर सर्वानंदकरी शुभेति
॥ अत्रापि दध्योदनादि नैवेद्यं भास्कराय दद्यादिति ॥ इति भविष्यपुराणोक्तं नंदासप्तमीव्रतं ॥ अथ भद्रासप्तमी ॥ शुक्लपक्षे तु सप्तम्यां नक्षत्रे हस्तसंयुते ॥ य
दा प्रथमनाथेन तदा सा भद्र तां व्रजेदिति ॥ सवितृनक्षत्रं हस्तः ॥ प्रथमनाथेन मेषनाथेन ॥ तत्र देवस्य घृतेन क्षीरेण गंधोदकेन च स्नपनं कृत्वा ऽष्टमां
पूरणादि कुर्यादिति भविष्योत्तरोक्तं भद्रासप्तमीव्रतं ॥ अथ भविष्यपुराणोक्तं निक्षुभार्कसप्तमीव्रतं ॥ सुमंतुरुवाच ॥ सूर्यभक्तास्तु या नारी ध्रुवं सा पु
रुषो भवेत् ॥ स्त्रीति तेनाप्युक्तमं नाथ युक्ता ताभ्य गुणसांप्रतं ॥ निक्षुभार्कव्रतं मानोः सदा प्रीतिविवर्द्धनमित्यादि ॥ अवियोगकरं नारी धर्मकामार्थसाधनं ॥ स
सप्तम्यां षष्ठ्यां वा संक्रांतौ भानवे दिने ॥ हविष्याहविष्याहो मंसोपवासः समाचरेत् ॥ निक्षुभार्कं सौवर्णं कृत्वा ताम्रमयीं शुभामित्यादि ॥ राजतीं वाथ वा
दार्वीं स्नापयेच्च घृतादिभिरिति ॥ निक्षुभा सूर्यपत्नी तया सहितोर्कः ॥ इति निक्षुभार्कसप्तमीव्रतं ॥ अत्रापि हेमाद्रौ ॥ यावद्वर्षमेकं षष्ठ्यां सप्तम्यां वा न भु
ञ्जीत निक्षुभार्कं च पूजयेत्तावर्षांते प्रतिमां दद्यात्तथा राजानं पतिं प्राप्नुयात् इति प्रथमं ॥ यानार्युपवसेद्देवं कृष्णा माघे को तु सप्तमी ॥ माघ केसरमंछा नं

जय.
२१७
217

मानोरिस्याद्दिइतिद्वितीयं।सप्तमां यानिराहारा भवेदब्दं च पुत्रिता॥ गजंपिष्टमयं कृत्वा तर्पीते विनिवेदयेत॥ अश्वगाहत्यादि पायंगछतीत्यादिइतित्तृती
यं।कृष्णपक्षे तु माघस्य सप्तम्यां यः दृढव्रता।वर्षैकं तु उपवासेन सर्वभोगविवर्जिता॥ वर्षांते सर्वैगं सोवर्णं निरूद्ध मार्कं निवेदयेत।सुवर्णामिरीरीकृत्वा वंभो
जयित्वा द्विजोत्तमम्।मित्या द्दि।चतुर्थं इतिम विष्णोत्तरोक्तं निरूद्धमार्कव्रतं वतुष्टयं।अथ मविष्यपुराणोक्तं सिद्धार्थकादि सप्तमीव्रतं।तत्र तुक्तं देमाद्रो
।माघे वा मार्गशीर्षे वा कार्या शुक्लाथ सप्तमी स्याद्दिनत्र जलेसिद्धार्थकं कृत्वा प्राशयेद्दिति सिद्धार्थसप्तमी।अथ सूर्याह्रया संवादोक्ताः सप्तमीभेदाः
।अर्कसंपुटकैस्नाद्वितीपामरिचैस्तथा।तृतीयानिंबपत्रैस्तु चतुर्थी फलसप्तमी।अनोदना पंचमी स्यात्।षष्ठी विजयसप्तमी।सप्तमी कामिकी ज्ञेया
विधिं तास्मानिबोधमे।शुक्लपक्षे रविदिने प्रवृत्ते चोत्तरायणे।पुन्नामधेयनक्षत्रे गृहीत्वा सप्तमीव्रतं।सर्वोऽष्टु ब्रह्मचारी स्यात् छौचयुक्तो जि
तेंद्रियः।सूर्यार्चनरतो दांतो जपहोमपरस्तथा।निर्णयामृते तु।रविवारे तु आयुक्ता यां सप्तम्यामुत्तरायणे।पुन्नामधेयनक्षत्रे शुक्लपक्षे हिताकरामितित्तत्र
रायणे।माघमासे पुन्नामनक्षत्राणि हस्तो मैत्रं तथा पुष्यो मृगशीर्षं पुनर्वसुः।पुन्नामधेयनक्षत्राण्येतान्याहुर्मनीषिणाः इति।आद्यां फलान्नि राम.
।अर्कसंपुटकैर्विंदन्नमलं प्राप्नोत्यहं।मरीचैः संगमस्याद्दै प्रियपुत्रार्थिभिः सह।सर्वरोगाः प्रणश्यंति निंबपत्रैर्न संशयः।फलेश्च पुत्रपौत्रा २१७

217A स्वर्द्धौहित्वास्त्वापि शुक्लाः।अनोदनाद्धनं धाम्नं स्वर्णं रजतं तथा।तथा यशो हिरण्यं च आरोग्यं संततिं नृप।उपोष्य विजयां शत्रून् राजा जयति नि
त्यशः।माघयेत्कामहाकामान्निर्विघ्नसुपासिता।पुत्राद्दीन्सर्वान्निसर्गं:।अथ विजयासप्तमीव्रतं।तत्रैव हेमाद्रौ।माघमासे शिते पक्षे सप्तम्यां कु
रु नंदन।निराहारो रविं भक्त्या पूजयेद्विधिना नृप।पूर्वोक्तेन जपेज्जप्यं देवस्य पुरतः स्थितः।वायो बलिष्ठ मन्दं ते सुमन्दं ते सुवै सदा।ममापि
कुरु भद्रं वै प्राशनात्स्कन्दहा भव।अनेन मंत्रेणापीतः पवनः शान्तिमति वाय्यदितीये हि पारणां कुर्यादिति विजयासप्तमीव्रतं।माघशुक्लसप्तमीमार
भ्य संवत्सरसाध्यं विशोकसप्तमीव्रतं।हेमाद्रौ।तत्र सूर्यं संपूज्य तैललवणं भुंजीत।अस्यामेव माघशुक्लसप्तम्यां आरोग्यसप्तमीव्रतं।तत्र सप्त
म्यामुपवासादिकं कृत्वा अष्टम्यां पारणां कुर्यादिति।अथ फाल्गुनशुक्लसप्तम्यां भविष्यत्पुराणोक्तमर्कपुटसप्तमीव्रतं।अत्र सर्वलोकाय न
मस्तस्मै नेन सूर्यं संपूज्य अष्टम्यामर्कपत्रं प्राश्य भुंजीतेति।इत्यर्कपुटसप्तमी।अस्यामेव भविष्यत्पुराणोक्तं त्रिवर्गसप्तमीव्रतं।तदुक्तं हे
माद्रौ।सप्तम्यां शुक्लपक्षे तु फाल्गुनस्येह यो नरः।जपेद्वेलीति देवस्य नामैतत् हितेनैव पूजनादिकं कर्त्तव्यमिति।अस्यामेव भविष्यत्पुराणोक्तं
यज्ञसप्तमीव्रतं।तत्र द्वादशमासेषु द्वादशमासाधिपान्पूजयेदित्यादि।अस्यामेव भविष्यत्पुराणोक्तं कामदासप्तमीव्रतं।पितामह उवाच।फा

जय.
२१८
218

ल्गुने मल पक्षस्य सप्तम्यां श्माधराधरः॥ उपोषितो नरो नारी समभ्यर्च्य तमोपहं॥ सूर्यनाम जपन्भक्त्या भावयुक्तो जितेंद्रियः॥ उत्तिष्ठन्प्रस्वपंश्चैव सूर्यमे
वानुकीर्त्तयेत्॥ ततो नादेवमे प्राप्रेच्य ष्टम्यां नियतो रविं॥ स्नात्वा सम्यक् समभ्यर्च्य दद्यादिप्राय दक्षिणां॥ रविमुद्दिश्य वैवाग्नौ घृतहोमं कृतं त्रिसः
।सरोपस्त्र जयन्नाथमिति वाक्यमुदीरयेत्॥ यमाराध्य पुरा देवी सावित्री काममाप वै॥ स मे ददात्तु देवेशः सर्वान्कामान्विभावसुः॥ समभ्यर्च्य दिति
ःप्राप्ता तांस्तान्कामानथेप्सितान्॥ मदर्दात्वा सिलान्कामाप्य सत्त्वो मे दिवसप्ततिः॥ अश्वराजः सहदेवेङ्गोय समभ्यर्च्य दिवाकरं॥ कामार्थमाप्तवान्नृप
अं स मे कामान्प्रयच्छतु॥ एवं समभ्यर्च्य पूजां च निष्पाद्य हविशेषत्तः॥ भुंजीत प्रयतः सम्यक् हविष्यं यतवाग्द्विजा॥ फाल्गुने चैत्र वैशाखे ज्येष्ठमासित्रि
याप रां वलुर्भिः स्नारणां मासैरेभिर्निषादितं भवेत्ताकरवीरैश्च वल्लरोमासासं पूजयेद्रविं॥ कृष्णागुरुं दहेद्धूपं माशप गोमयं गजं जलं नैवेद्यं गुड
वेष्टं च दद्यादिप्रेभ्यः एवं चातत्स्यचप्रयतामन्यालाषादादिषु याक्रिया॥ जातिपुष्पाणि शस्तानि धूपो गुग्गुलुरेव च॥ कृतपोदकमश्नीयान्नैवे
द्यं पायसं मतं॥ स्वयं तदेव चाश्नीयात् शेषं पूर्ववद्याचरेत्॥ कृतपोदकं कुशोदकं॥ कार्त्तिकादिषु मासेषु गोमूत्रं कायशोधनं॥ महांगश्चूपस्तु द्दिष्टं राम.
पूजा रक्तोत्पलैस्तथा॥ महांगाद्धूपो भविष्यत्सुरारारा एवोक्तः॥ तद्यथा॥ कर्पूरं कुंकुमं पुष्पं मगुरुं चंदनं तथा॥ अंजनं शर्करा कुष्ठं॥ महांगं सिंहकं तथा २१८

218A ।महांगोयंसमुत्तोभूपः प्रियोदेवस्य सर्वदेति।पलाशपुष्पमितिवीरमित्रोदयस्वरसःमहांगंमांसी।कासारैर्वैवनैवेद्यंनिवेद्यंभास्कराययवैः।प्रतिमा
संतर्पिप्राय्यद्वात्वाहृद्धिरण्यात्तथापूर्णाननंस्वच्छमाभानोःपारणापार्योगते।यथाशक्तियथायोग्यंपवित्तशाठ्यंविवर्जयेत।सझावेनैवसप्तम्यःसूर्यःपूजित
ःप्रीयतेततः।पारणांतेयथाशक्त्यापूजितःस्थापितोरविः।प्रीणीतस्वेप्सितान्कामान्दधाद्वाहतानरविः।स्पापुरापापापहरासप्तमी।सर्वकामद्वा
।यथाभिलषितान्कामान्दद्वातीमाहद्दवजा।अपुत्रःपुत्रमाप्नोति अधनोधनमाप्नुयात्।रोगाभिभूतश्चारोग्यंकन्याविंदतिसत्पतिं।समागमंप्र
वासिभिःउपोष्येतदवाप्नुयात्।सर्वान्कामानवाप्नोतिरोगतश्चापिमोदते।रोगतःस्वर्गगतः।पुनरेत्यमहींकृत्स्नघनाघनसमोनृपः॥घना
घनःशत्रुः।स्मातलेसाम्वसंदेहःप्रसादाह्नोमतेर्नरः।इतिकामदासप्तमीव्रतं।रविवारयुक्तसप्तमीकल्याणसप्तमीविजयावा।तस्यांस्त्रीसूर्यंसं
पूज्य।सोदकुंभंसकलशंघृतपात्रंदत्वागुडक्षीरघृतादिभिःपायसैर्नाद्वितीयादिवसेविप्रान्संभोज्यस्वयंपायसमोजनंकुर्यात्।इतिकल्याण
विजयाव्रतं।अथभविष्योत्तरोक्तंद्वादशसप्तमीव्रतं॥हेमाद्रौभविष्योत्तरेकृष्णउवाच॥अथान्यतेप्रवक्ष्यामिसप्तमीकल्पमुत्तमं।माघमासामलमा
समपक्षेपक्षेषुद्विविधे।सप्तम्यांकृत्तसंकल्पोवर्षमेकंव्रतीभवेत।अरुणांमाघमासेतुमार्तंडंपूज्यकारयेत।ब्रह्मकूर्चविधानंचयथाशक्त्यान्न

जय· २१९ 219

पोत्तमाच्चहृष्टमंमासोजयेद्विप्रां।तिलपिष्टगुडोदनैः।अग्निष्टोमस्ययज्ञस्यफलंलह्लन्नमश्नाप्यतेतद्ध्रुवं।फाल्गुनेमासिसूर्योपेतिप्रपूजयेत्।वाजपेयस्ययज्ञस्ययथोक्तं
लभतेफलं।सप्तम्यांचैत्रमासेतुवेदांशुरितिपूजयेत्।उकथ्याख्यस्यमंपुराणंनरःप्राप्नोत्यसंशयं।वैशाखस्यतुसप्तम्यांधातारमभिपूजयेत्।पशुबंधाख्यांपुराणं
नरःप्राप्नोत्यसंशयं।सप्तम्यांज्येष्ठमासस्यइंद्रमित्यभिपूजयेत्।अश्वमेधफलावाप्तिर्जायतेतस्यनान्यथा।तथाषाढस्यसप्तम्यांपूजयित्वादिवाकरं।बहु
सुवर्णस्ययज्ञस्यफलंप्राप्नोतिपुष्कलं।आतपीतिश्रावणेवनाम्नादेवंप्रपूजयेत्।सौत्रामणेःफलंपार्थनरःप्राप्नोतिभारत।रविंभाद्रपदेमासिसप्तम्याम
र्यमस्तुविः।तुलापुरुषदानस्यगुडेनफलमाप्नुयात्।आश्वयुक्शुक्लसप्तम्यांसवितारंप्रपूजयेत्।गोसहस्रप्रदानस्यफलमाप्नोतिमानवः।का
र्तिकेशुक्लसप्तम्यांसप्ताश्वंनामपूजयेत्।योभ्यर्चयतिसुव्रतात्मापौंडरीकफलंलभेत्।मार्गशीर्षेतथाभानुंपूजयित्वाविधानतः।राजसूयस्ययज्ञस्यफ
लभाग्भवेन्नरः।भास्करंपुष्यमासेतुपूजयित्वाविधानतः।नहुषाणामपिवेदानांस्वाध्यायस्यफलंलभेत्।तथैवकृष्णसप्तम्यांनामपूजादिकंचयः।सो
पवासःप्रयत्नेनवर्षमेकंसमाचरेत्।पारितेनियमेपार्थसूर्ययागंसमाचरेत्।शुक्लसमोभूमेदेशेरक्तचंदनलेपिते।एकहस्तंद्विहस्तंवावतुर्हस्तमम·
मयापिवा।सिंदूरेणातिगौरेणसूर्यमंडलमालिखेत्।रक्तपुष्पैःपायसैश्चधूपैःकुंकुमकादिभिः।संपूज्यदद्यान्नैवेद्यंविचित्रंघृतपाचितं।पुरतः २१९

219A

संस्थापयेत्कुंभान् जलपूर्णान्स दक्षिणान् ॥ द्वादशात्र न पश्चेष्टस्रक्चंदनैर्वर्णितान् ॥ अग्निकार्यं ततः कार्यं समाराध्य हुताशनं ॥ आकृष्णेनेति मंत्रेण समि
द्भिश्चार्कसंभवैः ॥ तिलैराज्यगुडोपेतैर्दद्यादष्टशताहुतीः ॥ दक्षिणां च ततो दद्याद्ब्राह्मणेभ्यः पृथक्पृथक् ॥ देयानि रक्तवासांसि द्वादशानां द्विजन्मनां ॥ द्वा
दशात्र प्रशंसंति गावो वस्त्राणि भूषिताः ॥ छत्रोपानद्युगं चैव मेकैकाय प्रदापयेत् ॥ वित्तहीनो न शक्नोति दातुं द्वादश धेनवः ॥ एकामपि सुशीलां च
एकवर्णां पयस्विनीं ॥ उपदेष्टे प्रदातव्या वित्तशाठ्यमकुर्वता ॥ ततो विसृज्य तान्विप्रान्स्वयं भुंजीत वाग्यतः ॥ एवं कुरु ते पार्थ सप्तमीव्रतमादरात् ॥ नी
रुजो रूपवान्नाम मोदी दीर्घायुश्चापि जायते ॥ विशेषाद्दीर्घरोगेण ग्रस्तः कुष्ठादिना नृप ॥ तेन कार्यं प्रयत्नेन व्रतमेतद्युजा पहं ॥ न ह्यस्ति भास्करादन्य औषधं रोग
हानिदं ॥ भास्करैकगतिर्यस्तु सर्वभूतहिते रतः ॥ तत्समं दर्शनात्स्पर्शाद्रोगहानिः प्रजायते ॥ कथं तु सूर्यभक्तानां रोगो दौर्गत्यसंभवः ॥ जायते भरतश्रेष्ठ स्वल्पक्षे
परमेष्ठिनि ॥ समभ्यर्च्य प्रतिमासं कृष्णसप्तम्यां व्रतवरो हि यः ॥ उपवासी रवेर्भक्तः सर्वभूतहिते रतः ॥ अष्टम्यां विप्रसहितो हविष्यं भोजयेन्नरः ॥ एकादशसमाप्तस्तु
नित्य... पापवसप्तमी ॥ सूर्यस्य मंडलं भित्त्वा याति ब्रह्म सनातनं ॥ व्रतमेतन्महाराज सर्वाशुभविनाशनं ॥ सर्वदुष्टोपशमनं शरीरारोग्यकारकं ॥ सूर्यलो
कप्रदं चांते पापहं द्वनार्हदामुनिः ॥ ये सप्तमीमुपवसंति सितासितां वा नामाक्षरैरहिमदीधितिमर्चयंति ॥ ते सर्वरोगरहिताः सुखिनः सदैव भक्त्या वरं तु च यान्...

जय.
२२०
220

विंदंति। इदमेवोद्यापनमत्रोक्तो द्यापनसप्तमीव्रते पुत्रेप्सं। इति भविष्योत्तरोक्तं द्वादशसप्तमीव्रतं। अथ नानासप्तमीव्रतानि। हेमाद्रौ सुमंतुरुवाच। यः
क्षिपेद्धोमयाहारः शुक्लादा दशसप्तमीः। राजेंद्र यावकाहारः शीर्णपर्णाशनोपि वा॥ क्षीराशी नैकभक्तो वा भिक्षाहारोथवा पुनः। जलाहारोथवा भूत्वा
पूजयित्वा दिवाकरमित्यादि। स्वयं भक्त्या विवस्वंतं प्रतिमासं समाहितः। पूजयेद्द्विधिवद्भक्त्या नामानीमानि कीर्तयेत्॥ तत्र च नामानि। मधौ विष्णुः। मा
धवे र्यमा। शुक्रे विवस्वान्। शुचौ दिवाकरः। श्रावणे पर्जन्यः। नभस्ये वरुणः॥ आश्वयुजे मित्रः। कार्तिके मार्तंडः। मार्गशीर्षे अंडजः। पौषे पूषा। मा
घे भगः। फाल्गुने त्वष्टेति। इति भविष्योत्तरोक्तं गोमयादिसप्तमीव्रतं॥ अथ उदकसप्तमीव्रतं। उदकप्रसृतिं पीत्वा क्रियते च सप्तमी। सैवोदकसप्त
मीत्यादि। अथ भविष्यपुराणोक्तं वराटिकासप्तमीव्रतं। हेमाद्रौ वराटिकाश्च यत्नेन यद्दत्वा हि लभंत देवमक्षं कलसयितोपोषणं कुर्यादिति। इति व
राटिकासप्तमी। अथ भविष्यपुराणोक्तं यस्यां कस्यांचित्सप्तम्यां आदित्यमंडकव्रतं॥ तत्रार्कचंदनजे मंडले सूर्यं संपूज्य सहिरण्यपत्रतद्रूमंडकं दद्या
त्। तत्र मंत्रः। आदित्यतेजसोत्पन्नं राज्ञीकरविनिर्मितं॥ श्रेयसे मम विप्र त्वं प्रतीच्छापूपमुत्तममिति। अथ प्रतिग्रहमंत्रः। कामदं सुखदं धर्म्यं पुत्रदं सु राम.
खदं तथा। आदित्यप्रीतये दत्तं प्रतिगृह्णाम्यहं मंडकं। एवं प्रतिसंवत्सरं कर्तव्यमिति। इति आदित्यमंडकविधिः। यस्यां कस्यांचित्शुक्लसप्तम्यां मत्स्य २२०

220A

ष्टागरोगोक्तं सप्तमी स्नपनं। सप्तमीस्नपनं नाम व्याधिपीडाविनाशनं। बालानां मरणं यत्र क्षीरपाणां तु दृश्यते इत्यादि। जातस्य मृतवत्सायाः सप्तमे मासि
नारद। अथवाप्युक्तं सप्तमासे तत्त्वं प्रशस्यत इत्यादि। गोमयेनोपलिप्तायां भूमौ वेदिकाग्निवत्तहा। तंडुलै रक्तशालेयैश्चरुं गोक्षीरसंयुतं। निर्वपेत्सूर्य
रुद्राभ्यां मातृभ्यश्च विशेषतः। कीर्तयन्सूर्यदेवत्यं सप्त चैव घृताहुतीः। जुहुयाद्रुद्रसूक्तेन तद्वद्रुद्राय नारद। होतव्या समिधश्चात्र तथैवार्कपलाश
योः। यवव्रीहितिलैर्होमः कर्त्तव्योष्टशतं पुनः। व्याहृतिभिरथाज्येन तथैवाष्टशतं द्विजाः। हुत्वा स्नानं च कर्त्तव्यं मंत्रैः सौरैर्वधीमता। विप्रेण वेदविदुषा
विधिवद्धर्मपारीणा। स्थापयित्वा दृढवर्णः कुंभान्कोणेषु शोभनान्। पंचमं च पुनर्मध्ये दध्यक्षतविभूषितं। स्थापयेदव्रणां कुंभं सप्तसर्षपगाभिमंत्रि
तं। सप्तऋषयः प्रतिहिताः शमीरे सप्तर्षि क्षांतिसद्मप्रमादम्। सप्तापः स्वपतो लोकमापुस्तत्र जागृतोऽस्वप्नं द्वौ सत्रसदौ च देवौ। सौरेणातीर्थेतो येन पू
र्णोरत्नसमन्वितं। सर्वान्सर्वौषधियुतान्पंचभंगजलान्वितान्। पंचरत्नफलैर्युक्तान्वासोभिः परिवेष्टितान्। सप्तमृत्तिकायुक्तांश्च कृत्वावत्तु ष्टौपिव
कुंभेषु तोयपूर्णेषु मध्यमं। गृहीत्वा ब्राह्मणास्तत्र सौराणि मंत्रानुदीरयेत। नारीभिः सप्तसंख्याभिरव्यंगाभिरिवत्रवा। पूजिताभिर्यथाशक्त्या माल्यव
स्त्राद्विभूषणैः। सविप्राभिश्च कर्त्तव्यं मृतवत्साभिषेचनं। दीर्घायुरस्तु बालोयं जीवपुत्रास्त्रियेतथा। आदित्यश्चंद्रमाः सार्द्धं ग्रहनक्षत्रमंडलैः। श

जय.
२२१
221

क्षः स लोकपालो वै ब्रह्मा विष्णुर्महेश्वरः। एते चान्ये च देवाद्याः सदा पांतु कुमारकं। माशनि मोंचश्चापि तु श्च मातृबालग्रहाः क्वचित्। पीडां कुर्वंतु बालस्य मा
मातृकुर्जनकस्य च। ततः शुक्लांबरधरा कुमारी पतिसंयुता। सप्तकं पूजयेत्स्त्रीणां आचार्यं भार्यया सह। कांचनीं च ततः कृत्वा ताम्रपात्रोपरि स्थितां॥
प्रतिमां धर्मराजस्य गुरवे विनिवेदयेत्। वस्त्रैः कांचनरत्नाद्यैः भक्ष्यैः सघृतपायसैः। पूजयेद्ब्राह्मणांस्तत्र वित्तशाठ्यविवर्जिता। भुक्त्वा च गुरुणा वे
दसु वाचयें पुत्रसंततिः। दीर्घायुरस्तु बालो यं यावद्वर्षशतं सुखी। यत्किंचिदस्य दुरितं तत्क्षिप्तं वडवामुखे। ब्रह्मा रुद्रो वसुः स्कंदो विष्णुः शक्रो हुता
शनः। रक्षंतु सर्वदुष्टेभ्यो वरदाः संतु सर्वदा। एवमादीनि वान्यानि वदंतं पूजयेद्गुरुं शक्तितः। कपिलां दत्वा प्रणिपत्य विसर्जयेत्। गुरुं च पुत्रस
हिता प्रणम्य रविशंकरौ। हुतशेषं तदश्नीयाद्दाहित्याय नमोस्त्विति। इति मत्स्यपुराणोक्तं सप्तमीस्नपनं। यश्चोपवासी सप्तम्यां समाप्ते हेमप
कंजं। गावश्च शक्तितो दद्याद्धेमांते घटसंयुताः। एतत्सौरव्रतं नाम सूर्यलोकप्रदायकमिति। इति पद्मपुराणोक्तं सौरव्रतं। इति सप्तमीव्रता
नि। अथ षष्ठ्यां प्रियायापन्यानि। शाल्योदनं तथा मुद्गान्गुडं गंधं घृतमेव च। अपूपान्गुडपूर्णांश्च पयो दधि तथा गुडं। एतैः स्तुतः प्रीतिमायाति भास्करोऽनेन स राम·
सदा। वर्षाणि भारतश्रेष्ठ नात्र कार्या विचारणा। कुलस्य कांमसूराः श्चवल्लांछ्याकृष्ट एव च। शिग्रुं कुंदं तथा सल्लाराजमाषांस्तथैव च। एतन्नमासके २२१

221A

रेद्घाघइच्छेच्छ्रियमात्मनः।सप्तम्यां न स्पृशेत्तैलं नीलं वस्त्रं न धारयेत्।न वाप्यामलकैः स्नानमित्यादिनिषेधास्तु हेमाद्रौ स्पष्टाः।पक्षद्वयगतास्व
स्वेव सप्तमीषु तिथिपतेनादित्यः पूज्यः।उक्तं च।सप्तम्यां भास्करस्येति। अथ सिद्धविरुद्धादिकालिख्यते। सप्तमी बुधवारे योगसिद्धा भवति। तदु
क्तं। बुधवारे द्वितीया च द्वादशी सप्तमी पुनरिति। सप्तम्यां रविवारे योगः संवर्त्ताख्यो योगो विरुद्धो भवति। सप्तम्यां दिनकरवासरो यदि स्याद्वा राश्व
त्यतिपदि चैव बुधे नंदनस्था। संवर्त्तो मुनिभिरुदीरितः स योगः संत्याज्यः शुभफलकांक्षिभिः प्रयत्नादिति। सप्तमी रविवारयोगादिविरुद्धयोगेषु क
श्चिद्विशेषो लिख्यते। यथा विरुद्धयोगास्तिथिवारजातानक्षत्रवारसंभवाश्चयेव।।हूणोषु वंगेषु च खर्यांत्रिमेषु देशेषु न ते विरुद्धाः। सप्तम्यां च
द्वितीयावद्व्रतपोष्टिकादिकर्म कार्यं। व्रतपोष्टिके द्वितीयाद्वादशीसप्तमीषु कुर्वीतेत्युक्तत्वात्। सप्तम्यामलकस्नानं लक्ष्मीनाशकरं। तदुक्तं। स
प्तम्यां निंदुनवमीषु च मं पादि वध्वः स्नायात्कदाचिदपि नामलकैर्मनुष्यः। रविभौमशनिनामसु तमे च गृहे कन्याराशिस्थिते सप्तमी शुभकर्मसु
निषिद्धा। तदुक्तं। परापरेषामित्यादि। सप्तम्यां वायव्यां दिशि योगिनी सा सुमुखा घात्रानकार्या वायव्ये शानयोरिहुक्तत्वादिति सर्वे सप्तमीनिर्णयः। श्री
मद्दिल्लीशस्नेत्यादिमाद्वः श्लोकः पूर्ववत्।। इति श्रीजयसिंहवर्मनृपतेः कल्पद्रुमे ग्रहमंथनस्थयं स्तबके दीशिवं समकरोत्सप्तम्यां निर्णयं कं।

जय. इति देवभट्टात्मजमहाराजपेययाजिरत्नाकरविरचिते जयसिंहकल्पद्रुमोद्योते सप्तमीनिर्णयो नामाष्टमस्तबकः समाप्तः ॥ अथाष्टमीनिर्णीयते ॥ तत्रादौ कृ
२२२ ष्णाष्टमीध्यानं ॥ घंटापात्रधरा गोस्था गोक्षीरधवलाष्टमीति ॥ अथ कृष्णाष्टमीध्यानं ॥ प्रेतगा चाष्टमी रक्ता कृष्णग्रीवासितांशुका ॥ अक्षं खड्गं तथा खेटं पा
222 त्रं चैतेन चतुर्भुजेति ॥ अष्टमी सर्वमते कृष्णाष्टमी सिता परा ॥ व्रतमात्रे ष्टमी कृष्णा पूर्वा शुक्लाष्टमी परेति माधवोक्तेः ॥ परस्तु कृष्णशुक्लाष्टमी पूर्वैव शुक्लकृ
ष्णेति दीपिकोक्तेः ॥ शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी ॥ पूर्वविद्धा न कर्तव्या कृष्णे तेया परसंयुतेति ॥ कृष्णपक्षेष्टमी चैव कृष्णपक्षे चतुर्दशी ॥ पू
र्वविद्धैव कर्तव्या परविद्धा न कुत्रचित् ॥ उपवासेषु पराज्ञेद एष धर्मः सनातनः इति नैगमाच्च ॥ हेमाद्रिमाधवनिर्णयामृतनिर्णयसिंधुकालतत्त्ववि
वेचनप्रभृति सर्वमते कृष्णाष्टमी उपवासादिषु पूर्वविद्धैव ग्राह्येति सिद्धांतः ॥ मदनरत्नमते तु उपवासे तु पक्षद्वयेप्यष्टमी परयुतैव ग्राह्या ॥ उप
वासे सप्तमीतुवेधाद्वर्जयेदुत्तरं दिनं ॥ पक्षयोरुभयोरेषु उपवासविधिः स्मृत इति नारदीयवचनेन पक्षद्वयेपि सप्तमीविद्धाया निषेधात् ॥ एकादश्यष्ट
मी षष्ठी तिथिः पूर्वा द्वादशी हतमन्त्रगुरुवचनाच्च निगमवचने उपवासग्रहणाच्चोपवासव्रतविषयमिति ॥ शान्तिपूजायां तु अष्टमी रात्रिव्यापिनी ग्राह्या ॥ राम
तुर्कं देवीपुराणे ॥ निशायां पूजिता देवी वैष्णवी पापनाशिनी ॥ तस्मात्सर्वप्रयत्नेन त्वष्टम्यां निशि पूजयेत् इति ॥ अत एव दुर्गाभक्तितरंगिण्याम २२२

222A पिशाचीभूजायामष्टमीरात्रियोगिनीश्चैववृत्वाद्येस्तुते ॥ कालव्यापि शास्त्रात् । शुक्लपक्षे पूर्वविद्धा दर्शे कृष्णपक्षे विवादाभावाद्य । दिनद्वये रात्रिव्याप्त्यभावे विकरात्रि
व्यापिनी ग्राह्या । तुल्यव्याप्तावुत्तरैव प्रमाणम् । प्रमकर्मकालपर्यंतमज्ञानात् । शिवार्चने नवंदिकायां कुलार्णवे निशायां नंदिनं कुर्याज्ज्योनैमित्तिकार्चनमि
त्यभिधानाच्चेति । इत्यष्टमीसामान्यनिर्णयः । अथाष्टमीकृत्यानि । तत्र सर्वास्वष्टमीषु भैरवयात्रोक्ता काशीखंडे । अष्टम्यां च चतुर्दश्यां रविभूमिजवा
सरे । यात्रां च भैरवीं कृत्वा नरः पापैः प्रमुच्यते ॥ तत्रैव । अष्टम्यां च चतुर्दश्यां भौमवारे विशेषतः । संपूज्य मतं तं काश्यां दुर्गां दुर्गार्तिनाशिनीमिति । चैत्रशु
क्लाष्टम्यां चैत्रकृष्णाष्टम्यां विष्णुधर्मोक्तं संतानाष्टमीव्रतं ॥ हेमाद्रौ कृष्णाष्टम्यां चैत्रमासे स्नातो नियतमानसः इत्यादि । कृष्णं देवकीनाम्यर्च्य उपोष्य उपसत्तिः ।
तत्राष्टमी नवमीयुक्ता नवमीयुक्ता नवमी वाष्टमीयुतेति मदनरत्ने वृत्ता युग्मवाक्यात् परा । अत्र भवानीयात्रोक्ता काशीखंडे । चैत्राष्टम्यां महाया
त्रां मृदान्याः कारयेत्सुधीः । अष्टाविकाः प्रकर्तव्याः शतकृतः प्रदक्षिणाः । भवानीयस्तु पश्येद्धि शुक्लाष्टम्यां मधौ नरः । न जातु शोकं लभते सदानंदम
यो भवेदिति । अत्रैवाशोककलिकाप्राशनमुक्तं लैंगे । अशोककलिका वाष्टौ ये पिबंति पुनर्वसौ । अशोककुसुमैः रुद्रमर्चयित्वा विधानतः । अशो
कस्याष्टकलिकामंत्रेणानेन भक्षयेत् । शोकं नैवाप्नुयान्नित्यं रूपवान् पिजायते इति । अत्र बुधपुनर्वसुयोगः प्राशस्त्यार्थः । तिथिः शरीरं देवस्य तिथौ न

जय॰
२२३
223

क्षेत्रमाश्रितं।तस्मात्तिथिं प्रशंसंति न नक्षत्रं तिथिं विना इति ज्योतिःशास्त्रादिति कल्पतरुलावल्यां।अत्र च लिंगपुराणे।अशोककलिकापानमशोकव्रतहर
जनं।शुक्लाष्टम्यां तु चैत्रस्य कृत्वा प्राप्नोति निर्वृतिं॥ इति।प्राशनमंत्रस्तूक्तो लिंगपुराणे।त्वामशोकहराभीष्ट मधुमाससमुद्भव।शोकार्त्तः कलिकां प्राश्य
मामशोकं सदा कुरु॥ इति।इदमशोकाष्टमीव्रतं।तिथितत्वे स्कांदे।मीने मघोशुक्लपक्षे अशोकाख्यां तथाष्टमीं।पिवेदशोककलिकाः स्नात्वा ब्रह्मलौहित्य
वारिणीति।अत्र मधुश्चांद्रः।एतच्च ग्रहणात्।निर्णयसिंधौ तिथितत्वे कालिकापुराणेपि।चैत्रे मासि सिताष्टम्यां यो नरो नियतेंद्रियः।स्नाया
ल्लौहित्यतोये स सयाति ब्रह्मणः पदं।चैत्रं तु सकलं मासं शुचिः प्रयतमानसः।लौहित्यतोये यः स्नायात्स कैवल्यमवाप्नुयात्।लौहितो ब्रह्मपुत्रः।स्ना
नमंत्रस्तु।ब्रह्मपुत्र महाभाग शांतनोः कुलसंभव।अमोघागर्भसंभूत पापं लौहित्य मे हर॥ इति।पृथ्वीचंद्रोदयेपि विष्णुः।पुनर्वसुबुधोपेता चैत्रे मासि सिता
ष्टमी।प्रातस्तु विधिवत्स्नात्वा वाजपेयफलं लभेदिति।निर्णयामृते।अस्यामेवाष्टम्यां देव्या महापूजा कार्या।तदुक्तं मार्कंडेयपुराणे।शरत्काले महा
पूजा क्रियते या च वार्षिकी।तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः॥ इति।अत्र या च वार्षिकीत्यनेन संवत्सरसाध्यं चैत्रशुक्लप्रतिपदमुपक्रम्याष्ट राम॰
मीपर्यंतं क्रियमाणा पूजाभिधीयते।ततश्च शरद्वसंतयोः स्तुल्यएव दुर्गोत्सवः।इति चैत्राष्टमीव्रतानि।अथ वैशाखशुक्लाष्टमीव्रतं।निर्णयामृते २२३

223A

वैशाखशुक्लाष्टम्यां उपोषिता ऽऽम्रफलरसेन स्नाता त्वपराजिताख्यां देवीं मांसीवालकवारिभिः स्नापयित्वा तां पूज्य शर्कराक्षीरनैवेद्यं दत्वा नवम्यां तद्देव
ब्राह्मणान् कुमारीश्च भोजयित्वा पारणां कुर्यात्। मांसी जटामांसी। वालकं उशीरं। तदुक्तं देवीपुराणे। सहकारफलैः स्नानं वैशाखस्याष्टमीदिने। आ
त्मानं देवतां स्नात्वा मांसीवालकवारिभिः। लेपनं फलकर्पूरं धूपं पंचसुगंधिकं। फलं जातीफलं। पंचसुगंधिकं कंकोलपूगकर्पूरं जातीफललवंग
कं। सुगंधं पंचमं प्रोक्तमायुर्वेदप्रकाशके। देव्याः पूजां च कुर्वीत केतस्या पंचकेन तु। शर्कराक्षीरनैवेद्यं कन्याविप्रेषु भोजनं। आत्मनः पारणां पश्चाद्द
क्षिणां शक्तितो दहेत्। सर्वतीर्थाभिषेकं चानेन प्राप्नोति भार्गवेति। इति वैशाखाष्टमीव्रतं। ज्येष्ठकृष्णाष्टम्यां शिवपूजा कार्या। तदुक्तं भविष्योत्तरे। ज्ये
ष्ठमासि द्विजश्रेष्ठ कृष्णाष्टम्यां त्रिलोचनं। यः पूजयति देवेशमीशलोकं व्रजेन्नर इति। ज्येष्ठे मासि तथाषाढे श्रावणे च तथापरे। पूजयेत्तु गोमा
सानुनीलोत्पलकह्लारकैः। त्रिपुरांतकरं शंभुमित्यादि। आसामेवाष्टम्यां शुक्लां देवीं पूजयेत्। तदुक्तं देवीपुराणे। शुक्लाष्टम्यां पुरा देव शुक्ला
देवी महामायानिजयाहेति शेषः। बधापद्मासनं वेद्राणां शुक्लपक्षे तत्तोयजेदिति। इति ज्येष्ठाष्टमी। आषाढशुक्लाष्टम्यां उपोष्य हरिद्रातोयेन स्नाता म
हिषघ्नीनाम्नीं देवीं तेनैव स्नापयित्वा पूजयेत्। तदुक्तं देवीपुराणे। आषाढ्यां च तथाषाढे निशातोयेन स्नापयेत्। स्वयं स्नाता तां च कर्पूरैः चंदनैः सा

विलेपयेत् । हेमाद्रिमदनरत्नयोः स्कांदे अष्टम्यां तथाषाढे निशांते तोयेन स्नापयेत् ॥ ततो देवीं जलैः कुशैर्वा गंधोदकेन वा । स्नात्वा विलिप्य कर्पूरं चंदनैः रोचनांबुभिरीति
पविंतं । धूपश्चंदनकर्पूरवालकैः सितसिल्हकैः । भक्ष्यान् शर्करया पूर्णान् पानकानि शुभानि च ॥ दापयेत्तक्रमकाविशा भोजनं चात्मनस्तथा । शक्तितो दक्षिणां
दद्यान्महिषघ्नीं च कीर्तयेत् । दीपमाला घृतेनैव सर्वान्कामानवाप्नुयात् । सर्वयत्नमहादानमनंतीर्थफलं लभेत् । एतद्व्रतवरं शुक्रमयारुद्रेण विष्णुना । जग-
तो हितं सिद्धिश्रीगौरीदुर्गाव्रतं महत् मातुर्नायं हविर्ध्वंसः समरे वक्तं तं युगात् तथा देवासुरैः पन्नगाकिन्नरमानवैः । अप्सरोभिस्तथाब्रह्माभिः सौभाग्यसवृद्ध-
ये । कृतं वैयमहशार्दूल यक्षकुर्पाघघाविवि । श्रवणादस्य वा योति सर्वकामसुखानि च । इष्टानि लभते मर्त्यो विंध्याद्युत्वं प्रपद्यते । इति महिषघ्नीव्रतं । आव-
णशुक्लाष्टम्यां देवीपुराणोक्तं दुर्गाव्रतं । देवीव्रतं प्रवक्ष्यामि सर्वकामप्रसाधनं । श्रावणे शुक्लपक्षे तु अष्टम्यां वायुभोजनः । स्नात्वा साद्रपदो भूत्वा देवीं
क्षीरेणास्नाप्य पायसं नैवेद्यं दत्त्वा स्वयमपि भुंजीतेति दुर्गाव्रतं । अथ जन्माष्टमी निर्णीयते । सा चामांतमासपक्षे श्रावणकृष्णाष्टमी । पूर्णिमांतमा-
सपक्षे भाद्रपदकृष्णाष्टमी । उभयथाप्येकैव उभयविधापि स्मार्तैर्व्यवहारे दर्शयिष्यते । सा च द्विविधा शुद्धा विद्धा च । तत्र शुद्धायामष्टौ भेदाः । विद्धायाम-
पां चाष्टौ भेदाः । तत्र सप्तमीयोगरहिता शुद्धा । सप्तमीयुक्ता विद्धा । शुद्धा नवविधा । समा न्यूनाभ्यधिका चेति तत्र सूर्योदयादुदयपर्यंतं स्थिता २२४

224A

समा। ततो वोड्ढिः कलान्यूना॥ तमतिक्रम्य प्रवृत्ता अधिका विपि समन्यूनाधिकभेदेन त्रिधा। तत्र शुद्धसमा रोहिणीसहिता तद्रहिता चेति द्विधा। शुद्धन्यू
नापि रोहिणीसहिता। तद्रहिता चेति द्विविधा। शुद्धाधिकात्पूर्वदिन एव रोहिणीसहिता। परदिने एव रोहिणीसहिता। उभयत्र रोहिणीसहिता
उभयत्र रोहिणीरहिता चेच्चतुर्विधा। एवं शुद्धाष्टविधा। एवं शुद्धाष्टविद्धसमापि रोहिणीसहिता तद्रहिता चेति द्विविधा। विद्धन्यूनापि रोहिणीसहिता
चेति द्विविधा। विद्धाधिकात्पूर्वदिन एव रोहिणीसहिता परदिन एव रोहिणीसहिता उभयत्र रोहिणीरहिता चेति चतुर्विधा। एवं विद्धाप्यष्टविधा। उ
भयेषां शुद्धविद्धभेदानां मेलने षोडशप्रकारा भवंति। द्वावन्यावांतरभेदौ यथा। अर्धरात्रे रोहिणीयुक्ताष्टमी जयंतीत्येकः। द्वितीयो नवम्यां बु
धवारसोमवारयोरन्यतरेण योगे। एवमष्टादशप्रकारा जन्माष्टमी। तत्र सकामैर्निष्कामैश्च सर्वथा उपवासः कर्तव्यः॥ग॥ अमां संवत्सरं कालं कृपेन वा
सुति सत्तम। मांसं वा हृदि पद्मां भुंक्ते कृष्णजन्माष्टमीदिने। तथा। कृष्णाष्टम्यादिने प्राप्ते येन भुक्तं द्विजोत्तम। त्रैलोक्यजनितं पापं भुक्तं तेन न संशयः
येन कृतं तिजानं तः कृष्णजन्माष्टमीव्रतं। ते भवंति महाप्राज्ञ व्याला महति कानने। श्रावणे बहुलेपक्षे कृष्णजन्माष्टमीव्रतं। न करोति नरो य
स्तु भवति क्रूरराक्षसः। अकुर्वन्त्ररकं याति यावदिंद्राश्चतुर्दश। अतीतानागतं तेन कुलमेकोत्तरं शतं। पातितं नरके घोरे यो भुंक्ते कृष्णवासरे। ढं

जय. तीह पुराणानि भूयो भूयो महामुने॥ तथ॥ कृष्णजन्माष्टमीं त्यक्त्वा ये मूढा न तु पामरास्ते नाप्नुवंति शुभं किंचिदिष्टापूर्त्तमथापि वा॥ श्रावणे बहुले पक्षे
२२५ न करोति यदाष्टमीं॥ कृष्णा सुधाः क्रूर समुखा हिंसंति यमकिंकराः॥ इत्यादिवाक्यैः करणे प्रत्यवायश्रवणात्॥ वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतं
225 ॥ न करोति महापापा सर्पा लीभवति कानने॥ वर्षे वर्षे तु कर्त्तव्यं तुष्ट्यर्थं चक्रपाणिन इत्यादिस्कांदादिवाक्ये भूवीप्साश्रुतेश्च॥ वह्निपुराणे जयंतीव्रत
मपि नित्यं॥ यद्वाल्ये यच्च कौमारे यौवने वार्द्धके तथा॥ बहुजन्मकृतं पापं हंति सोपोषिता तिथिः॥ सप्तजन्मकृतं पापं राजन्यत्त्रिविधं नराणां तत्क्षाय
लति गोविंदास्तिथौ तस्यां समर्चितः॥ उपवासश्च तत्रोक्तो महापातकनाशनः॥ जयंत्यां जगतीपाल विधिनानात्र संशय इति वह्निपुराणवचनेन॥
तथा॥ श्रद्धान्वेन तद्व्यपस्तापं शवहस्तस्य भोजनेनात्त पापं लभते धुंभिर्जयंत्यां भोजने कृते नर इति स्कंदपुराणवचनेन तथा॥ ब्रह्मघ्नस्य सुरापस्य गोघ्नस्य स्त्रीवधस्यापि
वा॥ न लोको मुनिशार्दूल जयंतीविमुखस्य च॥ न करोति यदा विष्णो जयंतीसंभवं व्रतं॥ यमस्य वशमापन्नः सहते नारकीं व्यथां॥ जयंतीवासरे प्राप्ते करो
तु दुरश्ररणात्॥ पापघ्ने तिलमात्रं ह्वयमद्भूतैः कलेवरं॥ यो भुंजीत विमूढात्मा जयंतीवासरे नरः पापं स कोत्तारो ने न तस्मात् त्रिद्वादशीमपि कुर्वीत इत्यादि व राम.
चनेषु अतद्करणे दोषश्रवणात्॥ शवहस्तस्य भोजनोक्तावसत्ता किं हस्तस्य भोजनइत्यर्थः॥ जन्माष्टमीव्रतं काम्यमपि फलसंश्रवणात्॥ तथा वह्नि २२५

225A

षेव तेनाराध्य देवेशं देवकीसहितं हरिं ॥ त्यक्त्वा यमपथं घोरं याति विष्णोः परं पदं ॥ जन्माष्टमीव्रतं ये वै प्रकुर्वंति नरोत्तमाः ॥ कारयंत्यथवा लोका न लक्ष्मीस्ते
षां सदा स्थिता ॥ स्मरणं नाम्सुदेवस्य मत्स्युकाले भवेन्मुने ॥ सिध्यंति सर्वकार्याणि कृते जन्माष्टमीव्रते ॥ माहात्म्यात्तथा जयंतीव्रतमपि काम्यं ॥ महाजयार्थं कु
र्यात्तां जयंतीं भुक्तिमुक्तिदां ॥ धर्ममर्थं च कामं च मोक्षं च मुनिपुंगव ॥ ददाति वांछितानर्थान् ये चान्येप्यतिदुर्लभाः ॥ इति स्कांदे ॥ हारीतः फलमुक्तं तेः ॥ तथा भविष्योत्तरे
जयंतीकल्पे ॥ प्रतिवर्षं विधानेन मद्भक्तो धर्मनंदन ॥ नरो वा यदि वा नारी यथोक्तं फलमाप्नुयात् ॥ पुत्रसंतानमारोग्यं ॥ सौभाग्यमतुलं लभेत् ॥ इह
धर्मरतिर्भूत्वा मृतो वै ॥ कुंठमाप्नुयात् ॥ हिसादितत्वादौ जयंतीस्वरूपं तावन्निरूप्यते ॥ माधवीये विष्णुधर्मोत्तरे ॥ रोहिणी च यदा कृष्णपक्षेष्टम्यां द्विजो
त्तम ॥ जयंती नाम सा प्रोक्ता सर्वपापहरा तिथिरिति ॥ सनत्कुमारसंहितायां ॥ स्मृत्युक्तो वहितो राजन् कृष्णमानेन यानघ ॥ श्रावणास्य नभोमासस्य कृष्णा
ष्टम्यां नराधिप ॥ रोहिणी यदि लभ्येत जयंती नाम सा तिथिरिति ॥ स्कांदे ॥ प्राजापत्येन संयुक्ता अष्टमी तु यदा भवेत् ॥ श्रावणे बहुले सा तु सर्वपापप्र
णाशिनी ॥ जयं पुण्यं च कुरुते जयां पुण्यां च तां विदुरिति ॥ शैवपुराणेपि शिववाक्यं ॥ अथातः संप्रवक्ष्यामि ह्यष्टमीभेदनिर्णयं ॥ श्रावणे कृष्णपक्षे
स्य घटिकाषष्टिर्यदा भवेत् ॥ तदा जन्माष्टमी ख्याता संपूर्णा सा प्रकीर्तिता ॥ रोहिणीऋक्षसंयुक्ता जयंती सा तु कथ्यते ॥ जयंती यदि लभ्येत तत्र क्षयं पापनाश

जय·
२२६
226

गपत इति। विष्णुरहस्ये। अष्टमी कृष्णपक्षस्य रोहिणीऋक्षसंयुता। भवेत्प्रौष्ठपदे मासि जयंती नाम सा स्मृतेति॥ वसिष्ठसंहितायां। श्रावणे वा नभस्ये वा
रोहिणीसहिताष्टमी पदा कृष्णा नरैर्लब्धा सा जयंतीति कीर्तिता। श्रावणे न भवेद्योगो नभस्ये तु भवेद्ध्रुवं। तयोरभावे योगस्य तस्मिन्वर्षे न संभव इति। अत्र
श्रावण इति मुख्यः कल्पः नभस्य इत्यनुकल्पः। यदि श्रावणो यदि वा नभस्ये सर्वथापि रोहिणीकृष्णजन्माष्टमीयोगो जयंतीत्येतद्विवाहं। पुराणांतरे
पि। रोहिणी च यदा कृष्णपक्षेष्टम्यां द्विजोत्तम। जयंती नाम सा प्रोक्ता सर्वपापहरा तिथिरिति। अत्र वचनद्वयेपि सामान्यतः कृष्णाष्टमीरोहिणीयोगो ज
यंतीत्युक्तमिति प्रतिभाति तथापि एवंक्व वचननिचयपर्यालोचनया त्रत्याष्टमीपदस्य जन्माष्टमीपरतया नेनापि वचनेन जन्माष्टमीरोहिणीयोगस्यै
व जयंतीत्युक्तं। अग्निं स्वप्नते उववामनः प्रजावेत्युभयपथ्यानं। जन्माष्टमीदिने प्राप्त इति स्कान्दात्। अर्द्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत्। तस्यामभ्य
र्चनं शौरेर्हंति पापं त्रिजन्मजं। सोपवासो हरेः पूजां मिस्यत्र। मासि भाद्रपदेष्टम्यां कृष्णपक्षेर्धरात्रके। शशांके वृषराशिस्थे ऋक्षे रोहिणीसंज्ञके। योगेस्मि
न्वसुदेवाद्देवकी मामजीजनत्। तस्मान्मां पूजयेत्तत्र शुचिः सम्यगुपोषित इत्यादावुपवासस्य गुणतया प्रतीतेः सहृतोद्यावतीत्यादिवत्फलिसंस्कारः एम·
पूजैव प्रधानमिति। तदर्पिततः। केवलेनोपवासेन तस्मिन् जन्मदिने मम। शतजन्मकृतात्पापान्मुच्यते नात्र संशय इति वचने केवलोपवासस्य फल २२६

226A संबंधश्रवणात्। अर्धं रात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत्। तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजमित्यत्र पूजायाः केवलायाः इव जयंत्यामुपवासस्य म
हापातकनाशनः। सर्वैः कार्यो महाभाग पूजनीयश्च केशव इति भविष्यद्विष्णुधर्मयोरपि एकवाक्ये फलसंबंधश्रवणाच्च। अत एव प्रयोगमेदकल्पना
पत्तिरपि परास्ता। यत्त्वाप्ये केचन सश्रवणात्त्वा उपवासोपलक्षणीयतात्र मो उपवासो महोः पूजामिसाव्रताविः समभ्युपोषित इत्यत्र चोपवासस्याति
शेषेणान्वेनोपादानेपि प्राधान्यं न विहन्यते। यजतावुद्देशवत्। एवं वसति वासुदेवं समुद्दिश्य सर्वपापप्रशांतये। उपवासं करिष्यामि कृष्णाष्ट
म्यां नभस्यहमिति भविष्योक्ते संकल्पवाक्ये यदुपवासमात्रस्य ग्रहणात् तत्पूजाया अप्युपलक्षणं। विधत्तु सारित्वात्संकल्पस्य। एवं सति वासुदेवं
समुद्दिश्येत्यप्यां जसेनान्वेति। पूजायां तस्योद्देश्यत्वादुपवासे उद्देश्यानपेक्षणात्। वासुदेवशब्देन तत्प्रीतिलक्षणायां वा तदपेक्षया जघन्येउपवा
सपद एव यथाश्रुततदन्वयार्थं पूजालक्षणायायुक्तत्वात्। उपवासोपसर्जनकपूजालक्षणायां वा वासुदेवं समुद्दिश्येत्यस्य विशेष्यपूजान्वयोपपत्तेः।
अत एव द्वितीयसंकल्पवाक्ये अर्चयित्वोपवासेन भोक्ष्येहमपरेहनि इति पूजाया अप्युल्लेखः। तस्मादुभयमपि प्रधानं अस्याश्च पूजायाः काल उक्तो वि
ष्णुधर्मोत्तरे। रोहिणीसहिता कृष्णा मासि च श्रावणेऽष्टमी। सप्तम्यामर्धरात्राधः कलयापि यदा भवेत्। तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः। तमे

जय.
२२७
227

वोपवसेत्कालं तत्र कुर्याद्विजागरं । अर्द्धरात्रेतु योगोयं तारापत्युदये तथा । नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्त्तयेदिति । वसिष्ठस्तु । सप्तमर्द्धरात्रसमु
दयकालत्वमाह । अष्टमी रोहिणीयुक्ता निश्यर्द्धे दृश्यते यदि । मुख्यकालः स विज्ञेयस्तत्र जातो हरिः स्वयमिति । मुख्यस्य प्रधानस्य कालो मुख्यकालः । श्री
भगवते दशमस्कंधे तृतीयाध्यायेपि । अथ सर्वगुणोपेतः कालः परमशोभनः । यर्ह्येवाजनजन्मर्क्षं शांतर्क्षग्रहतारकमित्युपक्रम्य निशीथे तम
उद्भूते जायमाने जनार्दने । देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः ॥ आविरासीदित्यादि । अजनजन्मर्क्षं रोहिणी । यद्यपि विकालं पूजयेद्देवं हि
णाचौ विशेषतः । अर्द्धरात्रावपि तथा पुष्पैर्नानाविधैरपीति भविष्येऽन्यकालेपि पूजोक्ता । उपवासश्चाहोरात्रावच्छिन्नो भोजनरूपस्तथाप्यर्द्धरात्र
कालावच्छिन्नैव पूजा प्रधानं तथा च भविष्योत्तरे । मासि भाद्रपदेष्टम्यां निशीथे कृष्णपक्षगे । शशांके वृषराशिस्थे ऋक्षे रोहिणीसंज्ञके । योगेस्मिन्व
सुदेवाद्धि देवकी मामजीजनत् । तस्मान्मां पूजयेत्तत्र शुचिः सम्यगुपोषितः । ब्राह्मणान्भोजयेद्भक्त्या ततो दद्याच्च दक्षिणां । हिरण्यं मेदिनीं गावो वा
सांसि कुसुमानि च । यद्यदिष्टतमं तत्तत्कृष्णो मे प्रीयतामिति । नारदीयसंहितायामपि । उपोष्य जन्मचिह्नानि कुर्याज्जागरणं तु यः । अर्द्धरात्रा राम
युताष्टम्यां सोश्वमेधफलं लभेत् । इति । एवं सत्यर्द्धरात्रेष्टमीसद्भाव एवात्र कर्मकालव्याप्तिरिति सिद्ध्यते । एतदेवाभिप्रेत्य विष्णुरहस्ये पठ्यते २२७

अर्द्धरात्रे तु रोहिण्यामित्यादि तस्मिन्नर्द्धरात्रे पूर्वापरभागयोः कियत्परिमाणमपेक्षितमित्यपेक्षायामादित्यपुराणे दर्शितं। अर्द्धरात्रादधश्चोर्ध्वं क
अपरंड़
227A
लयापि यदा भवेत्। जयंती नाम सा प्रोक्ता सर्वपापप्रणाशिनी इति वराहसंहितायामपि। सिंहेऽर्के रोहिणीयुक्ता नभः कृष्णाष्टमी यदि। रात्र्यर्द्धपूर्वा
परगा जयंती कलयापि चेति। रात्रेरर्द्धं रात्र्यर्द्धं पूर्वश्च पूर्वापरे। रात्र्यर्द्धे च ते पूर्वापरे च तयो गच्छति वर्त्तत इति रात्र्यर्द्धपूर्वापरगा। योगी यया रो
हिणी सहिता कृष्णा मासे नभस्यावणेऽष्टमी। अर्द्धरात्रादधश्चोर्ध्वमित्यादि। कला पाद्यतिसूक्ष्मत्वेन दुर्लक्ष्यत्वात्स एव पक्षांतरमाह। अर्द्धरात्राद
धश्चोर्द्ध्वमेकार्द्धघटिकान्विता। रोहिणी चाष्टमी ग्राह्या उपवासव्रतादिषु इति। एका वार्द्धघटिका चैकार्द्धघटिके ताभ्यामन्विता। कलामपेक्ष्यार्द्धघ
टिका स्थूला तामपेक्ष्य घटिका स्थूला तत्त्वायमर्थः संपद्यते। पूर्वभागावसाने एका घटिका उत्तरभागादौ चैकेति मिलितात् निशीथशब्दवाच्यमुहू
र्त्तेतावत्परिमाणांशवैरपि सुलक्ष्यत्वात्मुख्यः कल्पः। तदसंभवे घटिकार्द्धघटिकान्वेषणात्मसाध्यसंभवे कलेति। तत्र मुख्यं पक्षमभिप्रेत्य भविष्यो
त्तरे निशीथे कृष्णपक्षे दृग इत्युक्तं(?)। तच्च वचनं प्राक्तनेन पूर्वमेवोदाहृतं। अत्र जयंत्यां चंद्रार्घ्यसावत्सप्तकर्त्तव्यता तत्सापवच्चंद्रोदयकालीनत्वात्। निशी
थयोगः प्रशस्तः। एतदेव माधवीये विष्णुधर्मोत्तरे विहितं। अर्द्धरात्रे तु योगोऽयमित्यादि सोऽयमर्द्धरात्रयोगो मुख्यः कल्पः। यस्तु कश्चिदाहोरा

द्रुयोगः सोयं मुख्यतरः । प्रयस्त्वयं हार्कदा विदीष घोगः सोनुकल्पः । स च वासिष्ठसंहितायां दर्शितः । अहोरात्रे तयोर्योगो ह्यसंपूर्णो भवेद्यदि मुहूर्तमप्यहोरात्रे योग
श्चेत्तामुपोषयेदिति । वासरे वा निशायां वा यत्र स्वल्पापि रोहिणी । विशेषेण नभोमासे सैवोपोष्या मनीषिभिरिति । योपजयंतीव्रते योगानिरपेक्षः स एव जन्माष्टमी
व्रतेपि दृष्टव्यः । यस्मिन्वत्सरे योगो नास्ति तस्मिन्वत्सरे जन्माष्टमीव्रतमेकमेव प्रवर्त्तते । यदा च पूर्वेद्युः परेद्युर्वा रोहिणीयोगस्तदा जन्माष्टमी जयंत्यामंतर्भू
त्वा तेयान तु जन्माष्टमीव्रतं पृथक्कार्यं तदुक्तं माधवेनैव । यस्मिन्वर्षे जयंत्याख्यो योगो जन्माष्टमी तदा । अंतर्भूता जयंत्यां स्यादृक्षयोगप्रशस्तितः इति ।
मदनालनिर्णयामृतगौडमैथिलमतेप्येवं । निर्णयामिंधौ तु । हेमाद्रिस्तु रोहिणीसंयुतोपोष्या सर्वाघौघविनाशिनी । अर्द्धरात्र आदर्श्यो र्द्धमित्यमि
पुराणात् अर्द्धरात्रे एव रोहिणीयोगस्याशस्त्यान्मुहूर्त्तमपि लभ्येतेत्यादीनां चार्द्धरात्रे योगेष्वुपपत्तेर्न जयंतीव्रतं भिन्नं किंच । रोहिण्यामर्द्धरात्रे चेति वि
ष्णुधर्मोक्तेः । समायोगे तु रोहिण्यां निशीथे राजसत्तम । समजायत गोविंदो बालरूपी चतुर्भुजः । तस्मात्तं पूजयेत्तत्र यथावित्तानुरूपतः इति
वह्निपुराणाच्चार्द्धरात्रस्य कर्मकालत्वमवसीयते । अतः कर्मणो यस्य यः कालः इत्यादिवचनात्सर्वत्रैव प्राप्तेः परदिने सतोपि तो रोहिणीयोगस्य ग्राम
न प्रयोजकता अन्यथा बुधवारादेरपि तत्त्वापत्तेः । किंच । जयंतीशब्दो विविशेषवचनः । अभिजिन्नाम नक्षत्रं जयंती नाम शर्वरी । मुहूर्त्तो विजयो नाम २२९

228A

मपत्रजातो जनार्दनः इति ब्रह्मांडपुराणात् । तेन तद्योगिरोहिणीगौणत्वात्तान्न व्रतभेदः इति दुर्विवाना । इति स्थितं । पञ्च निर्णयसिंधौ रोहिणीयोगस्याहोरा
त्रे मुख्यः । निशीथे मध्यमः । दिवसमात्रे त्वधमः । अहोरात्रे तयोर्योगोऽसंपूर्णोऽपि भवेद्यदि । मुहूर्त्तमप्यहोरात्रे योगश्चेत्तामुपोषयेदिति वसिष्ठसंहितोक्तेरिसु
घुक्तं । तत्तु कौस्तुभे तत्त्वमाधवाचार्योद्धृतवसिष्ठसंहितोक्ताष्टमीरोहिणीयुक्तेति मुख्यत्वबोधकवचनविरोधात् पूर्वोक्तमाधववचनार्थविरोधाच्चेत्सले । तदेवं कर्म
काले निरूपिते दशमासा यावत्स्योपयोगित्वेन वेधो निरूप्यते सवाचनतिथ्यंतरवदष्टम्या दिवाप्रवेशोसत्येव ना किंतु रात्रिमात्रव्याप्तत्वेपि भवत्येव । प्रजाकृष
सप्तमाधानस्याद्रात्रिमात्रव्यापनात् ॥ अहस्सु तिथयः पुण्याः कर्मानुष्ठानतो दिवा । नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते इति वचनात् । अत एवात्रापि अष्ट
मी शिवरात्रिवदर्धरात्राद्वेधो यदि । दृश्यते घटिकापादमात्रं वं विद्धां प्रकीर्तितेति वेधश्चात्र कर्मकाले ष्टमीसद्भावः इदमर्धरात्रात्पूर्वं घटिकासद्भावे च
नेसर्वेष्वष्टमीसाम्यान् रागात् जन्माष्टम्यां तु कलासद्भावोपि पूर्वोक्तविष्णुधर्मोक्तरात् हि वचने पुत्र्यामिति हि प्राप्त रोहिण्यां वेधे निर्णीते संप्रति पूर्वोक्तभेदेषु सर्वसुख्यो
यं । तत्र शुद्धयोः समन्यूनयोर्न विवादः । शुद्धाधिका विद्धाधिका वा यदान्यतरास्मिन्नेव दिने रोहिणीसहिता तत् तस्मै व व्याख्या । जन्माष्टम्यां भवेद्यत्र कलैकापि रो
हिणी नृप । जयंती नाम सा ज्ञेया उपोष्या सा प्रयत्नतः । सप्तजन्मकृतं पापं राजन्यद्विविधं नृणां । तत्क्षालयति गोविंदस्तिथौ तस्यां सुभावित इति व

जय.
२२९
229

न्दुपुराणवचनात्। कृष्णाष्टम्यां कृष्णजन्माष्टम्यां। कालतत्त्वविवेचने। उत्तराहिन एव रोहिणीयोगे निशीथव्यापिनीमपि किंबहुनाष्टमीमपि पूर्वां परित्यज्योत्त
रैव जन्माष्टमीव्रते ग्राह्या। ननु वार्द्धरात्रस्य कर्मकालत्वं तावत्स्थितं। कर्मकालव्याप्तिशास्त्रस्य सर्वापेक्षया बलवत्त्वमुपपादितमेव रोहिणीयोगो ऽप्यमा
शस्त्यात्मकत्वातिशयमात्रं न तु तत्स्वनिर्णायोपयोगिता। नवमीबुधवारादियोगवत्। अन्यथा प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः। यैः कृता श्रावणे मा
सिष्टमी रोहिणीयुता। किं पुनर्बुधवारेण सोमेनापि विशेषतः। किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति पद्मपुराणवचनात्पूर्वेद्युरर्द्धरात्रे वर्त्त
मानां रोहिणीयुक्तामपि त्यक्त्वाष्टमीं विहाय बुधवारादियुक्तापरा कर्त्तव्या स्यादिति। अत्रोच्यते। कर्मकालव्याप्तिशास्त्राद्दैवप्रधानभूतायाश्चाष्टम्या अर्द्धरात्रस
त्तेन प्राशस्त्यं तु अहर्वा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला। रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुतामिति वचनेन रोहिणीयोगाभावविषयत्वेनोपपत्तेरे
वं हि तस्यार्थः। दिवावच्छेदेन रात्र्यवच्छेदेन वा कलामात्रापि चेद्रोहिणी चाष्टम्यां नास्ति तदैव चन्द्रोदयसंयुतामर्द्धरात्रव्यापिनीमितियावत्। प्रकुर्वी
त दिनद्वये पि तादृशाष्टम्यभावे बहुरात्रिसंयुतामुत्तरां प्रकुर्वीतेति। विष्णुरहस्यादिगतं मुहूर्त्तो दिवा दक्षमर्द्धरात्रगतं तत्परमितितत्त्यंताशुद्धांतथान्यवाक्यमपि राम.
वानर्थक्यप्रसंगात्। यदा हि शुद्धाष्टम्यर्द्धरात्रे वर्त्तमाना याहान्तदा रोहिणीसहिताखण्डा गरीयसीति किं वचनेन। मुहूर्त्तमप्यहोरात्र इति वचनेनैव सा सिद्धेः २२९

229A वाहोरात्रसंबंधिपतितं विमुहूर्त्तप्रतीतिः। उदये चाष्टमी किंचिन्नवमी सकला यदि स्यात्सर्वत्र चतुर्थ्योदयप्रतीतिः। तेन रोहिणीरहिता या निशीथव्यापिन्यात्रप
वादेन निर्णायकत्वं रोहिणीयोगे न तु बुधवारादिवाक्यशास्त्रमात्रं हेतुरिति सिद्धियुक्तं। त्रिपुक्त्वा प्रकुर्वीत तामुपावसेदुपोष्या सा प्रयत्नत इत्यादि
षु निर्णायकत्वं सैव प्रतीतेः। बुधवारादियोगवाक्येषु प्राशस्त्यमात्रप्रतीतेरिति। मदनरत्ने। यदा पूर्वेद्युः रोहिणीरहिता निशीथगाष्टमी तिथिः परेद्युः रो
हिणीसहिता निशीथात्परत्र तदा पूर्वैव ग्राह्या। कर्मकालशास्त्रस्य सर्वापेक्षया प्राबल्यस्य सर्वग्रंथसिद्धत्वात्। रोहिणीयोगे तु प्राशस्त्यफलाति
शयमात्रं न तु तस्या निर्णायकोपयोगिता। नवमी बुधवारवती अन्यथा प्रेतयोनिगतानामिति पाद्मवचनात्पूर्वेद्युरर्द्धरात्रे चेन्न वर्त्तमानांशे रोहिणीमप्यष्टमीं
त्यक्त्वा बुधनवमीयुता परैव कार्येत्यापद्यतेति। निर्णयसिंधावपि यदा पूर्वेद्युर्निशीथेऽष्टमी परेद्युरोहिणी तदा परेद्युर्जयंतीयोगस्य सत्वात्परैवेति माध
वः। तदुक्तं तत्रैव। यस्मिन्वर्षे जयंत्याख्येति। एवं विद्धाष्टमी या तु उदये नवमीदिने। मुहूर्त्तमपि संयुक्ता संपूर्णा साष्टमी भवेत्। कला काष्ठा मुहू
र्त्तापि यदा कृष्णाष्टमी तिथिः। नवम्यां सैव ग्राह्या स्यात्सप्तमीसंयुता न हीति पद्मोक्त्या केचित्तु हेमाद्रौ। अष्टम्याः आद्यामात्रसाम्ये पूर्वेद्युः कर्मकालव्या
पितास्तु पूर्वैव। प्राग्रंथ्रपूर्वेद्युः निशीथेऽष्टम्यभावे ज्ञेयं त्वंतर्भावोक्तिस्तु मरुर्वदंशग्रणमात्रमिति आहुः। तन्न तु अष्टम्याः कर्मकालव्याप्तिर्वाचायाहि वि

ज०प०
२३०
230

तिवाक्ये रोहिणीयुतायां यास्वतोक्तेर्वचनात्कर्मकालव्यापिनीं त्यक्त्वा पूर्वा परा वा सापि रोहिणीयुता ग्राह्येति वस्तुतस्तु । उपवासद्वयं कार्यं द्वयोर्निस
त्वादिति स्थितं । शुद्धाधिका यदा पूर्वस्मिन्दिने निशीथे रोहिणीयुक्ता उत्तरदिने पि तद्युक्ता तदा पूर्वैव ग्राह्या ॥ रोहिण्यामर्द्धरात्रे च यदा कृष्णाष्ट
मी भवेत् । सोपवासो हरेः पूजां कृत्वा तत्र न सीदतीति विष्णुधर्मोक्तवचनात् । यदा तु शुद्धाधिका यां दिनद्वयस्यार्द्धरात्रं विहाय रोहिणीयोगस्तदापि पू
र्वैव ग्राह्या । रोहिण्यामर्द्धरात्रे च यदा कृष्णाष्टमी भवेत् । सोपवासो हरेः पूजां कृत्वा तत्र न सीदतीति विष्णुधर्मोक्तवचनात् । यदा तु शुद्धाधिका यां दिन
द्वयस्यार्द्धरात्रं विहाय रोहिणीयोगस्तदापि पूर्वैव ग्राह्या । तस्याः सर्वाहोरात्रव्यापित्वान्मध्यमातिक्रमे कारणाभावाच्च । यदा तु शुद्धाधिका दिनद्वये
पि रोहिणीरहिता तदाप्यहोरात्रव्यापित्वात्पूर्वैव ग्राह्या । दिवा वेति वचनाच्च । विद्धाधिका तु यदा पूर्वस्मिन्नेव दिने निशीथे रोहिणीयुक्ता । दिनां
तरे तु निशीथं विहाय रोहिणीयुक्ता तदा पूर्वैव ग्राह्या । सप्तमीसंयुताष्टम्यां निशीथे रोहिणी यदि भविता साष्टमी पुण्या यावच्चंद्रदिवाकराविति वह्नि
पुराणवचनात् । पद्मपुराणेपि । कार्या विद्धापि सप्तम्या रोहिणीसहिताष्टमी । तत्रोपवासं कुर्वीत तिथिभान्ते च पारणामिति । आदित्यपुराणे । विनार्क्षराम·
हं न कर्त्तव्या नवमीसंयुताष्टमी । कार्या विद्धापि सप्तम्या रोहिणीसहिताष्टमी । तत्रोपवासं कुर्वीत तिथिभान्ते च पारणामिति विष्णुधर्मोक्ते २३०

230A
ये जयंतीशिवरात्रिश्चकार्यैं भद्रा जयान्विते। कृतो यवासेति य्यंते तथा कुर्यात्तु पारणामिति। जन्माष्टमी जयंती वा शिवरात्रिस्तथैव च। पूर्वविद्धैव क
र्त्तव्या तिथिभांते च पारणामिति जयंत्यां पूर्वविद्धायामुपवासं समाचरेदिति गारुडे च। यदा तु विद्धाधिको न तस्मिन्नेव दिने निशीथे रोहिणीयु
हिता पूर्वदिने तु निशीथे विहाय रोहिणीसहिता तदोत्तरैव ग्राह्या। मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्द्धरात्रके। शशांके वृषराशिस्थे ऋक्षे प्राजापत्यसं
संयुते। उपोषितोऽर्चयेद्विष्णुं यशोदां देवकीं तथेति भविष्योत्तरवाक्यात्। यदा तु विद्धाधिकादिनद्वये प्यर्द्धरात्रे रोहिणीयुक्तादिनद्वयेप्यर्द्धरात्रे वि
हाय रोहिणीसहिता वा तदोत्तरैव ग्राह्या। अविद्धायां तु सर्क्षायां जातो देवकिनंदन इति वचनात्॥ वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी। सऋ
क्षापि न कर्त्तव्या सप्तमीसंयुताष्टमीति ब्रह्मवैवर्त्तवचनाच्च। हेमाद्रौ पाद्मे। यदार्द्धरात्रादूर्ध्वं कलामात्राप्यतिक्रम्याष्टमी प्रवृत्ता रोहिणी वा द्वितीयेऽह्नि मुहू
र्त्ते द्वे मुहूर्त्ते वा तदा द्वितीयैव ग्राह्या तथा च स्कंदपुराणे। सप्तमीसंयुताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम। प्राजापत्यं द्वितीयेऽह्नि मुहूर्त्तार्द्धं भवेद्यदि तदाष्ट
यामिकं तं पयोक्तं यामादिभिः स्वरेति। पाद्मेपि। मुहूर्त्ते नापि संयुक्ता संपूर्णाष्टमी भवेत्। किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति। तत्रैव
पूर्वविद्धाष्टमी यातु उदये नवमीदिने। मुहूर्त्तमपि संयुक्ता संपूर्णा साष्टमी भवेत्। कलाकाष्ठामुहूर्त्तापि यदा कृष्णाष्टमी तिथिः॥ नवम्यां सैव ग्रा

जय॰
२३१
231

स्यास्यात्सप्तमीसंयुता न हीति यदा तु स्याद्वाविंशिकाया। विद्धाविंशिकायां वा द्वितीयदिने एव रोहिणीयोगः तदा प्राजापत्यर्क्षसंयुक्तेति विष्णुरहस्यवचनादुत्त
रसाध्याप्येतत्प्राप्नुयुक्तं। तस्यापवादबुधवारादियोगे प्राशस्त्यातिशयोपि पूर्वोक्ते प्रेतयोनिगतानामिति ब्रह्मपुराणोप्रदर्शितः। निर्णयामृतेपि। यदा स्यात्स
पिसूर्योदये चाष्टमी सा चरोहिणीयुक्ता उपरिसकलानवमीबुधवारेण सोमवारेणवा युता भवति। तदा संपूर्णा मध्य इष्टमीपरिसमाप्तेः वत्सलाभ्युपो
षा तद्युक्तं ब्रह्मपुराणे। उदये चाष्टमी किंचित्सकला नवमी यदि। भवेद्बुधेन संयुक्ता प्राजापत्यर्क्षसंयुता। अपि वर्षशतेनापि लभ्यते वा न वा विभो इति। य
त्तु मयूरते। सोमे नेत्यत्र युक्तं तु वंशोद्भययुतेत्युक्तं। तन्मध्यं तु बुधवारमात्रनिधानात्सोमवारस्यग्रहणोपलक्षणाभावे मदनरत्ननिर्णयामृतादिषु सोमपदे
न सोमवारस्यग्रहणाद्वा। नृसिंहपरिचर्यायामपि। सोमपदस्य सोमवारपरत्वमुक्तं निर्णयसिंधौ तु उदये स्याहिवचनं द्वानादिविषयं उपवासाद्यग्रहणाद्दित्यर्थं
तत्र दः। जयंतीपारणमिति हेमाद्रिः। उदये चेव श्रो दय इति गौडास्तु नवमीक्षयपरमिदं वचनं नवमी सकलाप द्वीतिमविष्योक्तेः। एवं तत्सूर्वोदिने जयंतीस
मात्र पारणमित्याहुः। जयत्याहि सर्वोपवादोपमिस्या वार्यं बुधमणापादयः। वयं तु सत्यं बतमेदः। जन्माष्टम्युपवासः पूर्वेद्युरेव। जयंतीव्रतं तु तात्पर्युव्या राम॰
सद्वयं कार्यमित्यपि स्थितं यात्तु विद्धाविंशिकादिनद्वये पि रोहिणीयोगरहितासा च तद्विधा। पूर्वस्मिन्नेव दिने निशीथे वर्त्तमाना उत्तरस्मिन्नेव दिने नि २३१

231A

शीर्षे वर्त्तमानादिनद्वये निशीथे वर्त्तमानादिनद्वयेपि तत्र वर्त्तमाना वेति। तत्राघपोःपक्षयोर्योनिशीथव्यापिनी सैव ग्राह्या॥ हिमाद्रिपरिहास्त्रावितिवचना

त्। तत्रापि च तुर्थ्योर्द्धसप्तत्रैव ग्राह्या। बहुतासंकल्पादिकर्मकालव्यापितात्। वर्ज्जनीयाप्रयत्नेन सप्तमीसंयुताष्टमीत्यादिवचनैः सप्तमीसहिताया अ

ष्टम्या निषेधाच्चेति दिक्। तं विस्तरेण। अथ नृसिंहपरिचर्यामतं लिख्यते। सूर्योदयाद्वपरि पलमात्रेण यत्राष्टमी निर्गमे सप्त्यां समस्त्यां वा रोहिणीपि द्वितीय

दिने स्वल्पा जन्माष्टमीव्रतं कर्त्तव्यं उदये वाष्टमी किंचिदितिवचनात् प्रेतयोनिगता नामित्यादिवचनाच्च। सप्तमीविद्धा तु सर्वथा त्याज्यैव जन्माष्टमीए

वं विद्धं सकृद्वांसकलामपि। विहाय नवमीशुद्धामुपोष्य व्रतमाचरेत्। शुद्धा कस्यही नां। पलवेधेतुविप्रेंद्र सप्तम्या चाष्टमीं त्यजेत्। सुरायाविंदुनास्पृ

ष्टं गंगांभः कलशं यथेति। वर्जनीया प्रयत्नेत्यादि पूर्वोक्तस्कांदवचनाच्च। अष्टम्यानिर्गमे तु सप्तमीविद्धाप्युपोष्या। एकादश्यान्निर्गमेपि दशमीवि

द्धा परित्यागेन शुद्धाद्वादश्युपवासविधानवत् शुद्धनवम्युपवासविधानाभावात्। रोहिणीयोगस्तु बुधसोमवारादियोगवल्लाभसत्यातिरेकसदीनोपवा

सप्रयोजकः तथात्वे तदभावे व्रतलोपप्रसंगात्। कालनिर्णयकारास्तु अर्द्धरात्रे रोहिणीयुताष्टमीयोगे तु अभयार्द्धरात्रे रोहिण्यष्टमीयोगाभावे तु नार्द्धरात्र

ए वरोहिण्यष्टमीयोगे पूर्वार्द्धरात्रे रोहिणीमात्रयोगे वोत्तरैवोपोष्या। अन्यदा पूर्वा। दिनद्वये कृत्स्नामावेष्टैवेति च समस्यापायिषः तु द्वयेवेत्परा दिनद्वयेप

जय.
२३२
232

द्वात्रयोदशिपष्ठमीयोगपरत्वं वर्णयां बभूवुः। तत्र च षष्ठीयोगातिरिक्तसप्तम्यादियोगस्योपवासविधानापादेश्यविशेषणातयाविद्धितत्वेहविहम
युक्तत्वदहापातितोभाक्याभेदस्य परिहारो हिसिद्धहस्याशिष्यैरन्वेष्यः। स्मृतिकौस्तुभे तु। पूर्वेद्युर्दिने सप्तमीवेधे तु निशीथव्यापिमात्राष्टम्याहत्वापवादो
वैष्णवविषयः यथोक्तं ज्योतिर्निबंधे पाद्मे सर्वथा सप्तमीयुक्तां संत्याज्यां सर्वैर्वैष्णवैः उपोषणं नवमीयुक्तां तदुक्तं ब्रह्मवैवर्ते। वर्जनीया प्रयत्नेन
सप्तमीसंयुताष्टमी सऋक्षापि न कर्तव्या सप्तमीसहिताष्टमीतित्यादि तद्दलमतिप्रसंगेन इति जन्माष्टमीजयंतीनिर्णयः। अत्र कृत्यविशेषः ततोऽष्ट
मांतिलैः स्नातो नद्यादौ विमले जले इत्यादि वक्ष्यमाणाभविष्योक्तेतिहासेन्वेष्टव्यः॥ अथ प्रयोगः तत्र कर्ता उपवासपूर्वदिने लघुभुक् रात्रौ जितें
द्रियः सुप्त्वा उपवासदिने प्रातः स्नानादिनित्यकृत्यं विधाय॥ सूर्यः सोमो यमः कालः संध्ये भूतान्यहः क्षपा पवनो दिक्पतिर्भूमिराकाशं खचरामराः
ब्रह्मं शासनमास्थाय कल्पध्वमिह संनिधिमित्युक्त्वा सूर्यादिदेवताभ्यो नमस्कृत्य। आचम्य प्राणानायम्य प्राङ्मुखउदङ्मुखो वा दर्भहस्तः फल
पुष्पाक्षतवारियुतं ताम्रादिपात्रं दक्षिणहस्ते नादाय मासपक्षवारनक्षत्राद्युल्लिख्य अमुकफलकामः पापक्षयकामो श्रीकृष्णप्रीतये जन्माष्टमी
व्रतमहं करिष्ये। तथा। वासुदेवं समुद्दिश्य सर्वपापप्रशांतये। उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहं। अद्य कृष्णाष्टमीदेवीं नभश्चंद्रसरोहिणीं

वा राम.
२३२

232A

।अर्चयित्वोपवासेन मोक्षेहं यत्परे हरि। एन सोमो मोक्षकामोस्मि यज्ञाविंदविघो निर्जितं ते मुंबतउमां त्राहि पतितं शोकसागरे। आजन्ममरणं तावद्यन्मया दुष्कृतं
कृतं तत्प्रणाशय गोविंद प्रसीद परमेश्वरेति पठित्वा जलमुत्सृजेत्। नसिंह परिवर्षापानं। अद्य स्थितो निराहारः श्वोभूते परमेश्वर। भोक्ष्यामि पुंडरी
काक्ष अस्मिन्जन्माष्टमीव्रत इति संकल्प वाक्यं पठित्वा। सप्तम्यां वा एकभक्तानंतरं संकल्पं कुर्यादिति वोक्तेः। ततो मध्याह्ने कृष्णतिलैः स्नात्वा देव
क्याः सूतिकागृहादिकं कुर्यात्। तद्यथा। सुपलिप्ते सुदेशे कदलीस्तंभनानावर्णवासःशोभितं समंतात्स्यापि तैराम्रपल्लवादिषु तैर्जलपूर्णैर्नवकलशै
र्दीपावलिभिः पुष्पमालाभिर्युतं चंदनागुरुधूपितं अग्निखड्गखड्गसच्छागरक्षामणिद्वारन्यस्तमुसलादिषु तं गीतवादित्रनृत्यादिमंगलोपेतं षष्ठ्या देव्या
विष्ठितं देवक्याः सूतिकागृहं विधाय तत्स्वसमं ताष्टितिषु हुडुकस्त्रमांजलीन्देवगांधर्वादीन् खड्गचर्मधरवसुदेवं देवकीं गर्गं गोपीगोपान्कंसनियुक्तान्
गोपेत्नुकुं जायान्यमुनां तदुद्र्दस्य कालियं अन्यच्च सकलं तत्कालीनं गोकुलचरितं यथासंभवं लिखित्वा सूतिकागृहमध्ये मंचकं स्थापयित्वा तदुप
रि सर्वतोभद्रमंडलोपरि कलशे सिंहासने वा हैमीं राजतीं ताम्रीं पैत्तलीं मृण्मयीं वार्क्षीं मणिमयीं लेख्यरूपां वा संभवंतीं श्रीकृष्णप्रतिमां देवकीस्तनं धयंतीं
मष्टमां देवक्याश्च गौरीस्वाहपंतीलक्ष्मीप्रतिमां प्रसूतां देवकीप्रतिमां च संस्थापयेत्। तत्रैव चक्रवित्य देशे सकन्यकां यशोदां रोहिणीं वसुदेवं नंद

वल्लभ इं गोपीः गोपांश्च उपकल्प्य देवकीसमीपे वृद्धहस्तं कंसं दृष्ट्वा नाराक्षसादींश्चावस्थापयेत्। तत्र प्रतिमायाः अग्न्युत्तारणं कृत्वा देशकालाद्यनुस्मृ-
त्य सपरिवारश्रीकृष्णपूजां करिष्य इति संकल्प्य हस्ते पुष्पांजलिं गृहीत्वा गायद्भिरिति मंत्रपुरःसरं देवक्यां क्षिपेत्। सवगायद्भिः किंनराद्यैः सततपरिवृ-
ता वेणुवीणाविनादैः भृंगारादर्शकुंभप्रवरकृतकरैः किन्नरैः सेव्यमाना। पर्यंके स्वास्तृते या मुदिततरमुखी पुत्रिणी सम्यगास्ते सा देवी देवमाता जयति सु-
वदना देवकी दिव्यरूपेति। विश्वेश्वराय देवाय तथा विश्वंभराय च। विश्वस्य पतये तुभ्यं गोविंदाय नमो नमः इति। श्रीकृष्णाय पुष्पांजलिं दद्यात्। श्री-
कृष्णाविर्भावं परिभाव्य। तमद्भुतं बालकमंबुजेक्षणं चतुर्भुजं शंखगदाद्युदायुधं। श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीतांबरं सांद्रपयोदसौभगं। म-
हार्हवैदूर्यकिरीटकुंडलत्विषा परिष्वक्तसहस्रकुंतलं। उद्दामकांच्यंगदकंकणादिभिर्विरोचमानं वसुदेव ऐक्षत॥ स विस्मयोत्फुल्लविलोचनो
हरिं सुतं विलोक्यानकदुंदुभिस्तदा। कृष्णावतारोत्सवसंभ्रमोऽस्पृशन्मुदा द्विजेभ्योऽयुतमाप्लुतो गवां। अथैनमस्तौदवधार्य पूरुषं परं नतांगः कृ-
तधीः कृतांजलिरिति जन्मश्लोकान्पठेत्। ततः श्रीकृष्णमंत्रन्यासान्विदध्यात्। ते यथा। शिरसि नारदऋषये नमः। मुखे गायत्रीछंदसे नमः। हृ- राम॰
दि श्रीकृष्णाय देवतायै नमः। क्लीं बीजाय गुह्ये नमः। नमः शक्तये इति पादयोः। ततः करांगन्यासौ। क्लां अंगुष्ठाभ्यां नमः। क्लीं तर्जनीभ्यां नमः। क्लूं २३३

233A

मध्यमाभ्यां वषट्। क्लैं अनामिकाभ्यां हुं। क्लौं कनिष्ठिकाभ्यां वौषट्। क्लः करतलकरपृष्ठाभ्यां फट्। एवं क्लां हृदयाय नमः इत्यादि। ततो मुद्रादिकं प्रदर्श्य।
अथ ध्यानं। कोशलीलां वृजजनविरहक्षामां मोहनेत्रां वृजस्योना लोलजंघा कदीरस्थल कलितरणत्किंकिणी कोमुकुंदः। दोर्भ्यां हेययं गवीनं दधति ववि
मलं पापमंतं विमृष्य वं घोगोपी गोपालवीतोरुणा नखविलसत्कौस्तुभ षाष्ठि रंवः॥ इति हृदि ध्यात्वा पूजनं कुर्यात्। प्रतिमापूजने च सर्वत्र प्राणप्रति
ष्ठापूर्वकं कर्त्तव्यं। प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा हस्तेन पाणिना प्राणप्रतिष्ठां कुर्वीत तत्स्यादेवस्य वाहरेः। अकृतायां प्रतिष्ठायां प्राणानां प्रति
मास्तु वा यथा पूर्वं तथा भावः स्वर्णादीनां न देवता। अन्येषामपि देवानां प्रतिमास्वपि पार्थिव। प्राणप्रतिष्ठा कर्त्तव्या तस्यां देवत्वसिद्धये वासुदे
वस्य बीजेन तद्विष्णोरित्यनेन वा। तथैव हृदये पुष्पं दत्वा शम्भुर्मंत्रवित्। एभिर्मंत्रैः प्रतिष्ठां तु हृदमेपि समाचरेत्। अस्मै प्राणाः प्रतिष्ठंतु अ
स्मै प्राणाः क्षरंतु च। अस्मै देवत्वसंख्यायै स्वाहेति यजुरीरयन्। अंगमंत्रै रंगिमंत्रैर्वैदिकैरिसनेन वा। प्राणप्रतिष्ठा सर्वत्र प्रतिमासु समर्चये दि
ति कालिकापुराणात्। बीजेन मूलमंत्रेण। इदं च प्रकृतविष्णुविषयेण। यदा तु हृदये पूजा क्रियते तदा हृदये पुष्पं दत्वा मंत्राः पठनीयाः प्र
तिमायां तु कपोलौ हृदयं वा स्पृष्ट्वेति विशेषः। वैदिकमूलमंत्राभावे प्रणवादिचतुर्थ्यंतनमोंतनामानि इत्यनेन संगृहीतानि अस्मै इत्यस्य स्था

जयः
२३५
234

नेतत्तद्देवतानामयुक्तमस्मादृक्षादि स्वाहांतंमंत्रं पठन्प्राणप्रतिष्ठां कुर्यात्। ततो गंधाद्भिरित्यनेन देवकीं मां वापि बालकं स्तनं पर्यंके स्तनपायिनं
।श्रीवत्सवक्षसं शांतं नीलोत्पलदलछविमिति श्रीकृष्णं वसुप्रतिमायां ध्यात्वा। ॐ नमो देव्यै श्रियै इति श्रियं च संपूजयेत्। प्रणवादिनम
स्यांतं पृथक्नामानु कीर्त्तयन्। ॐ योस्मज्जातिविद्विजश्चस वैपापायपत्नुजन्मे। देवकी वसुदेवाय पवा सुदेवाय वै वाहि। बलदेवाय नंदाय यशोदायै पृथक्पृ
थक्।। इति नमो देव्यै श्रियै इति च भविष्योत्तरस्वनात्। एवं नंदयशोदाबलभद्रचंडिकादीन् षोडशोपचारैः प्रत्येकं तंत्रेण वा पूजयेत्। भविष्योत्त
रे तु केषुचिद्द्वयवारेषु विशेषमंत्राश्च प्रयुक्ताः तत्र स्नानमंत्रः। योगेश्वराय देवाय योगानां पतये विभो। योगोद्भवाय नित्याय गोविंदाय नमो नम इति
।नृसिंहपरिचर्यायां तु योगेश्वराय देवाय देवकीसहिताय च। योगोद्भवाय नित्याय गोविंदाय नमो नम इति क्षीरस्नपने। गात्रे तु। योगाय योगेश्वराय
योगपतये योगसंभवाय गोविंदाय नमो नमइति शुद्धोदकस्नपने यज्ञेश्वराय देवाय तथा यज्ञोद्भवाय वा यज्ञानां पतये नाथ गोविंदाय नमो न
मइति धूपादौ। अथ नैवेद्यमंत्रः। विश्वेश्वराय विश्वाय तथा विश्वोद्भवाय च। विश्वस्य पतये तुभ्यं गोविंदाय नमो नमइति। फलतांबूलदक्षि
णादि सर्वं दत्वा देवक्यै अर्घं दद्यात्। प्रणमेद्देवजननीं त्वया जातस्तु वामनः। वसुदेवात्तथा कृष्णो नमस्तुभ्यं नमो नमः। सपुत्रार्घ्यं प्रदत्तं मे

रामः
२३५

234A गृहाणेमं नमोस्तु त इति ततः श्रीकृष्णायार्घ्यं दद्यात्॥ तत्र मंत्रो गारुडे। यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसंभवाय गोविंदाय नमो नम इति नृसिंहपरि
त्राणाय॥ जातः कंसवधार्थाय भूभारोत्तारणाय च। देवतानां हितार्थाय धर्मसंस्थापनाय च॥ कौरवाणां विनाशाय दैत्यानां निधनाय च। गृहाणा
र्घ्यं मया दत्तं देवक्या सहितोऽनघेति। ततो देवकीप्रार्थना। देवकि त्वं नमस्तुभ्यं कृष्णोत्साह नतत्परे। पापक्षयकरी देवि त्वं षिंया त्वं मया र्चिता। अदिते
देवमातस्त्वं सर्वपापप्रणाशिनि। अतस्त्वं पूजिता देवी भीतोहं भवसागरात्। पूजितासि च यद्देवैः प्रसन्ना त्वं वरानने। पूजिता त्वं मया मत्कृपा प्रसादं कु
रुष्व मे। यथा पुत्रं हरिं लब्ध्वा जाता ते निर्वृतिः परा॥ तामेव निर्वृतिं देहि सुपुत्रान् दर्शयस्व मे इति। अथ श्रीकृष्णप्रार्थना॥ अवतारसहस्राणि
करोषि मधुसूदन। न ते संख्यावताराणां कश्चिज्जानाति वै भुवि। देवा ब्रह्मादयो वापि स्वरूपं न विदुस्तव। अतस्त्वां पूजयिष्यामि मातुरुत्संगसं
स्थितं॥ वांछितं कुरु मे देव दुःकृतं वै विनाशनाय। कुरुष्व मे दयां देव संसारार्तिभयापहेति। ततः श्रीकृष्णाय पुष्पांजलिं दद्यात्। गारुडे। धर्माय धर्
मेश्वराय धर्मपतये धर्मसंभवाय गोविंदाय नमो नम इति स्वाहांतो घृताक्ततिलहोमे मंत्र उपात्तः॥ ततो गव्यघृतेन वसोर्धारा कार्या। कविहुड घृतेन
सुकृतेति ततो जातकर्म नालछेदनं षष्ठीपूजनं नामकर्म च संक्षेपेण कार्यं। तत्रादौ जातकर्मप्रयोगः। मामपक्षाघुलिख्य अस्य कुमारस्य बीजगर्भ

ज॰प॰
२३५
235

समुद्भवे नो निबर्हणाद्वा गर्भांबुजनितदोषपरिहारार्थं मे ममायुर्वेदभ्यर्थं जातकर्माहं करिष्ये । तत्र निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मा
तृकापूजनं वसोर्धारां नांदीश्राद्धं च करिष्ये इति संकल्प्य । गणानां त्वेति पंचोपचारैः गणेशं पूजयेत् । ततः पुण्याहं कल्याणं ऋद्धिं स्वस्ति श्रीः पुनंतु मां
। पयेमां॰ स्वस्त्यस्तु ऋद्धिरस्तु स्वस्ति नः श्रीश्च ते॰ इति पुण्याहवाचनं ॥ अथ मातृकापूजनं ॥ गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा
मातरो लोकमातरः । धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवताः ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही च तथेंद्राणी चामुंडाः सप्तमा
तर इति । वसोः पवित्रमसि इति घृतधाराः पंच सप्त वा कुड्ये कृत्वा संपूजयेत् ॥ ततः आयुष्यसूक्तजपः । आयुष्यं वर्चस्यं रायस्पोषमौद्भिदं । इदं हिरण्यं
वर्चस्वज्जैत्रायाविशतादिमां । न तद्रक्षांसि न पिशाचास्तरंति देवानामोजः प्रथमजं ह्येतत् । यो बिभर्ति दाक्षायणं हिरण्यं स देवेषु कृणुते दी
र्घमायुः ॥ इति मातृकापूजनं । अथ नांदीश्राद्धं । सत्यवसुसंज्ञिका विश्वेदेवाः नांदीमुखाः भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृ
द्धिः । गोत्राः नांदीमुखाः मातृपितामहीप्रपितामह्यः इदं वः पाद्यं॰ पाद्य॰ । पितृपितामहप्रपितामहाः नांदीमुखाः । भूर्भुवः स्वः इदं॰ पाद्यं पाद्यादा॰ द्वितीयगो गम॰
त्राः । वृद्धमातामहप्रमातामहवृद्धप्रमातामहाः भूः इदं॰ पाद्यानेत्रस्पर्शः ॥ मासपक्षाद्युल्लिख्य अस्मिन्कर्मणि सांकल्पेन विधिना नांदीश्राद्धमहं २३५

235A

कमिषे। सत्यवसुसंज्ञिकानां विश्वेषां देवानां भूर्भुवःस्वः इमे श्राद्धसने वोनमो नमः। नांदीश्राद्धे क्षणौ क्रियेतां। तथा प्राप्नुतां भवंतौ प्राप्नुवाव। गोत्राणां मातृ
पितामहीप्रपितामहीनां इमे नां। गोत्राणां पितृपितामहप्रपितामहानां नांदी इमे नांदीश्राद्धे तथा प्राप्नु। द्वितीयगोत्राणां मातामहप्रमातामहवृद्ध
प्रमातामहानां इमे नांदीश्राद्धे तथा अत्राः पाद्यं गंधाः पांतु अक्षताः पांतु पुष्पाणि पांतु। सत्यवसुसंज्ञिकेभ्यो विश्वेभ्यो देवेभ्यो वः गंधाद्यर्चनं स्वा
हा संपद्य वृद्धिः। गोत्राभ्यः मातृपितामहीप्रपितामहीभ्यो नांदीमुखीभ्यो वः इदं पुनः गंधादि हस्ता गोत्रेभ्यः पितृपितामहप्रपितामहेभ्यः नांदीमुखे
भ्यः वः। द्वितीयगोत्रेभ्यः मातामहप्रमातामहवृद्धप्रमातामहेभ्यः वः गंधादा। सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यः दास्यमानं त्रात्वपायुग्मभो
जनपर्याप्तमन्नममृतरूपेण स्वाहा संपद्यतां वृद्धिः। गोत्राभ्यो मातृपितामहीप्रपितामहीभ्यो नांदीमुखीभ्यः दास्यमानब्राह्मणाभो वृद्धिः। द्वितीय
गोत्रेभ्यः मातामहप्रमातामहवृद्धमातामहेभ्यः दास्य वृद्धिः। सत्यवसुसंज्ञका विश्वेदेवाः प्रीयंतां। गोत्राः नांदीमुख्यो मातृपितामहीप्रपिता
मह्यः प्रीयंतां। गोत्राः नांदीमुखाः पितरः प्रीयंतां। द्वितीयगोत्राः नांदीमुखाः मातामहाः प्रीयंतां। सत्यवसुसंज्ञिकेभ्यो विश्वेभ्यो देवेभ्यो नांदी
मुखेभ्यः कृतैतन्नांदीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयणीं दक्षिणां दातुमहमुत्सृजे। गोत्राभ्यो मातृपितामहीप्रपिता

जय·
२३६
236

महोभ्यो नांदीश्राद्धम· दातुमहमुतत्र्जे। गोत्रेभ्यः पितृपितामहप्रपितामहेभ्यः कृतेतन्नांदी· दातुमुतत्र्जे· द्वितीयगोत्रेभ्यो मातामहप्रमातामह
हवृद्धप्रमातामहेभ्यः कृतैतं नांदीश्राद्धं· दातुमहमुतत्र्जे। उपास्मै गायता नरः पवमानायेंदवे· अभि देवां इयक्षते॥ नांदीश्राद्धं संपन्नं सुसंप
न्नंजनेन नांदीश्राद्धेन कर्मांगदेवताः प्रीयतांवृद्धिः। अनामिकपास्तुवर्णानि हिंतापामसुधत्ते प्राशयेत। भूः त्वे दधामि। भुवः त्वे दधामि स्वस्त्वे
दधामि। भूर्भुवः स्वस्त्वे दधामि अथास्यायुष्यं करोति। नाभ्यां वा दक्षिणे कर्णे वा जपति। अग्निरायुष्मान्स वनस्पतिभिरायुष्मान्तेनत्वायुषायुष्मं
तं करोमि। सोम आयुष्मान्स ओषधिभिरायुष्मान्तेनत्वायुषायुष्मंतं करोमि। ब्रह्मा आयुष्मान्तद्ब्राह्मणैरायुष्मन्तेनत्वा· ऋषय आयुष्मंतस्ते व्रतैरा
युष्मंतः। तेनत्वा· देवा आयुष्मंतस्ते अमृतेनायुष्मंतः। तेनत्वा· यज्ञ आयुष्मान्। तेनत्वा पितर आयुष्मंतस्ते स्वधाभिरायुष्मंतः तेन·। समुद्र आयुष्मान्स
स्रवंतीभिरायुष्मान्तेन·। इति त्रिभिः। त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं यद्देवानां त्र्यायुषं॥ तन्मे अस्तु त्र्यायुषं इति च·। स यस्मिन्देशे जातो
भवति तमभिमंत्रयते वेद ते भूमि हृदयं दिवि चंद्रमसि श्रितं। वेदाहं तन्मां तद्विद्यात पश्येम शरदः शतं जीवेम शरदः शतं। शृणुयाम शरदः शतम·
शतमिति। अथैनमभिमृशति। अश्मा भव परशुर्भव हिरण्यमस्तुतं भव। आत्मा वै पुत्र नामासि सजीव शरदः शतमिति॥ ततः नालछेदनं २३६

236A

षष्ठीपूजनं वक्तव्या । मासपक्षादुल्लिखकुमारस्य वीजगर्भसमुद्भवएनोनिवर्हणाद्वाराय वहारासिध्यर्थं नामकर्माहं करिष्ये । तत्र पूर्ववद्गणेशपूजनादि
नांदीश्राद्धं तं विधाय नामकरणाग्गभूतां वृद्धीनश्राद्धमाणा न्भोज पित्वाघ्वस्तांवत्वक्षरं वाघोषवदाद्यंतरं तस्यंदीर्घामिनिष्ठांतं तत्कुर्यात । नामकर्म
करणानंतरं दशमस्याकान्वलाह्मणान्भोजयेत । संस्कारेषु द्वेवत्वदुरतिवचनात् ।: इति कातीयानां जातकर्म । नामकर्म च ततः प्रतिमाद्दौ मंडले वा सोमाय
सोमेश्वराय सोमपतये सोमसंभवाय सोमाय नमो नम इति गारुडोक्तमंत्रेण चंद्रं संपूज्य । शंखेतोयं समादाय सपुष्पकुशचंदनं जानुभ्यामवनिं गत्वा चंद्रा
य अर्घ्यं निवेदयेत । क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव । गृहाणार्घ्यं शशांकेमं रोहिण्या सहितो मम । ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषां पते । नमस्ते रोहिणी
कांत अर्घ्यं मे प्रतिगृह्यतामिति मंत्राभ्यां । ततो ज्योत्स्नापाः पतये तुभ्यं ज्योतिषां पतये नमः । नमस्ते रोहिणी कांत सुधावास नमोस्तुते । नमो मंडलदीपाय
शिरोरत्नाय धूर्जटेः । कलाभिर्वर्धमानाय नमश्चंद्राय चारवे इति मंत्राभ्यां प्रणामेत । ततः भगवत्स्तुतिं कुर्यात । अनघं वामनं शौरिं वैकुंठं पुरुषोत्त
मं । वासुदेवं हृषीकेशं माधवं मधुसूदनं । वाराहं पुंडरीकाक्षं नृसिंहं दैत्यसूदनं । दामोदरं पद्मनाभं केशवं गरुडध्वजं । गोविंदमच्युतं कृष्णमनंतमप
राजितं । अधोक्षजं जगद्बीजं सर्गस्थित्यंतकारिणां । अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमं । नारायणं चतुर्बाहुं शंखचक्रगदाधरं ॥ पीतांब

जय· २३७ 237

शंखं नित्यं वनमालाविभूषितं। श्रीवत्सांकं जगत्सेतुं श्रीकंठसंश्रीवं हरिं प्रपद्येहं सदा देवं सर्वकामप्रसिद्धये। प्रणमामि सदा देवं वासुदेवं जगत्पतिमि

ति। त्राहि मां सर्वलोकेश हरे संसारसागरात्॥ त्राहि मां सर्वपापघ्न दुःखशोकार्णवात्प्रभो। सर्वलोकेश्वर त्राहि पतितं मां भवार्णवे। देवकीनंदन श्रीश

हरे संसारसागरात्। त्राहि मां सर्वदुःखघ्न रोगशोकार्णवाद्धरे। दुर्गतांस्त्रायसे विष्णो ये स्मरंति सकृत्सकृत्॥ सोहं देवातिदुर्वृत्तस्त्राहि मां शोकसागा

रात्। पुष्कराक्ष निमग्नोहं मायाविज्ञानसागरे। त्राहि मां देवदेवेश त्वत्तो नान्योस्ति रक्षिता। यद्बाल्ये यच्च कौमारे यौवने यच्च वार्द्धके। तत्पुण्यं वृद्धिमा

प्नोति पापं हन हलायुधेति मंत्रैः प्रार्थयेत। ततः स्तोत्रपुराणपठनादिभिः रात्रिशेषमतिवाह्य परदिने प्रातः स्नानादि नित्यकर्म विधाय पुनः सपरि

वारं श्रीकृष्णं यथासंभवं संपूज्य चंडिकायां च यथाविभवं महोत्सवं कृत्वा यथाशक्ति ब्राह्मणान्भोजयित्वा तेभ्यः सुवर्णं मेदिनीं धेनुं वस्त्रादि यद्य

दिष्टं तत्तत्सर्वं मे प्रीयतामिति दत्वा यं देवं देवकी देवी वसुदेवादजीजनत्। भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः। सुजन्म वासुदेवाय गोब्रा

ह्मणहिताय च। शांतिरस्तु शिवं चास्त्विस्युक्त्वा प्रतिमां सुद्रासतां ब्राह्मणाय दत्वा ब्राह्मणान्विसर्ज्य इष्टैः सह स्वयं पारणां कुर्यादिति गारुडे। तत्र। सर्वा राम·

य सर्वेश्वराय सर्वपतये सर्वसंभवाय गोविंदाय नमो नम इति पारणारंभमंत्रः। भूताय भूतपतये भूतेश्वराय भूतसंभवाय गोविंदाय नम इति समापनेमंत्रः २३७

237A

उक्तः। इदं च प्रतिमासं कृष्णाष्टम्यामप्युक्तं मदनरत्ने वह्निपुराणे। प्रतिमासं व्रतेनेज्यामष्टम्यां यः करिष्यति। मम वै शाखिलान्कामान्स संप्राप्स्यत्यसंश
यमिति। अथ पारणानिर्णयः। पारणमुपवासपरदिने पूर्वाह्णे कर्तव्यं। उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेत्। इति देवलस्मरणात्। एवं सामा
न्यतः पूर्वाह्णे पारणप्राप्तौ पारणादिने केवलाष्टमीसद्भावे तदन्ते कर्तव्यं। तदाह मनुः। जन्माष्टमी रोहिणी वा शिवरात्रिस्तथैव च। पूर्वविद्धैव कर्त
व्या तिथिभांते च पारणमिति। अत्र रोहिणीव्रतोपवासे भांते कर्तव्यं। इतरोपवासे तिथ्यंते पारणमिति विवेकः। विष्णुरहस्ये। कृष्णाष्टमी स्कंदषष्ठी शिव
रात्रिः चतुर्दशी। एताः पूर्वयुताः कार्याः तिथ्यंते पारणं भवेदिति। निगमेपि। पूर्वविद्धास्तु तिथिषु भेषु च श्रवणं विना। उपोष्य विधिवत्कुर्यान्न तदन्ते च पारणमि
ति विष्णुधर्मेपि। जयंती शिवरात्रिश्च कार्ये भद्राजयान्विते। कृतोपवासस्तिथ्यंते तथा कुर्याच्च पारणमिति। यदा तु पारणादिनेष्टमीरोहिण्योः संभवः तदोभयां
ते पारणं कर्तव्यं। तदुक्तं पद्मपुराणे। कार्या विद्धापि सप्तमी रोहिणीसहिताष्टमी। तत्रोपवासं कुर्यात्तु तिथिभांते च पारणमिति ब्रह्मवैवर्तेपि। अष्टम्यामथ
रोहिण्यां न कुर्यात्पारणां क्वचित्। हन्यात्पुराकृतं कर्म उपवासार्जितं फलं। तिथिरष्टगुणं हंति नक्षत्रं च चतुर्गुणं। तस्मात्प्रयत्नतः कुर्यात्तिथिभांते च पार
णमिति। स्कंदपुराणेपि। तिथिनक्षत्रनियमे तिथिभांते च पारणं। अतोन्यथा पारणे तु व्रतभंगमवाप्नुयादिति। निर्णयामृते। अत्राष्टम्यंते पारणोक्ता

जय.
२३८
238

यँ रोहिण्यंतो नापेक्षितः। अंते पारणाविधानस्य रोहिणीश्रवणातिरिक्तनक्षत्रविषयत्वात्। याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रसंयुताः। ऋक्षांते
पारणं कुर्याद्विना श्रवणरोहिणीमिति स्मरणात्। माधवीये तु। नक्षत्रं च चतुर्गुणमिति प्रस्तावपराशरोदाहृतवाक्ये इदं युक्तं। विना श्रवणरोहिणी
मिति वचनं तु केवलनक्षत्रोपवासविषयमनुकल्पविषयं वेत्युक्तं तत्रामित्युक्तं।। ननु यदा पूर्वविद्धोपवासे परदिने ऽर्द्धरात्रे तदूर्ध्वं वा तिथ्यंतो भवति
। तदा महानिशायां भोजननिषेधात्। द्वितीयदिने उपवासः प्रसज्येत। मैवं न प्रयुक्तः। पारणस्यावश्यकार्यत्वात्। यदि पारणामंगलस्य तदा प्रतिनिषि
विधानं नोपपद्येत तद्विधानं च तदादर्शाप्रसात्रे देवलेन दर्शितं। संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथं। अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तं न दोषकृदिति
अतः पारणाशब्दबलात्प्रतिनिषिद्धबलाच्च पारणस्यांगत्वं द्रष्टव्यं। अत एवादित्यपुराणे।। पारणांते व्रतं ज्ञेयं व्रतांते द्विजभोजनं। असमाप्ते व्रते पू
र्वे नैव कुर्याद्व्रतांतरमिति पारणाशब्दस्य पारं तीरं कर्मसमाप्तिमिति धातोर्निष्पन्नत्वेन व्रतसमाप्त्यर्थत्वात्तदभावे व्रतस्यासमाप्तिः स्यादिति चे
न्नामस्यां तिथिभांतकालः पारणस्यांगं पारणांगं वा गिं। न ह्यंगाभावे गीनश्यव लोपइति प्रसिद्धिरस्ति। अतश्चातिथ्यंताभावेऽपि दिवैव पारणं कर्त्तव्यं। स्याम.
तदुक्तं। तिथ्यृक्षयोर्यदाच्छेदो नक्षत्रांतमथापि वा।। अर्द्धरात्रे यथा कुर्यात्पारणं त्वपरेहनि इति। अस्यायमर्थः। तिथ्यृक्षयोश्छेदः द्वयोः परिसमा २३८

238A

मोऽह्नि दैवपारणं कर्त्तव्यं। अपं भुक्त्वकलः नक्षत्रान्तरस्य तु कृत्स्नः। नक्षत्रपदं तिथेरप्युपलक्षणं। अन्यतरान्ते वा पारणं कुर्यादिहस्पष्टः। अथ नार्धरात्रे यघुम
पातस्तदाह्निप्रेभुक्त्वा तु कल्ययोरुभयोः प्रसंभवाद्रात्रौव पारणास्य निषिद्धत्वाच्चार्थात् तत्राप्युपवासप्राप्तौ पारणाप्रतिप्रसवः क्रियते। अर्धरात्रेपि वा
कुर्यादिति निर्णयामृते तु अर्धरात्रे तिथिभांतः स्यात्तदापरेऽहनि दिने पारणं कुर्यात्। दिवसे पारणं च सर्वोपवासे साधारणं तदुक्तं ब्रह्मवैवर्त्ते स
र्वेष्वेवोपवासेषु दिवापारणमिष्यते। अन्यथा पुण्यहानिः स्यादृते धारणपारणामिति। गारुडपुराणेपि। अन्यतिथ्यागमो रात्रौ तासमस्तेजसो दि
वा।। तामसं पारणं कुर्वन्न तामसीं गतिमश्नुत इति। अन्यतरान्ते पारणमनुज्ञानं नारदीयेपि। तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्। पार
णं तु न कर्त्तव्यं यावन्नैकस्य संक्षयः इति। वह्निपुराणे जयंतीप्रक्रमे। भांते कुर्यात्तिथेर्वापि शस्तं भारत पारणमिति। तथा रोहिणीसहिता चेयं वि
द्वद्भिः समुपोषिता। वियोगे पारणं कुर्यान्मुनयो ब्रह्मवादिनः। संयोगे केवलं ते प्राप्ने पक्षे कोपि विशुध्यते। तत्रैव पारणं कुर्यादेवं वेदविदो विदु
रिति मदनरत्ने। पिपद्वादिनैनैकतरस्याप्यंतः किं तु रात्रावेव निशीथाद्दर्वाग् उभयांतो न्यतरांतो वा। तद्धारात्राव शुभयान्तेऽन्यतरान्ते वा कर्त्तव्यं
। यदा तु निशीथाद्यवहितपूर्वक्षणाद्वोभयान्तरकतरांतो वा तदा निशीथे पारणं कर्त्तव्यं। तिथ्यृक्षयोरिति वचनादिति निशीथो रात्रेरष्टमो मु

ज०य० हूर्तैः। यस्तु। न रात्रौ पारणां कुर्याद्दृते वै रोहिणीव्रतात्॥ तत्र निश्यपि तत्कुर्याद्वर्जयित्वा महानिशामिति। गौडोदाहृतभविष्योत्तरवचनेन महानिशायां पारणा
२३९ निषेधः स महानिशातोऽर्वाक्पारणाकाललाभे वगंतव्यः। निर्णयसिंधावपि। महानिशातोऽर्वाक्पारणांतलाभे महानिशानिषेधः महानिशायामेव लाभे
239 न वैव पारणामिति। यत्तु मयूखेऽउक्तं पारणां रात्रौ न कुर्यान्न किंतु दिवैवेति। तन्मौठिवादमात्रं। अर्द्धरात्रे पि वा कुर्याद्दित्याघनेकवचनानर्थक्यप्रसं
गात्प्राचीनहेमाद्र्यादिसर्वग्रंथविरोधाच्च। यदप्युक्तं माधवेन अर्द्धरात्रशब्देन रात्रिमात्रं गृह्यत इति। तदपि माधवग्रंथे तादृशार्थानुपलंभान्मृग्यं॥ म
हानिशा सा द्वियामाद्युपरितनो यामः। तदुक्तं महानिशा तु विज्ञेया मध्यमं मध्ययामयोः तथा। मध्यमः महारात्रो विज्ञेया तु महानिशेति स्मृत्यंत
रमपि द्वंद्वमेव हेमाद्रिमदनरत्नमाधवादीनां मतं। कामधेनौ गार्ग्यस्तु। महानिशा तु विज्ञेया मध्यमं प्रहरद्वयमित्याह। वृद्धशातातपस्तु महानिशा द्वे घटि
के रात्रौ मध्यमयामयोरित्याह। वेदपाठपरं तदित्यन्ये। अशक्तस्तु गौणमुख्यकालालाभे पि दिवैव पारणां कुर्यात्। इयं सापूर्वविद्धा या मुपवासं समाच
रेत्। तिथ्यंते चोत्सवांते वा व्रती कुर्वीत पारणामिति कालादर्शादिनिबंधवचनात्। उत्सवान्ते। जागरणाद्युत्सवांते। द्वितीयदिवसे प्रातरित्यर्थः। यत्तूक्तं राम०
मयूखे उद्यापनं त्वनुक्तत्वान्नास्तीति। तदप्यपेशलं। उद्यापनं विना यत्तु तद्व्रतं निःफलं भवेत्। यदि चोद्यापनं नोक्तं व्रतानुग्रामात्समाचरेत्॥ विनाऽनुक्ता २३९

239 A

रतो दद्याद्व्रतको घापनेऽह्नि ते ॥ गाश्चैव कांचनं दद्याद्व्रतस्य परिपूर्त्तये इति पृथ्वीचंद्रोदये नंदीपुराणोक्तेस्तस्मात्सर्वथा उद्यापनं कर्त्तव्यमिति ॥ जन्माष्ट
मीकृत्यसमाप्तं ॥ अथ भविष्योत्तरोक्ता जन्माष्टमीव्रतकथा ॥ युधिष्ठिर उवाच ॥ कीदृशं तद्व्रतं देव देवैः सर्वैरनुष्ठितं ॥ जन्माष्टमीतिमं त्वं च पवित्रं
पापनाशनं ॥ येन त्वं तुष्टिमायासि वीरोत्पन्नमनाव्यय ॥ एतन्मे तत्त्वतो ब्रूहि सविधानं सविस्तरं ॥ श्रीकृष्ण उवाच ॥ मासि भाद्रपदेऽष्टम्यां नि
शीथे कृष्णपक्षगे ॥ शशांके वृषराशिस्थे ऋक्षे रोहिणीसंज्ञिते ॥ योगेस्मिन्वसुदेवाद्धि देवकी मामजीजनत् ॥ भगवत्साश्वतं नैव क्रियते कृम
होत्सवः ॥ योगेस्मिन्कथिते षष्ठ्यां सिंहराशिगते रवौ ॥ सप्तम्यां लघु भुक्त्वा कुर्याद्दंतधावनपूर्वकं ॥ उपवासस्य नियमं रात्रौ संस्थाप्य जितेंद्रियः ॥ के
वलेनोपवासेन तस्मिन्जन्मदिने मम ॥ सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥ उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह ॥ उपवासः स विज्ञेयः
सर्वभोगविवर्जितः ॥ ततोऽष्टम्यां तिलैः स्नातो नद्यादौ विमले जले ॥ सुदेशे शोभनं कुर्याद्देवक्याः सूतिकागृहं ॥ सितपीतैस्तथा रक्तैः कर्बुरैर्हारि
तैः शुभैः ॥ वाससोभिः शोभितं कृत्वा समंतात्कलशैर्नवैः ॥ पुष्पैः फलैः रनेकैश्च दीपालिभिरितस्ततः ॥ पुष्पमालाविचित्रं च चंदनागुरुधूपितं ॥ त्र
तिरम्यमनौपम्यं लज्जालादिभूषितं ॥ हरिवंशस्य चरितं गोकुलं च लिखापयेत् ॥ ततो वादित्रनिनदैर्वीणावेणुरवाकुलं ॥ नृत्यगीतक्रमोपेतं मंगले

जय॰
२५०
240

स्वसमं ततः। वन्हिवारिलोहखड्गस्तंभच्छागं च यलतः। द्वारि विन्यस्तमुशलं रक्षितं रक्षपालकैः। षष्ठ्या देव्या धिष्ठितं च ब्रह्मामिश्रसुजनैस्तथा। एवं विभवसं
येसा कृत्वा तत्सूतिकागृहं। तन्मध्ये प्रतिमा स्थाप्या सा चाप्यष्टविधा स्मृता। कांचनी राजती ताम्री पैत्तली मृन्मयी तथा। वार्क्षी मणिमयी चैव वर्णकैर्लि
खिता तथा। सर्वलक्षणसंपूर्णा पर्यंके चाष्टताश्रुते। प्रतप्तकांचनाभासां मया सह तपस्विनी। प्रसूयमानां च प्रसूतां वस्त्रापर्यंकोपरि। मां तत्र
बालकं स्तनपर्यंके स्तनपायिनं। श्रीवत्सवक्षसं शांतं नीलोत्पलदलच्छविं। यशोदां तत्र चैकस्मिन्प्रदेशे सूतिकागृहे। तद्वत्कल्पयेत्पार्थ
प्रसूतवरकन्यकां। तथैव मम पार्श्वस्थाः कृतांजलिपुटा नृप। देवा यक्षा महात्मानो गायकाश्च विद्याधरा नगाः। प्रणताः पुष्पमालाश्च वाहू हस्ताः सुरासु
राः। संवरंतं इवाकाशे प्रहारैरुदहितोदितैः। वसुदेवोऽपि तत्रैव खड्गचर्मधरः स्थितः। कश्यपो वसुदेवश्च अदितिश्चैव देवकी। शेषो वैवलभद्रोऽयं यशो
दा हि तिरन्वभूत्। नंदः प्रजापतिर्दक्षो गर्गश्चापि चतुर्मुखः। गोप्यश्चाप्सरसः सर्वा गोपाः सर्वे दिवौकसः। एषोवतारो राजेंद्र कंसोयं कालनेमिन
ः। तत्रकं समानियुक्ताश्च मोहितायोगनिद्रया। गोधेनुकुंजराश्चैव दानवाः शस्त्रपाणयः। नृत्यं तत्राप्सरोभिश्च गंधर्वा गीततत्पराः। लेखनीय राम॰
श्च तत्रैव कालियो यमुनाह्रदे। इत्येवमादि यत्किंचिच्छ्रूयते चरितं मम। लेखयित्वा प्रयत्नेन पूजयेद्भक्तितत्परः। स्तंभादेवं विधां कृत्वा देवकीनव २५०

240A स्मृतिकां। ततस्तां पूजयेद्गंधपुष्पाक्षतैः फलैः। कूष्मांडैर्नारिकेलैश्च खर्जूरैर्दाडिमीफलैः बीजपूरैः पूगफलैर्लकुचैर्वा पुष्पैस्तथा। कालदेशोद्भवैः पु
ष्पैः पुष्पैश्चापि सुविविधैः। पाद्यार्घ्यैः पूजयेद्गंधपुष्पाक्षतैः फलैः। मंत्रेणानेन कौंतेय देवकीं पूजयेन्नरः। गायद्भिः किन्नराद्यैः सततपरिवृता वेणुवीणा
निनादैः भृंगारादर्शकुंभप्रवरकृतकरैः किंनरैः सेव्यमाना। पर्यंके स्वास्तृते या मुदिततरमुता पुत्रिणी सम्यगास्ते सा देवी देवमाता जयति सुवदना दे
वकी कांतरूपा। या देवी संवाहयंती श्रीदेवक्याश्चरणांतिके। निषण्णा पंकजे पूज्या नमो देव्यै श्रियै इति। देवक्यै तु नमस्तुभ्यं कृष्णमातः सदा नतत्परे। या
पक्षयकरी देवी तुष्टिं यातु मयार्चिता। प्रणवादिनमस्कांतं पृथक् नामानुकीर्त्तयेत्। कृत्वा पूजां विधिवत् सर्वपापाः प्रणुत्त पो देवक्यै वसुदेवाय वासुदेवाय
चैव हि। बलदेवाय नंदाय यशोदायै पृथक् पृथक्। क्षीरादिस्नपनं कृत्वा चंदनेनानुलेपयेत्। विध्यंतरमपीच्छंति केचिदत्रैव सूरयः। चंद्रोदये शशांका
य चार्घ्यं दद्याद्धरिं स्मरेत्। अनघं वामनं शौरिं वैकुंठं पुरुषोत्तमं। वासुदेवं हृषीकेशं माधवं मधुसूदनं। वाराहं पुंडरीकाक्षं नृसिंहं दैत्यसूदनं। दा
मोदरं पद्मनाभं केशवं गरुडध्वजं। गोविंदमच्युतं कृष्णमनंतमपराजितं। अधोक्षजं जगद्बीजं सर्गस्थित्यंतकारकं। अनादिनिधनं विष्णुं त्रैलोक्येशं त्रि
विक्रमं। नारायणं चतुर्बाहुं शंखचक्रगदाधरं। पीतांबरधरं नित्यं वनमालाविभूषितं। श्रीवत्सांकं जगत्सेतुं श्रीधरं श्रीपतिं हरिं। योगेश्वराय दे

जय·
२५१
241

वाय योगानां पतये नमः। योगोद्भवाय नित्याय गोविंदाय नमो नमः॥ स्नानमंत्रः। यज्ञेश्वराय देवाय तथा यज्ञोद्भवाय च। यज्ञानां पतये नाथ गोविंदाय नमो नमः॥ धू
पादिमंत्रः। विश्वेश्वराय विश्वाय तथा विश्वोद्भवाय च। विश्वस्य पतये तुभ्यं गोविंदाय नमो नमः॥ पूजामंत्रः। मंत्रेणानेन नैवेद्यं दद्याद्वंद्रपसे नरः। तथैवार्घ्यं च मं
त्रेणाद्यनेनैव तु दापयेत्। क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव। गृहाणार्घ्यं शशांकेमं रोहिण्या सहितो मम। ज्योत्स्नाय ते नमस्तुभ्यं नमस्ते ज्योतिषां प
ते। नमस्ते रोहिणीकांत अर्घ्यं नः प्रतिगृह्यतां॥ स्थंडिले स्थापयेद्देवं शशांकं रोहिणीयुतं। देवकीं वसुदेवं च नंदं चैव यशोदया। बलदेवं मया सार्द्धं भक्त्या
परमया नृप। संपूज्य विविधैर्देहैः किं न प्राप्नोति दुर्लभं। अर्द्धरात्रे वसोर्द्धारां पातयेद्गव्यसर्पिषा। ततो वर्द्धापयेन्नालं षष्ठीनामादिकं मम। कर्त्तव्यं तत्क्षणाद्रात्रौ
प्रभाते नवमीदिने। यथा मम तथा कार्यो भगवत्या महोत्सवः। ब्राह्मणान्भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणां। हिरण्यं मेदिनीं गावो वासांसि कुसुमानि च। यद्य
दिष्टतमं तत्तत्कृष्णो मे प्रीयतामिति। यं देवं देवकी देवी वसुदेवादजीजनत्। भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः। सुजन्म वासुदेवाय गोब्राह्मणहि
ताय च। शांतिरस्तु शिवं चास्तु इत्युक्त्वा मां विसर्जयेत्। ततो बंधुजनौघं च दीनानाथजनं वृतः। भोजयित्वा यथाशक्त्या स्वयं भुंजीत वाग्यतः। एवं यः कुरुते देवा एम·
देवक्याः सुमहोत्सवं। प्रतिवर्षं विधानेन मद्भक्तो धर्मनंदन। नरो वा यदि वा नारी यथोक्तफलमाप्नुयात्। पुत्रसंतानमनघं सौभाग्यमतुलं लभेत्। इह धर्म २५१

241A रतिर्भूत्वा मृतो वैकुंठमाप्नुयात् । तत्र दिव्येन मानेन वर्षलक्षं प्रतिष्ठितः । सो गान्नानाविधान्भुक्त्वा पुण्यशेषादिहागतः । सर्वकामसमृद्धेश्च सर्वदुःखविव
र्जिते । सर्वस्मिन्युते पार्थ सर्वगोकुलमंडले । कुले नृपवरिष्ठानां जायते हृच्छयोपमः । यस्मिन्नस्ते देवदेवेशे पुलिखिते वापदापिते । मम जन्मदिनं पुण्यं
सर्वालंकारभूषितैः । पूज्यते पांडवश्रेष्ठ जनैरुत्सवसंयुतैः । परचक्रभयं तत्र न कदाचिद्भवेत्सुत । पर्जन्यः कामवर्षी स्यादीतिभ्यो न भयं भवेत् ।
गृहे वा पूज्यते यस्मिन्देवक्याश्चरितं मम । तत्र सर्वसमृद्धिः स्यान्नोपसर्गादिकं भयं । पश्यतो नकुलाद्व्यालात्सापरोगाद्वयातकात् । राजतश्चौ
रतश्चापि न कदाचिद्भयं भवेत् । प्रसंगेनापि यो भक्त्या व्रतं पश्येज्जनाकुलं । सोपि पापविनिर्मुक्तः प्रयाति हरिमंदिरं । जन्माष्टमीजनमनोनयनाभि
रामा पापापहा प्ररितिनंदितनंदगोपा । यो देवकीसुतसुतां यजतीह तस्यां पुत्रानवाप्य समुपैति पदं स विष्णोः । इति जन्माष्टमीव्रतकथासमाप्ता
। अथास्यामेव रोहिणीयुक्तायां अग्निपुराणोक्तं जयंतीव्रतं स भविष्ठे वाव । कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी नृप । जयंती नाम सा ज्ञेया उपो
ष्या सा प्रयत्नतः । सप्तजन्मकृतं राजन्यत्पापं त्रिविधं नृणां । तत्क्षालयति गोविंदस्तिथौ तस्यां सुभावितः । उपवासश्च तत्रोक्तो महापातकनाशनः
। जयंत्यां जगतीपाल विधिना नात्र संशयः । त्रेतायां द्वापरे चैव राजन्कृतयुगे पुरा ॥ रोहिणीसहिता चेयं विद्वद्भिः समुपोषिता । वियोगे पारणं चक्रुर्नयो

जय.
२४२
242

ब्रह्मवादिनः। सांयोगिके व्रते प्राप्ते यत्नेकोपि विपुज्यते। तत्र पारणकं कुर्याद्द्वेवं वेदविदो विदुः। अतः परं महीपाल संप्राप्ते तामसे कलौ। जन्मनो वासुदेव
स्य भविता व्रतमुत्तमं॥ आराधितः स देवक्या विष्णुः सर्वेश्वरः पुरा। सप्तम्यां योगे तु रोहिण्यां निशीथे राजसत्तम। समजायत गोविंदो बालरूपी चतुर्भु
जः। तं दृष्ट्वा जगतां नाथं प्रणम्य गरुडध्वजं। देवकी प्रांजलिर्भूत्वा इदं वचनमब्रवीत्। देवक्युवाच। नाहं वियोगं संसोढुं हा देव स्तुतलोचना। तवेद
क्र रूपमालोक्य शक्नोमि मधुसूदन। वासुदेव उवाच॥ तं मां दृष्ट्वा समं तादृग्विं दिने स्मिन्नेव तामसे। तव दर्शनमेष्यामि बालरूपेण देवकि। ये तां पु
ष्पादिभिर्देवि पूजयिष्यंति मानवाः। दिने तस्मिन्महाभागास्ते वो संगोप्य वास्थितां द्वासप्ततिये निशीथे धर्मतो हिरण्यपाम हिते विभो। सुवर्णेन कृते पात्रे राज
ते वारोत्तमाः। सर्वान्कामानवाप्स्यंति इह लोके परत्र च। सप्तमी संयुताष्टम्यां निशीथे रोहिणी यदि भविता साष्टमी पुण्या पापघ्नं द्वादशी वा करै। प्रतिमां सं
वते कृत्वा मषष्ट्यां परःकारिष्यति। मम चैव विलोकान्कामांस्तं संप्राप्स्यसि संशयं। वसिष्ठ उवाच। अनेन विधिना यस्तु प्रतिमासं नरेश्वर। करोति व्रतमस्य पू
र्णं यावद्दामनं नेह रेः। दद्यात्तु यां सुसंपूर्णां गोभी। लैरलंकृतां। ब्राह्मणायन पश्चैष्टतस्य पुराणफलं भूपते। यस्तु राप समम फरष्ठेन राजसूयेन पार्थिव सम.
। तस्तु राप समकल लब्ध्वा विष्णोः सालोक्यतां व्रजेत्। नापुत्री नाधनो दुःखी नाविपगीऊरूपवान्। भवेन्नाकालतो मृत्युः पांव जन्मशतं नृपा शंखेतोय २४२

242A समाप्त्यायसद्गुप्यफलं कांचनं ।जातरूपमयं वध्वरां गतावेद्या यार्घं निवेदयेत् ।रोहिण्यासहितं चन्द्रं कलाशौ प्यमयं बुधः ।द्वादशांगुलविस्तारं तत्रार्घं
सन्निवेदयेत् ।क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव ।अर्घ्यं गृहाण शांकेयं रोहिण्यासहितो मम ।ततोनुपूजयेत्तां तु सकलां देवकीं नृप गं
धपुष्पैः सनैवेद्यैर्वस्त्रैरामरणैस्तथा ।मंत्रणमे देवजननी तत्तो जातस्तु वामनः ।वसुदेवात्तथा कृष्णो नमस्तुभ्यं नमो नमः ।सुपुत्रार्थं प्रदत्तं मे ग
हाणो मन नमोस्तु ते ।अदितिर्देवमाता त्वं वसुदेवस्तु कश्यपः ।अजीजनस्त्वमीं देवं वासुदेवं सनातनं ।इत्येवं पूजयित्वा तं पुनः सूक्तैः स्तुवैः स्त
वैः ।स्तुत्वा वादित्रनिर्घोषैर्गीतवाद्यैः सुमंगलैः ।सुकृपामिर्विविधान्नित्यथाभेक्षणाकैरपि ।एवं तिहासैः पौराणैः क्षयेजागरणं नृप ।हृष्टात्मा शक्तितोरा
जन्मा मातरुदिते तौ ।ब्राह्मणेभ्यो यथाशक्त्या धेनुं वस्त्राणि कांचनं ।दक्षिणां तु द्विजेभ्यस्तु सर्वे तद्दक्षयं भवेत् ।मां ते कृयात्तिथौ वापि शक्तं भारतपारणं
।तेन रूपेण रूपता तस्मा जन्मपयफलं लमेत् ।यः कुर्याद्व्रतमेतत्तु पुण्यवान् शक्तितः सदा ।इहामुत्र सुखी विद्वान् फलार्फलतां व्रजेत् ।आदित्यपु
राणे ।तमेतमेव विधिमभिधायैतावान्विशेषः उक्तः ।।गंधैर्माल्यैस्तथा पेपैर्धैवगोधूमसंभवैः ।सगोरसैर्भक्ष्यभोज्यैः फलैश्चविविधैरपि ।रात्रौ प्रजागरः
कार्यो नृत्यगीतसमाकुलैः ।अरुणोदयवेलायां नवम्यां च ततः स्त्रियः ।रक्तवस्त्रान्विताः सर्वाः पुष्पमाल्यैरलंकृताः ।नपंति प्रतिमां स्येतां नानाविभव

जप:
२४३
243

संभवाः। नदीतीरं शुभं रम्यं विविक्तं वा महत्तरः। तत्र स्नानं प्रकुर्वीत स्नापयपंतिं च तास्ततः। ततः प्रविश्य वा गृहे यवान्नं भुंजते व्रताः। युग्मं। मिष्टविकारैश्च म
ध्याह्नसमरिवैः मह। इति जयंतीव्रतं। श्रीभाद्रपदकृष्णाष्टम्यां सुमामहेश्वरव्रतं। तत्र सुजनं चनं हेमाद्रौ। नभस्ये मासि वाष्टम्यां पद्माद्रौ जायते तदा। व्र
तमेतद्विधातव्यं सुमामहेश्वरं सुवीत्यादि। भाद्रपदकृष्णाष्टमी कालाष्टमी। तदुक्तं हेमाद्रौ वामनपुराणे। नभस्ये मासि च तथा पापस्यात्कृष्णाष्टमी शु
भा युक्ता मार्गशीर्षे पौषमासात्तु कालाष्टमी स्मृता। तस्यां शिवपूजनं कुर्यान्निमिकालाष्टमीं इयं मन्वादिश्च पि। अथ भाद्रपदकृष्णाष्टम्यां भविष्यपुराणो
क्तं दूर्वाष्टमीव्रतं। श्रीसुरुवाच। अथ भाद्रपदे मासि शुक्लाष्टम्यामुपोषितः। पूजयेत्स्कंकरंभत्या योनरः श्रद्धयान्वितः। सप्राप्नोति परं स्थानं यत्र दे
वाद्विलोचनः। गणेशं पूजयेत्तत्र दूर्वायां सहितं मुने। गणेशो महेश्वरः। फलानां शकलैर्दिव्यैर्गंधपुष्पविलेपनैः। दूर्वां पूजयत्तथेशानं सुचत्तेसर्वे
पातकैः। सुवौ देशे प्रजातायां दूर्वायां ब्राह्मणोत्तमः। स्थाप्य लिंगं ततो गंधैः पुष्पैर्धूपैः समर्चयेत्। खर्जूरैर्नारिकेलैश्च मातुलिंगफलैस्तथा। पू
जयेत्स्कंकरंभत्या दूर्वां विधिवद्द्विज। दध्यक्षतैर्द्विजश्रेष्ठ अर्घ्यं दद्यात्त्रिलोचने। दूर्वाशमीभ्यां संपूज्यमानवः श्रद्धयान्वितः। सर्वैः सुकृतजन्म एम:
ध्यामर्त्यदेवैस्तु वंदितः। विद्यां प्राप्नोति विद्यार्थी पुत्रार्थी पुत्रमाप्नुयात्। धनार्थी धनमाप्नोति भार्यार्थी लभते व्रता। मनसा यद्यदिच्छेत तत्तत्तदामा २४३

243A

तिमानवः। य एवं पूजयेत्तु दूर्वां भक्तेशं मानवः फलैः। सप्तजन्मपापौघैर्मुच्यते नात्र संशयः। कृतोपवासः सम्यग्मासषष्ठ्यां प्रपूजयेच्छिवां दूर्वां समेतां वि
प्रेंद्रदधाक्षतफलैः शुभैः। त्वं दूर्वेऽमृतजन्मासि वंदितासि सुरासुरैः। सौभाग्यं संततिं देहि सर्वकार्यकरी भव। यथा शाखाप्रशाखाभिर्विस्तृतासि मही
तले। तथा ममापि संतानं देहि त्वमजरामरं। दूर्वापूजनमंत्रः। दत्वा पिष्टानि विप्रेभ्यः फलं च विविधं प्रभो।। तिलपिष्टकं गोधूमधान्यपिंडानि पांडव
। भोजयित्वा सुहृन्मित्रसंबंधिस्वजनांस्तथा। ततो भुंजीत तच्छेषं स्वयं श्रद्धासमन्वितः इति।। एतच्च पिष्टादिकमनग्निपक्वमेव भक्षणीयं। अनग्निप
क्वमश्नीयाद्दधि फलं तथा। अक्षारलवणं ब्रह्मन्नश्नीयान्मधुनान्वितमिति भविष्यपुराणवचनात्। पद्मे भाद्रपदस्येशुक्लाष्टम्यां युधिष्ठि
र। दूर्वाष्टमीव्रतं पुण्यं यः करोति महाधनः। न तस्य क्षयमाप्नोति संतानं सप्तपौरुषं। नंदते वर्द्धते नित्यं यथा दूर्वा तथा कुलं। इति दूर्वाष्टमीव्रतं। इ
दं च दूर्वाव्रतं पूर्वविद्धायां कार्यं। श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धा तु कर्त्तव्या शिवरात्रिर्बलेर्दिनमिति बृहद्यमवचनात्। शुक्लाष्ट
मी तिथिर्या तु मासि भाद्रपदे भवेत्। दूर्वाष्टमी तु सा ज्ञेया नोत्तरा सा विधीयत इति पुराणसमुच्चयवचनाच्च। मुहूर्ते रोहिणी षष्ठ्यां दूर्वा वा यदि वा
परा। दूर्वाष्टमी तु सा कार्या ज्येष्ठां मूलं च वर्जयेदित्यत्र परसंविद्धायाश्चापि विधानात् तत्र पूर्वविद्धायाः कर्मकालव्याप्त्यभावे। सत्यामप्युभयत्र कर्म

ज्यो·
२४४
244

कालव्याप्तौ पूर्वैव विद्धायां ज्येष्ठामूलादियोगदुष्टायां वर्द्धष्टी । ज्येष्ठामूलयोगेत्र गान्तोदये कन्यास्थे सूर्ये चैतन्न कर्त्तव्यं । तथा च पुराणसमुच्चये दूर्वाष्ट
मी महापुण्या ज्येष्ठामूलसंयुता । परविद्धा तथा कन्यास्था मुनिः शातातपोब्रवीदिति तथा । प्राप्ते भाद्रपदे मासि शुक्लाष्टम्यां च भारत । दूर्वामभ्यर्चयेद्भ
क्त्या ज्येष्ठामूलं च वर्जयेत् । ऐन्द्रर्क्षे पूजिता दूर्वा हंत्यपत्यानि नान्यथा । भर्त्तुरायुर्हरा मूले तस्मात्तां परिवर्जयेदिति । स्कंदपुराणे शुक्ले भाद्रपदे मासि दूर्वासं
ज्ञा तु याष्टमी सिंहार्क एव कर्त्तव्या न कन्यार्के कदाचन ।। सिंहस्थे सोत्तमा सूर्ये उदिते मुनिसत्तम ।। इति । तथात्रैव । आगस्त्य उदिते तात पूजयेद्यस्तु दूर्वाङ्ग
नां वैधव्यं पुत्रशोकं च दशजन्मानि पंच वेति ।। हेमाद्रौ लौगाक्षिरपि । धानिकाशि तथपवित्रकमेघपूजा दूर्वाष्टमीफलविरूढकजागराणि ।। स्त्रीणां व्रता
नि निखिलान्यपि वार्षिकाणि कुर्यान्न दागस्त्यउदिते न शुभानि लिप्सुरिति हेमाद्रौ । शुक्लाष्टम्यामगस्त्योदये भाविनि मतिः पूर्वं कृष्णाष्टम्यामेव कुर्यादिति दी
पिकायामप्येवं । यदा भाद्रपदे द्विमासः तदा तत्रैव कार्यं नोत्तरः । तदुक्तं निर्णयदीपे स्कांदे । अधिमासे तु संप्राप्ते नभस्ये उदये मुनेः ।। चतुर्णां दूर्वाव्रतं का
र्यं परतो नैव कुत्रचिदिति । एतच्च व्रतं स्त्रीणां नित्यं । या न पूजयते दूर्वां मोहादिह यथाविधि । त्रीणि जन्मानि वैधव्यं लभते नात्र संशयः । तस्मात्संपूज राम·
नीया सा प्रतिवर्षं च भूजनैः । सुखसंताननननी भक्त्या सौभाग्यकारी सदेति । पुराणसमुच्चये वचने चाकरणे दोषश्रवणाद्दीस्यास्नुतेश्च । अत एव ज्येष्ठायो २४४

244A

गादिनिषिद्धकालेपिव्रतानुकल्पः स्मर्यते। कर्त्तव्यावैकभक्तेनज्येष्ठामूलंपद्मभवेत। हर्षीमभर्वेपेद्रक्त्यानवधांदिवसंनयेदिति। अत्रज्येष्ठामूलग्रहणं

सकलनिषिद्धकालोपलक्षणं। अत्रैवंमदनरत्नेपूर्वोक्तनिषिद्धज्येष्ठायोगाद्यभावेप्याशीभिः पूर्वोक्तप्रकारेणहर्षसंयुक्तंपुण्यमिष्टादिकंहत्वाअनग्नि

पक्वंभक्षणीयंनिषिद्धज्येष्ठादियोगेदर्वीत्यागाद्याराधनापूजांकलाएकमत्तेकर्त्तव्यमिति। अस्यामेवज्येष्ठाप्रकृतापांज्येष्ठापूजाकार्या। कन्यास्थार्केऽष्टमीशुक्ला

ज्येष्ठर्क्षेमहतीस्मृता। अलक्ष्मीपरिहारायज्येष्ठातत्रप्रपूजयेदितिलिंगपुराणात्। अत्रकन्यास्थार्कयोगेनप्राशस्त्यमात्रं। मासान्तरेभाद्रपदस्थायांद्रष्ट

व्या। कालादर्शेपि। भाद्रेशुक्लाष्टमीज्येष्ठानक्षत्रेणसमन्विता। महतीकीर्तितातस्यांज्येष्ठांदेवींप्रपूजयेत्। यत्तुज्येष्ठानक्षत्रमात्रापेक्षातिथिव्रताद्भिन्नं

ज्येष्ठारूपंव्रतंतत्रघस्रान्तिक्षौज्येष्ठानक्षत्रेभवतितस्यांतिथौकर्त्तव्यं। तदुक्तंमाधवीयेस्कान्दे। भाद्रपदेशुक्लेपक्षेज्येष्ठर्क्षेसंयुते। यस्मिन्कस्मि

न्दिनेकुर्याज्ज्येष्ठायाः परिपूजनमिति। अष्टम्याः खण्डत्वेज्येष्ठायोगवशेनपूर्वापराग्राह्याहिन्दद्मयोगेतदभावेपिवापरा। पूर्वेद्युरात्रियोगेपूर्वैव।

नवम्यास्त्रहकार्यास्यादष्टमीनात्रसंशयः। मासिभाद्रपदेशुक्लेपक्षेज्येष्ठर्क्षसंयुता। रात्रौयस्मिन्नादिनेतत्रज्येष्ठायाः परिपूजनमितितत्रैवोक्तेः। अ

स्यापवादः। यस्मिन्दिनेमध्याह्नेज्येष्ठामध्याह्नाहूर्ध्वमप्यणुः। तस्मिन्दिनेविधिपूजांचस्नानंचैवसर्वदाचरेदिति। ज्येष्ठानक्षत्रस्यखण्डत्वेऽष्टमीमात्रवामस्

जय॰
२५५
245

सुगम्यतरस्तु ग्वी। ज्येष्ठा नक्षत्रं ग्राह्यं। तत्राष्टम्यां पद्यावारो भानो जे षट्कर्मेव वा। नीलज्येष्ठेति माधवोक्ता दुर्लभा बहुकालिकेति कौशल्यायां। अन्यतरयोगस्याप्यभा
वे मध्याह्नव्यापिन्यामनुवर्ज्यमानं ग्राह्यं। एवोक्तं स्कांदे। तथा मैत्रे राधवाह्वये देवी जेष्ठायां तु प्रपूजयेत्। मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तममिति। इदं
व्रतं महाराष्ट्रेषु प्रसिद्धं। निर्णयसिंधौ। इदं च केवलतिथौ केवलनक्षत्रे चोक्तं। मात्स्ये। पत्यादिकं तिथावुक्तं तज्ज्येष्ठादैवतं व्रतं। प्रतिज्येष्ठाव्रतं च य
द्विहितं केवले शुभे। केवलो दुनीति वा पाठः। तिथावेव तावदेवाद्यं हितीयं केवलर्क्षके इति। दाक्षिणात्यास्त्वक्षय एव कुर्वंतीति। अत एव मदनरत्ने भविष्येन
क्षत्रमात्रे उक्तं। मासि भाद्रपदे पक्षे शुक्ले ज्येष्ठा यदा भवेत्। रात्रौ जागरणं कृत्वा एषा मे नैऋत्यपूजयेत् इति। पूजामंत्रो भविष्योत्तरे। पुत्रदारमम
थै लक्ष्म्याश्चैव विवृद्धये। अलक्ष्म्याश्च विनाशाय ज्येष्ठे त्वामर्चयाम्यहमिति। अनेन षोडशोपचारैः संपूज्य प्रार्थनां कृत्वा नमस्कारं कुर्यात्। तत्र मंत्रः।
ज्येष्ठायै ते नमस्तुभ्यं श्रेष्ठायै ते नमो नमः। शर्वा[illegible]यै ते नमस्तुभ्यं शांकर्यै ते नमो नमः। इति ज्येष्ठाव्रतं। अष्टम्यां महालक्ष्मीयात्रोक्ता काशीखंडे। महाल
क्ष्म्यष्टमी प्राप्य तत्र यात्राकृता नृणां। संपूजिते ह विविधैर्व्रतस्थाने मनुव्रतीति। शिष्टास्त्वापि षोडशदिनपर्यंतमन्वहं स्वस्ति संभवे यात्रां कुर्वंतीति। अत्र एतस्
यामेवाष्टम्यां महालक्ष्मीव्रतारंभः कार्यः। तदुक्तं मदनरत्ने स्कांदे। मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठायुताष्टमी प्रारभ्यं व्रतं तत्र महालक्ष्म्यायताक्ष २५५

245A भिरिति। पुराणसमुच्चये। स्त्रियो व्रतं भाद्रपदे सिताष्टमीप्रारभ्य कन्यागते च हस्ते समापयेत्तत्र तिथौ च यावत्सूर्यस्तु पूर्वार्धं गतोपुवत्याइति॥ सिंहसंक्रान्तौ भाद्र
पदस्सिताष्टमीमारभ्य लक्ष्मव्रतं मासं भगिणीयं तत्तत्संक्रान्तिः पूर्वा द्वैत्राश्विनकृष्णाष्टम्यां समापनीयमित्यर्थः। तत्रैव निर्णीयामृते। कन्यागते कैश्चार
भ्यकर्त्तव्यं न स्त्रियो व्रतं नाहस्तपातदलस्यैकैतद्व्रतं न समापयेदिति। इदं च व्रतं षोडशदिनात्मकं तत्र सिताष्टमी प्रातःकालव्यापिनी ज्येष्ठायुताग्रा
ह्यातद्भावे केवलापि। मुक्ते भाद्रपदाष्टम्यामारंभोस्य विधीयते। प्रातःषोडशकत्वात्सिस्याहि वचनात्। आश्विनकृष्णाष्टमी तु चन्द्रोदयव्यापिनी
ग्राह्या। तत्रैव चार्घ्यविधानात्। चन्द्रोदयव्रते सैव तिथिः स्यात्कालिकी स्मृतेति वचनात्। उपयत्र चन्द्रोदयसमये सत्वेवाकृष्णपक्षे अष्टमी वैवेति वचनात्पू
र्वापरयुक्तरादिने चन्द्रोदयान्तरं त्रिमुहूर्त्तान्तरा चेद्युत्तरे वा एवं वापरविद्धावाग्राह्या चन्द्रोदयेसहात्रिमुहूर्त्तापि साग्राह्या परतश्चोद्भगामिनीति वचनात्
। चन्द्रोदयादूर्ध्वं त्रिमुहूर्त्ताष्टमीचेत्तदापरैव ग्राह्यानचेत्पूर्वैवेत्यर्थः। तदुक्तं चन्द्रप्रकाशे स्मृत्यन्तरे। अर्द्धरात्रमतिक्रम्य वर्त्तते या नरापि तिथिः। तदा तस्या
तिथौ कार्यं महालक्ष्मीव्रतं शुभमिति। इदं च व्रतं दोषवत्सु वर्षे अहनायां तिथौ कर्त्तव्यं तदुक्तं पुराणसमुच्चये। पूजनीया गृहस्थेन अष्टमी प्राकृषिद्धिप्रियः।
दोषैः शत्रुभिः संत्यक्तासर्वसंपत्करी शुभेति। दोषाश्च तत्रोक्ताः। पुत्रसौभाग्यराज्यायुर्नाशनी साप्रकीर्त्तिता। तस्मात्सर्वप्रयत्नेन त्याज्या कन्यागते रवौ॥

जय॰
२४६
246

विशेषेणापरित्याज्या नवमीदूषिताष्टमी। अत्र कन्यागते रवौ निषेधो व्रतप्रारंभविषयः। तथा त्रिदिने चावमे चैव वृद्धाष्टमीं नोपवासयेत्। पुत्रहा नवमीविद्धा ख-
घ्नीहन्त्याद्गेरवौ। धर्मघ्नी त्रिदिने प्रोक्ता त्याज्या चैवावमे सतीति। खंडयं घ्नतीति खघ्नी। नवमीवेधः। रवेर्हस्तोत्तरदलगतत्वं त्रिदिनं। अवमदिनं चेति
ह्रोषत्वं तुष्टयं। त्रिदिनावमदिनयोर्लक्षणं रत्नमालायामुक्तं। यत्रैकस्य शाति तिथिद्वयावसानं वारस्त्र्यवमदिनं तदुक्तमार्यैः। यः स्पर्शान्नभवति ति-
थिद्वयस्य वान्हः त्रिद्युस्पृक्तस पुनरिहं द्वयं चनेष्टं। एतद्दोषवर्जनमुपक्रमोद्यापनयोरेव प्रायेणाज्ञेयं। व्रतस्य षोडशाब्दसाध्यत्वेन मध्ये तापापो गाहि-
ति। इति महालक्ष्मीव्रतनिर्णयः। अथ व्रतविधिः। भाद्रपदशुक्लाष्टम्यां प्रातरुत्थाय। प्रातः षोडशकृत्वस्त्रं ग्रंथीकरौ सुरंवपक्षाल्य स्नानादिकं नि-
त्यं विधाय संकल्पं कृत्वा पूजनं कुर्यात्। महालक्ष्म्याः चंदनादिना प्रतिमां विधाय तत्र स्थापयेत्तं तु षोडशसंख्यं सिद्धं ग्रंथि षोडशसंयुतं। लक्ष्म्यै नम इति मंत्रे-
ण प्रतिष्ठं पूर्वोक्तमंत्रेण संस्थाप्य लक्ष्मीपूजनं दोरकपूजनं च कृत्वा हस्ते दोरकबंधनं कुर्यात्। तत्र मंत्रः। धनं धान्यं धराहर्म्यं कीर्तिमायुर्यशः श्रियं। तु-
रगान्दंतिनः पुत्रान्महालक्ष्मि प्रयच्छ मे। मंत्रेणानेन बध्वा च दोरकं दक्षिणे करे। काण्डानि षोडश दाय दूर्वापात्राक्षतानि च। एकविंशतिः कृष्णांस्कृत्वा ताम-
त्र जपेत्तु दोरकं। ततस्तु प्रातराख्यया वत्साद्दसिताष्टमी। तावत्सज्जाल्यन दहत्तु पादाद्दीनि कथां तथा॥ ॥अथ शृणु पाचत्वहनावत्तं स्त्वपेरक्षता २४६

246 A

द्विमिरिति। अथ लक्ष्मीपूजनविधिः। तत्राष्टदलं कमलं विधाय पंचदशोपचारैः लक्ष्मीं पूजयेत्। तदुक्तं सारसंग्रहे। आवाहनं चासनं स्यादर्घ्यं पा
द्यं च मानिनि। मधुपर्काभिषेकौ च वस्त्रालंकारचंदनं। पुष्पं धूपं दीपभोज्ये प्रोद्वासनमथापि च। एतानि मंत्रवित्कुर्यात्क्रमात्पंचदशकेन हि। अथ प्रयो
गः। प्रणवेन श्रीबीजेन च प्राणायामत्रयं कृत्वा। क्षीरसिंधुआनंदकर्दमचिक्लीतश्रीपुत्रेभ्य ऋषिभ्यो नमः मुखे। अनुष्टुब्बृहतीत्रिष्टुप्प्रस्तारपंक्तिछं
दोभ्यः हृदि श्रीविभावसुदेवताभ्यामिति न्यासविधानुसारेण विनियोगमुक्त्वा हिरण्मय्यै नमः हृदयाय नमः। चंद्रायै नमः शिरसे स्वाहा। रजतस्रजा
यै नमः शिखायै वषट्। स्वर्णस्रजायै कवचाय हुं। हिरण्यस्रजायै नमः नेत्रत्रयाय वौषट्। हिरण्यवर्णायै नमः अस्त्राय फट्। इति षडंगमंत्रान्हृ
दयादिपदस्थाने युक्त्वा दिग्बंधं विधाय पांसुष्ठादिकरतलांतकयोर्यथास्थितान्हृदयादिषडंगेषु विन्यस्य हिरण्यवर्णामिति पंचदशर्चाभिर्मास्तु पा
दा। शिरसि हिरण्यवर्णामित्यादि नेत्रयोः। तां म आवहेति। कर्णयोः अश्वपूर्वामिति। नासायां कांसोस्मितामिति। मुखे चंद्रामिति। गले आदि
त्यवर्णा इति। बाह्वोः उपैतु मामिति। हृदि क्षुत्पिपासेति। नाभौ गंधद्वारामिति। गुह्ये मनसः काममिति। गुदे कर्दमेनेति। ऊर्वोः आपः सृजामिति। जान्वोः आर्द्रामि
ति जंघयोः आर्द्रामिति तां म आवहेति। एवमेताः प्रणवादिनमोंता विन्यस्य। सरसिजनिलये इति ध्यात्वा मानसपूजांते चतुर्द्वारं स्वलंकृतस्रजयावृतं

ज·य·
२४७
247

अष्टदलं कमलं पूजावृत्तं स्वस्तरतो निक्षायार्घस्थापनादि पीठदेवतानां पीठशक्तीः पूजयेत्। ॐ विभूत्यै नमः। उन्नत्यै। कांत्यै। सृष्ट्यै। कीर्त्यै। सन्नत्यै। व्यु
ष्ट्यै। उत्कृष्ट्यै। मध्ये। ऋध्यै। ततः प्रतिमादिष्वावाहनादि। अथ वा योगपीठमासंकृत्वा मूलमंत्रन्यासं कुर्यात्। अस्या विद्यायाः भृगुः ऋषिः निचृच्छं
दः श्रीर्देवता न्यासे विनियोगः। भृगुऋषये नमः शिरसि। निचृच्छंदसे नमः मुखे। श्रीलक्ष्मीदेवतायै नमः हृदये। शं बीजाय नमः गुह्ये। ईं शक्तये
नमः पादयोः। रं कीलकाय नमः नाभौ। श्रां अंगुष्ठाभ्यां नमः। श्रीं तर्जनीभ्यां नमः। श्रुं मध्यमाभ्यां नमः। श्रैं अनामिकाभ्यां नमः। श्रौं कनिष्ठिकाभ्यां
नमः। श्रः करतलकरपृष्ठाभ्यां नमः। श्रां हृदयाय नमः। श्रीं शिरसे स्वाहा। श्रूं शिखायै वषट्। श्रैं कवचाय हुं। श्रौं नेत्रत्रयाय वौषट्। श्रः अस्त्रा
य फट्। मूलेन व्यापकं कृत्वा ध्यायेत्। कांत्या कांचनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियं। वि
भ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्वलां क्षौमाबद्धनितंबबिंबललितां वंदेरविंदस्थितां १ इति ध्यात्वा मनसा संपूज्य मूलमंत्रं जपित्वा गु
ह्येति मंत्रेण समर्प्य। अर्घस्थापनादि कृत्वा। बाह्यपूजां समारभेत्। तत्र तांत्रिकं वैदिकं वा ध्यानं कृत्वा प्रतिमादिष्वावाहनादि कुर्यात्। तद्य राम·
था। हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजां। चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह। महालक्ष्मि समागच्छ पद्मनाभपदादिह। यथोपचारपूजे २४७

247A यंत्वदर्थे देवि निर्मितेति मूलेनावाहनं कुर्यात्। तवेयं महिमेति आलयस्मे हि कथितं इति च मूलेन संस्थापनं। सर्वांतरयामिणीमित्यासनं। आक्षि
न्यासन इति प्रतिष्ठापनं। अनन्यात वेति सान्निरोधनं। अज्ञानादुग्धं दत्त्वा दितिं संमुखीकरणं। दशापीयषेति स्थिरीकरणं। अभक्तवाङ्ग्न इति
अवगुंठनं। ततः षडंगेन सकलीकरणं। धेनुमुद्रयामृतीकरणं। महामुद्रया परमीकरणं। ततः प्राणप्रतिष्ठां कृत्वा आसनं दद्यात्। श्री
लक्ष्म्यै नमः आसनं। अपवअध्यःता पत्रपहरमिति। अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीं। श्रियं देवीमुपह्वये श्रीर्मा देवी जुषतां। श्री
रेषते घ्यः स्वाहा। ततः पाद्यं। यद्वक्तिलेशेति। कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलंतीं तृप्तां तर्पयंतीं। पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियं।
श्रीरेतत्ते पाद्यं। आचमनीयं। वेदानामपि वंद्यांप्र मासांय शशा ज्वलंतीं श्रियं लोके देवजुष्टामुदारां। तां पद्मनेमिं शरणमहं प्रपद्ये अल
क्ष्मीर्मे नश्यतां त्वां वृणोमि। मू. श्रीरेतत्ते आचमनीयं स्वा। अथ मधुपर्कः। सर्वकालुष्यहीनेति पठित्वा। आदित्यवर्णे तपसोधिजातो वन
स्पतिस्तव वृक्षोथ बिल्वः। तस्य फलानि तपसानुदंतु मायांतराश्च बाह्या अलक्ष्मीः। श्रीरेष मधुपर्कः स्वधा। ततः पुनराचमनीयं दत्त्वा। स्ना
नं। परमानंदबोधाब्धिरिति। उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतोस्मि राष्ट्रेस्मिन्कीर्तिं वृद्धिं ददातु मे। श्रीरेतत्ते स्नानं नमः। ततः पु

लप.
२४८
248

नगाव मनीयं। ततः वस्त्रं। मा याविन्ने ति। यमाश्रियेति तंतुसंतान मिति वा। क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहं। अभूतिमसमृद्धिं च सर्
वां निर्णुद मे गृहात्। श्रीरेते तेव्रासमत्तौ नमः। ततः भूषणानि। स्वभावसुंदरांगेति। गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं। ईश्वरीं सर्वभूतानां
तामिहोपह्वये श्रियं। श्रीरेत ते भूषणांनमः। ततश्चंदनं। मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां
यशः। मलयाचलसंभूतं नानापन्नगसेवितं। शीतलं बहुलामोदं चंदनं प्रतिगृह्यतां। श्रीरेषते गंधः। ततः अक्षताः। अक्षताश्च सुरश्रेष्ठ कुंकु
माक्ताः सुशोभनाः। गृहाणादेवदेवेशि मयादत्ता हि भक्तितः। ततः पुष्पाणि। मिलतरि मलामोदमत्तालिकुलसंकुलं। आनंदितंदनोघा
नं पद्मायै शुभं नमः। कर्दमेन प्रजाभूतामयि संभ्रम कर्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीं। श्रीरेतानि ते पुष्पाणि। वोषहूात
तः पंचपुष्पांजलीन्दत्वा आवरणपूजां कुर्यात्। कर्णिकापांषडंगानि संपूज्य ततः अष्टदले दिग्दलेषु। वासुदेवाय। संकर्षणाय। प्रद्युम्ना
य। अनिरुद्धाय। हिमपीततमालेंद्रनीलाभानपीतवाससः। चक्रशंखगदापद्मधारिणश्चतुर्भुजान्। पूजयेत्। ततः विदिग्दलेषु दम एम.
नकाय। सलिलाय। गुग्गुलवे। कुरंटकाय इति शुभंज्या। देव्याः दक्षिणे शंखनिधये वसुधारासहिताय। पद्मे वामे वसुमतीसहिताय पद २४८

248A ध्यानिधये। यजेत् शंखनिधिं देव्याः दक्षिणोदयितान्वितं मुक्तामाणिक्यसंकाशौ किंचित्स्मितमुखांबुजौ। अन्योन्यालिंगनपरौ शंखपंकजधारि
णौ। वामतः पंकजनिधिं प्रियया सहितं यजेत्। सिंदूरारुणो भुजाश्लिष्टौ रक्तपद्मदलान्वितौ। निःसरद्दलवर्षाभ्यां पद्माभ्यां मूर्द्धलांछितौ
। तद्वद्दिलं पंकजनिधिं नत्वा वसुमतीमपि। इति संपूज्य चाभीष्टेति संप्रार्थ्य हस्तौ प्रक्षाल्य। ततः तत्तोयावरणाश्रजाकृ यीत्। वलाकै नम
ः। विमलायै नमः। कमलायै। वनमालिकायै। विभीषणायै। मालिकायै। शंखयै। वसुमालिन्यै। पंकजदपधारिण्यै मुक्ताहारसमप्रभा
। एताः संपूज्य मूलेन स्वष्टदेवं संपूज्य मूलेन पुष्पांजलिं दत्वा। इंद्रादि पूजनं वज्रादि पूजनं कृत्वा पुष्पांजलिं दद्यात्। गंधर्वभ्रमासन्नं धूपं एषु व
सुमसमुद्भवं। सुगंधारनराणां दिव्यं धूपं देवि गृहाण मे॥ आपः सृजंतु स्निग्धानि विक्लीत वस वेश्म हे नि च देवीं मातरं श्रियं वासय मे गृहे। लक्ष्म्यै नमः। धूपं समर्पयामि इति
धूपः॥ मार्तंडमंडलाखंडचंद्रविंबाग्नितेजसां। निधानं देवि दीपोयं निर्मितस्तव भक्तितः। आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीं सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो
ममावह इति दीपः। देवतालमपातालभूतलाधारधामजं। षोडशाकारसंभारनैवेद्यं ते नमः श्रियै। आर्द्रां यः करिणीं यष्टिं पिंगलां पद्ममालिनीं चंद्रां हिरण्मयीं
लक्ष्मीं जातवेदो ममावह इति नैवेद्यं॥ स्नानादिकं विधायाथ यतः शुद्धिरवाप्यते। एतदाचमनीयं ते महालक्ष्मि विधीयतां इत्युत्तरापोशनं। इदं फलमिति फ

जप.
२४९
249

लंपाताल जलसंभूतं वदनां भोजभूषणां नानागुणसमाकीर्णां तांबूलं देवि तेन इति तांबूलं हिरण्यगर्भ मिति दक्षिणां श्रिये जात इति नीराजनं यानि कानि च पापा
नि इत्येका प्रदक्षिणा ततः नमस्कारः ततः श्रीसूक्तं पठित्वा प्रार्थनां कुर्यात् एवं संपत्यहं पूजनं विधाय समाप्ति दिने लक्ष्म्याष्टम्यां महापूजां कुर्यात् अथ पुष्कर स्ना
ष्टमी पूजा प्रयोगः नक्तं स्नात्वा नंदिधापशुक्लांबरधरः पूजागृहं गत्वा आसनोपरि पूर्वाभिमुख उपविश्य श्वेत वस्त्रेऽष्टदलकमलं विलिख्य तत्कर्णिकायां गजयुग्म
करस्थकुंभसिच्यमानां लक्ष्मीं संलिख्य पुष्पांजलिं दत्वा नां तत्सूक्तं पूजनं कृत्वा विष्णोर्वक्षसि पद्मे च शंखे चक्रे तथाम्बरे लक्ष्मि नित्यापयासि त्वं मयि नित्या तथा
भवेति संप्रार्थ्य उत्तार्य दोरकं वाहोर्लक्ष्मीपार्श्वे निवेदमेत् लक्ष्मि देवि गृहाण त्वं यन्मया दोरकं धृतं नाम तं संपूर्णतां यातु त्वत्कृपा कार्या मयि त्वयेति ततो वाग्ना
कदानं षोडश पिंडान् षोडश दीपांश्च दद्यात् इंदिरा प्रतिगृह्णाति इंदिरा वै ददाति च इंदिरा तारिकोभाभ्यामिंदिरायै नमो नम इति मूलेनार्घ्यं दद्यात् संपूर्णका
न गोधूमचूर्णदीपान् पिंडांश्च कुमाराणां जनानां वकृत्वा चन्द्रोदये फलादिभिः क्ते नमः शंखे नत्त्वा अर्घ्यं दद्यात् नमोस्तु ते निशानाथ लक्ष्मीभ्रात नमोस्तु ते ब्र
तमं पूर्णतां याग्तु गृहाणार्घ्यं विधो ममेति ततः नमस्कारं कृत्वा जानुभ्यामवनीं गत्वा प्रार्थयेत् क्षीरोदार्णवसंभूते कमले कमलालये प्रपद्यस्व सर्वकामा एमः
न्मे विष्णुवक्षस्थलालये पुत्रान्देहि यशो देहि सौभाग्यं मोक्षमपवर्गं कालि कालि महाकालि विकरालि नमोस्तु ते त्रैलोक्यजननि त्राहि वरदे कमलवत्सले २४९

249A ।एकनाथे जगन्नाथे जगद्वन्द्ये प्रियेवरे । एकेनाहि मा देवि त्राहि मातः शिवंकुरु ॥ मतनाथे जगन्नाथे प्रभीरुपुरुषोत्तमे । कपालकर्त्रिकाशूलडमरुहस्तके ॥ श्रि
यंकुरु महालक्ष्मि त्राहि प्रियंताशुनाशयपेति । वंदारुवीरसुरवृंदकिरीटकोटिरोचिः छटान्वितरुकात्सितरत्नदीपं । देवि त्वदीयवरणांश शरणं जनानां मे वा महेस कलमंगल
वर्द्धनाय । उत्फुल्लकैरवदलायतलोचनायै गंडोल्लसद्वदुलकुंडलमंडितायै । राकाशशिप्रतिमदाननकोमलायै तस्यै नमः कमललोचनवल्लभायै ॥ मद्भक्तव
त्सलतिकां हरिकंठभूषां केयूरहेमकटकोज्वलकंकणांकां । संसारसागरसुखेपततो ममाद्य देहि त्वदीयकरुपाष्टिमवंगमातः । दृष्टा देवि जनाय यापि विविधा
ः जन्मादिपसंगताः विष्णोर्वक्षसि पाचकारतरलालालाञ्छमालाधमं । क्लेशाग्निप्रहतं त्वदीयवरणाद्वंद्वाजसेवारतं कारुण्यामृतमाशु सिञ्चदृशा मामघ
पप्रे स्वरि मल्लाविफुल्लकुसुमोज्वलमध्यभागभूमिल्लसारजितता रकवि वितानां । उत्तप्तहेमनिकषोज्वलकायकांतिर्लक्ष्मीः स्वयं प्रणमतां श्रियमातनो
तु । इति महालक्ष्मीस्तुत्या मातर्विसर्जयेत् । पंकजन्मदेवि संत्यज्य मम वेश्म निसंविश । पश्चात्सुपुत्रभृत्यो हं स्तवीस्यां त्वत्प्रसादतः । इति देवीविसर्जनं । एतद्गु
ह्यापनं तिविति हासेद्दष्टव्यं । अथ महालक्ष्मीव्रतकथा । स्कंद उवाच । सौभाग्यजननं स्त्रीणां दौर्भाग्यपरिहंतनं परमैश्वर्यजननं यद्व्रतं ब्रूहि शंकर । श्रीशंक
र उवाच । साधुसाधु महाबाहो यत्पृष्टो हं त्वयानघ । नत्तेहं संप्रवक्ष्यामि व्रतानामुत्तमं व्रतं । येन चीर्णेन न नरो दुर्गतिं याति कहिचित । सुभगा दुर्भगा वापि स्त्रि

जय.
२५०
250

पोनविष्णुर्वासुहा।आस्तिदेव्याव्रतंपुराणंमहालक्ष्म्याःषडानन।नारीणांचनराणांचसर्वदुःखापहंतथा।स्कंदउवाच।देव्याश्चरितमहात्म्यंमर्त्येकेनप्रकाशितं।विधानंकी
दृशंब्रूहिव्रतस्यास्यमहाविभो।।शंकरउवाच।देवासुरमभूद्युद्धंपूर्णमब्दशतंपुरा।कृतेसुरागणाश्चापिपेदेवानांचपुरंदरो।तत्रदैत्यैर्महावीर्यैर्नीराधमावलाश्रया
न्वा।अमराणिर्जिताःसर्वेपातालतलमाययुः।केचित्स्वर्लोकंगताःकेचिद्विविशुर्वरुणालयं।गिरिदुर्गंसमाश्रित्यकेचित्तस्थुर्महाबलाः।तत्रकोलासुरोना
ममहावीर्योमहाबलः।गोमंतंदुर्गमंदुर्गंगिरिमाश्रित्यनिर्भयः।याराजकन्यकालोकेरूपवंत्योमहागुणाः।आनीयगिरिदुर्गस्थोरमयामासमर्वेशः।एवंमि
त्वान्वब्दिपत्नंचकामरूपीविहंगमः।एतस्मिन्नेवकालेतुआगतौमुनिसत्तमौ।श्रुतप्रभावसंपन्नौपुलस्त्योगौतमःस्महातीर्थयात्राप्रसंगेनश्रुत्वावार्तां
जनस्यतां।कोलासुरेणराजनितांकन्याहेतोःशिविध्वजाता।रुद्वन्तुर्जनंसर्वमगस्त्योस्तिमहामुनिः।येनतोयनिधिःपीतोविंध्याद्रिश्चनिवारितः।वातापील्व
लनामानौदैत्यौयेनविनाशितौ।तंगच्छामोवयंसर्वेकोलासुरवधायच।इत्यामंत्र्यजनाःसर्वेगतास्तमभितोघवा।ऊचुःसर्वेयथावृत्तंकोलासुरविचेष्टि
तं।तच्छ्रुत्वाभगवानाहमैत्रावरुणिरग्रधीः।सृष्टिस्थितिविनाशानांकारणंभगवत्तमलः।गमस्याग्नेतपश्यंतिब्रह्मविष्णुमहेश्वराः।तिष्ठन्तःसंध्यामृत्तिर्जिम राम.
त्सः।तेषांसुस्वरूपाणोरताः।तत्रैवचमहालक्ष्मीःशक्तिरूपेणासंस्थिता।।सर्वशक्तियुतादेवीलोकानांहितकाम्यया।इत्युक्त्वात्वरितंगत्वाकोलासुरवधाय २५०

250A येनिवेद्य निविविशुस्ते भ्यः तस्थुः प्रांजलयो जनाः। तस्थुस्ता निविविशुस्ते भ्योत्र त्यवि स्मुमहेष्वासाः। संख्या त्रयं समाहूय वानं प्रो त्कुर्जे नेश्वराः। वंदाहस्तुरवं देदुमौलिमा
लिकामं उला हनिषातिम हालक्ष्मीर्युद्धे कोलाहलं रिपुं॥ भगवत्सोमहर्निमिसौ दंडशूलादिभिर्वरैः। आयुधैर्विविधैः कृत्वा जयमाप्स पथ संयुगे। युध्मा कं च मा
हापोतो युध्मन् क्रोधमत्तमुद्भवः। भूतनाथो भूतमत्तुर्वैः साहाय्ये भविष्यति। इत्युक्त्वांतरितं गताहलयुः कोलाहलं सं। निःश्वसन् प्रांदेयोज गर्जुर्जल वृत्स्वनाः। भिं
रस्तश्च दिशां वृन्दं वर्द्धयंतः सुतं ध्वंधं। कोलाहलोऽपि तत्स्थुत्वा प्रोत्स पातमहासनात्। रोषणाः क्रोधताम्राक्षो मेरोरिव गजांतकः॥ हस्तस्वरथपादात चतुरंगब
लान्वितः। निर्ययौ पत्तनं पोतर्द्धं कालिकाया इवाशनिः। सकुंडलशिरस्त्राणः कवचीधृतवारणाधिः। बद्धगोधांगुलित्राणः कुद्धो वज्र इवापरः। ततो रुद्र
ससैन्यं तत् भूतनाथेन संगतं। देवनारीमनोह्लादि युद्धं चक्रे तिभीषणं। देवारवैर्भीमघोषैः नानाकैः कारनिःस्वनैः। निःस्वाननिनदैश्चैव लोकः शब्दमयो भ
वत्। जहि भिंधीति वदंतो धावतामितरेतरं। ववृधे समरो घोरो मुष्टीमुष्टिकवाक्रावि। उद्घते राक्षसबले भूतनाथो महाबलः। ममर्द राक्षसानीकं शरैरतिवि
दारणैः। हतं दृष्ट्वा स्वबलं क्रुद्धः कोलासुरोरणे। अभिद्रुत्य गदापाणिः ताडयामास भैरवं। यपौ मूर्छां महावीर्ये हेना निहतमस्तकः। ततो देव्यो तिवेगेन
समभिद्रुत्य रुद्रकं। त्रिशूलेनाभिजघ्नुस्तं पादैश्चैवव्यदारयन्। मुष्टिभिस्ताडयामासुर्नखैश्चैव व्यदारयन्। पादघातैः समाजघ्नुः सिंहः करिवरं यथा।

जय·
२५१
251

सकुंडलाशिरःस्त्राणोदष्टोष्ठोरक्तलोचनः। कृतभ्रूकुटिवक्त्रोसौएवंतस्तामुहुर्मुहुः। गदयाताडयामासशिरःकंठंसकुंडितु। बभंजुस्तांगदांतास्तुह
तत्तसःसंभ्रमाकुलाः। ततोधनुर्द्धरोभूत्वाबाणजालमवाकिरत्। तासांशरीरमर्माणिभिंदन्शरपुंगमैः। ननादवज्रवैरोसौहृदयेवामिनछैःतत
ःक्रुद्धतराशास्तुतंपादेजग्रहुर्भृशं। आकाशेभ्रामयित्वातंविक्षुब्धगगनेक्रुधा। कोलासुरोनिपतितोयावदुत्थानमिच्छति। तावन्निर्गत्यलक्ष्मीसंपा
द्याभ्यांसत्यपीडितः। तयाद्पीडितोरक्तोविवृत्तवदनोभृशं। मुक्तकंठस्वनंकृत्वाततोमोहमुपेयिवान्। ततोदेवाःसगंधर्वामनुष्याऋषयस्तथा। अस्तु
वन्देवनार्यश्चननृतुःसंभ्रमाकुलाः। देवदुंदुभयोनेदुःपुष्पवृष्टिःपपातह। दिशःप्रसेदुर्मरुतोववुर्मंदंस्थिरंजगत्। सुरासुराशिरोरत्नंवत्साहाम
हारत्नाः। हेब्योहृदिवेनयानेनयांतिकोलासुरंप्रति। आयांतीपद्मजांवीक्ष्यसुत्तपादायश्वंखलुः। तुष्टावपरयाभक्त्याराजकन्यागणोमुदा। राजक
न्याऊचुः। वंदामहेवीरसुरवंदकिरीटकोटिरोचिःछटानिकरवासितरत्नदीपं। देविवत्वदीयचरणौशरणांजनानांसेवामहेसकलमंगलवर्द्धनाय। उत्फु
ल्लकैरवदलायतलोचनायैगंडोल्लसत्कदुलकुंडलमंडितायै। राकाशशिप्रतिमदाननकोमलायैतस्मैनमःकमललोचनवल्लभायै। सद्भक्तिलास्यराम
लतिकांहरिकंठभूषांकेयूरहेमकटकोज्ज्वलकंकणांकां। संसारसागरमुखेपततोममाद्यदेहित्वदीयकरपद्ममिमंगमानः। दृष्टादेविजनायिपायि २५१

251A

त्रिविधाः ब्रह्माद्विपसंगता विष्णोर्वक्षःस्थिता वकारतरलालीलाञ्जमालाध्वमं। क्लेशाग्निप्रहतं त्वदीपचरणद्वंद्वाञ्जसेवारतं कारुण्यामृतमासुशरीतद्द
शामाम घपश्येश्वरि। मल्ली विकुल्लकुसुमोज्वलमध्यमागधामिल्लमार जितताम्रकविचित्रिताम्रा। उत्तप्तहेमनिकषोज्वलकायकांतिर्लक्ष्मीः स्वयंप्र
णमतां श्रियमातनोतु। इति स्तुत्वा महालक्ष्मीर्भक्तानामिष्टदायिनी। योगिन्योघभविष्यध्वमिति ता सा वरं ददौ। दृष्ट्वा तास्तु सुदा देवी स्वरूपं प्र
दर्ज्जने। तां स्मितिर्निधेविता देवीवरं वर्यद्दौ मुदा। राजकन्यास्तु ताः सर्वा मुक्ताः स्वपुरमाययुः। ततः प्रभृति लोके षु पूज्यास्ताः सर्वकामदाः। ताश्च
तुष्टियोगिन्यो महालक्ष्मीपरिग्रहात्। नृत्यंति निवहैस्तत्र गीतवाद्यैश्च निःस्वनैः। पुरो देव्या महालक्ष्म्याः करहाटपुरे निशि। एवंप्रभावा सा देवी विष्णु
रामा षडाननाः। व्रतस्यास्य विधानं च ब्रह्मण्यमत्तो विधानतः। मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठायुताष्टमी। प्रारब्धव्यं व्रतं तत्र महालक्ष्म्या यतात्मभिः। कु
रिष्यामि व्रतं देवि त्वद्भक्तस्त्वत्परायणाः। तदविघ्नेन मे यातु समाप्तिं त्वत्प्रसादतः। इत्युच्चार्य ततो बध्वा दोरकं दक्षिणे करे षोडशग्रंथिसहितं गु
णैः षोडशभिर्युतं। ततोन्वहं महालक्ष्मीं पूजयेन्नियतात्मवान्। गंधपुष्पैः सनैवेद्यैर्यावत्कृष्णाष्टमीदिनं। तस्मिन्नहिने तु संप्राप्ते कुर्यादुद्यापनं व्र
ती। वस्त्रमंडपिकां कृत्वा माल्यस्तोपशोभितां। त्रिभूमिकां च शुभ्रलक्षणां नानादीपैरलंकृतां। ततस्त्वः प्रतिमां कृत्वा सौवर्णीं तत्स्वरूपिणीः। स्ना

जय·
२५२
252

पनं कारयेत्तां मां पंचामृतविधानतः। षोडशैरुपचारैश्च धूपदीपादिभिस्तथा। जागरं तत्र कर्त्तव्यं गीतवादित्रनिस्वनैः। ततो निशीथे संप्राप्ते भुदिते म
तहीश्विते। कृत्वा तु स्थंडिले पद्मं षडंगं तु प्रपूजयेत्। दद्यादर्घ्यं वरारोहे प्रतीतस्मैः समाहितः। क्षीरोदार्णवसंभूते वद लक्ष्मी महोदरा। पीयूषधा
मरो हिरण्यमहितो घोरमहाराणमे। जानुभ्यामवनीं गत्वा मंत्रेणाप्रार्थयेत्ततः। क्षीरोदार्णवसंभूते कमले कमलालये। प्रपद्ये सर्वकामान्मे विष्णुवक्ष
:स्थलालये। पुत्रान् देहि यशो देहि सौख्यं सौभाग्यमेव च। कालिकालि महाकालि विकरालि नमोस्तु ते। त्रैलोक्यजननि त्राहि वरदे भक्तवत्सले। ए
कनाथे जगन्नाथे जगदग्निप्रिये वपो रेराके त्राहि मां देवि राममात्तः। शिवंकुरु। भूतनाथे जगन्नाथे प्रसीद पुरुषोत्तमे। कपालकर्त्रिकाशूलडमरु
व्यग्रहस्तके। श्रियं कुरु महालक्ष्मि त्वां श्रियं त्वा स्तुनाशया मंत्रैरेतैर्महालक्ष्मीं प्रार्थ्य श्रोत्रियपोषिते। चंदनतालपत्रं च पुष्पमालादिकं तथान्न दे
व्यं पंचभक्ष्याणि क्षिप्त्वा बहुविधानि तु। प्रत्येकं षोडशैतानि पूगपर्णानि वै वहि। तान्यन्येन समाछाद्य व्रती दद्यात्समंत्रकं। क्षीरोदार्णवसंभूता ल
क्ष्मीः चंद्रसहोदरा। व्रतेनानेन संतुष्टा प्रीयतां विष्णुवल्लभा। इंदिरा प्रतिगृह्णाति इंदिरा वै ददाति च। इंदिरा तारिको भाभ्यां इंदिरायै नमो नमः। दत्वार्घ्यं एवं
वा पनादीश्च श्रोत्रियाणां प्रपोषितां। ततस्वः प्रतिमां स्नात्वा तु ब्राह्मणाय निवेदयेत्। एवं कृत्वा सह निर्वर्त्य व्रती भोजनमाचरेत्। स्कंद उवाच। केनेदं सा २५२

252A

कृतं पूर्वं कथमस्मिन्प्रकाशितं ब्रूहि मेतत्त्वतो देव पघहं तव वक्ष्मः। शंकर उवाच। आसीद्राजा सार्वभौमो मंगलाख्यो इति श्रुतः। कुंडले नगरे रम्ये
तस्य पत्नी माधवीति प्रिया। तमागतः कश्चिद्देवः सेवको ब्राह्मणोत्तमः। अज्ञातनामा तस्यासौ नामचक्रे नृपस्तदा। तद्वल्लक इति ख्यातो बभूव द्विजस
त्तमः। कदाचिन्मृगयासक्तो भूपालो वनमाविशत्। तत्र विध्वा वराहादीन्मृगान्हत्वा सह स्वशः। क्षुत्तृट्परिवृतः श्रांतो वृक्षमूलमुपाश्रितः।
उदकान्वेषणे वा राज्ञः प्रेषयामास सर्वतः। वने जलं ते नापश्यन्नाश्चिरं भ्रांता अप्यलं ततः। ते गत्वा नृपतिं प्रोचुः नात्रांभ इति दुःखिताः। तद्वल्लकोपि ब
भ्राम विपिनं तदतंद्रितः। भ्रममाणस्तदा पश्यत्कस्मिंश्चिद्वनगह्वरे। रम्यं सरोवरं दिव्यं कुमुदोत्पलमंडितं। तत्रापश्यद्देवकन्या दिव्यरूपा मनोरमाः।
चार्वंगीश्चारुनयनाः पीनोन्नतपयोधराः। हारकंकणकेयूरनूपुरालंकृताः शुभाः। पूजयंतीर्महालक्ष्मीव्रतरूपेण सादराः। तद्वल्लकोपि पप्रच्छ
किमिदं कथ्यतामिति। स्त्रिय ऊचुः। महालक्ष्मीव्रतमिदं सर्वकामफलप्रदं। क्रियतेस्माभिरेकाग्रमनोभिस्तत्र भक्तितः। तद्वल्लकोपि तच्छ्रुत्वा
व्रतं जग्राह भक्तिमान्। तदनुज्ञां गृहीत्वा स जलमादाय सत्वरः। आजगाम जलं तस्मै दत्वा प्रांजलिना सह। जलं पीत्वा नृपस्तस्य दृष्ट्वा तद्दोरकं
करे। किमिदं दोरकं विद्वन्नकिं व्रतं कृतवानसि। राज्ञा पृष्टस्तु वल्लकोपि कथयामास तद्व्रतं। तच्छ्रुत्वा राजशार्दूलो व्रतं जग्राह भक्तिमान्। तद्वल्लके

नमहितो राजा स्वपुरमापयौ । पद्मावतीगृहं गत्वा तत्र यारं स्तुमनाः । सहारममाणाय सा देवी तेन राज्ञा प्रियेण वै । तं दृष्ट्वा दोरकं हस्ते क्रुपिता संजातको
पना । कपालं वं चितो ब्रूहि कया बद्धं सुदोरकं । मानवादीस्मया बद्धेत तत्र लक्ष्मीव्रतमनुत्तमं । इस्युक्ता तु प्रियेणासौ हस्ते विछेद्य दोरकं । ज्वालामाला
कुलेवन्हौ क्षिप्तवसति कोपना । हा हा कष्टमिदं पापे कृतं मूढतया त्वया । इति निर्भर्त्सिता राजा तस्याजवनगृहे । सा च हानिं यमौ पापा न च हानिं
यमौ नृपः । महालक्ष्म्यपचारेण सा राज्यपजलवर्जिता । भ्रममाणा वने तस्मिन्न्लक्ष्वि विद्धति मानुषान् । विंध्यवतीवने तत्र ऋषेः कुमसविदाश्रमं
ददर्श मृगामं कीर्णे शांतं ह्रस्व मृगान्वितं । तत्रापश्यद्वने रम्ये वसिष्ठं मुनिपुंगवं । ववंदे वरगौतमस्य विमं त्वा दुःखकर्षिता । निरंध्यात्वा सु निस्त
स्यात्वात वान्दुःखकारणं । महालक्ष्म्यपचारेण ज्ञातं विज्ञानचक्षुषा । तद्धृते कारयामास तस्या दुःखोपशांतये । तद्दुःखं तत्क्षणाद्देव विनष्टमभ
वत्तदा । पुनश्च मृगयासक्तो भूपालो वनमाविशत् । कंचिन्मृगं समाविध्य बाणेनैकेन बाहुमान् । अन्वगच्छन्मृगपदं तस्याश्रममुपागमत्
। वरं मुनिं ददर्शाग्रे वशिष्ठं वीतकल्मषं । कृत्वातिथ्यक्रियो दृष्ट्वा चरंतीं बहिरंतिकात् । हावभावविलासाद्यैर्हरंतीं हरिणेक्षणां । मंदं निर्गस्य नृपतिः प्रो राम॰
वाच मधुरं वचः । वामोरु कासि कल्याणि किमर्थं चरसे वने । किन्नरी मानुषी वा त्वं यक्षिणी वा शुहासिनी । किमन्यद्बहुनोक्तेन भजमानं भजस्व २५३

253A

मां। नृपेणानेन भर्त्रा त्वां मास्मिता वाक्यमब्रवीत्। उत्तर्भजामि नाहं त्वां मवेहि महिषीत्व। महालक्ष्म्युपचारेण त्वया हीनाव सामुहं। मुनीश्वरा श्वमे
रमेत हस्तुल्लोप शोभितो मम मो परि कृपा विस्रो महालक्ष्मीव्रतोत्तमं। कारयामास विधिवत् सर्वदुःखोपशमं तथा। तपोक्तं वचनं श्रुत्वा हर्षोद्गद्गदलो
चनः। कृषेश्च स्तामाहात्म्य त्रियामा सायसत्तरः। महालक्ष्मीप्रसादेन सतिविधिः सर्वसंपदां। एवं प्रभावा सा देवी नराणामिष्टदायिनी। सर्वपापह
राहे वी सर्वदुःखापहारिणी। एवं षोडश वर्षे तु कर्तव्यं व्रतमुत्तमं। यः करिष्यति तं मन्त्यासयं सिद्धिः प्रसेवते। लोकपालाश्च पुष्यंति दारा सादव
मनोरथान्। नारी वा पुरुषः करिष्यति मुदा भक्त्यात्र तं यलतः सेवंते हरिरुद्रपद्मजमुखाः पुष्यंति तस्यात्रियं। तस्मादं परितं जपं ति मनुजा मो
लिप्रभामंडलैः तास्मिन्नेव कुटुंबिनी वसति सा लक्ष्मीः स्वयं विष्णुना। स हृत्वा वाप्यभक्त्या वा कुर्वते व्रतमुत्तमं। अनन्तकालं स्वयं विष्णुः संसारात्परि
रक्षति यद्वदं श्रूणुयान्नित्यं श्रावयेद्वा समाहितः। न तं सजति तं लक्ष्मीर् लक्ष्मी नैव संसदे त्वा। सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते। इति महा
लक्ष्मीव्रतं। अथ महालक्ष्मीव्रतं लोकप्रसिद्धं भविष्योत्तरपुराणोक्तं। युधिष्ठिर उवाच। स्वस्थानलाभपुत्रायुः सर्वैश्वर्यप्रदं परं। व्रतमेकं समा
चक्ष्व विद्यायं पुरुषोत्तम। श्रीकृष्ण उवाच। पुरावृत्तहेतुपपरीक्षामेत्रि विष्टपे। एतद्देवकृतं सासोदे वेंद्रः प्राह नारदं। इंद्र उवाच। गतास्वाराज्य

जय.
२५४
254

मुच्यतइति॥ परदारपरद्रव्यपरद्रोहपराङ्मुखः॥ गंगामनुकरं ते कदा गरामसमाम पंपावयिष्यति॥ इति श्रीवैश्वानरनारदसंवादेदशपापहरा पाः॥ श्रीगंगायाध्यानार्चनविधिः

जय.कं. ।।एवं ध्यात्वा नाभेनविधिं विधाय पश्चाज्जलीतरोस्थित्वा ज्येष्ठे मासि सिते पक्षे प्रतिपदमारभ्य दशमीपर्यंतं दशविधपापप्रणाशनार्थं प्रतिदिनं मुनगोत्रस्व धार्य दशहरास्तोत्रजपम

२९१ हं करिष्य इति संकल्प्य पठेत्।।ब्रह्मोवाच।।नमः शिवायै गंगायै शिवदायै नमो नमः।।नमस्ते विष्णुरूपिण्यै ब्रह्ममूर्त्यै नमो नमः।।नमस्ते रुद्ररूपिण्यै शांकर्यै ते नमो नमः।।सर्वदे

291 वरूपिण्यै नमो भेषजमूर्त्तये।।सर्वस्य सर्वव्याधीनां भिषक्श्रेष्ठ्यै नमो नमः।।स्थाणुजंगमसंभूतविषहंत्र्यै नमो नमः।।संसारविषनाशिन्यै जीवनायै नमो नमः।।तापत्रि

तयसंहंत्र्यै प्राणेश्वर्यै नमः।।शांतिसंतानकारिण्यै नमस्ते शुद्धमूर्त्तये।।सर्वसंशुद्धिकारिण्यै नमः पापारिमूर्त्तये।।भुक्तिमुक्तिप्रदायिन्यै भद्रदायै नमो नमः।।भोगोपभो

गदायिन्यै भोगवत्यै नमो नमः।।मंदाकिन्यै नमस्तेस्तु स्वर्गदायै नमो नमः।।नमस्त्रैलोक्यभूषायै त्रिपथायै नमो नमः।।नमस्त्रिशुक्लसंस्थायै क्षमावत्यै नमो नमः।।त्रि

हुताशनसंस्थायै तेजोवत्यै नमो नमः।।नंदायै लिंगधारिण्यै नारायण्यै नमो नमः।।नमस्ते विश्वमित्रायै नंदिन्यै ते नमो नमः।।छहल्यै ते नमस्तेस्तु लोकधात्र्यै नमो नमः

।।पृथ्व्यै शिवामृतायै च सुवृषायै नमो नमः।।परापरशताढ्यायै तारायै ते नमो नमः।।पाशजालनिकृंतिन्यै अभिन्नायै नमो नमः।।शांतायै च वरिष्ठायै वरदायै नमो नमः।।उस्रा

यै सुखजग्ध्यै च संजीविन्यै नमो नमः।।ब्रह्मिष्ठायै ब्रह्मदायै दुरितघ्न्यै नमो नमः।।प्रणतार्तिप्रभंजिन्यै जगन्मात्रे नमो नमः।।सर्वापत्प्रतिपक्षायै मंगलायै नमो नमः। राम:

शरणागतदीनार्तपरित्राणपरायणे।।सर्वस्यार्तिहरे देवि नारायणि नमोस्तु ते।।निर्लेपायै दुर्गहंत्र्यै दक्षायै ते नमो नमः।।परापरपरायै च नमस्ते मोक्षदे सदा।।गंगे ममाग्र २९१

291A

तोभ्यां गंगे मे देवि रक्ष रक्ष नः ॥ गंगे मे पार्श्वयोरेधि त्वयि गंगेस्तु मे स्थितिः ॥ आदौ त्वमंते मध्ये च सर्वं त्वं गांगते शिवे ॥ त्वमेव मूलप्रकृतिस्त्वं हि नारायणः परः ॥ गंगे त्वं परमात्मा
च शिवस्तुभ्यं नमः शिवे ॥ य इदं पठते स्तोत्रं भक्त्या नित्यं नरोपि यः ॥ शृणुयाच्छ्रद्धया युक्तः कायवाक्चित्तसंभवैः ॥ दशधा संस्थितैर्दोषैः सर्वैरेव प्रमुच्यते ॥ रोगस्थो मुच्यते
रोगादापद्भ्यश्च प्रमुच्यते ॥ सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते ॥ इमं स्तवं गृहे यस्तु लेखयित्वा विनिक्षिपेत् ॥ २२ ॥ नाग्निचोरभयं तत्र पापेभ्योपि भयं न हि ॥ ज्येष्ठे
मासि सिते पक्षे दशमी हस्तसंयुता ॥ २३ ॥ संहरेत्त्रिविधं पापं बुधवारेण संयुता ॥ तस्यां दशम्यामेतच्च स्तोत्रं गंगाजले स्थितः ॥ यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः ॥ सो
पि तत्फलमाप्नोति गंगां संपूज्य यत्नतः ॥ २४ ॥ पूर्वोक्तेन विधानेन यत्फलं संप्रकीर्तितं ॥ यथा गौरी तथा गंगा तस्माद्गौर्यास्तु पूजने ॥ विधिर्यो विहितः सम्यक् सोपि गंगाप्र
पूजने ॥ यथा शिवस्तथा विष्णुर्यथा विष्णुस्तथा ह्युमा ॥ उमा यथा तथा गंगा चतूरूपं न भिद्यते ॥ विष्णुरुद्रांतरं यच्च श्रीगौर्योरंतरं तथा ॥ गंगागौर्यंतरं यच्च यो ब्रूते मंदधी
स्तु सः ॥ रौरवादिषु घोरेषु नरकेषु पतत्यधः ॥ अदत्तानामुपादानं हिंसा चैवाविधानतः ॥ परदारोपसेवा च कायिकं त्रिविधं स्मृतं ॥ पारुष्यमनृतं चैव पैशुन्यं चापि सर्वतः ॥ अस
म्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधं ॥ परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनं ॥ वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतं ॥ एतानि दश पापानि हर त्वं मम जाह्नवि ॥ दश
पापहरा यस्मात्तस्माद्दशहरा स्मृता ॥ एतैर्दशविधैः पापैः कोटिजन्मसमुद्भवैः ॥ मुच्यते नात्र संदेहो ब्रह्मणो वचनं यथा ॥ दशत्रिंशच्छतान्सर्वानपि पितॄनथ पितामहान् ॥

जयन्तः
२९२
292

इद्धरामेव संमार्गानंतैर्गणानेन नरः जितः॥ ३५॥ ॐ नमो भगवत्यै दशपापहरायै गंगायै नारायण्यै रेवत्यै शिवायै दक्षायै अमृतायै विश्वरूपिण्यै नंदिन्यै ते नमो नमः॥ ज्येष्ठमा
सि सिते पक्षे दशम्यां बुधहस्तयोः॥ गरानंदव्यतीपाते कन्याचंद्रे वृषे रवौ। दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते॥ सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां करधृतकलशो
घत्सोत्पलाभीत्यभीष्टां॥ विधिहरिहररूपां सेंदुकोटीरजूटां कलितसितदुकूलां जाह्नवीं तां नमामि॥ आदावादिपितामहस्य नियमव्यापारपात्रे जलं पश्चात्पन्नगशा
यिनो भगवतः पादोदकं पावनं॥ भूयः शंभुजटाविभूषणमणिर्जह्नोर्महर्षेरियं कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते॥ विष्णुपादाब्जसंभूते गंगे त्रिपथ
गामिनि॥ धर्मद्रवेति विख्याता पापं मे हर जाह्नवि॥ इति श्रीस्कंदपुराणे काशीखंडे दशहरास्तोत्रं संपूर्णं॥ इति ज्येष्ठशुक्लदशमीकृत्यं॥ आषाढशुक्लदशमीमन्वादिः
॥ आषाढ्यामास्थितः शमीत्यक्तैः॥ अत्र चक्राद्यादिकं कर्त्तव्यमित्युक्तं प्राक्॥ अथ भाद्रपदशुक्लदशम्यामारभ्य विष्णोर्नीराजनं शावतारव्रतं॥ पुरविष्टिरवाच॥ ज्ञातं दश
वतारव्रतं छुड कहि मा द्विजा॥ संमंत्रेण समस्तं सर्वपापोपशांतिदं॥ श्रीकृष्ण उवाच॥ दशम्यां शुक्लपक्षस्य मासे प्रोष्ठपदे शुचिः॥ स्नात्वा जलाशये सम्यक् पितृदेवादितर्पणं
॥ कृत्वा तेसादि॥ मत्स्यं कूर्मं वराहं च नरसिंहं त्रिविक्रमं॥ रामं रामं च कृष्णं च बौद्धं चैव सकल्किनं॥ गतो ममेश शरणं देवं हरिं नारायणं विभुं॥ प्रणतोस्मि जगन्नाथ समे भव सुःप्र एम:
सोदत्त॥ इत्यनेन मंत्रेणापज्जनेकर्यात्॥ सर्वं वर्षं दिने तस्मिन्नेव वर्षाणि वै दश॥ अथ नैवेद्यः॥ अपूपघृतपक्वामारमोदकमोहाल्वं तंडवेष्टककोकरसमअकेषु २९२

292A षकर्णौ वेष्टमंडकेषु प्रतिवर्षमेकैकं कृत्वानि वेदयेत् ॥ दशात्मनो दशाहरेद्दशविप्राय दापयेत् ॥ क्रमेणाभक्ष्ययेद्दत्वा यथोक्तविधिना नृप ॥ ॐ ह्रीं दुं विद्धवेदेयमर्घोयं वरदे
जातये ॥ ततो पाद्यमिच्छोपाद्भ्नात्वा स्वेजलाशये रुमादि ॥ इति मात्स्ये पद्देशहरादशमामास्यदशावतारव्रतं ॥ अथाश्विनशुक्लदशम्यां तु मांदेवीमं पश्चाद्विसर्जनं कृत्वा पारणा
कुर्यात् ॥ देवीपुराणे ॥ ततः प्रातः पूजयित्वा दशम्यां विधिपूर्वकं ॥ संप्रेष्यां तु कर्तव्यं गीतवादित्रनिःस्वनैरिति ॥ विसर्जनविधिस्तु नवरात्रप्रकरणे उक्तं बलिविधौ तथ ॥ अ
थ नवरात्रपारणानिर्णयः ॥ मात्स्ये दशम्यां कार्या ॥ आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकं ॥ प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥ नवमी तिथिपर्यंतं वृद्ध्या पू
जाजपादिकमिति ॥ प्रागुक्तवचनैर्नवमीपर्यंतं पूजाविधानेपवासादेर्थांगत्वेन तत्समर्पितत्वात् ॥ पावछ्छब्दो भिन्नामो ॥ देवीपुराणेपि ॥ उत्तरेण नवम्यां तु बलिना पूज
येद्द्विवौ ॥ श्रवणे न दशम्यां तु प्राणीपत्य विसर्जयेदिति ॥ तत्रैव ॥ महानवम्यां पूजेयं सर्वगमोक्षप्रदायिनोत्पन्नेश्वा ॥ न्वावक्त मास्या तोपि नवम्यासु पोष्यत्ना च ॥ प
द्धदेवीपुराणे ॥ कन्यासंस्थे रवौ शुक्ले शुक्लामारभ्य नंदिकां ॥ अयाचीत्यथवैकाशी नक्ताशी तथवा घृहः ॥ इति व्रतवन्नुष्टयमुक्तं ॥ तत्र होमादिमार्गविषये ॥ लोहा
भिसारिके कर्मकार्ये घावदृष्टमीमिति भविष्ये ज्ञ ष्टमीपर्यंतं तो तेः ॥ येपि अष्टमां जागरकं यन्नवम्यां पारणं तथा ॥ दशम्यां च विसर्गः स्याद्रमिषेकश्च माधवोद ॥ नवम्यां
वा विशालाक्षि कार्यो होमादिका क्रियाः ॥ पारणा च प्रकर्तव्या तद्देवीपूजनपूर्वकमिति ॥ वचनो ॥ पान्मापि निर्णयदीपे ॥ आश्विने शुक्लपक्षे तु नवरात्रमुपोषितः ॥ नवम्यां

जय·कं पारणं कुर्याद्दशमीमिश्रितां न वेत्। दशम्यामिश्रितायां तु पारणे नवमी भवेत् तत्र प्रजन्मकृतं पापं तत्क्षणादेव नश्यतीति तथा। यो मोहात्सारणं कुर्याद्दशमे दिवसे विमो
२९३ हात्। तद्दानं नाशमाप्नोति विद्धमिश्राद्दशमीं यदि भवेत्। रूपहीनं भवेद्राष्ट्रं दशम्यां पारणे कृते। तस्मात्तु पारयेद्देवि नवम्यां भक्तितत्परः। नवम्यां पारिते देवि कुलवृद्धिः प्रपद्यते। द
293 शम्यां पारिते देवी कुलनाशं करोति वै। तस्मात्तु पारणं कुर्यान्नवम्यां वसुधाधिप यस्मा देह पामलं देवी दुर्गा णाववनानि तानि पि लोहाभिसारिका विषयाणि। अ
पवायदाष्टमीविद्धा नवमी त्रिमुहूर्ता लभ्यते तदा पूर्वैन नवम्यां नवमीक्षये जाते द्वितीयनवम्यां पारणादि द्वितीये दशमीमिश्रितां न वेदित्यनेन तत्तु नवम्यां नवमं
ते प्रायाथाः पारणाया बाधेन नवमीमध्य एव विधानं यद्दुर्गाभक्तानां दीपाक्ति विषयमिति केचित्। तरलानला श्चा। निर्णयामृते तु नवमी पारणाविधायकानि वचनानि
हेमाद्र्यादि विरुद्धत्वान्निर्मूलानि। मम ल तेपि यद्याहं नद्द्येन नवमी तदा द्वितीयदिने निर्ध्यंते पारणानं विंदन नवमीमध्ये कार्यं सर्वं नेयानि। शिवरात्रिपारणावदिति
मध्यपवमप रवासिद्धांतः। दीक्षितास्तु नवमी पारणमेवाहुर्गौडाः। अन्नयया कुलाचारव्यवस्था। अथ राजा रिपक्षाः सूत्रके पारणाविचारश्च नवरात्रिप्रकरणे
वोक्तः अश्वयमेवा विजयदशमी। तस्मान्नवमी युक्ता यां अपराजिता। युक्ता यां वा पराजितां संयप अपस्थानं कार्यं तत्र तत्सा गामर्मसुख्यो जाम्बे नशक्त पत्रं पत्र कामसदशम्यां ग्रस्म·
उत्तरनैः सम्म कृ पूजनीया पापराजिता। ऐशान्यां दिशि माध्ये सत्य अपराह्ने प्रयत्नतः इति। तथा। याम्यां नवमी युक्ता तस्यां पूज्यापराजिता। क्षेमार्थं विजयार्थं च पूर्वोक्तविधि २९३

293A

विनानैरेऽनवमी शेषयुक्तायां दशम्यामपराजिता। स्दद्यातिविजयं देवी पूजिता जयवर्द्धिनी॥ इति॥ तथा॥ आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः॥ एकादश्यां न कुर्वीत
पूजितं चापराजितामिति॥ तथा। श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः। उल्लंघयेयुः सीमानं तद्दिनर्क्षे ततो नराः॥ इति। पूर्वदिने श्रवणयोगा
भावे परदिने वा लाभात एवामीनो यहापरैवा॥ तथा च हेमाद्रौ व्रतकांडे कश्यपः। उदये दशमी किंचित्संपूर्णैकादशी यदि। श्रवणर्क्षं यदा काले सा तिथिर्विजयाभि
धेति॥ पूर्वीयामिति तत्पारणामहनालोकानेपराह्णे परदिने त्वपराह्णे श्रवणाभावेऽपि तत्सर्वपक्षे पूर्वेति निर्णयामृते। तत्सत्वे च सा संपूर्णैकादशीति वचनात्तदा दशम्या
ः कर्मकालव्याप्तिर्नोपपद्येत॥ उत्तरदिने श्रवणयोगाभावे सर्वपक्षे पूर्वा दशमी। तज्जनैः सम्मिलितापूर्वोक्तवचनेऽपराह्णस्य कर्मकालत्वाभिधानादिति॥ दशम्यां यस्मा
त्सु लंघय प्रस्थानं कुरुते नरः॥ तस्य संवत्सरं राज्ये न क्वापि विजयो भवेदिति॥ स्कान्दे च वने दशम्यामेव प्रस्थानं न त्वालस्यादिना तामुल्लंघ्य एकादश्यामिति नियमार्थं नव
मीयुक्तत्वमभ्यनुज्ञां श्रवणासंभवे अयं च श्रवणासंभवे एव वेदितव्यः॥ श्रवणादशमीयोगस्य प्रशस्तत्वात्॥ श्रवणर्क्षे तु पूर्वायामित्युक्तेः महत्तरलेख्ये वै॥ श्रवणान
वम्यां पूर्वाभावे तत्केवलायामेव कार्यं तदुक्तं लल्लेन। तिथिः शरीरं तिथिरेव कारणं तिथिः प्रधानं तिथिरेव साधनमिति॥ दीर्घकृत्ये यमम पूर्वयोरुक्तं द्वयं न सत्वोद
यव्यापिनी ग्राह्या। तदुक्तं ज्योतिर्निबंधे लल्लकोशेन नारदेन॥ ईषत्संध्यामतिक्रान्तः किंचिदुद्भिन्नतारकः। विजयो नाम कालोऽयं सर्वकार्यार्थसाधकः इति॥ सितामधा॥

जय॰कं॰ वपि॥ आश्विने मासि सिते पक्षे दशमी तारकोदये॥ विजयो नाम कालोयं सर्वकार्यार्थसिद्धये इति॥ निर्णयसिंधौ॥ अपराह्णो तु सुस्वः कालः॥ तत्रैव यज्ञपार्श्वः प्रदो
२९४ षेणाणाः तत्र दिनद्वये अपराह्णव्यापित्वे पूर्वा प्रदोषव्याप्त्याधिक्यात्॥ दिनद्वये प्रदोषव्यापित्वे परा॥ अपराह्णव्याप्त्याधिक्यात्॥ श्रवणर्क्षस्य हि गौणत्वं दशमीप्रयोजकः
294 ॥दिनद्वये पराह्णैकदेशे पूर्वा॥ पूर्वेद्युः प्रदोषे तत्र चापि परदिने तु अपराह्णे श्रवणमत्वे पूर्वेति स्थितिः॥ अत्र यत् श्रवणस्य गौणत्वं दशमीप्रयोजकत्वमुक्तं तन्मदे हेष्टान्ता
पिहेतुः॥ तन्मते प्रथमे श्रवणे न गौणत्वं तत्का का तत्र यत्राभिषेचने तद्भवेत्तत्र दिवसे दशमी शुक्ला पूर्वविद्धा न कार्या श्रवणेनापि संयुक्ता॥ राज्याभिषेचने सु
यौ दिव्ये पन्ह प्राज्ञ नस्यते दशमीति तिथिः॥ आश्विने मासि शुक्ले तु विजया तां विदुर्बुधाः इति ज्योतिर्निबंधे नारदोक्तेः॥ दीप्तितो यम प्रसंवादेन दूर्येतां रकोदयकाला
भावे परदिने एकादश मुहूर्ते यात्रादिकार्ये॥ आश्विने मासि ते पक्षे दशमां सर्वेणा शिष्य॥ मार्यकालेषु मा यात्रादिना विजयदायी॥ एकादशो मुहूर्तो पि विजयः
परिकीर्तितः॥ आश्विनस्य वैदिधा तथा यात्रा विजयकांक्षिभिः॥ इति स्मृत्यंतरोक्तेः॥ पापदिने एकादशमुहूर्ते व्याप्त्यभावे पि श्रवणयोगश्चेन्नै दैवयात्राकर्तव्या पूर्वा उदयैवेदं
न एवरूदयेदशमी कित्वित्यादि पूर्वोक्तप्रत्वेव न नादिसंतो॥ अस्यामेव दशम्यां राज्ञा अस्या निर्के विधिं कुर्यात॥ तत्र यथा अथातः प्रस्थानं व्याख्यास्यामो जन्मेषु ग एम॰
मिथुन्तु पार्थिवावान मप्तमाउंऽभय स्सुवर्णा॥ आश्वापवाहयेन हक्षालेष्ट तारा स्वदंतउदगयनेपूर्वपक्षे प्रशस्तनक्षत्रे केशश्मश्रुलोमनखानि वापयित्वा संभारान् २९४

294A

पक्वान्नैर्मेनेन मुहूर्ते सुपरमभावाय शांतिभूतिमां कारयित्वा वोदारं ते नाभिषेचेत् यथोक्त मंजनां जनानुलेपनानि कारयित्वा वासोगंधान्नजश्चाव ध्वस्त्र स्थाता
रत्यपश्चिमा कर्तॄना लम्भजुहोत्तमपेपाजितागृध्वं समयनेः शमेवर्ममिजेनवेदनेश्च जपार्थिवसेतिमाप्रणामेतिन हुत्वा आगच्छता तसं ती दस्या
लोपाके नेष्ट्वा ज्ञातिश्च जिहुरनेह्यान्नजवेरातिपयानमास्थायजपरिमापाद्यं पतरंध्वा तामिदं मानोविदन्नमयसोमो वज्ञमति नेः पापिपात्सपश्चात्ते
वीतविहुञ्जमान्यो लेन्यारि अपराजितापञ्जनारैकैद्वनवगत्रप्रकाराणवशान्तत्रैवोक्तं॥ रमांश्चनशुक्लादशमोक्तत्वं॥ अथकार्तिकशुक्लादशम्यांवा
प्रागाणक्तेसार्वभौमव्रतं॥ सार्वभौमव्रतंवान्यत्कथयामिसमासतः॥ सनसंमकश्वेतनाशसार्वभौमोभवेन्नृपः॥ कार्त्तिकस्यतुमासस्यदशमीशुक्लपक्ष
गा॥ तस्यांनक्ताशनोनित्यंदिक्षुशुद्धबलिंहरेत्॥ शुद्धबलेः॥ पवित्रद्रव्यैः पूजोपहाराः॥ विचित्रैः कुसुमैर्मत्स्यैःरजपेचाह्रुजीनतथा॥ सर्वाभवत्यःसिद्धत्रम
मजन्मनिजन्मनि॥ भवतामिदिशरस्यर्थं एवमुक्त्वाबलिंतासुदत्त्वाशुद्धेनवेतमा॥ ततोदेशजेभुंजीतदध्यन्नेवहसंस्कृतं॥ पदेपश्चापथपेष्वेवएवंसंवत्सरंन्नया॥
यःकरोतिनृपानिसंततस्यादिग्विजयोभवेदिति सार्वभौमव्रतं॥ अथकस्मोनिषुक्लादशम्यामारभ्यभविष्योत्तरोक्तमाशाद्शमीव्रतं॥ युधिष्ठिरउवाच॥ राज्याश
यामाजयन्नःकृष्यपत्तस्तपोवलः॥ नारीणांयोर्थवाणिकपत्रःप्रत्रार्थेगुर्विणीतथा॥ धर्मकामार्थसंसिद्धैलोकाःकन्याकार्थिनी॥ यष्टुकामोद्विजश्चागोगोश्च

जय.क.
२९५
295

योयमेवस्या॥ त्रिषष्टवासितेनकांतेवालेह्यंभ्रनिपाडितोएतेषुनेषुकर्त्तमासाशात्रतामिदंतयातमा घसमभेवेद्याजिः कायंतेननतदाव्रती॥ शुक्लपक्षेदशमांतुस्त्रातास
यज्यदेवताः॥ नक्तमाशमक्तपञ्जाव्रेपुष्पालक्तवांचंदनैः॥ महांगणेनेरवयित्वायवैः॥ पिष्ठतकेनवा॥ स्त्रीरूपाश्वाधिदेवमश स्त्रवाहनमान्दिताः॥ अधिदेवम
न्तादित्याल सेद्धादेस्तमस छस्त्रेवाहनेश्चविन्हितालेवयित्तेसर्वः॥ हुत्वा घृताक्तैनेवेघपयकदीपोपस्थापयेत॥ फलानिकालजातानिततः कार्यानिवे
दयेत॥ आशाः स्वाशाःमरामेतरामिथ्यंतामेमनोरथाः॥ भवतीनांप्रसादेनसदाकल्याणमस्त्वितिएवंसंपूज्यविधिवद्दत्वाविप्रायदक्षिणां॥ अनेनक्रमयोगे
नमासिमासिसमाचरेत॥ वर्षेमेकेकृत्वाततः पश्चात्समुद्यापयेत॥ अर्वाकसंवत्सरात्सापिमासेद्वादशेवासमुद्यापयेत॥ मोदकाः कारयेद्वादशगोधूमाःसिद्धतके
न्वा॥ ग्रामितंबकुजनैःमाड्स्नातःसम्यगलंकृतः॥ पञ्चाः प्राक्सम्यगेनमंत्रेरामिर्गस्ताममा॥ तत्रयेषमान्विहितःशक्रः हाम्हानमरूद्दन्तः॥ पर्वोक्तसुवर्न
स्मामुर्एंद्रि दिग्ंस्वतेनमः॥ अग्नेःपरिग्रहाशेत्तमायेपीतियघमं॥ तेजोरूपाप्रशक्तिाग्नेयोवृदाभव॥ धर्माद्दत्ताममाश्रित्रस्यलोकान्संयमयसमो॥
तेननसंयममीवापिमामेस्वस्त्यामृद्दाभव॥ रक्षोहस्तातिवेष्ठतानिर्क्रतिस्तांसमाश्रिता॥ तेननिर्क्रतिनामासिसमाशौप्रययस्वमे॥ तप्याज्जेभुवनोधारवरुणाया ग्राम.
यादसांपतिः॥ कामार्थेममधर्मार्थेवारुणीप्रवणाभव॥ अधिष्ठितासियप्मात्तवायुनाजगदायुना॥ वायवेतमतः शौतितिंनित्यंयप्रछममालये॥ धनदेस्वामिषु २९५

295A

तामिस्रप्रथमातातमिहोत्तमा ॥ निःसृता यमवश्म्याह्रदलामघोमनोपयोगेशानोज्ञग्रसेशनशंमनात्मलेच्छता ॥ एरयत्वाशुमेदेवि बोधिष्ठितानिनमोनमः ॥ भुजंगाः पञ्चजे
नत्वैमे स्त्रियामिर्यता हृष्ट्वा ॥ नागा मनामिः साहितामहितामवमपावे ॥ सर्वलोकापरिगतामर्वदालोशिवा पूर्वा ॥ सनकाघैः पारिरुतामात्मेमोपाहिमर्वदा ॥
नक्षत्राणिवमवामाग्रहास्ताराणगणास्तथा ॥ नक्षत्रमातरो याश्च मूतप्रेतपिशाचकाः ॥ सर्वेमम भेषज्यं सिध्यर्थं भवंतु प्रवणाः ॥ भद्रा ॥ एभिर्मंत्रैःसमभ्यर्च्य पुष्प
धूपादिभिस्ततः ॥ वासोभिरभिमंस्काधपफलानिविनिवेदयेत् ॥ ततोवेदिविनादेनगीतवादित्रमंगलैः ॥ नयेतीमिवेश्रद्धामिजीयतां चनिशानयेत् ॥
ततःप्रभातेतामुहूलहानमानादेभिःसुव्रे ॥ प्रभातेत्वरा द्विजेभ्यः प्रणाप निवेदयेत् ॥ अनेनविधिनामर्वेद्यमाप्नोपियत्नतः ॥ भजोतामिनमहितःस्रष्टेवोज
नेनव ॥ यएवंकुरुतेपार्थ दशमीव्रतमादरात् ॥ सर्वान्कामानवाप्नोतिमनसोभिमतान्नरः ॥ स्त्रीभिर्विशेषतःकार्यंव्रतमेतद्युधिष्ठिर ॥ प्राणिवर्गोपतानार्य
श्रद्धाकामफलायताः ॥ धन्यंयशस्यमायुष्यं सर्वकामफलप्रदं ॥ कथितं ते महाराज मया व्रतमनुत्तमं ॥ येमानवा मनुजपुंगव कामकामाः संपूजयंति द
शमीषु सदा दशाशाः ॥ तेषां विशेषनिहितान्हृदयेभिकामानाशाः फलंसफलमत्र बहूनाददेतेन ॥ इतिश्री शादशमीव्रतं ॥ अथ सर्वदशम्यामनुष्ठपमाराप्यव्रतो ॥
मनतुमाज्ञवाना ॥ अथत्रेशस्मा ॥ विप्रर्षेदशमीव्रतमनुत्तमं ॥ सर्वरोगाणिशमनेसर्वपापप्रदशमे ॥ व्रतमेतन्महाबाहो कार्यं मयमिष्ठता ॥ सर्वदा कार्ये

जय॰ कां
२९६
296

मेतद्विलिप्तताङ्गी विततेरे॥ उपवासश्च कर्तव्यो नवम्यामपि सुव्रत॥ दशम्यां च कृतस्नानो मंगलाय तनेहरिं॥ देवमिंदिरयामार्थ्यं आनावजगतीपतिं॥ इंदिरा
लक्ष्मीः॥ वैनतेयभुजासक्तं वनमालाविभूषितं॥ शंखचक्रगदापद्मशार्ङ्गासिधनुसुतमं॥ फलैश्च मधुरैः पुष्पैः पायसेन समर्पयेत॥ अग्रतःस्थापयेत्कुंभं नी
र्पितो येन परितः॥ तस्मिन्नावाहयेत्सर्वं चक्रादीनायुधानपि॥ चक्रादीनि॥ चक्रगदाशमलधनुःखड्गान्निरातिहेमाद्रेः। पत्रपेटकमुख्येस्तु पुण्डान्नेन समाहि
तैः॥ द्वाराणामाचार्यान्त्वेनार्जयेद्ग्रामरायेत्परिजनोपगे॥ तस्मिन्नष्टदलं पद्मं मध्ये वर्णाहि विभावयेत्॥ मनः षष्ठानींद्रियाणि प्राणां बुद्धिं दलेषु च॥ कर्मणिका पातथा काल
कर्मणो वंसमर्पयेत्॥ मनः श्रोत्रं त्वक् चक्षुः जिह्वा घ्राणी प्राणो बुद्धिरिति क्रमः पूर्वादिदलेषु॥ अनामया नींद्रियाणि प्राणाश्च बुद्धिस्तथा॥ अनात्मकाला
वेमवाहृः सर्वे संस्तुनिरुपद्रवाः॥ मनसा कर्मणा वाचा वामया जन्मनि जन्मनि॥ संचितं सर्वपापं तेनः कालात्मा भगवान्हरिः॥ एवं संप्रार्थ्य गुरवे सदक्षिणामुपस्करां॥ दत्त्वा
ब्राह्मणान्भोजयित्वाद्यात्पारणां भवा मे गा मासाभ्यकैः संस्थाप्य तां वशिष्टेनान्नेन गुर्वन्तराप्य सांबांधवैः सह भुक्तानियमाश्चसृजेत्त। एवं कृते द्विषभा
गेप्यभवति॥ इति श्रीस्कन्दपुराणे माहात्म्ये॥ मार्कण्डेय उवाच॥ न तदृक्षे न च संसारः कालः कामो भवेन्निष्ठया॥ कल्याणमनुजो विप्रा मम मासश्च तेरश॥ क राम॰
रवानं मनुजः एवं कविश्वेदेवाः समायाता दशान्मा केशवो विभुः॥ तस्मात्संपूजनं कार्यं मित्रपक्षेन गाविया आरम्य कार्तिकामासाद्दशम्यां सुनिमन्त्रमासं उल्ले २९६

296A

पश्चाग्रेषु परिवार्वोह्मपाद्वा गंधमाल्यान्नमस्कारधूपदीपान्नसंपदा॥ त्रयों प्रतिमा॥ व्रतं ते कनकं घा घयाशक्ति द्विजातये॥ कृत्वाश्नं केवलमेतद्दिव्यं प्राप्नोति तेषां ह
विंतु लोकान्॥ तत्रोष्मकाले शुभ्रव्रतमेतत्॥ जामेवेद्वा ह्माग्नुंगवोवा॥ इति विष्णुधर्मोत्तरे राज्यावाप्तिव्रतं॥ मार्कंडेय उवाच॥ आत्मा ह्यायमनोदक्षो मदः प्राणास्तथैव च॥
हविष्मांश्च गविष्ठश्च दत्तः सत्यश्च ते दश देवास्त्वंगिरसो नाम दशम्यां प्रपूजयेन्नरः॥ सोपवासः पूर्वपक्षे शुक्ले विधिना नरः॥ पूर्वपक्षे शुक्लपक्षे॥ पूर्वोक्तविधिना नित्यं ततो
ऽनो विधिना॥ कृत्वा व्रतं केवलमिसारेद्र॥ इति विष्णुधर्मोत्तरे ब्रह्मावाप्तिव्रतं॥ अथ पदार्थव्रतं॥ शुक्लपक्षे दशम्यां तु सोपवासस्तथा नरः॥ मार्गशीर्षादिथ्यार
भ्य यावत्समे वत्सरं यजेत्॥ ततो गंधमाल्यनमस्कारधूपदीपान्नसंपद्भिर्दिगीशपूजनं दिक्पूजनं च कुर्यात्॥ तत्रादिगीशा इंद्रादिरुद्रांता दशबोध्याः॥ वत्सरांते वि
प्राय पयस्विनीं गां दत्ते षट्कामं यात्रासिद्धं वा प्नोति॥ वामीडम्वर्के तस्मिन् रसशत्ते यात्रा तथा गौ विजिगीषतश्च॥ विद्यार्थिनो वापि सुनाशनार्थी हि तत्पदार्थव्रतमेतदुक्तं॥ इ
ति विष्णुधर्मोत्तरे पदार्थव्रतं॥ मार्कंडेय उवाच॥ शुक्लपक्षे दशम्यां तु सोपवासस्तु मानवः॥ धर्मं संपूजयेद्देवं सर्वलोकसुखावहं॥ मार्गशीर्षादिथारभ्य नियमे
नादरीं इदम॥ ततो गंधमाल्यनमस्कारधूपदीपान्नसंपदा संपूज्य तेन वन्हौ हुत्वा विप्रान् पूजयेत्॥ व्रतांते च पयस्विनीं गां दत्त्वाश्वमेधफलं प्राप्नोति॥ कृष्णपक्षे
तथाप्येतत्कृत्वा संवत्सरं व्रती॥ राजसूयमवाप्नोति कुलमुद्धरति सकौ॥ कृत्वा पक्षद्वयेप्येतद्धर्ममर्थं समं तम॥ राजसूयाश्वमेधाभ्यां फलं प्राप्नोत्यसंशयं॥ शुक्ला

जय॰ के॰ पीतद्रव्याणि द्विजेभ्यो दैनंति । त्रीणि व्रतानि । स्वर्गलोकमवाप्नोति कुलमुद्धरति सर्वं ॥ धर्मे मतिर्भवेन्नास्य धर्ममाप्नोति मानवः ॥ पञ्चयज्ञाभिजायेत तत्र धर्मे परो भवेत् ॥ आरोग्यमासु
२९७ खकाय शास्त्रज्ञानप्रदं पापविनाशकारि ॥ कर्त्तव्यमेतत्सततं च यैर्यथावत्पूज्यो हि विष्णुर्भगवान्समर्थः ॥ इति विष्णुधर्मोत्तरोक्तं धर्मव्रतत्रयं ॥ दशम्यां यम उद्दिष्टः सर्वव्या
297 धिहरो ध्रुवं ॥ मूलमंत्राः स्वनामाभिः अंगमंत्राश्च कीर्तिताः मूलमंत्राः प्रधानमंत्राः अंगमंत्राः परिवारदेवतामंत्राः स्वतिथौ शंकुलागंधादिभिः संपूज्याज्यसमित्क्षीरा
न्नैः दधिमात्स्यैकैर्होमं कुर्यात ॥ अत्रादौ पूजा ततो घृताक्तधान्यहोमस्तत आज्यधारादिहोमः ॥ इति भविष्यपुराणोक्तं यमव्रतं ॥ स्कन्द उवाच ॥ दशम्यामेक
भक्ताशी समाप्ते दशधेनवः आदेशश्चक्रीकर्णीर्द्यास्तारीह्यामहीपते ॥ तिलद्रोणोपरिस्थाः सार्वभौमो भवेन्नृप ॥ एतद्दिग्व्रतं नाम महापातकनाशनं ॥ इति
पद्मपुराणोक्तं दिग्व्रतं ॥ पक्षद्वयगतास्वेव सर्वास्वपि दशमीषु तिथिषु पूर्वोक्तः कः पूज्यः ॥ तदुक्तं ॥ दशम्यामंतकस्यापीति ॥ अथ सिद्धिविरुद्धादिकं लिख्यते ॥
दशमी गुरुवारेण सिद्धा ॥ यथा गुरौ दशमी पंचम्यादिवेति ॥ दशम्यां सोमवारेण क्रकचयोगः ॥ दशम्यां पंचम्यां चन्द्रे गमनविवाहयात्रादिकं कार्यमित्याद्युक्तमेव ॥ वृश्चि
कस्थिते सूर्ये दशमी दग्धा भवति ॥ दशम्यां क्षत्रियादित्रयो वर्णा अभ्यंगस्नानं न कुर्युः ॥ उक्तं च ॥ त्रयोदश्यां द्वितीयायां दशम्यामि सा हि अन्नं नालीशाकं नाद्यात् । राम॰
उक्तं च शीर्षकपालान्त्राणि मादि ॥ दशम्यामुत्तरदिशि गमने योगिनी संमुखा न कुर्यादिति दशमीनिर्णयः ॥ श्रीमद्दिल्लीशसेनोद्भदक्षिणबाहुदण्डमनुजेश्वसिंहस्थिते २९७

297A स्यापद्यरुक्ष्मकामितवरहमतीपालनेधर्मे राजपुत्रो पौनवष्ठ श्रीवत्सप्तसिंहालक्षितिपकुलनभोरविंह्यसिंहसप्तत्रःश्रीमानाज्ञापिताजोजयहारिरमराधीशवतीहस्त्रीमा
त॥ श्रीमत्सेडितदेवमहत्तनयश्रीगणेशोप्रिदुपयानावाप्रसममस्तकामानिवहःसंप्राह्नमलाकारःतडत्रैश्रीजयसिंहवर्मनृपतेः॥ एकादशांसर्तुमेगुरुंमहश
मीतिधेःसमकहुरुपत्रुधान्हादकेरतिदेवमहात्मजपौंडरीकयाजिरलाकाविरविततजयसिंहकसहुमोघातेदशमीनिर्गायोनामैकादश॥ तबक॥ समा
प्त॥ अथैकादशीनिर्णयप्रतो॥ तत्रशुक्लाकृष्णैकादश्योःध्याने॥ एकादशीवृषस्यातुनीलसुश्राविशलिनी॥ तामस्त्रवर्णाधात्रहृष्टापात्रेवदैत्रमिपकन्या॥ एकादशीमहागज्व
स्यातुलाकर्तनेरिकापुत्रा॥ सिंहाननाऽगालाहुदिनीलानिसीनीपरेति॥ अथैकादशीमाहेमाहेमाहात्म्यभागे॥ मातेवमसवैबालानौओषधांतोमेगामेवा॥ रक्षांयेमर्वलोका
नोनिमेतैकादशीतिथिः॥ तथा॥ एकादश्यामुपवासीयः सधर्मःसवबुद्धिमान्॥ तथा॥ एकादशीपरित्यज्य योन्यद्व्रतमुपासते॥ कारस्थममहालंसत्कालोष्टंहिंसा
नते॥ तथा॥ एकामेकादशीवापिसमुपोष्यजनार्दनं॥ कामेनापिसमभ्यर्च्यसंप्राप्नुक्तिमाप्नुयात॥ पुराणांतरेतुतोयेनापिसमभ्यर्चेतिपाठः॥ पसंगाद्धायवालोमाहा
हेमाहात्रिरशाविपां॥ एकादश्यानमञ्जत्तामवेदशाद्दिमुच्यते॥ संसाराख्यमहाघोरादुःखिनांसर्वदेहिनां॥ एकादश्युपवासोयंनिर्मितःपरमौषधं॥ संसारोरगदष्टा
नांनागात्पापकर्मणां॥ एकादश्युपवासेनमघएवसदैवभवेत॥ नारदीयपुराणेनासिष्ठः॥ एकादशीसमंमुत्येनवान्हिनापातकेधने॥ भेस्मतायातिगजेंद्रआपेज

जय·कां श्वशतोद्भवं।तावत्स्थायाणि देहस्थानि तिष्ठंति मनुजाधिप।पापान्नोयवमेज्जेतः पद्मनाभदिने शुभे॥ अश्वमेधसहस्राणि वाजपेयशतानि च॥ एकादश्युपवास
२९८ स्य कलां नार्हंति षोडशीं॥ एकादशीं द्विपे पापं यत्कृतं भवता प्रभो॥ एकादश्युपवासेन तत्सर्वं विलयं व्रजेत॥ उत्पत्ति देहमाद्रौ दृष्टं यो॥ ब्रह्मवैवर्ते॥ सर्वेषामप
298 पि वर्णानां मिदं सन्मार्गग्रासकारकं॥ एकादशीव्रतं विप्र कुर्वन् मुक्तिमाप्नुयात॥ न गोदिने यदृशमिश्चतुर्थिकोरासघं॥ उपोष्यं पंचदशमं दिनं विष्णोर्हि मुच्य
ते॥ कलावस्मिन्न नृणां नो माहिं स्मापा विताम्नीए कादशीं विना विप्र न संशयः हिमोद्भ्याः॥ पद्मपुराणे॥ एकन्तः पृथिवीं दानमेकं जो हरिवासरः॥ न समं कविमि
ः श्रीको वासतरो स्यादि कोमतः॥ भविष्यपुराणे॥ एकादश्युभयपापो शक्तिरं नेता स्वस्थात्मिका॥ मातेन तिथिरूपेण दृष्टं ये कादशी मता॥ सनत्कुमारप्रोक्ते॥ ब्र
ह्मापापसहस्राणि ब्रह्मसहस्राशतानि वै॥ एकामेकादशी भक्त्या सम्यपोष्य शुचिर्भवेत॥ देवीरहस्ये दृष्टाणा यो पापं च विविधं प्रोक्तं पातकं चोपपातके
॥ लघुपातकं संच महापातकमेव च॥ एकादशीकं च तत्सर्वमेकादश्यामुपोषणात॥ विलयं याति तो यस्य यथा मन्त्रयज्ञोजने॥ सौरधर्मेषु॥ एकन्तत्था
प्रिहोत्रादि द्वादशीमेकतः प्रभुः॥ तुलया तोलयन्त्येद्द्वादशी वा विशिष्यते॥ देवीरहस्ये॥ गायत्री हयग्रासवैपापयं जामेदिनी॥ एकादशीतथा सर्वं पापप्रणा राम·
जरामेदिनी॥ स्कन्दपुराणे॥ अभोज्यभोजनाज्जातं अगम्यागमनाच्च यत॥ अपाज्यपाजनाच्चैव अभक्ष्याणां च भक्षणात॥ अस्पृश्यस्पर्शनाद्यच्च पावितायहा २९८

298A

रजः॥ ज्ञानाज्ञानकृतं पञ्चपातकं चोपपातकं॥ तत्सर्वं विलयं याति एकादश्यामुपोषणात्॥ वैष्णवतंत्रे॥ एकादशी महापुण्या विष्णोरीशस्य वल्लभा॥ तस्या
मुपोषितो यस्तु द्वादश्यां पूजयेद्धरिं॥ तस्य पापानि नश्यंति इत्यादि॥ स्कंदे मे विष्णुस्मरणात्पापो यः॥ यो द्वादशीमुपवसेत्यनिलाशभक्षो यथा स्वनेः स्तुकसुमेरु
गिमवैर्यांति॥ ते धौतपांडुरपटा निर्मिताजहंसाः संसारसागरजलस्य तरंति पारं॥ मत्स्यपुराणे॥ यः करोति नरो भक्त्या एकादश्यामुपोषणं॥ स याति विष्णु
सालोक्यं याति विष्णुः सहपत्नी॥ विष्णुपुराणे॥ ओंकारः सर्ववेदानां यथैवाघः प्रपूजितः॥ तथा सर्ववृतानां च द्वादशीव्रतमुत्तमं॥ इत्येकादशीमहिमा
॥ तत्रैकादश्युपवासो द्विधा॥ निषेधपरिपालनात्मको व्रतरूपश्च॥ तत्राद्यः॥ न शंखेन पिबेत्तोयं न खादेत्कूर्मसूकरौ॥ एकादश्यां न भुञ्जीत पक्षयोरुभयो
रपीति कौर्मे देवलाद्युक्तः॥ विष्णुरुत्तावपि॥ एकादश्यां न भुञ्जीत कदाचिदपि मानवः इति॥ नारदीयेपि॥ एकादश्यां न भुञ्जीत महाविघ्नप्रसक्तितः॥
इति॥ भविष्येपि॥ न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरे इति॥ अत्र न खादेत्कूर्मसूकरावित्यादिनिषेधसमभिव्याहृतत्वेनैकादश्यां न भुञ्जीत पक्षयोरुभयोरपी
त्यत्रापि निषेधपरत्वमेवाध्यवसीयते॥ न चैतद्वाक्येषु पर्युदासमकारणं व्रतशब्दस्याभावान्नाधिकरणादिति च्यवो॥ अतो भोजननिषेधोऽयं॥ व्रतरूपाश्च
त्यैवैतत्प्राप्तेः श्रीहरे नैवेद्यकविधायनियमनिशि॥ दशम्यामुपवासस्य प्रकुर्याद्वैकल्पं व्रतमिति॥ अन्यापि व्रतरूपत्वोपवासोपकानिवचनान्यमन्त्रेद्रष्टव्यानीर

जय० कौ० हंचाशिवभक्तादिभिरपि कार्यं तत्पाच हेमाद्रौ विष्णुधर्मोत्तरे। एकादश्यष्टमी चैव पक्षयोरुभयोश्चतुर्दशी॥ शिवसातिथयः प्रोक्ता मुनिभिः शौनकादिभिः॥ तासा
२९९ मापारणमुपवासो हि वानाघातथोक्तयारति। तथा॥ वैष्णवो वापि शैवो वा कुर्यादेकादशीव्रतमिति। एकादश्यामुपोषणं सौरैरप्यत्र चेष्यते॥ वैष्णवो वाथ शैवो वा
299 सौरोप्यतस्तमाचरेदिति सौरपुराणाभिधानात्॥ व्रतरूपोपि द्वेधा॥ नित्यः काम्यश्च॥ नित्यमुक्तो गारुडे॥ उपोष्यैकादशी नित्यं पक्षयोरुभयोरपीत्यादि॥
सनत्कुमारोपि॥ पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणमिति॥ नारदोपि॥ नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः। पक्षे पक्षे च कर्त्तव्यमेकादश्यामु
पोषणमिति॥ सनत्कुमारोपि॥ एकादशी सदोपोष्या पक्षयोः शुक्लकृष्णयोरिति॥ विष्णुपुराणेपि॥ द्वादशीं न प्रमोक्तव्या यावदायुः प्रवृत्तिभिरिति॥
आग्नेयपुराणेपि॥ उपोष्यैकादशी राजन्यावदायुः प्रवृत्तिभिरिति॥ कात्यायनोपि॥ एकादश्यामुपवसेन्न कदाचिदतिक्रमेदिति॥ नारदोपि॥ पक्षे पक्षे च कर्त्त
व्यमेकादश्यामुपोषणमिति॥ माधवीयेऽकरणे दोषमाह सनत्कुमारः॥ न करोति नरो यस्तु एकादश्यामुपोषणं॥ स नरो नरकं याति रौरवं तमसावृतं॥ एका
दश्यां तु निश्चेष्टो भुंक्ते मूढचेतनः। प्रतिमासं स भुंक्ते हि किल्विषं श्वादिविट्समं॥ निष्कृतिर्मद्यपस्योक्ता धर्मशास्त्रे मनीषिभिः॥ एकादश्यन्नकामस्य निष्कृतिर्गम
ःक्वापि नोदिता॥ मद्यपानाच्च निश्चेष्टपातेव नरकं व्रजेत्॥ एकादश्यन्नकामस्तु पितृभिः सह मज्जतीति॥ नारदीयेपि॥ यानि कानि च पापानि ब्रह्महत्यासमा २९९

31

निवसंत्यन्नमाश्रित्य तिष्ठंति संप्राप्ते हरिवासरे ॥ तानि पापान्यसुप्राप्नोति भुंजानो हरिवासरे इति ॥ स्कांदेपि ॥ मातृहा पितृहा चैव भ्रातृहा गुरुहा तथा ॥ एकाद-
299A श्यां तु यो भुंक्ते पच्यते पाकभेयोरपीति ॥ कावित्तु ॥ एकादश्यां न भुंजानो विष्णुलोकाच्च्युतो भवेत् इति पा ॥ ब्रह्मवैवर्ते ॥ पि ॥ स केवलमघं भुंक्ते यो भुंक्ते हरिवा-
सरे ॥ दिने तु सर्वपापानि भवंत्यन्नमाश्रितानि तु ॥ तानि मोहेन योऽश्नाति न स पापैर्विमुच्यते इति ॥ विधवायास्तु दोषविशेषः प्रदर्शितः कात्यायनेन ॥ विधवायाः
अपि च नारी भुंजीत एकादशी दिने ॥ तस्याः सुकृतं नश्यति भ्रूणहत्या दिने दिने ॥ अकारणात्खासमापनेपि दोष उक्तो विष्णुरहस्ये ॥ समादाय विधानेन द्वादशी-
व्रतमुत्तमं ॥ तस्य भंगं नरः कृत्वा रौरवं नरकं व्रजेत् ॥ यो गृहीत्वा व्रतं सम्यगेकादश्यादिकं महः ॥ न समापयते तस्य गतिः पापीयसी भवेदिति ॥ नारदीयेपि ॥ द्वादशी-
व्रतमादाय व्रतभंगं करोति यः ॥ द्वादशाब्दव्रतं शीघ्रं निष्फलं तस्य जायते इति ॥ अन्यायविधिदर्शितो विष्णुरहस्ये ॥ परमापरमापन्नो हर्षेण वा समनुपाप्तितो ॥ सू-
तके मृतके वापि न त्याज्यं द्वादशीव्रतमिति ॥ इति नित्यत्वबोधकानि ॥ अथ काम्यत्वबोधकानि ॥ यदीच्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः ॥ एकादश्यां न
भुंजीत पक्षयोरुभयोरपि ॥ कात्यायनोपि ॥ संसारसागरोत्तारमिच्छन् विष्णुपरायणाः ॥ ऐश्वर्यं संततिं स्वर्गं मुक्तिं वा यद्यदिच्छति ॥ एकादश्यां न भुंजीत कदापि
द्विपमानव इति ॥ स्कांदेपि ॥ यदीच्छेद्विपुलान्भोगान्मुक्तिं वात्यंतदुर्लभां ॥ एकादश्यामुपवसेत्पक्षयोरुभयोरपि ॥ इदं माहात्म्यरत्नानि शास्त्रीमोघो स्कादन्यपि

जय-का ॥ किं संग्रहीतुं शक्तः सांऽकः छक्ष्मक्षपांविनेसादि॥ अत्र निर्णयो ग्रन्थकारः॥ नित्यत्वविधायकवाक्यश्रवणात् किं नित्यं। किं वा काम्यत्वविधायकवाक्यश्रवणात् का

३०० म्यमिति॥ अत्र कश्चिदाह॥ नित्यकाम्यमिति॥ तन्नशक्तिसंदेहं यतो यदेव नित्यं तदेव काम्यमिति कथं संभवाः समममाम्नातायं अनेनोपपद्यते॥ नित्यत्वे फलानपेक्षत्वं॥ का

300 म्यत्वं नाम फलापेक्षत्वं नत्वेकस्य च फलापेक्षत्वं तदनपेक्षत्वं चोपपद्यते भावाभावरूपाः साम्ना नाधिकरणाभावात्॥ तथा चापूर्वोत्पत्तेः कामीनिष्कामस्त्व

तयोः संदेहति॥ व्यवस्था वक्ष्यते॥ एकत्र ततेति नहूयविधानेकदा गम्न्योपपद्यते॥ तथैकादशीव्रतं गतवान्नियमेन स्यात् मुक्तस्यैनित्ये काम्यमुक्तश्च वत्स षष्ठपामिति

भेदः प्रदर्शितः॥ अतश्च निष्कामो नित्यविधिना नित्यैकादशीव्रतं कुर्यात्॥ सकामस्तु काम्यविधिना काम्यैकादशीव्रतमिति॥ मासभ्याराधाकृ समसवा यज्ञनका

मानस्य प्रतियोगिकृतिविषयत्वस्यानित्यत्वस्य कामनोपाधिकत्वं यत्सकाम्यत्वस्य भावाभावरूपत्वाभावेन संयोगपृथक्त्वन्यायेन नैवकस्यैव नित्यत्वं काम्यत्वं

अविरुद्धं तत्र यथाविनिदिष्टाधिकारान्यायेन प्रसृष्टं वाद्गतिष्ठ तकाम्यप्रयोगस्य संगान्नित्यप्रयोगमध्ये सिद्धिरिति यो यथा विनमत्सु॥ कालनतत्वविवेचने॥ तत्रैतदुक्तं पा

गपक्वत्वान्दुम्नपकृपेनिते काम्ये वा॥ तस्य चोभयरूपस्यापि निषेधस्य वै कादशेन प्राप्तौ काम्यव्रतानुष्ठानेनैव नित्यप्रयोगवन्निषेधपरिपालनस्यापि सिद्धेः॥ तथा राम-

चोक्तं कालादर्शे द्विधामिदं सामान्यतो व्रतद्वितीयस्यते॥ अथैकादशीव्रते अधिकारिणः प्रदर्श्यन्ते॥ यथाह कात्यायनः॥ अष्टवर्षाधिको मर्त्यो ह्यपराशीतिवत्सरः ३००

300A

।।एकादश्यामुपवसेत्सदा पोरुषभयोरपि।। अष्टवर्षाधिकस्याप्यनयोजर तस्याप लब्दगीमिति हेमाद्रिप्रभृतयः।। वत्कैर्नुक्तं।। अष्टवर्षाधिकस्य नहाग्रासो
पलक्षणात्त्वप्रमाणमावयः।। उपलक्षणानियतमवेधामवाह।। किंतु विवक्षितमेवपरं तु शक्तौ ता नह्येषपक्षे न यवास्थितं।। अशक्तौ सात्वसत्वएकादश
वर्षीतरंश्चतापत्त्वविकारः।। अपर्णाकादश्यां बहसवत्तवर्षाधिकस्य वा।। प्राप्य यावत्तवर्षमात्रात्परतरं प्रमवाधवा इति दीपिका तीर्थयात्रायांश्चन्तमायमव
चनैएकादशवर्षपर्यंतमकारणोपायायाश्च त्राहोमासाइनभिकामसत्त्वात्।। तत्राप्यसामर्थ्ये चतुर्दशवर्षोन्नरमविकारः।। तदुक्तं माणि मांडव्यस्तु वा इ
महामामते।। मयोद्दास्या पयाम घलोकेघमिफलोदयी।। आचतुर्दशकादूर्ध्वान्नभविष्यति पातकं।। परतः कुर्वतामेव दोषएवं भविष्यतीति।। अत्र मरसे
ग्रहगास्ते वेषामेवाउलोमप्रतिलोमाद्रीनाम त्राविकारः। नारीयपराणोपि।। अष्टवर्षाधिकोमर्त्यो अशीतिर्न हि पूर्यते।। यो भुंक्ते मामके राष्ट्रे विष्णोरहनि
पापकृत्।। समेवध्यश्च दंड्यश्च स्वाने वासो देशतः स मे।। एतस्मात्कारणाद्विप्र एकादश्यामुपोषणं।। कुर्यान्नारी वा नारी वा पक्षयोरुभयोरपि इति।। एवंप
सहयेकादश्यां नृत्तस्यमवेत्त्रप्राप्तैव स्याधाविशेषः कालादशौमिहितः।। विधवा या वनस्थस्य यत्तेश्चकारश्चेद् पे।। उपवासो गृहस्थस्य सगृहाश्रमासु
त्रिणाः।। अन्नं जे निषेधः कृष्णायामाहृतस्य ततो मतइति।। माधवीयेपि।। गृहस्थस्य सम्यक्दानामेवानेत्या यवास्य।। तथा नकर्मपराणा।। एकादश्यां न भुं

जप.क.
३०१
301

जीवत्पत्न्योरभ्युदयोरपि॥ वानप्रस्थो यतिश्चैव शुक्लामेव समाचरेदिति॥ मदनरत्ने तस्याः कामेऽपि एकादश्यां नक्तं जीवत्पत्न्योरभ्युदयोरपि॥ ब्रह्मचारी च नारी च शुक्ला-
मेव सदा गृहीति॥ अत्र नारीशब्दो विधवापरः॥ तस्या एव यतिसमानधर्मत्वात्॥ वनस्थयतिसमानधर्मत्वं च तस्या गारुडपुराणोक्तं॥ यथा॥ पुनः प्रमी-
तस्य मये घोरे कैकादशीमनेतः॥ तन्नोपवासो विहितो वनस्थस्य यतेस्तथा॥ विधवायास्तत्रैव परजोद्यादशीं नवेदिति॥ पतिमत्यास्तूपवासनिषेधादि-
कैपरिभाषायां द्रष्टव्यं॥ चातुर्मास्ये तपोतानुतच्छ्रूयापि गृहिणोपोष्या॥ शयनीबोधनीमध्ये या कृष्णैकादशी भवेत्॥ सैवोपोष्या गृहस्थेन नान्या कृ-
ष्णा कदाचन इति स्मरणात्॥ अत्र कृष्णग्रहणं स्यादि षयं॥ पुत्रवतस्तु सापि निषिद्धा॥ संक्रान्त्यामुपवासं च कृष्णैकादशीवासरे॥ चंद्रसूर्यग्रहे चैव न कुर्या-
त्पुत्रवान्गृहीति नारदोक्तेः॥ कृष्णैकादश्यां पुत्रिणा उपवासनिषेधः कूर्मपुराणेऽपि॥ संक्रान्त्यां कृष्णपक्षे च रविशुक्रादिने तथा॥ एकादश्यां न भुंजी-
त पुत्रवान्मसेव वा पुत्रं तद्दुःखं पारणामिति॥ अत्र पुत्रवानित्युपलक्षणं॥ पारणामपि तत्तन्निमित्तमेव निषिध्यते॥ तत्र समयप्रवासान्नपोष्ये वसमयप्रामं यतेऽ इत्यत्रम
पुत्रजन्मकृत्तान्यापद्यत्तान्नोणां देवनश्यतीति वचनविहितशनिवासरमयुक्तोपवासानां भक्तानां तदृज्ञ रविवारे भौमे रविवारमयुक्तो निर्णयेऽदूषयोः पनपो नैमित्तिकम्॥
वतो देयः॥ वेदार्के पार्श्वहाणा यो यतीपातेष्वपर्वसु॥ अहोरात्रोषितः स्नात्वा श्राद्धं दानं तथा जपः॥ यः करोति प्रमत्त्वात्त्वाततमस्मादस्य पैत्रतः स्मृतिः कात्यायनः ३०१

301A

पर्वदिने विहितोपवासो गमयते तदुक्तं गारुडे नेप्याम्रसंक्रान्त्यादिनिमित्तकं तन्निषेधेन वचनं गर्वादिनोपवासनिषेधपरं वृद्धवद्ध्येयम्॥ तथा च शौनो र वौ न संक्रा
न्तिदिने नस्य च वैदिनेष्वाशुपुत्रवद्गृही। गृहोपवासो न कार्य इति पर्यवसति॥ गौतमोपि॥ आदित्यहानि संक्रान्त्यामसिते कादशी तथा॥ व्यतीपाते च तेष्वा
दृपुत्री नोपवसेद्गृहीति॥ पुमपुराणेपि॥ संक्रान्त्यामुपवासेन पारणेन पणाचिप्रियः॥ एकादश्यां च कृष्णायां ज्येष्ठः पुत्रो विनश्यतीति॥ नारदीयेपि॥ इंदुक्ष
यार्कसंक्रान्त्योः कादश्यामिति तयोः॥ उपवासं न कुर्वीत पुत्री धनसंततिश्रियोमिति॥ एषु अनेकेषु वचनेषु वृद्धहिगाः सामान्यतः कृष्णैकादश्युपवा
सनिषेधकत्वमतीयते॥ तथापि कृष्णैकादश्युपवासविधिवचनान्यपि विषयत्वेनोपसंहार्य गृहस्थमात्रस्य तत्प्राप्ते निषेधस्य प्राप्त्यपेक्षितत्वेन यथा
श्रुतार्थकत्वायोगात् यावज्जीवमासीत गतः कृष्णैकादशी विषयत्वमेवावसिते॥ तत्र शयनीबोधिनीमध्ये इति स्मृत्यन्तरवचनेन गृहस्थस्योपवासस्य विहितत्वा
दिति हेमाद्रिनिर्णयामृतप्रभृतयः॥ माधवस्तु॥ यानि पुत्रवद्गृहिणः कृष्णैकादश्युपवासनिषेधकानि वचनानि तानि गृहस्थमात्रस्य कृष्णैकादशी
सु पुत्रवासनिषेधपराणि न भवन्ति तथा एकादशीत्वे कृष्णायां संक्रमेण यह गौणपि वत्सरादिषु न वा कोषु संक्रा
न्त्यादिवारादिषु काष्टयां शुक्लैकादश्यामपि उपवासनिषेधकं प्रतीयते इति॥ वेत॥ ना॥ तत्र सौम्य संक्रान्त्यादिविहितोपवासविषयत्वाते॥ नन्वत एव कैकादि

जप॰कं स्युपवासविषयता॥ नष्टे तैत्कात्यायनेन॥ एकादश्यां तु कृष्णायां रविसंक्रमणे तथा॥ चंद्रसूर्योपरागे च न कुर्यात्पुत्रवान्गृही॥ तत्र पुत्रोपवासस्यानि
३०२ षेधायमस्यार्थः॥ अयस्तस्य तु रपत्यस्य न विधिर्नैनिषेधनमिति॥ जैमिनिरपि॥ तन्निमित्तोपवासस्यानिषेधो यत्रतद्वाद्वन्नः॥ नानुबंधाकृतोद्यास्योपतानि
302 मस्युपोषणीयमिति॥ अयमर्थः॥ एकादश्युपवासस्यानित्यत्वान्मूंकांत्याद्युपवासस्य च काम्यत्वात्काम्योपवासनिषेधेऽपि न नित्योपवासनिषेधः॥ अमिथ्याति
रति॥ अत एव नारदिसंवादरे यागर्ग्येकादशीनिमित्तोपवासो विहितो मरनरलेमनकुमारयोः॥ अन्नैवारोगा संयुक्ता तथा संक्रांतिसंयुता॥ एकादशीम
होपोष्या सर्वसंपत्करा तिथिरिति॥ कालतत्त्वविवेचने विष्णुधर्मोत्तरे॥ पुष्या नदिंगे पेतास्तु पैसंक्रांतिसंयुता॥ एकादशीमहापोष्या पुत्रपौत्रप्रव
र्द्धिनीति॥ कात्यायनोऽपि॥ व्यतीपाते वैधृति वा एकादश्यां पहाम वे तु॥ उपोष्या मासाद्भवते संयदाद्विवर्द्धिनीति॥ प्रायश्चित्ते ब्रह्मवैवर्ते हस्यानो नाश्वापिनि
सानि लेभमन्तिमयाः तु तैनेरं विष्णुपरायणौ॥ पंचेतेपद्रोग कन्नैच्यमेकादश्यामुपोषणम्॥ मत्सत्रस्थ मेधार्थ ... जनो भक्तिसंयुतः॥ एकादश्यामुपवसे
त्स हि पापमपरिपातिनाराहात्के ... ॥ निर्णयामृते च अत्र शब्दश्चापत्तमात्रवचनः॥ नारायणाब्दौ तो पमानानएवमेयत्रा जापोऽग्नि स्रवापत्यमात्र राम॰
वाचित्वातोः॥ जनयेद्वहुपुत्राणामिति लिंगात्समानपुत्रो जापत इति व॥ काम्यकालेऽरवापोः॥ पितृणां गतिमान्वेष्टुकृष्णापी सम पोषयेदिति॥ अ ३०२

302A

येनग्रहवतापि विधेयः॥ एतच्चान्यस्मिन्मासे अवंजपन्नामुपैवच॥ उभयोःपक्षयोःकाम्यव्रतंकुर्वीत्तवैष्णवमिति॥ नारदपुराणात॥ मत्स्यपुराणेपि॥ एकादश्यां
तुशुक्लायामुपोष्य विधिवन्नरः॥ एवंनामानुः समः द्वैवमासमुमेवमागच्छतीति॥ दिनक्षयेपुत्रवतांगृहस्थानामुपवासोनिषिद्धः॥ मदनरत्ने व्यासः॥ एकादशी
पुनष्टहरवोमेकमेवातथा॥ पारणंचोपवासंच नकुर्यात्पुत्रवान्गृही॥ दिनक्षयेत्वमेयाममेनोपोष्या दशमीयुता॥ यदीच्छेत्सत्वरंपौत्रान्नाम्नाद्वैमेपरमा
त्मनइति॥ मत्स्यपुराणेपि॥ दिनक्षयेतुसंक्रांतौ ग्रहणेचंद्रसूर्ययोः॥ उपवासंनकुर्वीत पुत्रपौत्रसमन्वितइति॥ दिनक्षयलक्षणंपूर्वमुक्तं॥ हेमाद्रौ तिथ्ये
तानेकवारयास्मिन्समादिनक्षयइति॥ वसिष्ठोपि॥ एकाह्निमावनेत्वाद्वितिथीनांत्रितयंयदा॥ तदादिनक्षयःप्रोक्तस्तत्रसाहस्रिकंफलमिति॥ फलम
त्रपुत्रवत उपवासातिरिक्तदानादिजन्यंद्रष्टव्यं॥ तस्योपवासनिषेधात्॥ एवंशेषविषयेकिंविधेयमित्यपेक्षायांविशेषोवायवीयपुराणे॥ उपवासनिषे
धेतुकिंचिद्भक्ष्यंप्रकल्पयेत्॥ नदुष्यत्युपवासेन उपवासफलंलभेदिति॥ भक्ष्यंचविद्धाविषयेदर्शितं॥ अविद्धानामलाभेतुपयोमूलफलानिवा॥ म
हदेवालसमश्नीयादुपवासस्तत्राभवेत्॥ इति॥ तथा॥ नक्तंहविष्यान्नमनोदनंवाफलंतिलाःक्षीरमथांबुचाज्यं॥ यत्पंचगव्यंयदिवापिवायुः प्रशस्त
मत्रोत्तरमुत्तरंत्विति॥ हेमाद्रौ॥ नित्यैकादश्युपवासासमर्थेनैकभक्तादिकंकर्तव्यं॥ तथावमार्कंडेयः॥ एकभक्तेननक्तेननयेवायाचितेनवा॥ उपवासे

जय॰ कृ॰ नदानेन ननिर्दिष्टे द्वादशिकोऽभवेत ॥ एकभक्तेन नक्तेन वालब्ध द्वाचरः क्षिपेत पयोमूलफलैर्वापि न निर्दिष्टे द्वादशिकोऽभवेत ॥ स्कान्देऽपि ॥ उपवासेष्वशक्तानामशीतेरू
३.२ र्ध्वजीविनां ॥ एकभक्तादिकं कार्यमाह बौधायनो मुनिरिति ॥ मार्कण्डेयपुराणे ॥ गोद्वादशीकले ॥ एकादश्यां प्रसुप्ते विष्णुं समभ्यर्च्य कद्यवनं ॥ उपोषितेन नक्तेन नयेवा
303 याचितेन च ॥ एकभक्तेन वा तात ननिर्दिष्टे द्वादशिकोऽभवेत्क ॥ तद्वेकानियमानेतेन मारति भगवाने ॥ कायशक्तिबलादेवं बलाद्वुर्भमाचरेत ॥ हेमाद्रौ बौधायन
: ॥ आखिभिः परिम्लानानायेनात्विकशरीरिणां ॥ त्रिंशद्वर्षाधिकानां च नक्तादिपरिकल्पना ॥ विविंशद्वर्षा गागामि समपेक्षा विसा वः ॥ तत्र न वाति वर्षा गा
मिनर्षः ॥ कूर्मपुराणे ॥ एकभक्तेन नक्तेन वालब्ध द्वाचरः क्षिपेत ॥ नातिक्रमे द्वादशीं च उपवासव्रते न च ॥ भविष्ये ॥ उपवासात्परं भैक्ष्यं भैक्ष्यात्परमयाचि
तं ॥ अयाचितात्परं नक्तं तस्मान्नक्तेन वर्त्तयेत ॥ अष्टौ तानि इमानि परिभाषायां द्रष्टव्यं ॥ नित्यकाम्ययोरशक्तः स्वप्रतिनिधिभिर्व्रतं कारयेत् ॥ तेऽपि च
चैव द्रष्टव्याः ॥ आपस्तम्बादः कश्यपपर्यन्तात्रे ॥ मद्रुह्ये वेदशयनेम स्वाभ्यर्यावर्त्तने ॥ अथ यो दीक्षितः काष्ठे देहसंबोधनेतताः ॥ अन्नं वा यदि भुंजीत फ
लमूलमथापि वा ॥ अपराधमहं तस्मात्क्षमामि करवावन ॥ क्षिपामि नरके तावत्तावद्दाभूतसंप्लवमिति ॥ मत्स्यपने मदुत्थाने मत्स्यास्वपार्श्वनर्त्तने ॥ फ राम॰
लमूलजलाहारी हृदि शल्यमिवार्पितिरते ॥ यानि च वचनानि शक्तस्कन्देकादश्योः सामर्थ्यविषयकानि ॥ विष्णुरहस्ये स्कन्देकमेनारदीयपुराणे च यद्वितेय ३.२

303A

पाकस्यान्यापशुक्लाविशेषो नास्ति कश्चनेति॥ एवमेव सनत्कुमारविष्णुपुराणमोक्षधर्मेष्वपि॥ विष्णुरहस्यसौरपुराणयोः॥ यथा सप्रजितो गौरः कृष्णो वा वेदवि
द्विजः समतां याति दानान्नारे द्वादशीव्रतयामृते॥ तथा स्कन्दपुराणे॥ नैव लंघ्यं शुक्लेतरागाणीवति लानां सदृशं यथा॥ कृष्णायाश्च सिताया वा गोः क्षीरं सदृशं यथा॥ द्वादश्यो
स्तु सदृशं तद्वत् शुक्लासितामयोः॥ दर्शश्च पूर्णिमासी च पराय तस्य या समे॥ तथा सितासिते पुण्ये द्वादश्यौ मुनिभिः स्मृते इति॥ यथा नरं सुक्षिणी चैव यन्नैव
प्रकीर्तिते॥ तुल्यं पुण्यमवाप्नोति द्वादश्योः कृतयोर्द्वयोः॥ तथा॥ सोमसूर्यग्रहे प्राप्ते यो यथैव मुनिभिः स्मृतो॥ तथा सितासिते पुण्ये द्वादश्यौ विष्णुतुष्टिदे॥ मा
यं प्रातर्यथा संध्ये सायं प्रातस्तथैव तौ॥ तथा सितासिते पुण्ये द्वादश्यौ च मतं समे इति॥ यथा विष्णुः शिवश्चैव समं पूज्यौ मुनिभिः स्मृतौ॥ तथा पूज्यतमे प्रोक्ते द्वाद
श्यौ शुक्लकृष्णके॥ वाराहपुराणे॥ एकादश्यामुपवसेत्पक्षयोरुभयोरपि॥ द्वादश्यां पारयेद्विष्णुमभ्यर्च्य फलमाप्नुयात् इत्यादीनि॥ यामपि शुक्लकृष्ण
विवेकप्रत्यवायबोधकानि॥ कूर्मपुराणे विष्णुधर्मोत्तरे स्कन्दपुराणे च॥ सत्र ब्रह्महा सुरापश्च स्तेनो गुरुतल्पगाः॥ स्कन्दपुराणे॥ सत्र ब्रह्महा मद्यपो ब्रह्मस्वहरापो
गुरुतल्पगः॥ कालिकापुराणे॥ सर्वेषामिह पापानां प्रायश्चित्तं प्रकीर्तितः॥ एतेषामुज्झितादेन्तु॥ विवेकवर्ति योऽनाहारे एकादश्यां सितासिते इति गरुडपुराणे॥ शु
क्लां वा यदि वा कृष्णां विशेषो नास्ति कश्चन॥ विशेषं कुरुते यस्तु पितृहा स तु कीर्तितः॥ मत्स्ये दशमी नाम शुक्ला कृष्णा तथा॥ एकादश्याः स्वरूपं तु मतं व्या
पार्श्वे केवलं॥ अनः शुक्लासितत्वादि शशिनो गुणा उच्यते॥ एकादश्यां न तेनास्ति दूषणं येन दृश्यते॥ सनत्कुमारप्रोक्ते॥ एकादश्यां द्वयोर्यस्तु विशेषं कुरुते

जप॰कं॰ स्पष्टमेकादश्यां न पश्यामि यावद्रामत्वसंग्रहवामिन्यादीनि तानि सर्वाणि वानप्रस्थयतिवैष्णवादिविषयाणि । अन्यथा शास्त्रमेव व्यर्थं दारगृहीतादिवाक्यविरोधः स्यादि
३४ ति दिक् ॥ अथ प्रसंगाद् द्वादशी एकादशीभेदा उच्यंते ॥ तत्रैकादशी द्विविधा ॥ संपूर्णा विद्धा च । या संपूर्णा सैव शुद्धेत्युच्यते तत्र शुद्धैकादशी समता न्यूनताधि
304 क्ययोगात्त्रिविधा । सा त्रिविधापि द्वादशी साम्यन्यूनताधिक्ययोगात्प्रत्येकं त्रिविधा भवतीत्येवं शुद्धाया नव भेदाः यथा ॥ शुद्धसमा द्वादशी समा १ शुद्धसमा द्वाद
शीन्यूना २ शुद्धसमा द्वादश्यधिका ॥ ३ शुद्धन्यूना द्वादशी समा ४ शुद्धन्यूना द्वादशीन्यूना । ५ । शुद्धन्यूना द्वादश्यधिका ६ शुद्धाधिका द्वादशी समा ॥ ७ शुद्धाधि
का द्वादशीन्यूना ॥ ८ । शुद्धाधिका द्वादश्यधिका चेति ॥ ९ एवं विद्धापि साम्यन्यूनताधिक्ययोगात्त्रिविधा सनी द्वादशी साम्यन्यूनताधिक्ययोगात्प्रत्येकं त्रिवि
धा इति नव विधा या अपि नव भेदाः ॥ विद्धसमा द्वादशी समा । विद्धसमा द्वादशीन्यूना २ विद्धसमा द्वादश्यधिका ॥ विद्धन्यूना द्वादशी समा ३ ॥ विद्धन्यूना द्वादशी
न्यूना ५ विद्धन्यूना द्वादश्यधिका विद्धाधिका द्वादशी समा विद्धाधिका द्वादशीन्यूना विद्धाधिका द्वादश्यधिका चेति ॥ एवं मिलित्वा ष्टादश भेदा भवंति अत्र
सर्वेष्वपि भेदेषु एकादशी द्वादश्योः समत्वं नाम षष्टिघटीत्मकत्वं तन्न्यूनत्वं न्यूनत्वं आधिक्यं आधिक्यं तद्वेयं ॥ हेमाद्रौ तत्र संपूर्णा नाम ब्रह्मकैवर्त्ते उक्ता अरुणोदया
दुदयपर्यंतं व्याप्य तिथिर्यस्मिन्नेकादशी संपूर्णेति ॥ तथा च ज्योतिः सिद्धांते ॥ सर्वा स्युर्व्याप्य संपूर्णा उदयादोदयात् स्थिताः ॥ नारदीयपुराणे ॥ आदित्योदयवेला राम॰
या आरभ्य षष्ठिनाडिकाः याति तिथिः सा तु संपूर्णेति नैव न्यायीयसः ॥ प्रतिपत्प्रभृतयः सर्वा उदयादोदयाद्रवेः ॥ संपूर्णा इति विख्याता हरिवासरवर्जिता इति ३४

304A स्कंदपुराणवचनविरोधात्कीदृशी तर्हि संपूर्णोत्पत्त्युपेक्षे गरुडपुराणे शिवरहस्ये चोक्तं॥ उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता॥ संपूर्णैकादशी नाम तत्
त्रैवोपवसेद्गृही॥ भविष्यपुराणे॥ आदित्योदयवेलायाः प्राङ्मुहूर्तद्वयान्विता॥ एकादशी तु संपूर्णा विद्धान्या परिकीर्त्तिता॥ वसिष्ठस्मृतौ॥ द्विविधैका
दशी संपूर्णा अहोरात्रव्यापिनी अरुणोदयादारभ्य द्वितीयसूर्योदयपर्यंतमवस्थिता वा तत्रापि सर्वतिथीनामावरणाः प्रवेशः सीमसंपूर्णा घटिकामुख्यः नाडिती
यायी॥ अनेकार्थत्वात्पात्रात्॥ उदयात्प्राक् घटिकाचतुष्टयपर्यन्तविद्धमानायाः संपूर्णत्वमिष्यते तत्र अरुणोदयवेधनिराकरणार्थे॥ हरिवासरवर्जिता इ
ति च॥ कालतत्वविवेचने तु संपूर्णत्वं नोदयमात्रादारभ्य प्रवृत्तायाः॥ किंतूदयात्प्राग्मुहूर्तद्वयव्यापिन्याः आदित्योदयेतिभविष्यपुराणवचनात्॥ घ
टिपञ्चकेनयद्वा तिस्कंदपुराणवचने सूर्योदयादारभ्य प्रवृत्तत्वं सूर्योदयपर्यंतं तत्त्वं च द्वयमभिलितं भासमानं तु संपूर्णत्वं प्रयोजकं पञ्चकं तु नभ्यस्ये एवमेका
दश्यां पर्यंतरसे तेह हरिवासरवर्जिता स्यान्नेन॥ नन्वत्र मपि तत्रैव वचनांतरे विशेषविधानात्॥ तेनारुणोदयादारभ्य द्वात्रिंशन्मुहूर्तव्यापिनी एकाद
शी संपूर्णा न तिलमात्रा तिथिवशात् षष्टिघटिकामात्रव्यापिनीति॥ आदित्योदयवेलाया आरभ्य षष्टिनाडिका॥ संपूर्णैकादशी नाम तत्रा तिथिवृद्धौ संपूर्णत्व
मेकादश्या अप्युक्तं तन्मुख्यं॥ किंतु कल्पः स्वच्छमात्रं विषयद्वयं स्कंदीम विष्यति॥ अरुणोदयैकदेशमवदशमापराणादेकादश्याः सकलत्वद्व्या

जयकः स्याविद्धत्वेतेनयाएकादशीकृत्वाहणोदयव्यापिनीहि तीयम पौरस्यारवौगेवरात्रौ दिने वात्तमाप्नादार्दस्यायुक्तोमानविद्वानमेयाणिकिं तमवेशमात्रेसूर्योदयमा
३०५ स्मातदशमयमात्रपर्यंतं वर्त्तमानारतरातिपपरवेति॥ अपरदशमीवेधो निरूप्यते॥ सनववेधास्त्रोविवेचः॥ अरुणोदयवेध सूर्योदयवेधः पंचदशनाडीवेधस्त्रो
305 ति॥ तत्राहणोदयवेधोम विष्णुपुराणे॥ अरुणोदयवेलायां दशमीगंधोभवेद्यादि॥ तुष्टं तत्रुअयत्नेन वर्जनीयेनराधिपेति दशादशमी॥ एतच्च वैष्णवोपोष्ये सूर्योदयवेधः
कादशी विषये दशमीवेधसंयुक्तो यदि स्याद्दरुणोदयः॥ नैवोपोष्यं वैष्णवेन तद्दिनं नैकादशीव्रतमिति भविष्यपुराणयगारुडपुराणावचनात्॥ वैष्णवलक्ष
णीवल्कारे॥ परमापदमापन्नो हर्षे वा समुपस्थिते। नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी॥ समात्मा सर्वभूतेषु निजाचारादविप्लुतः॥ विष्ण्वर्पिताखिलाचा
रः स हि वैष्णव उच्यत इति॥ स्मृत्यंतरेपि॥ वैखानससाधागमोक्तदीक्षायुक्तो हि वैष्णव इति॥ यद्यपि पंचरात्रादेरागमदीक्षायां तन्मात्रमेव वैष्णवत्वेन तत्सूत्रादेश
यापिसपापंपरप्रसिद्धमेव वैष्णवत्वं तस्मात्तेवमस्मतेवद्धाद्यात्॥ तत्तसागरे भविष्ये॥ यथा शुक्लातथाकृष्णा यथा कृष्णातथेतरा॥ तुल्येतेमन्यते यस्तु स वै वैष्णव
उच्यत इति॥ अरुणोदयप्रमाणं तु स्कंदे नारदाम्नाभस्ते॥ उदयात्प्राक् चतस्रस्तु नाडिकाअरुणोदय इति॥ हेमाद्रौ॥ चतस्रो घटिकाः प्रातररुणोदय उच्यते॥ य रामः
तीनांस्नानकालस्तु गंगांभः सदृशः स्मृत इति॥ निशीथांते तु पामाद्वे दिनं वा दिनं वा दने॥ सारस्वतानस्मपने वारुणोदय उच्यते इति तत्र यथा॥ अरुणोदयवे ३०५

305A घः स्यात्सूर्त्तार्धेन द्विघटिकात्मयामिति ॥ एतेषां मध्ये षोडशानां रात्रिमानज्ञाप्तव्यः ढिम्मीमुहूर्त्तेहृदयपर्यन्तैव । उदयात्प्राक् पद्मविषमुहूर्त्तद्वयं संध्येते त्मादित्योदयवेला याः प्रा
ग्मुहूर्त्तद्वयानि तेति ॥ माहूर्भविष्यवचनेक्वा वाक्यात् । कालतत्त्वविवेकेनापि । अरुणोदयकालेताद्दिग्भागं भोमवे घटी त्यादिवचनेषु योरुणोदय उक्तः स उ
दयप्राचीनमुहूर्त्तद्वयात्मकएव द्वष्टव्यः । एवं कृतवाक्यतात् । योगार्थस्यापि तत्रैव संभवात् ॥ यत्र क्वचिद्रात्रेस्तुष्ठमभागस्यारुणोदयत्वाभिधानं तद्रा
त्रतादृत्तत्परमेव ॥ यदपि ब्रह्मवैवर्ते चतस्रो घटिकाः प्रातररुणोदयनिश्चयः ॥ चतुष्टयविभागोत्र वेधादीनां किलोदितः । अरुणोदयवेधः स्यात्सार्द्धं तु घ
टिकात्रयं । अतिवेधो द्विघटिकः प्रभासंदर्शनाद्रवेः । महावेधोपि तत्रैव दृश्यते केन दृश्यते । तुरीयस्तत्र विहितो योगः सूर्योदये सतीति अरुणोद
यवेधातिवेधमहावेधयोगसंज्ञाकरणं तद्भुवनारात्मप्रदर्शनार्थं मुहूर्त्तो घटिकाद्वयमितिवत् घटिकाशब्दो मुहूर्त्तद्वयपरः । उदयात्प्राक्तनत्रिसार्द्धनाडिकारु
णोदय इति नारदादिवचने नाडिकाशब्दोपि तथा । अत एवनागोद्धा दश नाडी मितिर्दिकृपंचदशामितस्तथा । मतोष्टादश नाडी मिहेचयत्तज्जातिर्यामितिवच
नोक्तविशेषवेधः षट्सार्द्धमप्यनवमुहूर्त्तपर्यवसन्न एव कालादर्शादिष्वदर्शितः । तेन रात्रिब्राह्ममुहूर्त्तौ ढिम्मीमुहूर्त्तौ नामसंभवः सहदीमप्पगानोच्यवेद्यनिश्चयः क
लेवेधानतस्य लदर्शित ॥ यत्तु वेधातिवेधमहावेधाख्यदोषाः एवं मुक्ताः तेषु मध्ये काद्दशीसंपन्नाः प्रादित्यसंपन्नासंकीर्णा नामभिर्व्यवह्रीयन्ते ॥ अरुणोदयस्पर्श
मघटिकापीद्दशमीसद्भावे वेधस्तत्रैव ॥ स चाद्दृविघः । घटिकाप्रारंभे कृत्स्न घटिकापाव दशमी वृत्तिभेदात् ॥ तत्र प्रारंभमात्रे दशमी युक्ते काद्दशीसंपन्ने तस्य

जय॰का॰ च्यते। कृत्स्नघटिकाव्याप्तिर्दशमीसत्त्वे प्येकादशीसंदिग्धा॥ अरुणोदयप्रथममुहूर्ते दशमीव्याप्तिरिति वेधमात्रमुपेत्यैकादशीमेवसक्तेत्युच्यते। सूर्यमंडलदर्शनमे

३६ देहवेलायां दशमी सद्भावो महाभवे पश्यत्स्पृष्टैकादशी सकीर्तितेत्युच्यते॥ ता एताः सं पक्षास्य पश्चतस्रोपि त्याज्याः। तथा च गोभिलः। अरुणोदयवेलायां दश

306 मी यदि संगता। संपूर्णैकादशीं तां तु मोहिमेदत वान्नुमुरीति। गारुडपुराणे। उदयात्प्राक् द्विघटिकाव्यापिन्येकादशी यदा। संदिग्धैकादशीनाम वर्ज्यं धर्मकांक्षि

भिः। उदयात्प्राङ्मुहूर्तेन व्यापिन्येकादशी यदा॥ संयुक्तैकादशीनाम वर्जयेद्धर्मवृद्धये। आदित्योदयवेलायामारभ्य षष्टिनाडिका॥ संपूर्णैकादशीनाम

सा ज्ञेया धर्मफलेप्सुभिरिति। यद्यपि पूर्वेद्युर्वेधवाक्ये सार्धद्विघटिकात्रयमिस्पृष्टैव संदिग्धैकादशी वाक्ये त्रिघटिकेत्युक्तं। तथापि नैतावता वैषम्येण

विरोधः शंकनीयः। शास्त्रद्वयस्यापि दशमीवेधस्यागपरत्वात्। पक्षनिर्णयसिंधौ। उदयात्प्राक् चतस्रः इति स्मृतिवचनेन मुहूर्तद्वयमेव तेनेति गारुडवचनस्

प्राङ्मुहूर्तद्वयान्विते तिथिविष्णुवचनस्य चोपसंहारादेवं चतुर्घटिकयमेवारुणोदयः इति चतस्रो घटिका इति भविष्यवचनमपि अवयवद्वारेणारुणोदयवेधविशे

षपरमेवेति। पक्षमनकेविद्वां। एषामत्र्येयपक्षाणां मुहूर्तद्वयेन कौंडिकायानि घः प्रीतरतिर्वनाद्युराणविमानवशात्सार्धत्रिदंडोदयेनैकेऽरुणोदयाः। त

दाहुर्हेमाद्रौ। सार्धघटिकात्रयात्मकेऽपि षट्विंशतिघटीमितत्वात्त्रिविषयामहत्त्वमास्त्रात्रीये पक्षः चतस्रो घटिकास्त्वकामिस्याहुः। तन्न। अरुणोदयस्य राम॰

सानेकार्थत्वापत्तेः। न च मुहूर्तद्वयमर्थः दंडद्वये कमुहूर्तादि वेधानां तथाप्यनुपपत्तेः। न हि तेषां यामार्द्धत्वमरुणोदयत्वं वा स्मृत्यादिना देशतः पाततः। ग वेमा ३६

306A

नहासंवद्धिवशेनत्रिदंडमात्रेत्रिदंडवत्तुदंडात्मकत्वान्मुहूर्तद्वयैकमूलकल्पनायालाघवेनदंडवत्तत्पृथग्विग्रहातिपादकवचनाभावमुहूर्तद्वयपर्यवसितार्थप्रतिपादकत्वात्सै
वपूर्वोक्तौ।।मुहूर्तद्वयत्वमनुगतमेवायंतावच्छेदकमतत्कलमाधुमालेननमनानापेक्षापतित्र्यमहगोदयशब्दसाहित्यैकादेतदमत्वेनदोषायत्तमाहगोदयमा
त्मकत्वात्तदोषविशेषवोधनार्थंतदमिधानादिमले।।नदेवंमामान्यविशेषाभ्यांप्रतिषिद्धत्वादहगोदयविद्धैकादशीवर्ज्ये।।पिपासिलाऽवादमुभाशेषवच्चत्वात्परिसा
दहगोदयः।।नैवाप्राप्तेवेद्धवेनत्ताद्वैतैकादशीव्रतमितिमालत्वेअविप्रेष्वप्रयोगमात्रनिषेधात्।नारदीयेपि।।लववेधेपिविप्रेन्द्रदशम्येकादशीमजेत्।।स्कांदेपि।।विद्धेनाप्य
थेगोगांगमरुवानिर्मला।।तोदेपि।।कलाकाष्ठादिनालेवदशम्यतेदशमीविमो।।एकादशीनकर्तव्यावर्ततानजन्मकदाचनेति।।माधवीयेप्याहतमोपेकलादिवेधोरुणोदयवे
धेम्यपोदयवेधेचसमानाइति।।निगमेपि।।सर्वप्रकारवेधोयमुपवासस्यदूषकइति।।योप्यमत्पेरध्याकरदशमीसंद्भावरूपोवेधःसमवेऽथ्यरुणोदयवेधवद्विशेष
तत्तदभिधानेनचदोषतारतम्यप्रदर्शनायस्मृतमेव।।दोषतारतम्यंचप्रायश्चित्ततारतम्यादवगम्यते।।तथाचोक्तंहेमाद्रौभस्तुसंस्कारे।।अज्ञानाद्यदिवामोहाद्भक्तेनैकादशी
नरःदशमीशेषसंयुक्तोषायात्स्विनमिदंव्रतम्।।बृहत्पादेनरःश्रीनारसीवरदायाम्नसंयुक्ता।।घरणासाधंकैतुदध्यैतिलद्वाणमथापिवेति।।अत्रवेधनारुतमाघवस्ये
तिहेमाद्रेःनिशःप्रोक्तत्वापिमुहूर्तद्वयपरमेव।।तस्मादरुणोदयशब्दस्यमुहूर्तद्वयपरतैवेसन्नौ।।यत्तुब्रह्मवैवर्ते।।अर्द्धरात्रेतुकेषांविद्दशमावेधइष्यते।।क
पालवेधइत्याहुर्मुहूर्तद्वयपरतैवेसन्नौ।।यत्तुब्रह्मवैवर्ते।।अर्धरात्रेतुकेषांविद्दशमावेधइष्यते।।कपालवेधइत्याहुराचार्यायेहरिप्रियाः।।इतितत्रकैमुतिकन्या

जय.क.
३०७
307

त्याहगालेद्दयवेधमिनं दापरमितिमाधवः । नतेतत्पर्वं वक्तव्यं यतोमेषवृतमेक न्यूकर्णनाथेमितन्नपदमेव वक्ष्यते । यदपि नाप्तो द्वादशनाडीभिर्दिक्यं वदशमित्यत्थायमतो
द्वादशनाडीभिर्दूषयत्युत्तरांतिथिमिति स्कांदं तद्भूवस्योक्तानिगमे ॥ सर्वप्रकारवेधोयमुपवासस्य दूषकः । मावेन सप्तमुहूर्त्तं स्तत्संयोगोयं वायुकेवलमितिवत्तस्य
वासमन्ने मितिमाधवः ॥ इतिपक्तयोगसंज्ञकश्च हर्षो वेधस्तस्य त्याज्यत्वमर्थमिदं । ज्ञह्मेषार्द्र यवेधाप्रिय हात्यज्यते तदा किं मु वक्ष्यं मह्योदयवेध इतिमाध
वीये । पापवृत्तौ विंतु वेधः हिताह्डे कादशी सा हि द्विविधा । आग्निकेनपक्वा तद्दहिता चेति । आग्नेयकेवलं विद्धा ॥ एकादश्या विकी द्वादश्यामिकस्यमयाधिकी वेति
॥ त्रिविधभेतेषु पक्षेषु सदादयमा । त्यप्रहणांशुद्धा मध्ये कादशीपरित्यज्य परेयुरूपवासः कर्त्तव्यः । तत्रैकादश्यादिके नारद आह । संपूर्णैकादशी यत्र द्वाद
श्यां वृद्धिगामिनी ॥ द्वादश्यां लंघने कार्यं त्रयोदश्यां तु पारणामिति । स्कंदसेतरेपि । एकादशी यदा पूर्णा परतः पुनरेव सा ॥ पूर्वां कृत्वा शनस्योक्तत्रयोदश्यां
तु पारणामिति ॥ विष्णुरहस्येपि ॥ एकादशी कलाप्याप्नुयेन द्वादश्य पोषिता ॥ तुल्यक्रतुशतसंस्यं तत्रयोदश्यां तु पारणामिति ॥ द्वादश्यामिको ध्यामस आह । ए
कादशी यदा लुप्ता परतो द्वादशी भवेत् ॥ उपोष्या द्वादशी शुद्धा यदीच्छेत्परमां गतिमिति पत्तमरस्वपत्तमाधवादयोप्येवं । एकादशी यदा लुप्ता निववनाघ्रूद्धापी
द्वादशीमात्रे विकोपेस्त्रको ॥ तन्न ॥ लोपपदस्य समर्थपरत्वास्पर्शेलोपप्रसिद्धामस्यो रपदर्शमी विद्धा पामेवेत्तदकनपवर्जे: अतोनेदख्यद्धस्यन्नाविकदादशीका गमः
यामुपवासविधायकामिति ॥ यदपि कौम्यैं द्वशुप्नातिछित्तस्मात्तस्यरक्तष्पयाजिते । तदपिवेंस । अकारप्रश्लेषमानाभावादितिपतरेतस्थेयत्वे ॥ द्वितीयस्तयोस्या ३०७

307A

सर्शेसैव्रलोपमनतास्य यें विषयत्याग्न ।। नवैवेमाध्ववा चार्यागाल्मानैनिर्णीपे पुनर्लिखिते स्मिन्नवनेनुमेसस्मादोहशमोमिमन्त्रितलासारनोक्तः ब्रह्मावाक्च
स्यंगतेतिव्याख्यानेविवृत्यऽत्रैतिवाच्यं ।। शास्त्रमसवहु विषयत्वसम्मायतेनहितीयमत्पैदपामतोपयते वयागीतेयतथाभिधानमसे भ्यासि यसकोता
ता ।। सैपणीकाहशीसाज्योतिमागवतते चादिवचनसमानार्थकतेम कस्मृतिकल्पनालाघवेनअकारप्रश्लेषाणापि व्यास्व्यातेत्र कातावा ।। उभ यामि सं
गृह्याह ।। सैपणीकादशीयत्रप्रमातेपुनरेवसा ।। तत्रोपोष्या द्वितीया तु परे नो द्वादशी पदीति ।। नारदोपि ।। सैपणीकादशी यत्र प्रभाते पुनरेव सा ।। सर्वै
रेवोत्तराकार्या परतो द्वादशी यदीति ।। स्कन्देतरेपि ।। एकादशीं मवेस्मर्गा पातोद्वादशीयदि ।। एकादशीपरित्यज्य द्वादशीमसयाघ्येहिति ।। उभ
यावेवसारह्नायांतुशद्धपानकोपिमहोहीति ।। यत्तवत्वतार्केहषाणामसहितं ।। एत्ताहशतोपवध्य नेतराहेनआकास्मिकहाममस्तोतिः
श्राविजपमिदेतिव्याख्यानेपत्रेणुप्लमैपेवहशशृहाधिकानधिकारद्वादशीकोदाहरणसम्गानवक्तहमायमानवाहिति ।। तरेत व्याख्येयमानेर ।।
देशांतरेताद्विमानहामेनमपाहपाडिकांत्रयालभकसप्रहतेहयतसापेअमाणारयतसैभवेनमपादसप्रपेवाशद्धरिकोनतत्र उक्तैकादश्यादि
तीयाहेनेसप्रदयपथेतविधमानायाः सूहूलेनतदेवाप्रवक्त्रादारशपाघटिकात्रयहाससंभवेनोद्धद्रणामेभवातत ।। अतरवमस्कनलोयप

जप०कं रमवद्भोमत्स्योद्देडषट्कादृयपसैकज्योतिःशास्त्रे॰प्रसिद्धिरित्यर्थः॥तथाऽत्रिमानह्रासमुद्देशीतरेज्योतिःशास्त्रे प्रसिद्धः॥तिथिपत्रेनुपलभ्यमानकलदेशीय
३०८ यतितिथिपत्रानालोवननमल्लिकैवेत्सलो॥कालतत्त्वविवेचनेयथापिमासवानार्योदिक्षिःमवैहो॥तिथीनामनिर्वेधकारैःसर्वोदयवेधप्रवर्पारिशेषादितरेषामिसस्यते
308 ॥तथाप्यरुणोदयस्थापिन्याःमेसङ्गीतितद्व्यापिन्याश्चविद्धत्वेप्रतिपादयतो वचनस्यामान्यविषयत्वान्नैवोपपद्यमितिवचनेनैवकारप्रयोगात्वैष्णवेनसर्व
षानिसलेनकाम्यतेनवापरंनेमकादशीद्वादश्योरलाभेपिगुणाहणोदयवेधत्वसोनेवोपपद्यमितिसत्कामतिसेभवेवैष्णवेत्तरैरपिनैवोपपद्यमितिप्रतीतेः॥
सातिमेभवेताद्दषयन्नमप्यरुणोदयवेधस्यानीनभद्रोयगौडनिबंधेचोक्तमिति॥तदेवंअरुणोदयमारभ्यादितोस्यसर्वोदयंयावद्दशमीनामसर्वान्यतिशुद्धास्यो
दयोत्तरेकियताणिदशम्यायुक्तासुसर्वान्यतिविद्धात्ततःप्रावीनमुहूर्तद्वयमध्येदशम्यालिताचवैष्णवान्यतिमवेहारुणारोकिमतिकाम्यव्रतेपारितान्यत्रसम
त्वेनविद्धेतिशुद्धाविद्धाविवेकास्थितेनिर्णयप्रदर्श्यते॥वैष्णवैर्विद्धामवैधाप्राज्यादशमीशेषतिगरुडपुराणावचनात्॥शुद्धाप्यन्यत्तरस्मात्अपिपरस्यसतत्वे
स्याडेतिएवंवैष्णवरीत्याप्रक्तानामेकादशीनिर्णयउक्तः॥ताडन्यानास्मात्तेपरेनवस्वहीयमाणानामेकादशीनिर्णयउपत्ते॥अरुणोदयवेधेचस्मार्तवाक्यवचनेनवै
ष्णवानिषयत्वपर्यवसितेस्मार्तानांसर्वोदयवेधमात्रहिन्नानुष्ठानविषयत्वेपारिशेष्यान्निर्णयउपत्ते॥अतःसर्वोदयवेधस्याभिमतेः॥अतिवेधामहावेधायवेधास्तिथिषुप्रत्यक्षेणताः
ःसर्वेपत्ववेधास्तिसंख्यावेधःसर्वोदयमतरहिति॥कोणवाप्राहउदयात्पूर्वविद्धातदशम्येकादशीयदिदृश्येवेसःपीनानार्थेदत्तंवामाकशामन्वदृति॥स्कन्दपुराणे॥ ३०८

308A शम्याः प्रीतमादाय यद्दोहे द्विजिर्दिवाकरः ॥ तेन स्पृष्टं हि यदहस्तेन दृष्टोजं भास्करः प्रायतिति ॥ तथा ॥ सूर्योदय यदा स्पृशास्त्येकादशमी गर्हितामस्थेति ॥ तत्र सूर्योदयमारभ्योदयप
र्यंते विद्यमानां संपूर्णा सूर्योदयात्पूर्वं दशमीसद्भाववर्तीति विद्धा वाभिप्रेत्साष्टा दशमेहः पूर्वे संक्रातस्तेषामिदानीं व वक्ष्यो च्यते ॥ तत्र शुद्धसमापोन्द नहादशी
कासालसमहादशपाम्यिकायां वनविवादः ॥ एवं शुद्धसंनापामध्यना दशपानविवादः ॥ परा शुद्धसमापश्च दन्वनावाधिकहादशिकाभवति ॥ तदाम वैश्णपिशुद्धेकाद
शपोष्यात उक्तं स्कन्दपुराणे ॥ शुद्धाप दामसमाहोनामसमाहीनाधिकातत्र ॥ एकादशीमुपवसेन्न शुद्धां वैष्णवोमपीतिमस्ट्हैकादशीप दासमामन्नावाभव
ति उत्तराद्वादशीमसमान्नाधिकावाभवतु ॥ तदेकादशीमुपवसेन्न शुद्धां वैष्णवोद्वादशीमिमस्पैः ॥ नारदोपि ॥ नवेदेकादशीविद्धो द्वादशीपरतः स्थि
ता ॥ उपोष्यैकादशी तत्र यदीच्छेत्परमं पदमिति ॥ हेमाद्रौ ॥ तिपरोक्तादशादि विनाद्वादश्यामसतीसतीव ॥ तत्राथामत वैष्णवोपोष्या ॥ त्रयोदश्यां द्वा
दश्यभावे मतीतिनिर्णीतं ॥ त्रयोदश्यां द्वादशीसद्भावे केवित्घ्नहुः एकादश्यामुपवासं न द्वादश्यां एकादशीलसारास्यस्य कालसद्वादश्याममावा
त्या: यत्तवस्मो ॥ एकादशीतहोवंद्वादशीनकलाधिका त्रयोदश्यां पराण्यानरूपं यामाद्वादशीत्वटेति ॥ न दशमीविद्धैकादशीविषये द्वादश्यां विद्यमानाकेव
न्यावेकादशीविषये वेत्याहुः ॥ पारतु परतो द्वादशीसद्भावे शुद्धदादश्यामुपवासोनैकादश्यां ॥ विद्धाप्यविद्धा सिते यापरतो द्वादशी न चेत ॥ अविद्धापितथा

जयकं विद्धापनोद्यद्दशीयदीति पद्मपुराणवचनात्॥ तथा च विष्णुधर्मे॥ एकादशी कलिस्मात् संपूर्णा परविद्धा परातिथिः॥ अथैकादशी नास्ति द्वादश्यां सा
३०९ संप्रोक्ता॥ केलाथ काष्ठा द्वादश्यां घटिमात्रं प्रहानि॥ द्वादश द्वादशीं हंति पूर्वविस्मिमात्रांतहंतामिति॥ अस्यार्थः॥ एका पूर्वदिनगता लिप्ता कलामात्रापि स
ऽशक्नस्तायमानऊर्पासापंचाजनार्खंडितं। स्नानंपूजादिसंयुक्तं स नरो हरिलोकभाक्॥ गीतवाद्यकरो विष्णोर्गांधर्वंलोकमाप्नुयात्॥ लोकानृत्यवो भ्यपेयघृत
सोंतेविष्णुपुरं व्रजेत्। कृत्वा प्रेक्षणकं दिव्यं लोकमप्सरसां व्रजेत्॥ कृत्वा प्रेक्षणकं दिव्यं निर्मलं देहमाप्नुयात्। नित्यस्नायी नरो राजन् नरकं स न पश्य
ति। भोजनेवर्जयेद्घृतस्नस्नानंपौष्टिकं लभेत्। शिलायां भोजयेद्घृतं तत्स्प्रयागजंफलं॥ एवमेव पि जगन्नाथे केशवे गरुडध्वजे॥ निवर्त्तंते क्रियाः सर्वा
श्चातुर्मासे च भारत॥ यामद्वयं जगत्स्या गान्नरोगैरभिरूपते॥ एवमादिव्रतैः पार्थ तुष्टिमायाति केशवः। विवाहव्रतबंधादि चूडासंस्कारलक्षणां॥ क्षौ
रयामप्रवेशाद्विगोदानादिप्रतिष्ठितं॥ आपनिपातिकर्माणि वर्जयेद्दक्षिणायने॥ असंक्रांतं तथा मासं दैवे पित्र्ये च वर्जयेत्। मलिम्लुचमशौच
चमूर्ध्वसंक्रांतिवर्जितं॥ मासेभाद्रपदे मासि एकादश्यां सिते हरिः॥ कटिदानं भवेद्विष्णोर्महापूजाप्रवर्तनं॥ कटिच्छेदजगन्नाथ योगनिद्रां निरंजन। कटिदानं कुरु
ष्वा घस्याशेभाद्रपदे शुभे॥ यदेन्देवशयनं तद्वेहंकालाशतः॥ पुराजयः प्रमादेन तोषयित्वा हरिं प्रभुं॥ यावित्तं स्वरस्वमं गनुरूपा नमे पूर्णानिद्ध्या॥ निरीक्ष्य वालमनो
देहहृंद्रं लक्ष्म्या उरस्थलं॥ शंखचक्रासिशार्ङ्गं स्ववाहशेषपर्यपश्यमे॥ नाभेरधो निरुद्धं मे वैनतेयेन पक्षिणा॥ सुकुदेनाशिरोरुद्धं कुंडलैः स्त्वशिरोजथा॥ हृद्यम
हंततः कृष्णनेत्रयोस्थानमादाता॥ चतुरोवार्षिकान्मासान्नसमीतामविष्यति॥ योगनिद्रापि महाकं स्मृत्वा योगाणां कं द्रुमं। नकारको वनानासमनो पंमेशुभि

९

जय०क० ३४४ 344

ष्ठिर॥ अहं तां न्नात इच्छामि मानयामि मनस्विनां॥ योगनिद्रां महानिद्रां शेषाहिशयने स्वपं॥ क्षीरोदन्तोपवीच्यग्रैर्धौतपादं समाहितं॥ लक्ष्मीकरांबुजैः श्लिष्टं मेघ
मानपदद्वयो॥ तत्रकाले तु योमामान्मंजके षुक्ष्णः क्षिपेत॥ प्रजैरनेकैर्नियमैः पांडवश्रेष्ठमानवः॥ कल्पस्थायी विष्णुलोके भ्रमते नात्र संशयः॥ ततो विबोधये
द्देवं शंखवर्णाःगहादिवरैः॥ कार्त्तिके शुक्लपक्षस्य एकादश्यां यथा हुत॥ मंत्रेणानेन राजेंद्र देवमुत्थापयेत्ततः॥ उत्तिष्ठोत्तिष्ठ गोविंद योगनिद्रां विहाय च॥ लक्ष्मीं
विसृज लोके स्मिन्न लक्ष्मीं तु दकेशव॥ मंत्रुत्थितेन दाविष्णोऽप्रक्रियासर्वाप्रवर्त्तते॥ तत्रैव देवदेवस्य पूर्वं वै स्नानमाचरेत॥ महातूर्यरवैरात्रौ भ्रामयेत्स
दृनेस्थितं॥ उत्थितं देवदेवेशं नगरे पार्थिवः स्वयं॥ दीपोद्योतकरैर्मार्गैर्गीतसमाकुलैः॥ योयोद्यामोदनं पश्ये उत्थितेश्वरं गीश्वरं॥ समदेशोपि राजेंद्र स
र्वैः स्वर्गाय कल्पते॥ रात्रौ जागरणं कार्यमेकादश्यां स्वालये॥ प्रभाते विमले स्नात्वा द्वादश्यां विष्णुमर्चयेत॥ जुहुयाद्धव्यवाहं च हविर्द्रव्यैर्घृतादिभिः॥ ततो
विप्रान्सुमान्नात्ता भोजयेदन्नविस्तरैः॥ घृतक्षीरदधिक्षौद्रक्षायगुडमोदकैः॥ यजमानोप्यतः स्थित्वा क्रोधलोभविवर्जितः॥ एकादश द्वादशाष्टौ वा भो
जयेत्कुटुंबतत्परान्सर्वे येद्वंद्वैनेरबीरौः पुष्पैर्गंधैर्द्विजोत्तमान॥ शास्त्रोक्तविधिनापार्थ भोजयेद्रागवद्भतान्॥ आवर्तते भ्यस्ततो दद्यात्सनत्पयत्किंचिदेवच॥ स्व राम·
भावाघदमीष्टं वै पत्रं पुष्पं फलादिकं॥ वद्धोरा वार्षिका न्मामा न्निपमो यस्य यः कृतः॥ कथयित्वा द्विजेभ्यस्तद्याद्भक्त्यास दक्षिणां॥ दत्वा विसर्जये द्विप्रा ३४४

रक्षतो मुंजीत तत्त्वयी ॥ यस्त्वक्तं चतुरो मासान् मासान्नं समुद्धरन् ॥ एवं प्रआचरेत् सार्थी सोनंतफलमाप्नुयात् ॥ अवमाने तु गाजेंद्रवाहु देवपुरं व्रजेत् ॥ प
344A स्यादिविघ्नमवाप्नोति वा तु भीसत्र तं नृप ॥ सर्वे वल्लत तद्वत्यक्त्वा न पुनर्मानुषो भवेत् ॥ योदेव शयनं वापि कटिदाने समाचरेत् ॥ उत्थाने वापि कृष्णस्य सह रे लो
कमाप्नुयात् ॥ शरणोनिद्रा पातिष्ठो तिऊहो स्याख्यातियो नरः ॥ हरे में क्तिकरः पार्थ स गच्छेद् वैष्णवं पदं ॥ दुग्धाब्धि शोभि शयने भगवान् अनंतो यस्मिन् दिने स्वपिति
वा च विबुध्यते वा ॥ तस्मिन्ननन्यमनसामुपवास भाजां पुंसां ददाति सुगतिं गरुडांगगामी ॥ इति श्रीभविष्योत्तरपुराणे विष्णोः शयनकटिदानोत्थापने कादशी
माहात्म्यं समाप्तं ॥ आषाढशुक्लैकादश्यां सा पद्मा हो नाव उक्तो मस्ना लेव त्वपुराणेपि ॥ एकादश्यां तु शुक्लायामाषाढे भगवान् हरिः ॥ भुजंगशयने शेते
क्षीरार्णवजले सदा ॥ ततस्तस्य तिमाकार्या सर्वलक्षणसंयुता ॥ सुप्ता तु शेषपर्यंके शैलमद्धिस्तवानिसिः ॥ ताम्रारकूदरजतेमस्थाप्या विचित्रपदे शुभा ॥
लक्ष्म्या उत्संगहस्ते च विमृक्तवरणांबुजा ॥ उत्संगहस्तेउत्संगास्थितहस्ते · नानाविधोपकरणैः पूजा च विधिपूर्वकं ॥ उपवासश्च कर्तव्यो जागरश्च
तथा ॥ तस्यां एव व्यतीतायां द्वादश्यां पूजयेत् तथा ॥ त्रयोदश्यां तथा गीतं नृत्यं वा घंनिवेदयेदिति ॥ दोडाने दपि आषाढशुक्लैकादश्यां कुर्यो स्वपनम हो
त्सवमिति ॥ अयं च द्वादश्यामपि कार्यः ॥ आभाकाघेषु मासेषु मिथुने माधवस्य च ॥ द्वादश्यां शुक्लपक्षे च मत्स्या पावर्त्तनो त्सवा इति निर्णयामृते धौम्

जयक० विषोक्तेः ॥ आषाढशुक्लद्वादश्यां क्षीराब्धिशयनोत्सवः कार्यो न यावत्ततो वृश्चिके सौराणां वाक्यत इति रामार्चनचंद्रिकोक्तेश्च ॥ द्वादश्यामित्यत्र पारणा
३४५ हस्तात्रैविद्यदिते । पारणाहे पूर्वरात्रे घंटादीन्वादयेत्तुङ्गरिति तत्रैवोक्तेः ॥ नृसिंहपरिचर्यायामपि यद्याषाढस्य सितपक्षे एकादश्यामुपोषितः । नक्तादि
345 जवरस्त्रेष्टुगृहीयान्नियमं व्रती ॥ कार्त्तिके शुक्लपक्षस्य एकादश्यां समाहितः इत्यादिवचनैरेकादश्यामेवानुष्ठेयता गम्यते तथापीयं वद्वादशी देवप्रबोधा
र्थं विनिर्मितेति मंत्रलिंगादनुगृहीतशिष्टाचाराद्द्वादश्यामप्यनुष्ठेयता निर्धार्यते इत्युक्तं ॥ मत्पुरेदुः । पद्मादश्यां शयनादिकमुक्तं तन्मिथुनार्कादौ वा भाकाद्येषु वि
तिभविष्योक्तेः । स्वापकालविशेषस्तु निशि स्वापो दिवोत्थानं संध्यायां परिवर्तनमिति ब्रह्मपुराणवचने न विशेषोक्तः । एताश्च द्वादश्यो रात्रिसंध्यादिने
ष्वनुराधाश्रवणरेवतीनामाद्यमध्यांतभागयुक्ताः क्रमेण प्रस्वापादिषु प्रशस्ताः । तथा च नारदीये । मैत्राद्यपादे स्वपितीह विष्णुः श्रुतेश्च मध्ये परिवर्ततेमेति
॥ पौष्ण्यावसाने च सुरारिहंता प्रबुध्यते मासचतुष्टयेनेति ॥ भविष्येपि ॥ आभाकासितपक्षेषु मैत्रश्रवणरेवती ॥ रेवतीत्यत्र सप्तमीलोपः आदिमध्यावसानेषु प्रस्वा
पावर्तनोत्सवाः ॥ यदा तु द्वादशीषु रात्र्यादिभागेषु तत्तन्नक्षत्रभागो नास्ति तदा द्वादशीनक्षत्रमात्रयोगोपि रात्र्यादिगतो ग्राह्यः । पादयोगो यदा न स्याद्द राम०
क्षेणापि पदा भवेदिति वाराहपुराणात् । विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते ॥ द्वादश्यामृक्षसंयोगे पादयोगो न कारणमिति विष्णुधर्मोत्तराच्च ॥ ३४५

345A

ह्यत्तु द्वादशीषु तासु निनक्षत्राणि न संत्येव किं ते काद्शीषु च यो दशीषु वा तदा तत्रापि तत्तदृक्षभाग एव निशादिवेलानादरेणाप्रस्वापादिकार्यं अपास्ते द्वादशीमध्ये उत्थानश
यनेहेतुः पादयोगेन कर्तव्ये नाहोरात्रं विविंतपेदिति जीमूतवाहनधृतवचनात् पादयोगाद्भ्यमति यौ द्वादश्यामृक्षसंगमादिति वचनाच्च ॥ एवं च द्वादश्यां निशा
घादरे मतियौ वनक्षत्रप्रपादयोगादरे निपतेमतिपद्याद्वादशीषु निशादेस्मत्रतत्तदृक्षभागयोगोऽस्मति यौवतदित्तरनक्षत्रस्येव योगात्तदा द्वादशीषु
संध्यायांमस्वापादिद्वादश्यांमद्धिसमये नक्षत्राणाममतं भवे ॥ आभाकामितपक्षेषु शयनानर्ने नादिकमिति या ग्रहवचनात् । संधिसमयइति शयनाद्वाय
नेतिसंधिसमयश्वस्वापसंध्येवा रेवत्यंतोयदारात्रौ द्वादश्यां च समागतः ॥ नद्दाघवुध्यते विष्णुर्दिनान्ते माप्यरेवती मिति जीमूतवाहनधृतवचनात् । अत्र च
उत्थुवचनेषु चतुर्थभागमात्रविपादग्रहणात् चतुर्थ्यविभक्तास्तुए धारे त्रयोराधान्तपादयोरेवस्वापशबोधोत्सवौ कार्यौ ॥ नत्वादिमध्यावसानेष्वि जिशाक्यु समंसू
दस्तुगतत्वादिति मायेन त्रेधाविभागएव । अतएव मध्यग्रहणमस्युपपद्यत इति वाच्यं ॥ वचनांतरेषु पादग्रहणेन विशेषश्रवणाद्युक्तत्वादिति हेतोरस्ति द्व
:स्वग्रामस्पष्टत्रेधा विभक्तस्य मध्यभाग एव ग्राह्यः ॥ आषाढकार्त्तिकपौर्णमास्योरपि स्वापप्रबोधावाह यमः ॥ क्षीरोदधौ शेषपर्यंके आषाढ्यां संविशेद्धरिः । नि
द्रां त्यजति कार्त्तिक्यां तयोः संपूजयेत्सदेति । अत्र चाषाढीकार्त्तिकीपदे आषाढस्येयं कार्त्तिकस्येयमिति श्रुतसा एकादशीपरेन व्व द्वियस्या वामादिरीतिः

जयक: ह्रितं ज्ञायांछे आषाढी यमितिस्यादिति वाच्यं कश्चिदप्यवादविषये पौर्णमासी कप्रवृत्तिरिति माधवेनाराधयत्यपेनेष्टमिति द्विरीतिलक्ष्मीधरमदाः यत्तु चातुर्मास्ये द्वादशीपक्षां
३४६ तेषु गवात्मधुसूदनः भोगिभोगे निजां मायां योगनिद्रां समासुयादिति विष्णुधर्मोत्तरस्वनविरोधोद्भूषणामभिहितं तदा शय्यानवबोधनिवेधनं ॥ यतोत्र
346 वाक्ये पक्षस्यत्रैधा विभागोनतु तीयांश एकादश्या द्विपंचदश्यंतो नशब्दे नविवक्षित इत्याहुः श्रीदत्तादयस्तु आषाढशुक्लैकादशीमारभ्य पौर्णमासी
पर्यंतं विष्णोर्निद्राग्रहणारूपशयनसमयः अतएवैकादश्यां शयनमभिधाय तदादिदिनपंचके कर्मकथनं ब्रह्मपुराणे वाराहपुराणे वा ॥ निद्राग्रह
णार्थं ज्ञानंतरं आषाढमासे द्वादश्यामित्यभिधानं वामनपुराणे अनुजां ब्रह्मणो भ्य स्वद्वादश्यां प्रयतः शुचिः लब्ध्वा पीतांबरधरः स्वस्ति निद्रां समा
नये दित्यभिधानं च । पमस्त्येनो आषाढीप दसोपाधेस्तत्रैव प्रवृत्तेः पूर्णिमायां शयनाभिधानं वसंगच्छते। विष्णुधर्मोत्तरेप्येवं ॥ केचित्तु भगवतः शयनका
ले विकल्पमाहुः कथमन्यथा आषाढे शाखाद्युज्जगवानिताचुंवनायामखिन्नो देवो दैत्यप्रमथनपटुर्यावदेकांतसुप्तः । अंतः शय्यापरिणततनुर्योगनिद्रा
सुपैतितावद्भूदेः समयउरिस्ति ब्रह्मणो भाषिते नेति गारुकशास्त्राद्दैशाखादिमासे हरिशयनमित्यप्याहुः । एतेषां च पक्षाणां यथासंप्रदायं व्यवस्था ॥ श्री राम:
रामस्य तु पमरणोत्तरं द्वादशीमध्ये त्रयोदशीमध्ये वा पूर्वेण वेस्वापोत्सवः पारणाहे पूर्वरात्र इति रामार्चनचंद्रिकोक्तेः शिष्टास्तु सर्वदेवानामपि पारणोत्त ३४६

346A

रम्येवाम्भोरुहेंवैतीतिकेचित्॥ पत्रमोहरूढोमेरोः॥ मिथुनरथोपदाभानुसमावास्यापदंपरस्पृशेत्॥ द्विराषाढःस्मविज्ञेयोविष्णुःस्वपितिकर्कटेदेइतिनदुत्तरवर्षगतककोर्के
स्वापपरामितिमाधव॥ मेषादिमिथुनांतेषुयदादर्शद्वयंभवेत्॥ अब्दांतरेतदावश्यंकर्कटार्केहरिःस्वपेत्॥ कर्कटादित्रिकेवापिपदादर्शद्वयंभवेत्॥ अब्दा
न्तरेतदानित्यंमिथुनार्केहरिःस्वपेत्॥ इतिवराहमिहिरोक्तेः॥ स्मृतस्यवावश्यानुष्ठेयनोक्ताराःमार्गेनवेद्धिकायांग्राह्य॥ मिथुनस्थेसहस्रांशौशोयोस्वापयति
नोहरिं॥ वैष्णवैःसहसंभूयघ्नावष्टितथाभवेदिति॥ अथरामार्चनंवर्द्धिकोक्तःस्वापमहोत्सवविधिः॥ पारणाहेपूर्वरात्रेचदानादस्यमुद्वा॥ विधाय
महतींपूजांविष्णुमभ्यर्च्यवैष्णवान्॥ नीराजनरथानेयात्रामारोप्यवैष्णवैः॥ गीतवादित्रघोषेणदेवंनीत्वाजलाशयं॥ पुष्पांजलिंप्रदायाथयानादुत्ता
रयेत्प्रभुं॥ तीरेऽघ्रिमार्जमाशास्यहस्तीक्रोपवेशयेत्॥ पौर्णीघ्रिपाणीःवीतःकुर्यात्संकल्पमादृतः॥ न्यासंकृत्वावदेदेवंस्वर्णाघर्मोऽनुवाकतः॥ तथापुरु
षसूक्तेनोच्चैर्नारायणोनवा॥ पंचामृतेनसंस्नाप्यपरसेक्षेणाघरघृतम्॥ अतोदेवेतिमंत्रेणजलेप्रस्थापयेत्प्रभुं॥ शेषपर्यंकपर्यंस्मिन्फणामणिगणाम
ले॥ श्वेतद्वीपेनरेदेवंनिद्रांकुरुनमोस्तुते॥ अथपुष्पांजलिंमहापूजांगंधस्रग्धूपदीपकैः॥ अन्नतांबूलनैवेद्यैःशास्यानुग्रहंहरेः॥ सप्तक्षेत्रपिठगन्धाचेज
गत्सुप्तेभवेदिदं॥ विबुद्धेचविबुध्येतप्रसन्नोमेभवाव्ययपाइतिसंप्रार्थ्यतत्स्याग्रेगृह्णीयान्नियमानिमान्॥ श्वेतद्वीपेभोगिनाथेयोगेनाधोस्थितेत्वयि॥ चातुर्मा

१

जयकर्म·
३४७
347

सव्रते त्वनुज्ञां देहि लक्ष्मीपते मम॥ लब्ध्वानुज्ञां शंखहस्तो यथा प्रोषितभर्तृका॥ वसुरो वार्षिकान्मासान्यद्वोत्थापनावधि॥ इमं करिष्ये नियमं निर्विघ्नं कुरु मे च्युत॥ इदं
व्रतं मया देव गृहीतं पुरतस्तव॥ निर्विघ्नं सिद्धिमायातु प्रसादात्ते रमापते॥ गृहीतेस्मिन् व्रते देव पंचत्वं यदि मे भवेत्॥ तदा भवतु संपूर्णं प्रसादाने रघूत्तम॥ इत्सम्यर्थ्यां
पदेवाय शंखेनार्घ्यं निवेदयेदिति॥ अथ प्रयोगः॥ एकादश्यां निशि नैमित्तिकं च पूजनं कृत्वा नरयानेन रथेन वा गीतवादित्रघोषेणादेवं जलाशयं नीत्वा पुष्पांज
लिं प्रदाय यानादुत्तार्य स्वह स्तेन संहृत्य तीरे उपवेशयेत्॥ ततः स्वपंचौतांघ्रियाणि रावांत श्रं कल्पं कुर्यात्॥ ततो विष्णुमंत्रमुच्छे दन्काषिनाम शर्वकं ध्यानं कृ
त्वा केशवादिभिर्नामभिः संस्तूय देवं वचसेत्॥ ततः स्तुवर्णो घर्मानुवाकपुरुषसूक्तोत्तरनारायणानुवाकान्स्मेतजेत्पृथक्॥ स्तुवर्णा घर्मपरिवृढवेनी॥ इन्द्रस्या मा
न्द्र शधा व र्तं॥ अंतः समुद्रे मनसा चरंतं॥ ब्रह्मान्वविंदद्दशहोतारमर्णे॥ अंतः प्रविष्टः शास्ता जनानां॥ एकः सन्बहुधा विचारः॥ शतं शुक्राणि यत्रैकं
भवंति॥ सर्वे वेदा यत्रैकं भवंति॥ सर्वे होतारो यत्रैकं भवंति॥ समानसीन आत्मा जनानां॥ अंतः प्रविष्टः शास्ता जनानां सर्वात्मा॥ सर्वाः प्रजा यत्रैकं भवंति
॥ चतुर्होतारो यत्र संपदं गच्छंति देवैः॥ समानसीन आत्मा जनानां॥ ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठां॥ दिव आत्मानं सवितारं बृहस्पतिं॥ चतुर्होतारं प्रदिशोनुक्लृप्तं॥ वाचो वीर्यं तपसान्वविंदत्॥ अंतः प्रविष्टं कर्तारमेतं॥ त्वष्टारं रूपाणि विकुर्वंतं विपश्चिं॥ अमृतस्य प्राणं यज्ञमेतं॥ चतुर्होतृणामात्मानं कवयो निचिक्युः॥ ३४७

347A अंतः प्रविष्टं कर्त्तारमेतं ॥ देवानां बंधुं निहितं गुहासु ॥ अमृतेन क्लृप्तं यज्ञमेतं ॥ चतुर्होतॄणामात्मानं कवयो निचिक्युः ॥ शतं नियुतः परिवेद विश्वा विश्व
वाराः विश्वमिदं वृणाति ॥ इंद्रस्यात्मा निहितः पंचहोता ॥ अमृतं देवानामायुः प्रजानां ॥ इंद्रं राजानं सवितारमेतं ॥ वायोरात्मानं कवयो निचिक्युः ॥ रश्मिं र
श्मीनां मध्ये तपंतं ॥ ऋतस्य पदे कवयो निपांति ॥ य आंडकोशे भुवनं बिभर्त्ति ॥ अनिर्भिन्नः सन्नथ लोकान्विचष्टे ॥ यस्यांडकोशं शुष्ममाहुः प्राणा
मुल्बं ॥ तेन क्लृप्तो अमृतेनाहमस्मि ॥ सुवर्णं कोशं रजसा परीवृतं ॥ देवानां वसुधानीं विराजं ॥ अमृतस्य पूर्णां तामु कलां विचक्षते ॥ पादं षड्ढोतुर्न
किलाविवित्से ॥ येनर्त्तवः पंचधोत क्लृप्ताः ॥ उत वा षड्धा मनसोत क्लृप्ताः ॥ तं षड्ढोतारमृतुभिः कल्पमानं ॥ ऋतस्य पदे कवयो निपांति ॥ अंतः
प्रविष्टं कर्त्तारमेतं ॥ अंतश्चंद्रमसि मनसा चरंतं ॥ सहैव संतं न विजानंति देवाः ॥ इंद्रस्यात्मानं शतधा चरंतं ॥ इंद्रो राजा जगतो य ईशे ॥ सप्तहोता
सप्तधा विक्लृप्तः ॥ परेण तंतुं परिषिच्यमानं ॥ अंतरादित्ये मनसा चरंतं ॥ देवानां हृदयं ब्रह्मान्वविंदत् ॥ ब्रह्मैतद्ब्रह्मण उज्जभार ॥ अर्कं श्चोतंतं स
रिरस्य मध्ये ॥ आ यस्मिन्त्सप्त पेरवः ॥ मेहंति बहुलां श्रियं ॥ बह्वश्वामिंद्र गोमतीं ॥ अच्युतां बहुलां श्रियं ॥ स हरिर्वसुवित्तमः ॥ पेरुरिंद्राय पिन्वते ॥
बह्वश्वामिंद्र गोमतीं ॥ अच्युतां बहुलां श्रियं ॥ मह्यमिंद्रो नियच्छतु ॥ शतं शता अस्य युक्ता हरीणां ॥ अर्वाङायातु वसुभी रश्मिरिंद्रः ॥ प्रमंहमा

अ॰प॰का॰मं॰ गोबहुला ॅ श्रियं॥ रश्मिरिंद्रः सविता मे नियछतु॥ घृतं तेजो मधुमदिंद्रियं॥ मय्ययमग्निर्दधातु॥ हरिः पतंगः पटरी सुपर्णः॥ दिविक्षयो नभसा य एति॥
३४८ स न इंद्रः काममवरं ददातु॥ पंचारं चक्रं परिवर्त्तते पृथु॥ हिरण्यज्योतिः सरिरस्य मध्ये॥ अजस्रं ज्योति नभसा सर्पदेति॥ स न इंद्रः काममवरं ददातु॥ सप्तयुंजंति
348 रथमेकचक्रं॥ एको अश्वो वहति सप्तनामा॥ त्रिनाभिचक्रमजरमनर्वं॥ येनेमा विश्वा भुवनाधितस्थुः॥ भद्रं पश्यंत उपसेदुरग्रे॥ तपो दीक्षामृषयः स्वर्विं
दः॥ ततः क्षत्रं बलमोजश्च जातं॥ तदस्मै देवा अभिसन्नमंतु॥ श्वेतं रुश्मिं बोभुज्यमानं॥ अपां नेतारं भुवनस्य गोपां॥ इंद्रं निचिक्युः परमे व्योमन्॥
रोहिणीः पिंगला एकरूपाः क्षरंतीः पिंगला एकरूपाः॥ शतं सहस्राणि प्रयुतानि नाम्नां॥ अयं यः श्वेतो रश्मिः परिसर्वमिदं जगत्॥ प्रजां पशू
न्धनान्य(?)स्माकं ददातु॥ श्वेतो रश्मिः परिसर्वं बभूव॥ सुवन्मह्यं पशून्विश्वरूपान्॥ पतंगमक्तमसुरस्य मायया॥ हृदा पश्यंति मनसा मनीषिणः॥
समुद्रे अंतः कवयो विचक्षते॥ मरीचीनां पदमिछंति वेधसः॥ पतंगो वाचं मनसा बिभर्ति॥ तां गंधर्वोवदद्गर्भे अंतः॥ तां द्योतमानां स्वर्यं मनीषां॥ ऋत
स्य पदे कवयो निपांति॥ ये ग्राम्याः पशवो विश्वरूपाः॥ विरूपाः संतो बहुधैकरूपाः॥ अग्निस्तां अग्रे प्रमुमोक्तु देवः॥ प्रजापतिः प्रजया संविदानः॥ वीत ॅ एम॰
स्तके स्तके॥ युवमस्मासु नियछतं॥ प्रप्रयज्ञपतिं तिर॥ ये ग्राम्याः पशवो विश्वरूपाः॥ विरूपाः संतो बहुधैकरूपाः॥ तेषां सप्तानामिह रंतिरस्तु॥ राय ३४८

348A स्पोषाय स्तुप्रजास्त्वाय स्तुवीर्याय॥ य आरण्याः पशवो विश्वरूपाः॥ विरूपाः संतो बहुधैकरूपाः। वायुस्तां२ अग्रे प्रमुमोक्तु देवः॥ प्रजापतिः प्रजया संविदानः॥
इडायै सृप्तं घृतवच्चराचरं॥ देवा अन्वविंदन्गुहा हितं॥ य आरण्याः पशवो विश्वरूपाः॥ विरूपाः संतो बहुधैकरूपाः॥ तेषां२ सप्तानामिह रंतिरस्तु॥ राय
स्पोषाय स्तुप्रजास्त्वाय स्तुवीर्याय॥ ॥ सहस्रशीर्षा पुरुषः॥ सहस्राक्षः सहस्रपात्॥ स भूमिं विश्वतो वृत्वा॥ अत्यतिष्ठद्दशांगुलं॥ पुरुष एवेदं२ सर्वं॥ यद्भूतं
यच्च भव्यं॥ उतामृतत्वस्येशानः॥ यदन्नेनातिरोहति॥ एतावानस्य महिमा॥ अतो ज्यायां२ श्च पूरुषः॥ पादोस्य विश्वा भूतानि॥ त्रिपादस्यामृतं दिवि॥ त्रि
पादूर्ध्व उदैत्पुरुषः॥ पादोस्येहाभवात्पुनः॥ ततो विष्वं२ व्यक्रामत्॥ साशनानशने अभि॥ तस्माद्विराडजायत॥ विराजो अधि पूरुषः॥ स जातो अत्यरिच्य
त॥ पश्चाद्भूमिमथो पुरः॥ यत्पुरुषेण हविषा॥ देवा यज्ञमतन्वत॥ वसंतो अस्यासीदाज्यं॥ ग्रीष्म इध्मः शरद्धविः॥ सप्तास्यासन्परिधयः॥ त्रिः सप्त समिधः कृता
॥ देवा यद्यज्ञं तन्वानाः॥ अबध्नन्पुरुषं पशुं॥ तं यज्ञं बर्हिषि प्रौक्षन्॥ पुरुषं जातमग्रतः॥ तेन देवा अयजंत॥ साध्या ऋषयश्च ये॥ तस्माद्यज्ञात्सर्वहुतः॥ सं
भृतं पृषदाज्यं॥ पशूं२ स्तां२ श्चक्रे वायव्यान्॥ आरण्यान्ग्राम्याश्च ये॥ तस्माद्यज्ञात्सर्वहुतः॥ ऋचः सामानि जज्ञिरे॥ छंदां२सि जज्ञिरे तस्मात्॥ यजुस्त
स्मादजायत॥ तस्मादश्वा अजायंत॥ ये के चोभयादतः॥ गावो ह जज्ञिरे तस्मात्॥ तस्माज्जाता अजावयः॥ यत्पुरुषं व्यदधुः॥ कतिधा व्यकल्पयन्॥ मुख

जय·क·म किमस्य कौ बाहू ॥ का ऊरू पादा उच्येते ॥ ब्राह्मणोस्य मुखमासीत् ॥ बाहू राजन्यः कृतः ॥ ऊरू तदस्य यद्वैश्यः ॥ पद्भ्यां शूद्रो अजायत ॥ चंद्रमा मनसो जातः
३४९ चक्षोः सूर्यो अजायत ॥ मुखादिंद्रश्चाग्निश्च ॥ प्राणाद्वायुरजायत ॥ नाभ्या आसीदंतरिक्षं ॥ शीर्ष्णो द्यौः समवर्तत ॥ पद्भ्यां भूमिर्दिशः श्रोत्रात् ॥ तथा लो
349 काँ अकल्पयन् ॥ वेदाहमेतं पुरुषं महांतं ॥ आदित्यवर्णं तमसस्तु पारे ॥ सर्वाणि रूपाणि विचित्य धीरः ॥ नामानि कृत्वाभिवदन्यदास्ते ॥ धाता पुरस्ताद्य
मुदाजहार शक्रः प्रविद्वान्प्रदिशश्चतस्रः ॥ तमेवं विद्वानमृत इह भवति ॥ नान्यः पंथा अयनाय विद्यते ॥ यज्ञेन यज्ञमयजंत देवाः ॥ तानि धर्माणि प्रथमान्या
सन् ॥ ते ह नाकं महिमानः सचंते ॥ यत्र पूर्वे साध्याः संति देवाः ॥ अद्भ्यः संभृतः पृथिव्यै रसाच्च ॥ विश्वकर्मणः समवर्तताधि ॥ तस्य त्वष्टा विदधद्रूपमेति ॥ तत्पु
रुषस्य विश्वमाजानमग्रे ॥ वेदाहमेतं पुरुषं महांतं ॥ आदित्यवर्णं तमसः परस्तात् ॥ तमेवं विद्वानमृत इह भवति ॥ नान्यः पंथा विद्यतेयनाय ॥ प्रजापति
श्चरति गर्भे अंतः ॥ अजायमानो बहुधा विजायते ॥ तस्य धीराः परिजानंति योनिं ॥ मरीचीनां पदमिच्छंति वेधसः ॥ यो देवेभ्य आतपति ॥ यो देवानां पुरोहितः ॥
पूर्वो यो देवेभ्यो जातः ॥ नमो रुचाय ब्राह्मये ॥ रुचं ब्राह्मं जनयंतः ॥ देवा अग्रे तदब्रुवन् ॥ य स्त्वैवं ब्राह्मणो विद्यात् ॥ तस्य देवा असन्वशे ॥ ह्रीश्च ते लक्ष्मीश्च प राम·
त्न्यौ ॥ अहोरात्रे पार्श्वे ॥ नक्षत्राणि रूपं ॥ अश्विनौ व्यात्तं ॥ इष्टं मनिषाण ॥ अमुं मनिषाण ॥ सर्वं मनिषाण ॥ ततः पुरुषसूक्तेन संपूज्य· अजो देवेति मंत्रेण राज ३४९

349A

लेमस्नापनं कुर्यात् ॥ शेषपर्यंकवर्येऽस्मिन्फणामणिगणामले ॥ श्वेतद्वीपांतरे देव निद्रां कुरु नमोऽस्तु ते इति मंत्रेण नत्वापि महापूजां कृत्वा तस्मिन्हरेरनुग्रह
मामास्यस्ट मे त्वयि जन्नाथे जाग्रत्स्वप्ने भवेद्धृदि । विबुद्धे त्वयि बुध्येत प्रसन्ने मे भवाव्ययेति संप्रार्थ्य । श्वेतद्वीपे भोगिनाथे योगिनाथे स्थिते त्वयि ॥ चातुर्मास्य
व्रतं तेनुमोदे हि लक्ष्मीपते मम ॥ इति भगवत्कृपाकटाक्षदृष्ट्या माज्ञां लब्ध्वा देवस्याग्रे नियमस्वीकारं कुर्यात् ॥ तत्प्रकारस्तु हेमाद्रौ भविष्ये ॥ एवं नाम प्रतिमां विष्णोः
पूजयित्वा स्वयं नरः ॥ प्रभाषेताग्रतो विष्णोः कृतांजलिपुटस्तदा ॥ चतुरो वार्षिकान्मासान्गृहे चोत्थापनावधि ॥ इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत ॥ इमं व्र
तं मया देव गृहीतं पुरतस्तव ॥ निर्विघ्नां सिद्धिमायातु प्रसादात्ते रमापते ॥ गृहीतेऽस्मिन्व्रते देव यं व्रजीय यदि मे भवेत् ॥ तदा भवतु मे पूर्णं प्रसादात्ते रघूद्वह ॥ ततो
देवाय शंखेनार्घ्यं निवेदयेत् ॥ तत्र मंत्रः ॥ शंखपात्रगतं तोयं फलपुष्पसमन्वितं ॥ अर्घ्यं गृहाण देवेश रमाकांत वरप्रदेति ॥ अर्घ्यदानोत्तरं भगव
तः स्तुतिं कुर्यात् ॥ सा च यथा ॥ यः पृथ्वीभरवारणाय दिविजैः संप्रार्थितश्चिन्मयः संजातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः ॥ निश्चक्रं हतराक्ष
सः पुनरगात्ब्रह्मत्वमाद्यं स्थिरां कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजे ॥ विश्वोद्भवस्थितिलयादिषु हेतुमेकं मायाश्रयं विगतमायमनंतमू
र्तिं ॥ आनंदसांद्रममलं निजबोधरूपं सीतापतिं विदिततत्त्वमहं नमामि ॥ भजेऽहं सदा राममिंदीवराभं भवारण्यदावानलाभाभिधानं ॥ भवानीहृदा भावि

जय॰ कं॰ म॰ त्वामेकरूपं मनसा वचोभिरहं तु भवाब्धिप्रपन्नः। हरानेककुठः घोरौघनाशैकहेतुं निराकारदेहं निराकाममीड्यं। परेशं परानंदरूपं वरेण्यं हरिं राममीशं भजे भारतीशं॥ प्रपन्ना

३५॰ श्रितानां दयालोऽहं प्रसन्नं प्रपन्नार्तिनिःशेषनाशाभिधेयं॥ तपोयोगयोगीशभावाभिभाव्यं कपीशादिमित्रं भजे राममित्रं॥ सदा भोगभाजां सुदूरे विभांतं

350 सुहायोगभाजामदूरे विभांतं। चिदानंदकंदं सदा राघवेशं विदेहात्मजानंदरूपं प्रपद्ये॥ महायोगमायाविशेषानुयुक्तो विभासीश लीलानराका

रवृत्तिः। त्वदानंदलीलाकथापूर्णकर्णाः सदानंदरूपा भवंतीह लोके॥ अहंमानपानाभिमत्तः प्रमत्तो न वेदाखिलेशाभिमानाभिमानः॥ इदानीं भव

त्पादपद्मप्रसादात्त्रिलोकाधिपत्याभिमानो विनष्टः॥ स्फुरद्रत्नकेयूरहाराभिरामं धराभारभूतासुरानीकदानं॥ शरच्चंद्रवक्त्रं लसत्पद्मनेत्रं दुरा

वारपारं भजे राघवेशं॥ सुराधीशनीलाभनीलांगकांतिं विराधादिरक्षोवधाल्लोकशांतिं॥ किरीटादिशोभं पुरारातिलाभं भजे रामचंद्रं रघूणामधीशं

॥ लसच्चंद्रकोटिप्रकाशादिपीठे समासीनमंके समाधाय सीतां॥ स्फुरद्धेमवर्णां तडित्पुंजभासां भजे रामचंद्रं निवृत्तार्तितंद्रं॥ इत्युध्वा त्मरामायप्रणो

त्कं रामचंद्रं स्तोत्रैः इति स्तुत्वा प्रजापालो राजन्याशासमंगलैः॥ शंखवीणादिवर्षवसभोज्यगीतनृत्यादिना हरिं। परितोष्य यथा सं पूजयेत्स्तुत्वा स्वरूपान् राम॰

कौ॥ भगवंतं समारोप्य गीतवादित्रघोषतः। आगतं मंदिरे रत्नामहानीराजनं प्रभोः॥ विसर्ज्य तैर्ह्यशान्देवानुपवेश्य सुरवैः सह पेते॥ इति शापनोत्स ३५॰

350A

वः॥ मदनरत्ने महाभारते॥ आषाढे तु सिते पक्षे एकादश्यामुपोषितः॥ चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्नियतो नरः॥ सनत्कुमारः॥ चातुर्मास्यव्रतारंभस्य कालां

तरमप्याह॥ एकादश्यां तु शुक्लायां संक्रांतौ कर्कटस्य वा॥ आषाढ्यां वा नरो भक्त्या चातुर्मास्योदितं व्रतमिति॥ असंभवे प्रारंभोऽतुर्वल्लमया हावधिका

र्पः॥ तथा च वृद्धगार्ग्यः॥ न शैशवं न मौढ्यं च शुक्रगुर्वोर्न चातिथेः॥ खंडितं चिंतयेद्धीमांश्चातुर्मास्यविधौ नरः॥ एतत्तत्त्वाविरोधात्प्रथमारंभविषयम

पि॥ यदपि हेमाद्रौ चातुर्मास्यव्रतप्रकरणे भविष्ये॥ असंक्रांतं तथा मासं दैवे पित्र्ये च कर्मणि॥ मलमासस्य शौचं च वर्जयेन्मतिमान्नरः इति॥ तद्धाव

रो वर्जयेच्छुक्रमित्यादिना आषाढादिकमिति मासविशेषविहितव्रतानानुवृत्तसर्थं। सष्टमासविशेषाख्या विहितं वर्जयेन्मनुः इति वचनात्॥ चातु

र्मास्यव्रतानिवर्तनं मलमासेप्यनुवर्तनमित्यपरे॥ इति मयूखे॥ एतद्वचनं चातुर्मास्यप्रकरणे पठितमपि असंबद्धार्थत्वान्न चातुर्मास्येणामंत्र्यापेनात्रो

न्को र्षं च्यमिति ज्ञेयं॥ मकरस्य निवेशेपि चा प्रथमारंभविषयमिति निर्णयामृते॥ वस्तुतस्तु॥ अधिमासनिपातेपि संधेयः एव विधिः क्रमः इति वचनेन चातुर्मा

स्यव्रतारंभानंतरं समाप्तेः प्राग्गतमलमासपातेऽनुवृत्तिविधाने नैतद्वचनं तत्प्रकरणोपठितमपि तद्भिन्नविषयं एकादश्यामाशौचे पूर्णिमायां कर्कसं

क्रांतौ वारंभेत त्रितयत्राप्याशौचे प्रथमतो नारंभ एव॥ आद्यं चेत्सूतकं न स्यादन्त्ये चेत्सूतकमिति विघ्नस्ते: द्वितीयाद्यारंभमत्स्यमवगमेव॥ प्रति वर्षं वयः कु

जय॰ कम॰ योहि देवदेवेशं स्मरन्हरिं देहं त्यजेत्तिप्रदीपेन विमानेनार्कवर्चसा ॥ मोदते विष्णुलोके सौ यावदाभूतसंप्लवमिति ॥ हेमाद्रौ भविष्ये च नेन प्रतिवर्षं क्रियमाणा सैकैकफलमं
३५१ वंधे नैकव्रतत्वेन प्रथममारिभमसत्त्वात्तदिति ॥ यत्तु वंनदीपिकायां स्कांदे ॥ अशक्तो विवर्णशक्तो वापि यदि स्त्री यदि वा पुमान् ॥ व्रतमेतन्नरः कुर्यान्मुच्यते सर्वपातकै
351 रिति तदारंभोत्तरं बोध्यं ॥ चातुर्मास्यव्रतानि तु भविष्योत्तरीयेति हासप्रसंगे नष्टवर्मे योक्तानि ॥ अथ चातुर्मास्यव्रतानि भविष्ये ॥ श्रावणे वर्जयेच्छाकं दधि भाद्रपदे
तथा ॥ दुग्धमाश्वयुजे मासि कार्तिके चामिषं त्यजेत् ॥ द्विदलं त्यजेदित्यपि पाठः ॥ मारापग्रवर्णां च मांकुजं बीरं बीजपूरकं ॥ अयज्ञशिष्टमन्नाद्यं यद्विष्णोरनिवे
दितं ॥ दग्धमन्नं मसूरं च मांसं चमष्टविधं मतं ॥ कृ चंतत्तद्देशलभ्यं फलमूलादि वर्जयेत् ॥ पाद्मे कार्तिकमाहात्म्ये ॥ गोछागीमहिषीभूतादन्यदुग्धादि चामिषं ॥
धान्ये मसूरिका प्रोक्ता अन्नं पर्युषितं तथा ॥ द्विजक्रीता रसाः सर्वे लवणं भूमिजं तथा ॥ ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितं ॥ आत्मार्थं पाचितं चान्नमा
मिषं तत्स्मृतं बुधैः ॥ जंबीरराजमाषांश्च मूलकं रक्तमूलकं ॥ कूष्मांडं वेक्षुदंडं च चातुर्मास्ये त्यजेद्बुधः ॥ तथा ॥ विशेषाद्दहरी धात्री कूष्मांडं तिंत्रिणीं त्य
जेत् ॥ जीर्णा धात्रीपलं ग्राह्यं कथं चित्त्काय शोधनमिति ॥ तथा ॥ निष्पावान् राजमाषांश्च मसूरं संधितानि च ॥ वृंताकं च कलिंगं च सप्ते देवेन भक्षयेत् ॥ राम॰
॥ स्कांदे ॥ चत्वार्येतानि नित्यानि चतुराश्रमवर्तिनो ॥ प्रथमे मासि कर्तव्यं नित्यं शाकव्रतं नरैः ॥ द्वितीये मासि कर्तव्यं दधिव्रतमनुत्तमं ॥ पयोव्रतं तृती ३५१

351A

पेत्तुचतुर्थैंद्रुनिशामपा॥ द्विदलं बहुवीजं च वृंताकं तैलवर्जयेत्॥ नित्यान्येतानि विप्रेंद्रव्रतान्याहुर्मनीषिणः॥४॥ कोद्रवा वार्षिकी श्चातुरो मासान्प्रसुप्ते वै जनार्दने॥ मी
नरवद्यादिशयनेवर्जयेन्मतिमान्नरः॥४॥ अन्यत्तो वर्जयेद्धार्यो मांसं मधुपरौदने॥ पटोलं मूलकं चैव वृंताकं च न भक्षयेदित्यादि। शाकप्रारब्धश्च दशस्तुहूद
४॥ मूलपत्रकरीराग्रफलकांडादिरूढकाः॥ त्वक्पुष्पं कवकं चैव शाकं दशविधं स्मृतम्। मिश्रकोः॥ अपि रूढे अंकुरः॥ आवा समहीपे॥ वृंताकं च कलिंगं च
बिल्वोदुंबरमिश्रयः॥ उदरेपमज्जीयंतित्तस्मद्दूरन्तरोहरिः॥ मिश्रुयदग्धान्नं॥ मीस्तदेतिपाठे तु मीस्तदाश्लेष्मान्कमितिधन्वंतरिनिघंटुः॥४॥ पत्तुन्नस्ति
हपरिवर्ण्यांवृंताकंसदा वैद्धुवैर्वर्ज्यं॥ येभक्षयंति वृंताकंनस्पहूरनरोहरिरित्यादिनिंद्राश्रवणादिति। तच्छूतवृंताकविषयं। तथा च पराशरः॥ पला
डुश्चेतवृंताकंकुसुंभंचनकंदयं॥ नालिकाबालपुष्पंच भुक्त्वादिनमभोजनं। अत्रापि पलांडुमितिश्वेतपालांडावेवोपसंह्रियतमाधव॥४॥ देहलीदी
पकन्यायेनतथैव पुष्पमितितदाशयः॥ एतान्यातुरस्यभिषक्क्रियायामप्रतिषिद्धानीतिस्मृतौ॥४॥ तथा चतुर्थेपि हि हविष्याशीनपायमागिति॥ ह
विष्याणिपरिभाषायांदृष्ट्यानि॥ अथ चातुर्मास्यव्रतसमाप्तौ विशेष उच्यते॥ चातुर्मास्येतु वैत्यक्तं भक्ष्यभोज्यादिकं च यत्॥ चतुरो वार्षिकान्मा
सान्नियमोयस्ययः कृतः। कथयित्वा द्विजेभ्यस्तद्दत्त्वा विप्राय दक्षिणां॥ दत्त्वा विसर्जयेद्विप्रान्ततो भुंजीत च स्वयमिति। अथ तत्तद्व्रतसांगत्वं न समा

जैंक०म०
य
३५२
352

सौदेयकृत्वा निर्मम विधे॥ गुडवर्जनतो दध्याज्ययुक्तं ताम्रभाजनं॥ महिषीं पिनरश्चेष्टलवणास्वादवर्ज्यं विधिः॥ नक्ते वस्त्रयुगं एकान्तरोपवासे गौः शयने शय्या षष्ठ
कालभोजने गौः॥ व्रीहिगोधूमत्यागे हेममव्रीह्यादि कृच्छ्रव्रते गोयुगं॥ शाकाशने गौः पयोव्रते वा॥ मधुदधिघृतव्रते स्वर्णं गौश्च॥ ब्रह्मचर्ये स्वर्णमूर्तिः॥
तांबूलव्रते वासोयुगं॥ मौने घृतकुंभो वस्त्रयुगं घंटा वा॥ देवाग्रे रंगमालिकाकरणे धेनुः हैमपद्मं वा॥ दीपव्रते दीपिका वासोयुगं वा॥ भूमिभोजने प
रां भोजने कांस्यपात्रं गौश्च॥ चतुष्पथदीपे गोग्रासे वा गौः॥ प्रदक्षिणाव्रते वस्त्रं॥ अनुक्तेषु स्वर्णं गौः श्वेत्यादि ज्ञेयं॥ इदं च कार्तिकशुक्लद्वादशी
वक्तव्यमपि प्रसंगात् लिखितं॥ तथा मार्गवार्त्तं नदीपिकायां पाद्मे॥ शयनी बोधनी मध्ये शमीदूर्वा पमार्गकैः॥ मृदंगारजेन देवांस्नानार्थं पीतकद्वादनेति॥
हेमाद्रौ पाद्मे॥ आषाढादि चतुर्मासान् मृगं वर्जयेत् सदा॥ समाप्ते च पुनर्दद्यात् तिलतैलयुतं घटमिति॥ आषाढादि चतुर्मासे वर्जयेन्नखकृंतनं॥ वृं
ताकं गृंजनं चैव मधुसर्पिर्घटान्विती॥ कार्तिक्यां तु पुनर्हैमं ब्राह्मणाय निवेदयेत्॥ अन्यानपि वर्जनसंकल्परूपादन्यमोर्यीथे भोज्यानि॥ आषा
ढशुक्लद्वादश्यां तप्तमुद्राधारणमुक्तं रामार्चनचंद्रिकायां॥ कर्तव्यं वैष्णवैर्नित्यं प्रदायानुरागतः॥ शयन्यां चैव बोधिन्यां चक्रतीर्थे तथैव च॥ शं राम०
खचक्रविधानेन वह्निप्रतोभवेन्नरः॥ इति॥ पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः॥ अतप्ततनूर्न तदामो अश्नुते श्रृतास इद्वह ३५२

352A

तस्तत्तमाशात॥तपोध्यविन्नंवितनंदिवसस्यदेशोवंतोजस्पतीतवोव्यास्थिरत्॥इतिऋग्वेदे॥सहोवाचयाज्ञवल्क्यस्तसुमानात्महितायप्रेशगाहरिंभजेत॥स्तु
स्लोकेमोलेवेर्मार्गायानिनासंघतइतिशानपाथिकश्रुतौ॥पतद्विजोजवक्रेहतमेजन्मामोघीतत्तवर्षाणिद्राः॥मलेवाहोर्दधर्मेधुराणालिंगाभ्यंमे
तमाधुयान्यपंयेंतोमामवेदे॥ऊर्ध्वमस्यबिन्दुंकिनालोकेऊर्ध्वमागाभवेम॥इत्यथर्ववेदे॥अग्निहोत्रंयथानित्यंवेदस्याध्ययनंयथा॥ब्राह्मणस्यत
थानित्यंतप्तचक्रीकधारणं॥इतिपाद्मे॥एतत्प्रकारस्तुरामार्चनचंद्रिकानोजेपः॥यथ्वीवंश्रोद्रपादित्यंथेषुतु॥यस्मात्तप्तशंखादिलिंगाविन्हतनुर्न
रः॥सस्तवेयात्नाभोगीवेडालोजन्मकोटिषु॥द्विजैस्तुतप्तशंखादिलिंगांकिततनुर्नरः॥संभाष्यरौरवंयातियावदिंद्राश्चतुर्दश॥इतिवृहन्नारदीयोक्ते
श्शांखचक्राघंकनंचगीतन्स्यादिकंतथा॥एकजातेरयंधर्मोनजातुस्याद्विजन्मनः॥शंखचक्रेमृदापस्तुकुर्यात्तप्तायसेनवा॥सशूद्रवद्बहिःका
र्यःसर्वस्माद्विजकर्मणः॥यथाश्मशानजंकाष्ठमनर्हंसर्वकर्मसु॥तथाचक्रांकितोविप्रःसर्वकर्मसुगर्हितः॥तथा॥शिवकेशवयोरंकान्शूलचक्रादि
कान्द्विजः॥नधारयेन्नमतिमान्वैदिकेवर्त्मनिस्थितः॥इतिविष्णुआश्वलायनादिवचनात्॥ऋग्वेदादितीनोद्धर्मादिक्तातिपरत्वात्॥अन्यश्रुतीनांस
तथाविधानामनुपलंभाइदाहृतपाद्मवचनस्याकरग्रंथेष्वनुपलंभात्वक्रादिधारणेविशुद्धविषयमेवेत्युक्तं॥यच्चापिनिषेधस्यप्राप्तिसापेक्षत्वा

२०
२१

जयं०कृ०म
३५३
353

द्विविंविनाचनदध्योगाडुपजीव्यविरोधेनवतौपशौकरोतीतिवद्विकल्पोयुक्तस्तथापिएकजातेमयंधर्मइत्यनेनसामान्यवाक्यानामुपसंहारात् द्विजातिनिषेधोनित्यानु
वादइतितद्दाशयइतिनिर्णयसिंधौ॥यद्यपिविष्णुवाक्यलापनादिवचनेषुमद्यापिशेषवचकादिध्वाराणानिषेधःप्रतीयते॥तथापिशैवंवैष्णवंकाकिनोविप्रःश्म
शानेम्रियतेपिवेत्॥प्रपाणोपागतिःप्रोक्तामागतिस्तस्यनारदेतिकदाचिदुधीकितंविन्हेगोपीवंदनमस्तयापा॥प्रपापादिषुतीर्थेषुगत्तामोक्षिकारणनीतिआदि
वाराहपुराणादिवचनैर्मद्दाकर्तव्यतावामेनयतदत्ननयायसक्तानुयसक्तवितया॥अथमत्स्यपुराणोक्तंविष्णुतिद्वादशीव्रतं॥नंदिकेश्वरउवाच॥श्रृणु
नारदवक्ष्यामिविष्णोर्व्रतमनुत्तमं॥विष्णुतिद्वादशीनामसर्वामरविभूषिता॥कार्त्तिकेत्तथवैशाखेमार्गशीर्षेथफाल्गुने॥आषाढेवैदशम्यांतुशुक्लायांल
घुभुक्नरः॥कृत्वासायंतनींसंध्यांगृहीयान्नियमंबुधः॥एकादश्यांनिराहारःसमभ्यर्च्यजनार्दनं॥द्वादश्यांद्विजसंयुक्तःकरिष्येभोजनंततः॥तदवि
घ्नेनमेयातुसाफल्यंमधुसूदन॥ततःप्रभातेचोत्थायकृतस्नानजपःशुचिः॥पूजयेत्पुंडरीकाक्षंशुक्लमाल्यानुलेपनैः॥विष्णवेतिदेनमःपादौविशोकायेतिजा
नुनी॥नमःश्रीशायेत्यूरूचकटिंवैविश्वरूपिणे॥कंदर्पायनमोमेढ्रंआदित्यायनमःकटौ॥दामोदरायेत्युदरंवासुदेवायपार्श्वकौ॥माधवायेतिसंपूज्य राम०
ःकंठमुत्कंठिनेनमः॥श्रीधरायमुखंकेशान्केशवायेतिनारद॥पृष्ठंशार्ङ्गधरायेतिश्रवणौवरदायवै॥स्वनाम्नाशंखचक्रासिगदावरदपाणयः॥शिरःस ३५३

वीत्मनेब्रह्मन्नमह स्वामिश्च जपेत ॥ मत्स्यमुत्पलसंयुक्तं हैमं कृत्वा तु शक्तितः ॥ उदकुंभसमायुक्तं मयत स्थाप्य पेद्विमो ॥ गुडपात्रीं तिलैर्युक्तां सितवस्त्रा
भिवेष्टितां ॥ रात्रौ जागरणं कुर्यादितिहासकथादिकं ॥ प्रभातायां तु शर्वर्यां ब्राह्मणाय कुटुंबिने ॥ सकांचनोत्पलं देवं सोदकुंभं निवेदयेत ॥ यथा न मुच्य
ते विष्णुः सदा सर्वं विमूर्त्तिदः ॥ तथा मामुद्धराशेषदुःखसंसारकर्दमात् ॥ दशावताररूपाणि प्रतिमा मैत्रकमान्मुने ॥ दत्त्वा चेयं तथा व्यासः कुत्सलेन सम
न्विते ॥ प्रतिमा संयुक्तं त्रैमूर्त्तिपः कांचनेन वै ॥ कांचनमेव पद्मस्पर्शस्थाप्यो परिरुजयेत ॥ पुष्पधूपादिनैवेद्यैर्भक्ष्यभोज्यैः प्रदीपकैः ॥ वस्त्रैराभरणैश्चै
व पयावि भवसारतः ॥ रात्रौ जागरणं कुर्यान्नृत्यवादित्रनिर्भरः ॥ ततः प्रभाते विमले कृतस्नानादिकक्रियः ॥ उपदेष्टृदत्त्वा सर्वमेतत् समाहितः ॥
प्रतिमास्तु पुराणज्ञे वेदवेदांगपारगे ॥ ततः संपूजयेत्तेषां विशेषं शक्तिपूर्वकं ॥ शक्तिपूर्वकं विधृतिपुष्पमरी ॥ कृत्वा संपूज्य लवणापर्वतेन समन्विता ॥ लव
णापर्वतदानं विधिवत्कृत्वा नरः देवदेवेशसौम्य ॥ शय्यां सोपस्करां च्छेत्रं सौवर्णीं वोपस्करणान्वितां ॥ ग्रामं देशपतिर्दद्यात्क्षेत्रं ग्रामपतिस्तथा ॥ निवर्तनं क्षेत्रपाति
र्वनं च समग्रशिमत ॥ एवंविध्वनतारेणा पूजयित्वेदशीगृहे ॥ अन्यानपि यथाशक्त्या तर्पयित्वाद्विजोत्तमान ॥ वृद्धान्नगोहिरण्यादि सत्त्वमास्थाय वोत्तमं पत्रमतं
तेनहरिस्तोषमायात्यसंशयं ॥ पश्चातिनिस्वः पुरुषो भक्तिमान्माधवं प्रति ॥ पुष्पार्चनविधानेन स कुर्याद्द्वादशीव्रतं ॥ अनेन विधिनाय स्वविभूतिद्वादशीव्रतं ।

जप०कम० कुर्यात्सर्वपापनिर्मुक्तः पितॄणां तारयेच्छतं ॥ सप्तजन्मान्यसौ मर्त्यो विभूतिं प्राप्नुयात्सदा । रोगदौर्गत्यपापानां भाजनं नोपजायते ॥ भक्तिश्च यज्ञपुरुषे तस्य जन्मनि

३५४ जन्मनि ॥ प्राप्नुयादच्युतस्थानमच्युतस्य प्रसादतः ॥ इयं चारवैडितका पुण्या विभूतिद्वादशी नरैः ॥ सर्वपापप्रशमनी फलसर्वप्रदायिनी ॥ इति कलुषविदारणी

35-4 जनानां पठति मृदा घशृणोति वेति भक्त्या ॥ मतिमपि चद्दाति देवलोके वसति चिरं वसुधृत्यजने मरौ घैः ॥ इति मत्स्यपुराणोक्तं विभूतिद्वादशीव्रतं ॥ अ

थ मेवैकादश्यां वाराहपुराणोक्तं वासुदेवद्वादशीव्रतं ॥ दुर्वासा उवाच ॥ आषाढे प्येवमेव तु सकल्पविधिना नरः ॥ अर्चयेत्परमं देवं गंधपुष्पैर्विधानतः

वासुदेवाय पादौ तु कटिं संकर्षणाय च ॥ प्रद्युम्नायेति जठरमनिरुद्धाय वैउरः ॥ चक्रपाणये ति भुजौ कंठं भूपतये तथा ॥ स्वनाम्ना शंखचक्रे तु पुरुषा

येति वैशिरः ॥ एवमभ्यर्च्य मेधावी प्राग्वत्तस्याग्रतो घटं ॥ विन्यसेद्वस्त्रयुग्मेन तत्सोपरि ततो न्यसेत् ॥ कांचनं वासुदेवं च वस्त्रं वीहुंस्तनात्तनं ॥ तमभ्यर्च्य

विधानेन गंधपुष्पादिभिः क्रमात् ॥ प्राग्वत्तत्ब्राह्मणे दद्याद्देवाहिनिस्तुबते ॥ पीपितांश मनसश्च तु विधं रूपीति मंत्रः ॥ एवं नियमयुक्तस्य पुराये

तस्य शृणु फलं शुभे ॥ वसुदेवो भवेद्राजा यदुवंशसमुद्भवः ॥ देवकी तस्य भार्यासीत्समानव्रतचारिणी ॥ सा तत्पुत्रा मया न्याधीपति धर्मपरायणा ॥ तस्याः राम०

काले न महता नारदो भ्यागमद्गृहे ॥ वसुदेवेन भक्त्यासौ पूजितो वाक्यमब्रवीत् ॥ कथयामास धर्मज्ञो देवकीवसुदेवयोः ॥ ता वध्येवं विधं भक्त्या वक्रतुः ३५४

354A

श्वहपान्वितौ ॥ तयो स्त्रष्टः स्वयं विष्णुः पुत्रत्वे वव्रजगाम ह ॥ एवमेषा पापहरा द्वादशी पुत्रदा स्मृता ॥ इमां सुपोष्य हस्ताद्विधादि त्वं लभेतिव ॥ राजंश्चष्ट राज्या
स्तु पापिनः पाप संक्षयी ॥ यथा भार्गोपनी तस्मात् प्राणापानः केशवेन वै ॥ मत्तो विष्णुपुरे रम्ये मोदते कालमक्षयी ॥ मन्वंतराणि षट्त्रिंशत्तत्र कालात्पुनः ॥ इह
लोके भवेद्राजा सप्त वर्षाणि तानि तु ॥ दात्ता पञ्चासमायुक्तस्ततो निर्वाणमाप्नुयात् ॥ इति श्रीधराणि भविते वासुदेव द्वादशी व्रतं ॥ अथ श्रावण कृष्णैकादशी मा
हात्म्यं ॥ युधिष्ठिर उवाच ॥ आषाढ शुक्लपक्षे तु यद्देवशयनी व्रतं ॥ तन्मया संश्रुतं सर्वं हि पुराणे बहुविस्तरं ॥ श्रावणे कृष्णपक्षे तु किं नामैकादशी भवेत्
॥ एतत्कथय गोविंद वासुदेव नमोस्तुते ॥ २ ॥ श्रीकृष्ण उवाच ॥ नारदाय पुरा राजन् पृच्छते च पितामहः ॥ परं यदुक्तं वा तात तदहं ते वदाम्यहं ॥ नारद उवाच
॥ भगवन् श्रोतुमिच्छामि त्वत्तो हि कमलासन ॥ श्रावणे कृष्णपक्षे तु किं नामैकादशी भवेत् ॥ को देवः को विधिस्तस्याः किं पुण्यं कथय प्रभो ॥ ब्रह्मो
वाच ॥ शृणु नारद वक्ष्यामि लोकानां हितकाम्यया ॥ श्रावणैकादशी कृष्णा कामिका नाम नामतः ॥ अस्याः श्रवणमात्रेण वाजपेयफलं लभेत् ॥
अस्यां यः पूजयेद्देवं शंखचक्रगदाधरं ॥ श्रीधराख्यं हरिं विष्णुं माधवं मधुसूदनं ॥ जपते ध्यायते यो वै तस्य पुण्यफलं शृणु ॥ न गंगायां न काश्यां च नैमि
षे न च पुष्करे ॥ तत्फलं समवाप्नोति यत्फलं हरिपूजनात् ॥ केदारे च कुरुक्षेत्रे राहुग्रस्ते दिवाकरे ॥ न तत्फलमवाप्नोति यत्फलं कृष्णपूजनात् ॥ गोदावर्यां

जप॰ क्रम॰ गुरौ सिंहे व्यतीपाते वगीडके ॥ न तत्फलमवाप्नोति यत्फलं कृष्णपूजनात् ॥ ससागरवनोपेतां यो ददाति वसुंधरां ॥ कामिकाव्रतकर्त्ता च नावुभौ समफलौ स्मृतौ ॥ प्रसूय
३५५ मानां यो धेनुं दद्यात्सोपस्करां नरः ॥ तत्फलं समवाप्नोति कामिकाव्रतकृन्नरः ॥ श्रावणे श्रीधरं देवं पूजयेद्यो नरोत्तम । तेनैव पूजिता देवा गंधर्वोरगपन्नगाः ॥ तस्मा
355 त्सर्वप्रयत्नेन कामिकादिवसे हरिः ॥ पूजनीयो यथाशक्ति मनुष्यैः पापभीरुभिः ॥ संसारार्णवमग्ना ये पापपंके समाकुलाः ॥ तेषामुद्धरणार्थाय कामिकाव्रतमुत्तमं ॥
नातः परतरा काचित्पवित्रा पापहारिणी ॥ एवं नारद जानीहि स्वयमाह प्रभुर्हरिः ॥ अध्यात्मविद्यानिरतैर्यत्फलं प्राप्यते नरैः ॥ ततो बहुतरं विद्धि कामिकाव्रत
सेवने ॥ रात्रौ जागरणं कृत्वा कामिकाव्रतकृन्नरः ॥ न पश्यति यमं रौद्रं नैव पश्यति दुर्गतिं ॥ न पश्यति कुयोनिं च कामिकाव्रतसेवनात् ॥ कामिकाया व्रते चीर्णे कै
वल्यं योगिनो गताः ॥ तस्मात्सर्वप्रयत्नेन कर्त्तव्या नियतात्मभिः ॥ तुलसीप्रभवैः पत्रैर्यो नरः पूजयेद्धरिं ॥ न वै संलिप्यते पापैः पद्मपत्रमिवांभसा ॥ तु
लस्या भारमेकं तु रजतं च चतुर्गुणं ॥ तत्फलं समवाप्नोति तुलसीदलपूजनात् ॥ रत्नमौक्तिकवैडूर्यप्रवालादिभिरर्चितः ॥ न तुष्यति यथा विष्णुस्तुलसीपूज
नाद्यथा ॥ तुलसीमंजरीभिस्तु पूजितो येन केशवः ॥ आजन्मकृतपापस्य तेन संमार्जिता लिपिः ॥ या दृष्टा निखिलाघसंघशमनी स्पृष्टा वपुःपावनी राम॰
रोगाणामभिवंदिता निरसनी सिक्तांतकत्रासिनी ॥ प्रत्यासत्तिविधायिनी भगवतः कृष्णस्य संरोपिता न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः ॥ ३५५

दत्तैः स्नातियो मर्त्यो दिवारात्रौ हरेर्दिने॥ नस्यपुण्यस्य संख्यानं चित्रगुप्तो न वेत्त्यलं॥ कृष्णाग्रे दीपको यस्य ज्वलते कादशीदिने॥ पितरस्तस्य तृप्यंति अमृतेन दि
विस्थिताः॥ घृतेन दीपं प्रज्वाल्य तिलतैलेन वै पुनः॥ स याति महर्लोके स दीपको दिशतैर्दतः॥ अपि तवाग्रे कथितः कार्त्तिकामहिमा मया॥ अतो नरैः
मकर्त्तव्या सर्वपातकहारिणी॥ ब्रह्महत्यापहारिणी भ्रूणहत्याविनाशिनी॥ त्रिदिवस्यानयत्रीयं महापुण्यफलप्रदा॥ श्रुत्वा माहात्म्यमेतस्या नरः श्रद्धा स
मन्वितः॥ विष्णुलोकमवाप्नोति सर्वपापैः प्रमुच्यते॥ इति श्रीब्रह्मवैवर्त्ते पुराणे श्रावण कृष्णपक्षे कामिकामाहात्म्यं समाप्तं॥ अत्र माधवनाम्ना विष्णु
पूजनं कुर्यात॥ नियमादिकं तु पूर्ववदेव॥ अथ भविष्योत्तरपुराणे श्रावणशुक्लैकादशीमाहात्म्यं॥ युधिष्ठिर उवाच॥ श्रावणस्य सिते पक्षे किंना
मैकादशी भवेत्॥ कथयस्व प्रसादेन ममाग्रे मधुसूदन॥ श्रीकृष्ण उवाच॥ श्रूयतामवहितो राजन्कथां पापहरां परां॥ यस्याः श्रवणमात्रेण वाजपेयफ
लं लभेत्॥ द्वापरस्य युगस्यादौ पुरा माहिष्मतीपुरे॥ राजा महीजिदाख्यातो राज्यं पालयति स्वयं॥ पुत्रहीनस्य तस्यैव न तद्राज्यं सुखप्रदं॥ अपुत्रस्य सुखं ना
स्ति इह लोके परे तथा॥ यततोस्य सुतप्राप्तौ कालो बहुतरो गतः॥ न प्राप्तश्च सुतो राज्ञा सर्वसौख्यप्रदो नृणां॥ दृष्ट्वात्मानं प्रवयसं राजा चिंतापरोभवत्॥ स
दोगतः सभामध्ये इदं वचनमब्रवीत्॥ इह जन्मनि भो लोका न मया पातकं कृतं॥ अन्यायोपार्जितं वित्तं क्षिप्तं कोशे मया नहि॥ ब्रह्मस्वं देवद्रविणं न गृहीतं

जयक्रम·
३५६
356

मयाकृवित्॥ न्यासापहारो न कृतः परस्व बहुपापदः॥ सुतवत्पालिता लोका धर्मेणाविजिता मही॥ दुष्टेषु पातितो दंडो नैव शुद्धो परमेश्वापि॥ शिष्टाः संपूजि-
ता लोके दिव्या अपि मया जनाः॥ इत्येवं वर्तमानस्य धर्ममार्गे द्विजोत्तमाः॥ कस्मान्ममगृहे पुत्रो न जातस्तद्विमृश्यतां॥ इति वाक्यं द्विजाः श्रुत्वा सप्रजाः
सपुरोहिताः॥ मंत्रयित्वा न्वपाहितं जग्मुस्ते गहनं वनं॥ इतश्चेतश्च पश्यंत आश्रमान्मुनिसेवितान्॥ न्यपतेहिं त मिष्ठं तो ददृशुस्ते मुनीश्वरं॥ तप्यमानं तपो
घोरं विद्यानंदं निरामयं॥ निराहारं जितात्मानं जितक्रोधं सनातनं॥ लोमशं धर्मतत्वज्ञं सर्वशास्त्रविशारदं॥ दीर्घायुष्यं महात्मानं मनेकब्रह्मसंमितं॥
कल्पे कल्पे गते तस्य एकं लोम विशीर्यते॥ अतो लोमशनामानं त्रिकालज्ञं यहामुनिं॥ तं दृष्ट्वा हर्षिताः सर्वे आजग्मुस्तस्य सन्निधौ॥ यथान्यायं यथा-
र्हं ते नमश्चक्रुर्यथोदितं॥ विनयावनताः सर्वे उत्तस्थुश्चैव पारसरं॥ अस्मद्भाग्यवशादेव प्राप्तोयं मुनिसत्तमः॥ तांस्तथा प्रणतान्दृष्ट्वा उवाच मुनिसत्तमः॥ लोम-
श उवाच॥ किमर्थमिहसंप्राप्ताः कथयध्वं सकारणं॥ मद्दर्शनात्तज्ञादगोरक्त वेतइवमा किमु॥ असंशयं करिष्यामि भवनीयं हितं भवेत्॥ परोपकृतये ज-
न्म माद्दृशानां न संशयः॥ जना ऊचुः॥ श्रूयतां मनिधास्यामो वयमागमकारणं॥ संशयच्छेदनार्थाय तव सन्निधिमागताः॥ पद्मयोनेः परात्मतत्वज्ञ एम·
ः श्रेष्ठो न विद्यते॥ अनः कार्यं वश्यं त्वामाप्ताः समीपं भवतो वयं॥ महीजिन्नाम राजासौ पुत्रहीनो स्ति सांप्रतं॥ वपंतः सप्रजा ब्रह्मन् पुत्रवत्तेन पालिताः॥ ३५६

356A

नेः पुत्ररहितं दृष्ट्वा तद्दुःखेनैव दुःखिताः ॥ तपः कर्तुं मिहायाता मतिं कृत्वा तु नैष्ठिकीं ॥ न स्मृ भाग्यवशाद्दृष्टस्त्वमस्मिंस्त्वं द्विजोत्तम ॥ महतां दर्शनेनैव कार्यसिद्धिर्भ
वेन्नृणां ॥ उपदेशं वदस्व नो राजा पुत्रो यथा भवेत् ॥ इति तेषां वचः श्रुत्वा मुहूर्तं ध्यानमास्थितः ॥ प्रत्युवाच मुनिर्ज्ञात्वा तस्य जन्म पुरातनं ॥ लोमश उवाच ॥ पु
रा जन्मनि वैश्यो यं धनहीनो नृशंसकृत् ॥ वाणिज्यकर्मनिरतो ग्रामाद्ग्रामांतरं व्रजन् ॥ ज्येष्ठमासि सिते पक्षे दशमी दिवसे तथा ॥ मध्यगे द्युमणौ ग्रामप्रा
प्तसीम्नि जलाशयं ॥ कूपिकां निर्जलां दृष्ट्वा जलपाने मनो दधौ ॥ सद्यःसूता सवत्सा च धेनुस्तत्र समागता ॥ तृषातुरा निदाघार्त्ता तस्य चापः पपौ तु सा ॥ पि
बंती वारयित्वा नामसौ तोयं स्वयं पपौ ॥ कर्मणा तेन पापेन पुत्रहीनस्ततोऽभवत् ॥ एवं जन्मार्जितात्पुण्यात्प्राप्तं राज्यमकंटकं ॥ जनाः शृणुत ॥ पुण्यपात्य
पंक्षयं याति पुण्यराशस्य ते मुने ॥ पुण्योपदेशं तु कथय येन पापक्षयो भवेत् ॥ यथा भवत्प्रसादेन पुत्रो भवति भूपतेः ॥ लोमश उवाच ॥ श्रावणे [illegible] पक्षे
तु पुत्रदा नाम नामतः ॥ एकादशी वास्ति तदा कुरुध्वं तद्व्रतं जनाः ॥ यथाविधि यथान्यायं यथोक्तं जागरान्वितं ॥ तस्याः पुण्यं सुविमलं दद्ध्वं नृप
तेर्जनाः ॥ एवं कृते तु नियतं राज्ञः पुत्रो भविष्यति ॥ श्रुत्वेति लोमशवचस्तं प्रणम्य द्विजोत्तमं ॥ प्रजग्मुः स्वगृहान्सर्वे हर्षोत्फुल्लविलोचनाः ॥ श्राव
णे तु समासाद्य स्मृत्वा लोमशभाषितं ॥ राज्ञा सह व्रतं चक्रुः सर्वे श्रद्धासमन्विताः ॥ द्वादशे दिवसे पुण्यं ददुर्नृपतये नराः ॥ दत्ते पुण्ये तथा राज्ञी गर्भमा

शुक्ल ६

उप॰ कौ॰
३५७
357

घत्तशोभने ।। प्राप्नेप्रसवकाले सा स्तुवे पुत्रमूर्जितं ।। एवमेषा न पत्नीषपुत्रदा नामविश्रुता ।। कर्तव्या स्तु खमिच्छद्भिरिह लोके परत्र वा ।। श्रुत्वा माहा
त्म्यमेतस्मान्नरः पापैर्विमुच्यते ।। इह पुत्रसुखं प्राप्य परत्र स्वर्गतिं लभेत ।। इति श्रीभविष्योत्तरपुराणे श्रावणशुक्लपक्षे पुत्रदैकादशी माहात्म्यं समाप्तं ।। अथा
स्यामेव कर्तव्यं बुद्धद्वादशीव्रतं ।। हवीमा उवाच ।। एवमेव श्रावणे मासि संकल्प्य द्वादशीं ।। अर्चयेत्परमं देवं गंधपुष्पनिवेदनैः ।। बुद्धाय पापरोसंहर्त्र्ये श्रीधराये
ति वै कटिं ।। पद्मोद्भवाय जठरं संवत्सराय च ।। स्तुषीवायेति कंठं तु भुजौ द्वौ विश्वबाहवे ।। प्राग्वच्छङ्खगदीन्संपूज्य शिरो वै परमात्मने ।। एवमभ्यर्च्य मेधावी तस्या
ग्रे घटं तोयघटं ।। स्थापयेत्तत्र सौवर्णं बुद्धं कृत्वा विचक्षणः ।। बुद्धस्वरूपमुक्तं पुराणांतरे ।। बुद्धस्त हि भुजं कार्यो ध्यानास्तिमितलोचनः इति ।। तमभ्यर्च्य
तु संपूज्य ब्राह्मणाय निवेदयेत् ।। प्रीयतां श्रीधरो बुद्धरूपी इति मंत्रः ।। अनेन विधिना पूर्वं द्वादशी समुपोषिता ।। शुद्धोदनेन बुद्धो भूत्स्वयं पुत्रो जनार्दन
ः ।। महतीं च श्रियं प्राप्तः पुत्रपौत्रसमन्वितः ।। भुक्त्वा राज्यश्रियं सोपि यगातिं परमिकां गतः ।। इति वाराहपुराणोक्तं बुद्धद्वादशीव्रतं ।। अथ पवित्रा
र्पणं ।। तच्च यद्यपि द्वादश्यां विहितं तथाप्येकादश्यां महिमानं तत्कथनादत्रैवोच्यते ।। हेमाद्रौ नारद उवाच ।। श्रुतानि मया विधानानि कानि विष्णोराराधनानि राम॰
या ।। तस्य माहात्म्यमाद्यास्तां श्रेष्ठ जन्मदुःखहरं परं ।। महापापघ्नं तु मिच्छामि सम्यक्कर्मबाफलप्रदं । अल्पव्ययेन देवेश महापुण्यफलप्रदं । पवित्रारोपणं कृत्वा वि ३५७

357A

हृोर्भक्तिसमन्वितैः ॥ किं फलं प्राप्यते देव नरैस्तत्कृतमानसैः ॥ यस्मिन्काले च कर्त्तव्यं विधानं च यथा भवेत् ॥ तिथौ तस्मिन्यथा सूत्रं प्रमाणं च यथाविधि ॥ यावंतस्तं
तवस्तास्मिन्न तंत्र यच्चापि मंत्रमीतत्वन्यासविधानं च तथा चैवाधिवासनं ॥ आरोपणाविधानं च उपवीतस्य चार्चनं ॥ विसर्जनविधानं च पवित्रारोपणादि
के ॥ किं कृत्वा फलमाप्नोति हीयते किमकुर्वतः ॥ एतत्सर्वं समाचक्ष्व समासात्त्रिदशेश्वर ॥ ब्रह्मोवाच ॥ शृणु वत्स परं गुह्यं विधानं देवनिर्मितं ॥ मया श्रुतं पुरा
सम्यक्शंकराच्चक्रपाणिनः ॥ पवित्रारोपणं विष्णोर्भुक्तिमुक्तिप्रदायकं ॥ आयुः कीर्तियशः पुत्रपस्त्रवसंपद्धनावहं ॥ पुराणानि तु यथा पुण्यं सर्वपापहरं
शुभं ॥ पवित्रारोपणं तस्मात्पवित्रं परमं स्मृतं ॥ संवत्सरं नरो भक्त्या समभ्यर्च्य जनार्दनं ॥ यत्फलं समवाप्नोति पवित्रारोपणो न तत् ॥ न करोति विधानेन पवित्रारोप
णं तु यः ॥ तस्य संवत्सरीपूजा निःफला मुनिसत्तम ॥ तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ॥ वर्षे वर्षे प्रकर्त्तव्यं पवित्रारोपणं हरेः ॥ आषाढस्यासिते प
क्षे कर्कटस्थे दिवाकरे ॥ द्वादश्यां वासुदेवस्य पवित्रारोपणं स्मृतं ॥ सिंहस्थे वा रवौ कार्यं कन्यायां तु गते थवा ॥ तस्यामेव तिथौ सम्यक् तुलास्थे न कदाचन ॥ विष्णोः हृ
दयस्वरूपस्य पवित्रं वै परमुत्सवं ॥ देवानां चाधिनाथस्य मात्रहणीधनदस्य च ॥ यत्पवित्रारोपणं कार्यं अन्येषां च यथाविधि ॥ अकृत्वा फलहानिः स्यात्सर्वकर्म
कृतार्चनात् ॥ सर्वेषां तु महापुण्यं पवित्रारोपणं कृते ॥ तिथयस्तत्र विन्यासाः पृथगुक्ताः स्तपोधन ॥ प्रतिपद्धनदस्योक्ता पवित्रारोपणे तिथिः ॥ श्रियो देव्या द्विती

पान्तु तिथीनामुत्तमा तिथिः॥ त्वन्तीयान्त भवान्या मान्या चन्द्रथश्तन्मृतस्यन्तु॥ पंचमी शेषराजस्य षष्ठी प्रोक्ता गुहस्य च॥ सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी स्मृता॥
मातृणां नवमी प्रोक्ता दशमी वासुकेः स्मृता॥ एकादशी ऋषीणां तु द्वादशी चक्रपाणिनः॥ त्रयोदशी ह्यनंगस्य शिवस्योक्ता चतुर्दशी॥ ममदेवस्य मुनिश्रेष्ठ पौर्ण
मासीति तिथिः स्मृता॥ यथोक्ता शुक्लपक्षे तु तिथयश्च वरानन॥ सर्वेषामेव देवानां कार्यतास्तु यथाक्रमी॥ नारद उवाच॥ कस्मिन् सूत्रे तु कर्त्तव्यं पवित्रं चक्रपा
णिनः॥ प्रमाणं चैव तंतूनां पुण्यं चैव हि कीदृशी॥ कनिष्ठं मध्यमं चैव उत्तमं च पवित्रके॥ कृते यथा फलं कर्तुस्तद्वदस्व पितामह॥ ब्रह्मोवाच॥ शृणु वत्स यथा
कार्यं सूत्रं यत्प्रमाणकं॥ विधानं च यथा तस्य फलं चैव यथा भवेत्॥ प्रथमं दर्भसूत्रं च पद्मसूत्रं ततः परं॥ शुभ्र त्रिकार्पाससूत्रेण निर्मितं वा शुभावहं॥
शुद्धैर्निर्मितं वा शुद्धौ देशे कार्यं ततः प्रयत्नतः॥ तद्विधानोपयुक्तं च यथोक्तफलदायकं॥ कन्या तु कर्त्तयेत् सूत्रं नारी वाथ पतिव्रता॥ विधवा साधुशीला वा सूत्र
मेतत्तु कर्तयेत्॥ केशयुक्तं क्षतं दग्धं मघरक्तादिदूषितं॥ मलिनं नीलरक्तं वा प्रयत्नेन विवर्जयेत्॥ यथोक्तं सूत्रमादाय त्रिगुणं त्रिः प्रयोजयेत्॥ पवित्रं
तेन कुर्वीत कनिष्ठोक्तं मम प्रियं॥ कनिष्ठं तत्तु विज्ञेयं सप्तविंशतिभिः समं॥ मर्त्यलोके तु तत्कीर्तिस्सुरा यावन्न पुत्रदं॥ चतुःपंचाशता ज्ञेयं तंतूनां मध्य राम·
ध्यमं परं॥ हित्वा घोगावहं स्वर्गं स्वर्गं वा मंगलावहं॥ उत्तमं चैव तंतूनां शतमष्टोत्तरं शतं॥ दत्वा तद्वासुदेवाय विष्णुलोकं व्रजेन्नरः॥ अष्टोत्तरसहस्रैस्तु तंतूनां ३५८

358A

परिसेव्यया॥ वनमालास्मृता विष्णोर्दत्ता मुक्तिप्रदा हि सा॥ कनिष्ठं नाभिमात्रं स्यात् ऊरुमात्रं तु मध्यमं॥ पवित्रं चोत्तमं प्रोक्तं जानुमात्रप्रमाणतः॥ वनमालाप्रमा
णेन प्रतिमापादप्रणीयते॥ नराणां जन्मसंसारस्य दुःखप्रणाशिनी॥ कनिष्ठे द्वादशे शोक्ता मध्यमे द्विगुणाः स्मृताः॥ त्रिगुणास्तूत्तमे प्रोक्ता ग्रंथयस्तु प
वित्रके॥ शतमष्टोत्तरं कार्यं ग्रंथीनां तु विधानतः॥ मुनीन्द्र वनमालायां विष्णुपूजनतत्परैः॥ अक्षिणास्तनसूत्रे तु ग्रंथयो द्वादश स्मृताः॥ तत्तन्नामवि
धानेन तु रूपतां गुह्यसत्तमं॥ तावद्द्वादश वर्तीयेन्मंत्रं पावितो ग्रंथयः स्मृताः॥ एकधा वा द्विधा वैव त्रिधा चैव पवित्रके॥ हृत्स्थे प्रतिग्रंथि सत्कृत्य मंत्रं जपः मध्य
मोत्तमपोर्द्धं हि त्रिः कुंकुमोशीरकर्पूरचंदनादिविलेपनैः॥ पवित्राणि विलिप्याथ तत्तन्नामस्पृशन् स्मरन्॥ मूलमंत्रेण वै कार्यं पवित्रारोपणं हरेः॥ एकाद
श्यां व्रतं कृत्वा मूलमंत्रेण भक्तिमान्॥ एकादश्यां शुभैर्गंधैः पुष्पधूपविलेपनैः॥ नैवेद्यदीपवस्त्राद्यैः पूजये गरुडध्वजं॥ नृत्यगीतशुभाख्यानैर्मल्लयुद्धैश्च प्र
वल्गितैः॥ वाद्यैर्मुरजशंखाद्यैर्जागरं कारयेन्निशि॥ क्षीरोदशसंपा वव दंतकाष्ठपमोदकैः॥ फलैः सुगंधैर्मधुरैर्नैवेद्यं कारयेद्धरेः॥ एकादश्यां
नरो भक्त्या संपूज्य मधुसूदनं॥ पवित्रारोपणं कुर्याद्देवदेवस्य चक्रिणः॥ सोपवासः शुचिः स्नातः कृतजाप्यो जितेन्द्रियः॥ दत्त्वा ह्यन्नं द्विजाग्र्येभ्यः पू
जयित्वा जनार्दनं॥ पूर्वाधिवासितं सम्यक् समादाय पवित्रकं॥ अतो देवेति मंत्रेण विष्णोर्मूर्द्ध्नि निवेदयेत्॥ अयं मंत्रो द्विजातीनां पवित्रारोपणे स्मृतः॥

इत्थमूलमंत्रेणाथवा येन मः संपूजयेद्धरिं॥वाशब्दाद्द्वादशाक्षरेण॥स्तुतिभिर्गलनिर्घोषैर्गीतवादित्रनिस्वनैः॥पवित्रारोपणं कृत्वा देवो यो यास्ति मे वरः॥मणिविद्रुममा
लाभिर्मंदारकुसुमादिभिः॥इषा सांवत्सरी पूजा तवास्तु गरुडध्वज॥मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन॥यत्पूजितं मया देव परिपूर्णं तदस्तु मे॥व
नमाला यथा देव कौस्तुभं सततं हृदि॥पवित्रं मत्कृतं तद्वत्पूजां च हृदये वह॥कृत्वा पवित्रकं विष्णोर्वर्षे द्वादशवार्षिकं॥फलं प्राप्नोत्यकृत्वा तु पूजा
हानिमथाप्नुयात्॥एवं संप्रार्थ्य देवेशं प्रणिपत्य पुनः पुनः॥भूयोपि दद्याद्विप्रेभ्यो हरिमुद्दिश्य दक्षिणां॥ततो तु भोजयेद्भक्त्या गुरुं ज्ञानप्रदायिनं॥व
स्त्रंगंधानुलेपाद्यैः पुष्पैः स्रग्वाभूषणैः॥यापनमंत्रैर्गुरोः शिष्यो भक्त्या नार्चयते गुरुं॥स गच्छति विमूढात्मा नरके हि नराधमः॥तस्मात्सर्वप्रयत्नेन यथा विष्णु
स्तथा गुरुः॥आनंदेनार्चयेद्भक्त्या समुक्तिफलमाप्नुयात्॥यथा विष्णुस्तथा विद्या यथा विद्या तथा गुरुः॥त्रितयं पूजयेद्भक्त्या समुक्तिफलमश्नुते॥निष्कम्य दे
वताभाराः संपूजा पितृदेवताः॥मूलमंत्रेण जुहुयाद्धोमं घृतपायसैः॥ततो तु भोजयेद्विप्रान्दद्याच्छक्त्या च दक्षिणां॥तां कूलपुष्पगीधूपैः पूजयित्वा
विसर्जयेत्॥ततो बंधून्विशिष्टांश्च ज्ञातिमित्रसमाश्रितान्॥भोजयेदागतांश्चान्यान्भिक्षुकांश्च स्वशक्तितः॥एवं विधिं विनिर्वर्त्य पवित्रारोपणाह्वये॥विष्णो
ः सायुज्यमाप्नोति पुनरावृत्तिदुर्लभं॥स्थंडिले देवदेवस्य स एव विधिः स्मृतः॥पवित्रारोपणे विष्णोर्विशेषः श्रूयतामिह॥यावन्मानसमायुक्तं भावयेत्कु

359A

नार्दने ॥ तावदर्गुल्कं विष्णोः पवित्रं मानवेस्मृतं ॥ पावितोयं यथ॰ प्रोक्ताः स्वतंत्रैश्चानुमंत्रणं ॥ तत्रैव मूलमंत्रेण दद्याद्विष्णो॰ पवित्रकं ॥ प्रतिमायां स्थंडिले
वा कृत्वा विष्णो॰ पवित्रकं ॥ कुलानां शतमुद्धृत्य विष्णुलोकं व्रजेन्नर॰ ॥ एवं संपाद्य विधिना पवित्रारोपणं हरे॰ ॥ अर्चयित्वा विधानेन हरिं सपवित्रकं
॥ विसर्जयेत मंत्रेण ज्ञानेनैव पवित्रकं ॥ सांवत्सरीं श्रुभां पूजां संपाद्य विधिवन्मम ॥ व्रजेद्धानीं पवित्रं त्वं विष्णुलोकं विसर्जितं ॥ मंत्रेणानेन तत्सूत्रं अवतार्य
यथाविधि ॥ आचार्यं ब्राह्मणं दद्यात्तोये वाथ विसर्जयेत् ॥ पावस्तु गणं स्मृतं तस्मात्पवित्रारोपणोत्सवे ॥ उपवीतं कृतं मत्या तत्फलं वा समुपान्नर॰ ।
अनेनैव विधानेन तत्सपूजा विसर्जनं ॥ प्रार्थनावाहनं दानं समस्तं विधिमाचरेत् ॥ तत्वमंत्रे॰ समावेश विसर्जनविधिक्रियाः ॥ अर्चनेनतु सुरेंद्राणां
सर्वकामानवाप्नुयात् ॥ आयुर्वलं धनं विद्यामारोग्यकीर्तिमव्ययं ॥ प्रपद्यंति यथाशक्त्या प्रसन्नात्मादिवौकस॰ ॥ अर्चिते देवदेवेशे शंखचक्र
गदाधरे ॥ अर्चिता॰ सर्वदेवास्तु॰ यत॰ सर्वगतो हरि॰ ॥ अर्चिते सर्वलोकेशे सुरासुरनमस्कृते ॥ केशवे केसकेशिघ्ने न याति नरकं नर॰ ॥ सा
तमेध्येपराक्षत्व सुरासुरगुरुं हरिं ॥ ये नमंति नराभक्त्या न ते नरकगामिन॰ ॥ तपस्तप्त्वा नरो घोरं अरण्ये विजिते द्रि॰ ॥ यत्फलं समवाप्नोति स्मृत्वा तु
गरुडध्वजं ॥ इति गुह्यतमं विष्णो॰ पूजाकल्पं मयोदितं ॥ समाचरति यो मर्त्यः स याति परमां गतिं ॥ इति ब्रह्मपुराणोक्त॰ पवित्रारोपणविधि॰ ॥ श्री

जप० क्रम०

गागमेशिवं पवित्रलक्षणी ॥ एकाशीतस्तथा वाम्नः त्रिंशत्या वाष्टसु कल्पा ॥ पंचाशतावाकर्तेषां तु लग्रग्रथ्यीतरालकं ॥ द्वादशांगुलमानानि यासां दृष्टांगुला
३६०
360
निवा ॥ लिंगविस्तारमानानि वद्धं गुलकानिवा ॥ तथैव पिंडिकास्पर्शे वद्धुर्थं सार्वदैवतं ॥ गोगावतारकं कार्यं पवित्रमतिसुंदरं ॥ अथ विष्णुरहस्योक्तप
वित्रारोपणविधिः ॥ नारद उवाच ॥ भगवन्देवदेवेश चक्रकौमुदहलं हिमे ॥ पवित्रारोपणं पुण्यं प्रसादाद्वक्तुमर्हसि ॥ पवित्रे तिकथं संज्ञा कुतो तत्प्रनं
किमुच्यते ॥ कृते च किं फलं प्रोक्तं विधानं तस्य कीदृशं ॥ द्रव्येणाकेन वा कुर्यात्किं प्रमाणं हि तत्स्मृतं ॥ किं दैवतं च किं छंदः को वा तस्य ऋषिः स्मृतः ।
अध्यात्मं चाधिभूतं च आधिदैवं कथं भवेत् । केन मंत्रेण तत्कुर्यात् विधानं तस्य कीदृशं ॥ कस्मिन्कालेन तु कर्तव्यं नक्षत्रे वा तिथौ क ॥ थं ॥ किं यंत्रं
द्धियते कालमेतन्मे ब्रूहि सर्वेश्वर ॥ श्रीभगवानुवाच ॥ साधु नारद धर्मज्ञ तोषितोहं त्वयानघ ॥ शृणुष्व तत्त्वतो वक्ष्यामि पवित्रारोपणीकमानं ॥ यावत्यत्येव
नि सत्रापते भवबंधनात् ॥ पवित्रं तेन विख्यातं ब्राह्मीतेजो भिगीयते । विवाद्ययाद्गुविख्यातं तदा लोके निगद्यते ॥ तदेव सत्वरूपेण यज्ञेशः कर्मणः प्रभु
॥ तदेव विष्णुणा मंत्रे भर्तनारायणास्यया ॥ त्रिवेदात्मा त्रिदेवात्मा त्र्यक्षरः परात्परः स्मृतः ॥ तेनेतद्वस्तसुद्धं ज्ञानात्मा हि द्वेगामि श्रितासु कृतत्रसूत्र ग्राम०
मिदमिनिष्प्रश्नसेदस्तुतरी ॥ ते ध्यानेन च तंतूनां त्वात्मा परिकीर्तितः ॥ तंतूनां प्रथमो देवो वासुदेवो जगद्गुरुः ॥ हलायुधो द्वितीयश्च प्रद्युम्नश्च तृतीयः ३६०

360A

कृथ ॥ अपरस्त्वनिरुद्धस्ततो नारायणः प्रभुः ॥ ब्रह्माविष्णुस्तथैवाग्निर्विरंगाहेशाः समाश्रिताः ॥ आधिदैवेन रूपेण अध्यात्मं च निबोध मे ॥ मनोबुद्धिरहंका

रस्तन्मात्राणि तथैव च ॥ जीव इत्येति नवैवात्र अध्यात्मे संप्रस्थिताः ॥ द्यौरंतरिक्षं पृथिवी भूर्भुवःस्वस्तथैव च ॥ अकारश्चाप्युकारश्च मकारश्चाधिभूतके

॥ अभिन्नरूपं तथा कर्म त्रितयं सदनाय ये ॥ ज्ञेयं पवित्रेत द्विद्वा नवाधिवेदमुदाहृतं ॥ छंदश्चैवात्र गायत्री प्रद्युम्नः कीर्त्यते ॥ वासुदेवः प्रमातस्य देव

तापरिकीर्तिता ॥ योगो सन्नब्रह्मकरागो ब्राह्मणानां विशेषतः ॥ अलंकारादिजातीनां कर्तव्यं प्रतिवत्सरं ॥ शरद्वर्षासु ऋतुषु पवित्रारोपणं शुभं ॥ यावद्व

धारयेतं तु स्नात्वा ऋत्वरत वैष्णवीं ॥ तथा पवित्रकं कृत्वा नीलमासांश्च मासमेव वा ॥ पक्षं द्विमासमासं वा पातित्रिरात्रं एकरात्रं वा ॥ अथवा घिंकोर्जिकं कृत्वा मित पक्षाघ

कमात ॥ यथाशक्त्या यजेद्देवं कालसंकल्पनात्तथा ॥ पवित्रे द्विपमारोप्य तु तस्याः संख्यातां तितिके ॥ उत्पाविनीकृते पश्चात् घथेष्टं विवरेद्बुधः ॥ मंगल

शोभनं रुद्रं विज यंत्र वर्तुर्थिके ॥ आषाढादिकमादेवं नामानि नामानि धारयेत् ॥ द्वादश पंचविंशं वा गोवापि पंचमासमथवा द्विज ॥ आनुकूल्येन कर्तव्यं पव

दशपामथापि वा ॥ सूत्रं तु याज्ञिकं कृत्वा तु गावल्कलसंभवं ॥ कार्पासिकं तथा कार्पटार्मिकं वापि कारयेत् ॥ ब्राह्मणी कर्तितं सूत्रं मसद्वा तु यथा हि वि

॥ त्रिगुणं त्रिगुणी कृत्य क्षालयेन्निर्मलांभसा ॥ यत्नेन शोधयेद्दोषान्केशाघांश्चस्वयं बुधः ॥ अष्टोत्तरशतं कुर्यात्तंतवस्तु पंचाशदेव वा ॥ सप्तविंशति वार्यज्येष्ठ

जय० क्रम०

३६१

361

मध्यकनीयसां ॥ अंगुष्ठपर्वमात्रा स्याद्यथाप्रश्नोत्तमाधमस्मृताः । तदर्धं मध्यमा श्रेष्ठा तदर्धं मध्यमा ८ स्मृता ॥ अधमं नाभिमात्रं स्यात् हृन्मात्रं द्वितीयकौ । उत्तमं जानुमात्रं च

प्रतिमायां निगद्यते ॥ एवं हि रूपतः कुर्यादधमोत्तममध्यमे । यथाशोभं प्रकुर्वीत ग्रंथयो विषमाः स्मृताः ॥ सैव प्रोक्ता मया देवे प्रोक्ताय च द्वक वितस्त्या वितः ॥ आरोप

दे द्विजश्रेष्ठ एवं विधा द्विलक्षणा ॥ स्थंडिले वाथ वक्ष्यामि प्रथमं कारिकान्तरे ॥ दलाग्रगं द्वितीये च द्विशाया लांजतं गं परं ॥ यथाशक्त्या तु कर्तव्यं प्रत्यवायो भ

ति कमात ॥ पितृत्तोमातृजः । शुद्ध आत्मशुद्धस्तथैव च ॥ सदाचारास्थितो मंत्री वेदवेदांगपारगः ॥ अलुब्धोपिशुनः सौम्यः सर्वभूतहितेरतः । आचार्यः

सतु विज्ञेयः सर्वकर्मसु गोहितः । ब्राह्मणाः क्षत्रियो वैश्यस्तथा स्त्री शूद्र एव च ॥ स्वधर्मावस्थिताः सर्वे भक्ताश्च मधुसूदने ॥ एवं विधं गुरुमासाद्य भक्त्या संतोष

येद्व्रती ॥ यज्ञार्थं प्रार्थयेत्पश्चात्तद्द्वारं कुरु मे प्रभो ॥ पवित्रारोपणस्तेन पूजयेन्मधुसूदनं । करिष्यामेव मिस्फके संभारांश्च समाहरेत् ॥ होः सूत्रादि सर्वं

गुरवे नान्निवेदयेत् । यथाशक्त्या पवित्रं च शुचिः कुर्याद्दत्त द्विजः । अथाक्षरेण मंत्रेण गायत्र्यर्थं तेन ग्रथयेत्तथा ॥ कुंकुमं रोचना चैव कर्पूरो रोचना समन्वितं ॥ अ

ष्टाक्षरेण मंत्रेण व्यस्तेन च विनिक्षिपेत् ॥ समस्तेन ततो मंत्री मंत्रयीत विचक्षणः ॥ उक्तेनैव तु मंत्रेण वर्जयीत पवित्रकं ॥ ओमिति कंकुमं निक्षिप्य नम राम

इति तदुपरि रोचनं ॥ नारायणेति तदुपरि कर्पूरमिति व्यस्तेन मंत्रेण मेलयित्वा ओं नमो नारायणायेति समस्तेन मंत्रेणाभिमंत्र्य समस्तेनैव पवित्रमलंकु ३६१

361A

र्पितं ॥ इति विष्णुरहस्योक्तः पवित्रारोपणविधिः ॥ अथ पूजामार्तण्डे वैदिकोक्तः पवित्रारोपणविधिः ॥ श्रावणस्य सिते पक्षे द्वादश्यां शौनकादिभिः ॥ उक्तस्तद्वा
मकर्तव्यः पवित्रारोपणोत्सवः ॥ तथा बृहच्चपरिशिष्टे ॥ स स्नातः सर्वतीर्थेषु यज्ञैः सर्वैश्च दीक्षितः ॥ हरेश्च प्रीतिमाप्नोति यः पवित्रं समावहेत् ॥ विष्णुनाशा
श्वद्वर्षे न यो न कुर्यात्पवित्रकं ॥ हरंति राक्षसास्तस्य वर्षपूजादिजं फलं ॥ पापमेत्तु ऊर्जे प्रतं मधौ दोलां श्रावणे तोतं तु पूजनं ॥ वैवेद मनस्कारोपमकुर्वीरोव्र
जसखः ॥ पवित्रारोपणं विप्रा तस्माच्छ्रावणेन न भवेद्यदि ॥ कार्त्तिकावधि सिंहार्के कर्त्तव्यमिति नारदः ॥ इति पवित्रनिरूपणं ॥ प्रयोगसारादुत्पत्तिः पवित्रस्यप्रत
न्यते ॥ कनीयान्वा स्तुके श्वीता पवित्रो नामनागराट् ॥ निराहारव्रतो भूत्वा दैत्यकेशरदीशितं ॥ तपसोन्येपे समाक्षिप्त देवदेवं महेश्वरं ॥ प्रसन्नस्तपसा तु
स्य गुरुतः पुरुषोत्तमः ॥ प्रणतार्तिहरः शंभुर्गिरिशो मीढुमापतिः ॥ प्रसादाभिमुखं दृष्ट्वा देवं मृत्युंजयेश्वरः ॥ कं ठामरणानां यासुबन्धेसं वरस्तुत्तमीनथे
ताभाष्यतं कंठे दधार त्रिपुरांतकः ॥ प्रादात्तस्मै वरं वाच्यं पवित्रायात्मनो गिरे ॥ ये त्वां न बहु मन्यन्ते यथा संभाविता मया ॥ जपहोमादिजं तेषां फलं
त्वामेत्तु निष्फलं ॥ अत्रैव श्रावणे मासि नभस्ये वापि वैष्णवे ॥ तस्मादाराधयंस्तुष्टां नित्यं नैमित्तिकोद्यता ॥ वैदिकाः सन्तु होमेन पूजां कुर्वन्तु ते न घृ
॥ तस्मादृश्यानुकारेण निवीते नतु तांत्रिकाः ॥ आराध्यारोप्य इज्यायै देवतायै पवित्रकं ॥ नाभागमोक्षमार्गेण तस्य कर्तव्यतोच्यते ॥ हेमरौप्यताम्रक्षौ

जप०कम. मैः सूत्रैः कौशेयपट्टजैः । कुशैः काशैश्च कार्पासैर्ब्राह्मण्याकर्तितैः शुभैः । कन्यया वा पवित्राणि स्वल्पादिभिः कृतैः ॥ स्नाता त्रिगुणीनं सूत्रं त्रिगुणीकृत्य शो
३६२ धयेत् । अभिषिंचेत्पंचगव्यैरद्भिः प्रक्षालयेत्ततः ॥ मूलेनाष्टोत्तरशतं गायत्र्या वा समं जपा ॥ अभिमंत्रयेदिति शेषः ॥ शुद्धोदकेनाभिषिच्य पवित्राणि विनि
362 र्ममेत ॥ दुर्बद्ध्वाङ्गविस्तारैः पंचगव्यक्रमं विदुः । आप्यायस्व दधिक्राव्णो गा अस्ते जोसि पंचगव्यके ॥ गंधद्वारां चक्रमात्रे यं विवक्षणो ॥ इति सूत्रशुद्धिः ॥ अत
उत्तमपवित्रं तु षष्ट्यासहस्रशतैस्त्रिभिः ॥ सप्तत्या सहितं द्वाभ्यां पवित्रं मध्यमं स्मृतं ॥ साशीतिना शतेनैव कनिष्ठं तत्समाचरेत् ॥ अष्टोत्तरं क्रमेणो वन
वसूत्रीकमेण वा ॥ जानूरुनाभिदेशे तु उत्तमादित्रयं भवेत् ॥ अष्टोत्तरसहस्रेण वनमालां प्रकल्पयेत् ॥ उत्तमस्य पवित्रस्य द्वैगुण्येनापि भावयेत् । आ
रभ्य मुकुटं यावत् सूत्रेणारचिता शुभा ॥ आपादलंबिनी माला वनमाला प्रकीर्तिता ॥ यजमानपवित्रं वा विना सनपवित्रकं ॥ कनिष्ठेन समं कार्यं मध्यमे
न समं गुरोः ॥ कुर्वीताग्नेः पवित्रं तु मध्यमेन समं शुभं ॥ साधारणपवित्राणि त्रिभिः सूत्रैः समाचरेत् ॥ उत्तमं तु शतग्रंथि पंचाशद्ग्रंथि मध्यमं ॥ कनि
ष्ठं तु पवित्रं स्यात् षड्विंशद्ग्रंथिशोभितं ॥ षट्त्रिंशच्च चतुर्विंशद्द्वादशेति च केचन ॥ चतुर्विंशद्द्वादशाष्टौ इत्येके मुनयो विदुः । अंगुष्ठपर्वमात्रं तु कुर्यात् ग्रं एम.
थिमथोत्तमे । तदर्धेन तदर्धेन मध्यमे च कनिष्ठके ॥ ग्रंथीन् कुर्वीत सर्वत्र स्वतंत्रान् सुमनोहरान् । नैव विषमसंख्याकान् ग्रंथीन् कुर्वीत कर्हिचित् ॥ ३६२

362A

विघ्नो भवत्यदानेन कर्तुः स्यादशुभं फलं ॥ पवित्रं परयाभक्त्या तस्मात्कुरु वरं तु शोभनं । कुंकुमं रोचनं चैव कर्पूरेणाभिमिश्रितं । तेन संरंजयेत्सूत्रमष्टाक्षरवि
मंत्रितं ॥ ततोभिमंत्रणां कुर्यादिदं विष्णुस्वमंत्रतः ॥ द्वादशाक्षरमंत्रो वा सर्वसाधारणः स्मृतः ॥ इति पवित्रलक्षणं । ततस्तानि पवित्राणि वैष्णवे पट
ले शुभे ॥ संस्थाप्य शुभे बिंबे वस्त्रेणापिधाय पुरतो न्यसेत् । अरलिसंमिश्रितां वेणीं कुर्यात्षट्त्रिंशताकुशैः । मंत्रयेन्मूलमंत्रेण पंचगव्येन शोधयेत्
। तां तु कक्षांतरे कृत्वा मानसेनाहनमाचरेत् । ततस्तु सर्वतोरह्नांह्वलाग्नौ होममाचरेत् । स्वयं तु भगवत्पूजां महतीं समाचरेत् ॥ महास्नानं प्रकुर्वी
त उपचारांस्तथैव च ॥ देवस्य सर्वतः स्थाप्यं दंतकाष्ठं जलं कुशाः ॥ मृत्तिका वह हरिद्रां च कुष्ठं गोरोचनादिभिः ॥ पादुकोपानहं छत्रं चामरं व्यजनं तथा ॥ त्री
स्याहीनि वस्त्राण्यानि पुरतः स्थापयेत्तदा ॥ दंडवस्त्राणि पात्रैश्च स्तोत्रैर्नानाविधैरपि ॥ वेदिकैश्च जपैर्देवं पंचपथ्यान्यतिशोधयेत् ॥ क्रियालोपविघातार्थं य
त्वया विहितं प्रभो ॥ मयैतत्क्रियते देव तव तुष्ट्यै पवित्रकं ॥ नहि विघ्नो भवेद्देव कुरु नाथ दयां मयि ॥ सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः ॥ उप
वासेन त्वां देव तोषयामि जगत्पते ॥ कामक्रोधादयो ह्येते न मे स्युर्व्रतघातकाः ॥ अद्यप्रभृति देवेश यावद्वैशेषिकं दिनं । तावद्रक्षा त्वया कार्या स
र्वस्यास्य नमोस्तु ते ॥ एवं विज्ञाप्य देवेशं गुरुपादौ समाप्य च ॥ कुर्यात्तु वैष्णवैः सार्धं पवित्रारोपणाहरे ॥ ॐ भैरवापांडुना पूर्यं सर्वतोभद्रके शुभे ॥ स्था

श्री·जय·क·

३६३

363

पयेत्पुरतोविद्वान्मन्त्रसूत्राणिपूजयेत॥ओंसांवत्सरस्ययागस्यपवित्रीकरणायभो४॥विष्णुलोकात्पवित्रकमागछेहनमोस्तुते॥अनेनावाहयेत्सूत्रं
मूलमंत्रयुतेनच॥उत्तमादित्रयेविद्वान्स्मरेद्देवत्रयंतत ब्रह्माणं रुद्रंचैव ध्यायेल्लोकत्रयंतथा॥प्रकृतिंचनवर्णीयामालापीनिर्विलासिको॥पुलो
कंमुकुंदेसूत्रेध्यायेन्तमात्रशालिनि॥ओंसर्वाभरणविज्ञांगसर्वदेवनमस्कृत।लावण्यरूपविश्वात्मन्नत्रब्रह्मसूत्रेसमाश्रय॥ओंसर्वलक्ष्मीकरश्रीश
सर्वज्ञानमयात्मक॥निवृत्तरूपविश्वात्मन्नमध्यसूत्रंसमाश्रय॥अत्रिवेगजगघोनेपुरुषात्मकदिवस्पते॥कनीयोमेप्रभोदेवनेजमासूत्रमाश्रय
॥सर्वाधारधरारूपसर्वकर्त्तःप्रजापते॥सर्वधात्मेशसूत्रेस्मिन्सान्निध्यंकुरुतेनमः॥सर्वलोकज्वलाकारब्रह्मांडब्रह्मणेविषामुकुंदेजमसर्वांगशि
रःसूत्रइहेहिमोः॥प्रकृतिर्जगतःकत्रेसर्वलावण्यदायिनी॥श्रीसूत्रेनित्यकल्याणिसांनिध्यंकुरुतेनमः॥उत्तमादीनिसूत्राणिक्रमादाल
म्यपाणिना॥मंत्रैर्भिर्मंत्रयेदेभिः पूजयेन्मूलमंत्रतः॥ब्रह्मविष्णुमहादेवास्त्रिसूत्रीदेवताःस्मृताः॥ओंकारःसोमवन्हीचब्रह्मानागाःशशीरवि
ःशिवश्चविश्वेदेवाश्चनवसूत्राधिदेवताः॥क्रियातपोहृषीवीराविडपेशापराजिनाः॥मनोन्मनीजयाभद्रामुक्तिग्रंथिदेवताः।ध्यात्वावाहयाम सम्य·
तीकृत्सगंधपुष्पाक्षतांकुरैः।धूपदीपान्नतांबूलैःपवित्राणिप्रपूजयेत्॥अथदेवकरोविद्वान्पदसूत्रसमुद्भवंवितस्तिमानकंदोरंबध्नीयात्संग ३६३

363A

त्मकं। संवत्सरकृतार्चायाः संपूर्णफलदोसि यत्। पवित्रारोपणायैतत् कुरुष्व करते नमः। ओं विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनं। सर्वकामप्रदं
देवतवांगे धारयाम्यहं। मूलमंत्रेणैतादृक्समादद्यात गंधपवित्रकं॥ नीराजयेत्ततो देवं मंगलाघोषपूर्वकं। नैवेद्यं विविधं दद्यात्ताम्बूलमनुलेपनं। उ
पतिष्ठेत्ततो देवं जितं मित्रादिभिस्तवैः। मंत्रेणाथ हरेशानं देवदेवं निमंत्रयेत्। आमंत्रितोसि देवेश पुराणपुरुषोत्तम। प्रातस्त्वां पूजयिष्यामि सां
निध्यं कुरु केशव। क्षीरोदधिमहानागशय्यावस्थितविग्रह॥ प्रातस्त्वां पूजयिष्यामि संनिधो भव ते नमः। निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्रकं। सर्वथा सर्व
दा विष्णो नमस्तेस्तु प्रसीद मे॥ निपत्य दंडवद्भूमो क्षिपेत् पुष्पांजलिं पुनः॥ पूजितान्यत्र स्त्रागीं कुंभं च पुरतः स्थितं। अस्त्रेणामंत्रितो रक्षेत् कवचेनाव
गुंठयेत्॥ रक्षेद्वा चक्रमंत्रेण नरहरेमंत्रेणाथवा॥ ब्राह्मणांस्तु नमस्कृत्य गुरुपादौ प्रणम्य च॥ गीतमंगलनिर्घोषैः सकुर्याज्जागरं ततः॥ अधिवा
से विधिः प्रोक्तः काथितो नारदादिभिः॥ अधिवासनकाले च दीपिका या सुक्तः॥ गोदोहीन रिते का लेपूर्वेद्युर्वा धिवासनमिति॥ इति पवित्रा
धिवासनं॥ ततः प्रातः समुत्थाय स्नात्वा देवं यथोदितं॥ नित्यपूजां ततः कृत्वा पवित्राणां तथैव च॥ नीराजयेच्छनैर्दीपोमंगलाघोषपूर्वकं॥ स्न
नाचविविधैः स्तोत्रैर्महादेवं सुप्रार्चितो॥ ततो मंगलनिर्घोषैः शंखतूर्यादिनिःस्वनैः॥ गंधपुष्पाक्षताद्यैश्च दद्याद्देवाय सूत्रकं॥ ओं राम राम नमस्क

श्रीजय·राम· भोगहस्तो दर्पवित्रकं॥ पवित्रीकरणार्थाय वर्षपूजाफलप्रदं॥ पवित्रं त्वत्कृपात्रयन्मयाद्य कृतं हरे॥ शुद्धो भूर्वाम्यहं देव त्वत्प्रसादान्महेश्वर॥ मूलमंत्रेण तो
३६४ येषपवित्राणि पूजयेन्मनुः॥ अंगाद्यावृत्तिदेवेभ्यस्ततो दद्यात्स्वनामभिः। नैवेद्यंतु महापूर्वं ततो दद्याद्भक्तितः॥ नीराजयेत्ततो देवं भक्तितस्तु मंग
364 लैः॥ सगीतजयशब्दैश्च पुरस्ताद्दर्पणं दर्शयेत्ततः॥ विविधानि च पुष्पाणि दद्यात्पुष्पांजलिं पुनः॥ प्रार्थयेद्देवदेवेशं मंत्रैरेभिर्यथाविधि॥ मणिविद्रु
ममालाभिर्मंदारकुसुमादिभिः॥ इयं सांवत्सरी पूजा तवास्तु गरुडध्वज॥ वनमाला यथा देव कौस्तुभं सततं हृदि॥ पवित्रमस्तु तेतद्वत्पूजां च
हृदये वह॥ जानताजानता चापि न कृतं यत्तवार्चने॥ केनचिद्विघ्नदोषेण परिपूर्णं तदस्तु मे॥ अपराधसहस्राणि क्रियंतेहर्निशं मया॥ दासोय
मिति मां मत्वा क्षमस्व मधुसूदन॥ निपत्य दंडवद्भूमौ भक्तियुक्तेन चेतसा॥ प्रणमेद्देवदेवेशं रामभिष्टार्थदं बुधः॥ ततः पवित्रं गुरवे दद्यात्सं धा
दिपूर्वकं॥ अथैनं पूजयेद्भक्त्या गंधस्नानानुलेपनैः॥ ब्राह्मणान्वैष्णवांश्चैव गंधपुष्पादिनार्चयेत्॥ भक्त्या संतोषयेत्तांस्तान्वस्त्रभोजनकां
चनैः॥ मासपक्षमहोरात्रं त्रिरात्रं धारयेच्च वा॥ देवे तत्सूत्रसंभेदं देशकालव्यवस्थया॥ प्रत्यहं स्नानकार्यादि सूत्राणामुत्तार्य कारयेत्॥ अभिषि राम·
च्यार्चितो येन पुनर्देवे निवेदयेत्॥ अथातो देवमभ्यर्च्य निःशेषात्पुष्पवंदनैः॥ नैवेद्यं विधिवद्दत्त्वा ततः सूत्रं विसर्जयेत्॥ सांवत्सरीं पू ३६४

364A भांपूजां समं याघ विधिवन्मम ॥ ब्रजेद्दानीं पवित्रं तं विष्णुलोकं विसर्जितः ॥ यावद्देवे पवित्राणि तावत्तिष्ठेत्समाहितः ॥ ब्रह्मचारी हविष्याशी देवपूजापरायणः ॥
॥ पवित्रारोपणं कालेन करोति कथंचन ॥ तदा स्तुतं जपेन्मंत्रं स्तोत्रं वापि समाचरेत् ॥ इति पवित्रारोपणं ॥ अथ प्रयोगः ॥ प्रातः कृत्यं कृत्वा सूत्रं त्रिगुणं त्रि
गुणीकृत्य पंचगव्येन संप्रोक्ष्य उष्णोदकेन शीतलेन वा प्रक्षालयेत् हृदयमंत्रेण ॥ ततो मूलेनाष्टोत्तरशत संख्यया गायत्र्या वाष्टोत्तरशतं जपवारमभि
मंत्र्य शंखोदकेनाभिषिच्य पवित्राणि विनिर्ममेत् ॥ तत्राष्टोत्तरशततंतुद्विगुण बहुसूत्राः श्रेष्ठमध्यकनिष्ठानि देवस्य जानूरुनाभिदघ्नानि षट्त्रिंशत चतुर्वि
शद्वादशग्रंथिकानि कृत्वा कर्पूरकुंकुमकेसरगोरोचनागुरुसंयुक्तेन चंदनेन रंजयित्वा नारायणाष्टाक्षरेण ॥ इदं विष्णुरिति मंत्रेण द्वादशाक्षरेण
वाभिमंत्रयेत् ॥ तानि पवित्राणि वैणवपटलसंपुटांतः शुभ्रवस्त्रेण संछाद्य स्थापयेत् परिवारदेवतानां सप्तविंशति षड्विंशति षोडश द्वादश नव त्रिसू
त्रीषन्नतमाभि ग्रंथाशोमं दशग्रंथिकानि कृत्वा गुरुपवित्रमग्निपवित्रं वनतथैव संपाद्य अन्येषां यथासंभवं पवित्राणि कृत्वा पूर्ववत्संस्कृत्यैकस्मिन्पद
लेपटलांतरे वा संस्थाप्य गंधपवित्रं षोडश द्वादश नव सूत्री षन्नतमात्रं द्वादशग्रंथिकं कृत्वा अंगुलिमात्रमिति तांषट्त्रिंशत्ता कुशैर्वेष्टितां कुर्यात् ॥
ततस्तां वेष्टनां मूलमंत्रेणाभिमंत्र्य पंचगव्येन संशोध्य कक्षांधरे कृत्वा मानसं स्नानं कुर्यात् ॥ तद्यथा ॥ स्वाश्रितं पुंडरीकाक्षं मेघमूर्तिं विभुं स्मरेत् ॥ अ

श्री॰जय॰क॰ नंताद्रिसमंकाशं वासुदेवं चतुर्भुजं॥ शंखचक्रगदापद्ममुकुटं वनमालिनं॥ दिव्यचंदनलिप्तांगं चारुहासं शुभेक्षणं॥ नारदाद्यैः सेव्यमानं भास्वत्कुंडलकं

३६५ करीं॥ मकिंकिरणीककेयूरहाररिणं मणीनूपुरं॥ ध्वजछत्रांकुशालक्ष्यपादपंकेरुहद्वयं॥ तस्यादेहदकजां धारां निपतंतीं स्वमूर्धनि॥ चिंतयेद्ब्रह्म

365 रंध्रेण प्रविशंतीं स्विकां तनुं॥ तया संक्षालयेत्सर्वमंतर्देहगतं मलं॥ तत्क्षणाद्विरजा मंत्री जायते स्फटिकोपमः॥ इदं मांत्रं च संस्नानमहरहस्तादृशं विकं स्मृ

तं॥ तत्र सर्वतो रक्षणं कुर्यात्॥ तद्यथा॥ जलपुष्पाक्षतान् हस्ते गृहीत्वा ओं हूः अस्त्राय फट् इत्यस्त्रयाम्नः परितः प्रक्षिप्य अस्त्राय फट् इति सर्वं

च्छोटिकाभिः सर्वं दिग्बंधनं कृत्वा आग्नेयां कारमुद्रां स्वमूर्ध्नि ने परितः प्रादक्षिण्येन त्रिर्भ्रामयेत्॥ तन्मध्यगतमात्मानं संचिंत्य संक्षेपेण भगवत्पूजां

कृत्वा मूलमंत्रेण वैदिकेन वा होमं विधाय महापूजां कुर्यात्॥ तत्र नित्यपूजनात् पंचामृतादिद्रव्यं त्रिगुणं ग्राह्यं ततो गंधतैलदानानंतरं उद्वर्तनं

कुर्यात्॥ तत्प्रकारो महाकपिलपंचरात्रे॥ रजनी सहदेवी च शिरीषं लक्ष्मणापि च॥ सहदा भद्रा कुशाग्रा च तीर्थं उद्वर्तने मिहोच्यत इति॥ एतद्द्वर्तनं तं शंखो

दकेन देवाया भिषेकं कुर्यात्॥ पदाहुः शतं सहस्रमयुतं शक्त्या वाप्यभिषेचयेत्॥ शंखस्थं दर्पयेत्तैलं वस्त्रपुष्पेण वा देवनामिति॥ अयमत्रापि विशेषस्तु यागे राम॰

यत्नायेन संस्नाप्य जगदीश्वरं महाभिषेकं सर्वत्र शंखेनैव प्रकल्पयेदिति॥ ततो देवं सर्वोपचारैः संपूज्य देवस्य पुरतो दंतकाष्ठं जलं कुशान्मृत्तिकां हरि ३६५

365A

द्रांकुशंगोरोचनांपादुकेउपानहौछत्रंचामरंव्यजनंव्रीह्यादिधान्यानिश्रस्याप्ययेत्॥ तानि चोक्तानि विष्णुपुराणे॥ व्रीहयः सयवा माषा गोधूमाः अणवस्तिलाः॥ प्रि
यंगुसक्षमाह्येतेअष्टमाश्चकुलत्थकाः श्यामाकास्त्वथनीवाराजर्तिलाः सगवेधुका४॥ तथावेणुयवाः प्रोक्तास्तथामर्कटकाःशुभे॥ ग्राम्यारण्याः स्मृताह्येतेओ
षध्यश्चचतुर्दशेति। ततः साष्टांगंप्रणिपत्यनानाविधैः स्तोत्रैर्वैदिकैश्चदेवंस्तुत्वाविज्ञापयेत्। क्रियालोपविघातार्थंयत्त्वयाविहितंप्रभो। मयेतत्तत्क्रियतेदेव
तवतुष्ट्यैव्रतंपवित्रकं॥ नहिविघ्नोभवेद्देवकुरुनाथदयांमयि। सर्वथासर्वदाविष्णोममत्वंपरमागतिः॥ उपवासेनत्वांदेवतोषयामिजगत्पते। कामक्रोधा
दयोह्येतेनमेसंतुव्रतघातकाः। अद्यप्रभृतिदेवेशयावद्वैशेषिकंदिनं। तावद्रक्षात्वयाकार्यासर्वस्यास्यनमोस्तुते। तवयागंकरिष्यामिपवित्रमपरमच्युत। आ
मंत्रितोसिसपरीवारः श्रीरामसोमया। रामराममहाराम रक्षमांशरणागतं॥ मद्भक्तितुष्टिसंपूर्णंतवतोषकरंपरं इति। निजाराधनीयदेवंविज्ञाप्यदेवाग्रेसर्वतो
भद्रमंडलंपद्मंवाविरच्यतत्रफलपुष्पमालालंकृतंवितानमाबध्यमंडलोपरिजलपूर्णंकुंभंमहीद्यौरिति विधानेनसंस्थाप्यतदुपरिसमस्त्रंवैणवंपात्रं
वसंस्थाप्यपवित्रंपूजांकुर्यात्। ओंवत्सरस्ययागस्यपवित्रीकरणायभोः। विष्णुलोकात्पवित्रत्वमागच्छेहनमोस्तुते। इत्यनेनमूलमंत्रयुतेनावाहयेत्
॥ उत्तमंमध्यमंकनिष्ठंचब्रह्मविष्णुरुद्रात्मकंराजतंतामं। शिवेदत्त्वपंलोकत्रयंध्यात्वावनमालांयांप्रकृतिमुक्तुंदत्त्वेविष्णुलोकंध्यात्वाओंसर्वाभरणावि

जप॰क्रम॰ त्वांगमसर्वदेवनमस्कृतं ॥ लावण्यरूपविश्वात्मन् ज्येष्ठस्त्वं समाश्रय ॥ ओं सर्वलक्ष्मीकरश्रीश सर्वज्ञानमयात्मक ॥ निष्कलरूपविश्वात्मन् मध्यस्त्वं स
३६६ माश्रय ॥ अतिवेगजगद्घोने पुरुषात्मन् दिवस्पते ॥ कनीयो मे प्रभो देव तेजसा स्त्वं समाश्रय ॥ सर्वाधार ध्वाहरूपसर्वकर्मः प्रजापते ॥ सर्वथात्मेश सूत्रे
366 स्मिन्त्वां निबध्नं कुरु मे नमः ॥ सर्वलोकज्वलाकारब्रह्मांडब्रह्मगोविष ॥ मुकुटेन समं सर्वांगशिरःस्पृक्त्व इहे ह्रिभोः प्रकृतिर्जंतःकर्त्री सर्वज्ञा वसायदायि
नी ॥ श्रीसूत्रे नित्यकल्याणि मां निबध्यं कुरु ते नमः ॥ उत्तमादीनि सूत्राणि क्रमात्स्थानानि मे त्रैः [illegible] आलभ्य ॥ त्रिसूत्वां ब्रह्मविष्णुरुद्रान् ॥ ओंका
रं सोमं वह्निं ब्रह्माणं नागांस्तु शशिनं रविं शिवं विश्वान्देवान् नवसूत्र्यां ध्यात्वावाहयेत् ॥ ग्रंथिषु ग्रंथिदेवताभ्यो नमस्त्या वा स्वप्र[illegible]येत् ॥ ततश्चावाहना जप
दिमुद्राः प्रदर्श्य चक्रमुद्रया संरक्ष्य धेनुमुद्रयामृतीकृत्य गंधाक्षतपुष्पाक्षतधूपदीपनैवेद्यफलतांबूलादिभिः पवित्रं देवताश्च संपूज्य ततो गंधपवित्रं वितस्ति दोर
कात्मकं गृहीत्वा हृद्यमंत्रेण प्रणवेन वाभिमंत्र्य देवं नमस्कृत्य संवत्सरकृतार्चा पासं पूर्णफलदोसि पत ॥ पवित्रारोपणाय ते तत् कुरु केशव केनमः ॥ ॥ वि
ष्णुतेजोद्भवं रम्यं सर्वपातकनाशनं ॥ सर्वकामप्रदं देव तवांगे धारयाम्यहम् इति मूलं संपुटितं श्लोकद्वयं पठित्वा देवकरे बध्नीयात् ॥ ततो मंगलारात्रिकेन देवं नी राम॰
राजयेत्पुनश्चंदननैवेद्यताम्बूलादिभिर्देवं संपूज्य ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंचिनुतं शरण्यं ॥ भृत्यार्तिहं प्रणतपालभवाब्धिपो ३६६

366A

तं वंदे महापुरुषते चरणारविंदे ॥ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादरण्यं मायामृगं दयितयेप्सितमन्वधावद्वंदे महापुरुष
ते चरणारविंदे ॥ योंतः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना ॥ अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगवते
पुरुषाय तुभ्यं ॥ इत्यादिभिः स्तुत्वा देवं निमंत्रयेत् ॥ देवदेव शरण्या स्वाघनञ्जकृत्साक्षांतक ॥ जगन्मय जगन्नाथ विश्वेश्वर रमापते ॥ त्रैलोक्यमोहनानंतका
मनामासुने शमस ॥ आमंत्रितोसि देवेश सहितो लोकपालकैः ॥ सहितः परिवारैश्च विश्वेश्वर जगद्गुरो ॥ प्रातस्त्वां पूजयिष्यामि सांनिध्यं कुरु केशव ॥
क्षीरोदधिमहानागशय्यावस्थितविग्रह ॥ प्रातस्त्वां पूजयिष्यामि संनिधौ भव ते नमः ॥ निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्रकं ॥ सर्वथा सर्वदा विष्णो मम
त्वं परमा गतिरिति संप्रार्थ्य सायंगं प्रणाम्यमारोपणं पुष्पांजलिं दत्त्वा स्तुत्वा प्रपद्ये ॥ संरक्षकवचे नावगुंठ्य नृसिंहमंत्रेण रक्षां कुर्यात् ॥ नृसिंहमंत्रस्तु ॥
उग्रं वीरं महाविष्णुं ज्वलंतं सर्वतोमुखं ॥ नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहं ॥ ततो ब्राह्मणांश्चंदनेन गुरुं वंदनं च कृत्वा रात्रौ जागरणं कुर्यात् ॥ स
घोषिवासनेन्तु जागरणं नास्ति ॥ ततो जागरणं कुर्वीत सघो जागरणं नहीति हस्त्रिणामपि संहितावचनात् ॥ इत्येकादश्यां पवित्राधिवासनं ॥ ततो द्वा
दश्यां नित्यं नैमित्तिकं च देवपूजनं कृत्वा पवित्राणि च संपूज्य देवं नीराजयित्वा तैः सूत्रैर्गंधदूर्वाक्षतैर्युक्तं पवित्रं हस्ते गृहीत्वा मूलमंत्रेण षड्वारम

जय॰कम॰ ३६७ 367

भिमंत्र्य मूलसंपुटितेन श्लोकद्वयेन पवित्रमर्पयेत्॥ ओं रामराम नमस्तुभ्यं गृहाणेदं पवित्रकं॥ पवित्रीकरणार्थाय वर्षपूजाफलप्रदं। पवित्रं तत्कुरु
ष्वाद्य मया दुष्कृतं कृतं। शुद्धो भवाम्यहं देव त्वत्प्रसादात्सुरेश्वरेति॥ ततोंगावृतिदेवेभ्यस्तत्तन्नामभिरर्पयेत्। ततो महानैवेद्यं समर्प्य नीराजनं कृत्वा
नामभिः संवीज्यादर्शं दर्शयित्वा पुष्पांजलिं समर्प्य मणिविद्रुममालाभिर्मंदारकुसुमादिभिः॥ इयं सांवत्सरी पूजा तवास्तु गरुडध्वज॥ वनमाला
यथा देव कौस्तुभं सततं हृदि॥ पवित्रमस्तु ते तद्वत्पूजां च हृदये वह॥ जानताजानता वापि न कृतं यत्तवार्चनं। केनचिद्विघ्नदोषेण परिपूर्णं तद
स्तु मे॥ अपराधसहस्राणि क्रियंतेहर्निशं मया॥ दासोयमिति मां मत्वा क्षमस्व मधुसूदन॥ इति संप्रार्थ्य साष्टांगं प्रणम्य देवं प्रसादाभिमुखं विचिंत्य
मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर॥ पूजनं पूर्णतामेतु पवित्रेणार्पितेन ते इति पठित्वा गुरवे गंधादिपूर्वकं पवित्रं दत्वा सुवर्णवस्त्रादिभिः पू
जयेत्॥ ततो ब्राह्मणान्संभोज्य स्वयं भुंजीत पवित्रधारणं तु देवे स्वदेहे वा मासपक्षादि यथासंभवं कार्यं स्नानादिकाले तदुत्तार्य देवं स्नापयेत्॥
तथैव स्वयं स्नायात्॥ अर्घ्यतोयेनाभिषिच्य देवाङ्गे स्वाङ्गे च तत्तद्धारयेत्॥ विसर्जनसमये देवं संपूज्य विशेषेण गंधादिभिः संपूज्य विसर्जयेत्॥ विस राम॰
र्जनमंत्रस्तु॥ ओं सांवत्सरीमिमां पूजां संपाद्य विधिवन्मम॥ व्रज इदानीं पवित्रक स्वलोकं विसर्जितः। यावद्देवे पवित्राणि तावद्ब्रह्मचर्यादिनियम ३६७

मेनास्येयो॥ एवंयःकुरुतेविद्वान्वर्षेवर्षेनसंशयः॥ सयातिपरमंस्थानंयत्ररामःसनातनः॥८॥ पावनंतुपवित्रंतुनाकस्वर्गेमहीयते॥ आयुरारोग्य
367A मैश्वर्यंविपुलंतस्यवर्धते॥ इतिपवित्रारोपणोत्सवः॥ अथभाद्रपदकृष्णैकादशीकथा॥ ब्रह्मवैवर्तेयुधिष्ठिरउवाच भाद्रस्यकृष्णपक्षेतुकिंना
मैकादशीभवेत्॥ एतदिच्छाम्यहंश्रोतुंकथयस्वजनार्दन॥ श्रीकृष्णउवाच॥ शृणुराजैकमनाराजन्कथयिष्यामिविस्तरात्॥ अजेतिनामतःप्रो
क्तासर्वपापप्रणाशिनी॥ पूजयित्वाहृषीकेशंव्रतंतस्याःकरोतियः॥ पापानितस्यनश्यंतिव्रतस्यश्रवणादपि॥ नातःपरतराराजन्लोकद्वय
हिताव्रता॥ सत्यमुक्तंमयाह्येतन्नासत्यंममभाषितं॥ हरिश्चंद्रइतिख्यातोबभूवनृपतिःपुरा॥ चक्रवर्तीसत्यसंधःसमस्तायाभुवःपतिः॥ कस्यापि
कर्मणःप्राप्तोराज्यभ्रष्टोबभूवसः॥ विक्रीयवनितांपुत्रंसचकारात्मविक्रयं॥ पुल्कसस्यतदादासःसंगतोराजासत्पुण्यकृत्॥ ससत्यमालंब्यराजेंद्र
मृतचैलापहारकः॥ सोभवन्नृपतिश्रेष्ठोनसत्याच्चलितस्तदा॥ एवंगतस्यनृपतेर्बहवोवत्सरागताः॥ ततश्चिंतापरोराजाबभूवातीवदुःखित
ः॥ किंकरोमिक्वगच्छामिनिःकृतिर्मेकथंभवेत्॥ इतिचिंतयतस्तस्यमग्नस्यवृजिनार्णवे॥ आजगाममुनिःकश्चिज्ज्ञात्वाराजानमातुरं॥ परोपकृ
रणार्थायनिर्मिताब्रह्मणाद्विजाः॥ सतंदृष्ट्वाद्विजवरंननामनृपसत्तमः॥ कृतांजलिपुटोभूत्वागौतमस्याग्रतःस्थितः॥ कथयामासवृत्तांतमा

जय. कम.
३६८
368

स्मनो दुःखसंयुतं ॥ श्रुत्वा नृपतिर्वाक्यानि गौतमो विस्मयान्वितः ॥ उपदेशं नृपतये व्रतस्यास्य ददौ मुनिः ॥ मासि भाद्रपदे राजन् कृष्णपक्षे तु शोभना ॥ एका
दशी समाख्याता अजा नाम्नेति पुण्यदा ॥ अस्याः कुरु व्रतं राजन् पापस्यांतो भविष्यति ॥ तव भाग्यवशादेषा सप्तमेऽह्नि समागता ॥ उपवासपरो भूत्वा रा
त्रौ जागरणं कुरु ॥ एवमस्या व्रते चीर्णे सर्वपापक्षयो ध्रुवं ॥ तव पुण्यप्रभावेन आगतोऽहं नृपोत्तम ॥ इत्येवं कथयित्वा स मुनिरंतरधीयत ॥ मुनिवाक्यं
नृपः श्रुत्वा चकार व्रतमुत्तमं ॥ कृते तस्मिन् व्रते राज्ञः पापस्यांतो भवत्क्षणात् ॥ श्रूयतां राजशार्दूल व्रतस्यास्य प्रभावकं ॥ यद्दुःखं बहुभिर्वर्षैर्भो
क्तव्यं तत्क्षयो भवेत् ॥ निस्तीर्णदुःखो राजासीद्व्रतस्यास्य प्रभावतः ॥ पत्न्या सह समायोगं पुत्रजीवनमाप सः ॥ देवदुंदुभयो नेदुः पुष्पवर्षं
मभूद्दिवः ॥ एकादश्याः प्रभावेन प्राप्तं राज्यमकंटकं ॥ स्वर्गं लेभे हरिश्चंद्रः सपुरः सपरिच्छदः ॥ ईदृग्विधं व्रतं राजन्ये कुर्वंति द्विजोत्तमाः ॥ स
र्वपापविनिर्मुक्तास्त्रिदिवं यांति ते नृप ॥ पठनाच्छ्रवणाद्राजन्नश्वमेधफलं लभेत् ॥ इति ब्रह्मवैवर्तपुराणे भाद्रपदकृष्णपक्षे अजैकादशीमा
हात्म्यं समाप्तं ॥ अथ भाद्रपदशुक्लैकादशीमाहात्म्यं ब्रह्मांडपुराणोक्तं ॥ युधिष्ठिर उवाच ॥ नभस्यासितपक्षे तु किंनामैकादशी भवेत् ॥ को दे राम.
वः को विधिस्तस्याः एतदाख्याहि माधव ॥ श्रीकृष्ण उवाच ॥ कथयामि महीपाल कथामाश्चर्यदायिनीं ॥ कथयामास यां ब्रह्मा नारदाय महात्मने ॥ ना ३६८

368A रहउवाच । कथयस्व प्रसादेन तत्सर्वं खनमोक्षते ॥ नभस्य शुक्लपक्षे तु किं नामैकादशी भवेत् । एतदिच्छाम्यहं श्रोतुं विस्तरेणाघनाशनं ॥ ब्रह्मोवाच ॥ वैष्णवोऽसि
मुनिश्रेष्ठ साधु पृष्टं त्वया कलिप्रिय ॥ नातः परतरं लोके पवित्रं हरिकीर्तनात् । पद्मानामेति विख्याता नभस्यैकादशी भवेत् ॥ हृषीकेशः पूज्यते यस्याः कर्त्तव्यं व्रतमुत्तमं
। कथयामि ते वत्साहं कथां पौराणिकीं शुभां ॥ यस्याः श्रवणमात्रेण महापापं प्रणश्यति ॥ मांधाता नाम राजर्षिर्विवस्वद्वंशसंभवः ॥ बभूव चक्रवर्त्ती च
स नृपः सत्यप्रतापवान् । धर्मतः पालयामास प्रजाः पुत्रानिवौरसान् ॥ न तस्य राज्ये दुर्भिक्षं न ताप्यो व्याधयस्तथा ॥ निरातंकाः प्रजास्तस्य धनधान्यस
मेधिताः ॥ नान्यायोपार्जितं वित्तं कोशे तस्य महीपतेः ॥ स्वे स्वे मार्गे प्रवर्त्तंते सर्ववर्णाश्रमास्तथा ॥ कामधेनुसमा भूमिस्तस्य राज्ये महीपतेः ॥ तस्यै
वं कुर्वतो राज्यं बहुवर्षगणा गताः ॥ अथो कदाचित्संप्राप्ते विपाके किल कर्मणः । वर्षत्रयं तद्विषये न ववर्ष वलाहकः ॥ तेनोद्विग्नाः प्रजास्तस्य बभू
वुः क्षुधयार्दिताः ॥ स्वाहास्वधावषट्कारवेदाध्ययनवर्जिताः । बभूव विषयस्तस्य सस्याभावेन पीडितः ॥ अथ प्रजाः समागत्य राजानमिदमब्रुवन् ॥
श्रोतव्यं नृपशार्दूल प्रजानां वचनं त्वया ॥ आपो नारा इति प्रोक्ताः पुराणेषु मनीषिभिः ॥ अयनं तस्य ताः प्रोक्तास्तेन नारायणः स्मृतः । पर्जन्यरूपी
भगवान् विष्णुः सर्वगतः स्थितः ॥ स एव कुरुते वृष्टिं वृष्टेरन्नं ततः प्रजाः ॥ तदभावेन नृपते क्षयं गच्छंति ताः प्रजाः ॥ तथा कुरु नृपश्रेष्ठ योग

जय·का·म·
३६९
369

क्षमोपयो भवेत्॥ राजोवाच॥ सत्यमुक्तं भवद्भिश्च न मिथ्या विहितं वचः॥ अन्नं ब्रह्म श्रुतं प्रोक्तं अन्ने सर्वं प्रतिष्ठितं॥ अन्नात्भवंति भूतानि जगदन्नेन वर्त्तते॥
इत्येवं श्रूयते लोके पुराणे बहुविस्तरं॥ नृपाणां तु प्रचारेण प्रजानां पीडनं भवेत्॥ नाहं पश्याम्यात्मकृतं दोषं बुद्ध्या विचारयन्॥ तथापि प्रयतिष्याम्पि प्रजा
नां हितकाम्यया॥ इति कृत्वा मतिं राजा परिमेयपरिच्छदः॥ नमस्कृत्य विधातारं जगाम गहनं वनं॥ बभ्राम मुनिमुख्यानामाश्रमं तपसैधितं॥ ददर्शाथ ब्र
ह्मसुतमृषिमंगिरसं नृपः॥ तेजसा द्योतितदिशं द्वितीयमिव पद्मजं॥ तं दृष्ट्वा हर्षितो राजा अवतीर्य स्ववाहनात्॥ नमश्चक्रे स चरणौ कृतांजलिपुटो
वशी॥ मुनिस्तमभिनंद्याथ स्वस्तिवाचनपूर्वकं॥ प्रयच्छ कुशलं राजे सप्रस्वंगेषु भूपते॥ निवेदयित्वा कुशलं पप्रच्छानामयं ततः॥ दत्तासनो गृहीता
र्घ उपविष्टोस्य सन्निधौ॥ प्रश्नावसरमुनिं राजा पृष्टो ह्यागमकारणं॥ राजोवाच॥ भगवन्धर्मविधिना मम पालयतो महीं॥ अनावृष्टिः प्रवृत्ता वै नाहं
वेद्मि तत्र कारणं॥ संशयच्छेदनायात्र आगतोहं तवांतिके॥ भगवन्कृतविधाने न प्रजानां निर्वृतिं कुरु॥ अंगिरा उवाच॥ एतत्कृतयुगं राजन्युगानामुत्त
मं स्मृतं॥ अत्र ब्रह्मोत्तरा लोका धर्मश्चात्र चतुष्पदः॥ अस्मिन्युगे तपोयुक्ता ब्राह्मणा नेतरे जनाः॥ विषये तव राजेंद्र वृषलोयं तपस्यति॥ अकार्यक राम·
रणात्तस्य न वर्षति बलाहकः॥ कुरुतस्य वधे यत्नं येन दोषः प्रशाम्यति॥ राजोवाच॥ नाहमेनं वधिष्यामि तपस्यंतमनागसं॥ धर्मोपदेशं कथय उ ३६९

पसर्गविनाशनं॥अंगिरा उवाच॥ततो देवं तु हरिं नृपते कुरु षैकादशीव्रतं॥नभस्यस्यासिते पक्षे पद्मानामेति विश्रुता॥तस्या व्रतप्रभावेन सद्यो वृष्टिर्भ
विता ध्रुवं॥सर्वसिद्धिप्रदा ह्येषा सर्वोपद्रवनाशिनी॥अस्या व्रतं कुरु नृप सप्रजः सपरिच्छदः॥इति वाक्यं मुनेः श्रुत्वा राजा स्वं गृहमागतः॥प्राप्ते भा
द्रपदे मासि पद्माव्रतमथाकरोत्॥प्रजाभिः सह सर्वाभिश्चातुर्वर्ण्यसमन्वितः॥एवं व्रते कृते राजन्प्रववर्ष बलाहकः॥जलेनाप्लाविता भूमिरभवच्छस्य
मालिनी॥हृषीकेशप्रसादेन लोकाः सौख्यं प्रपेदिरे॥एतस्मात्कारणाद्देव कर्त्तव्यं व्रतमुत्तमं॥भुक्तिमुक्तिप्रदं चैव लोकानां सुखदायकं॥पठनाच्छ्रव
णाद्राजन्सर्वपापैः प्रमुच्यते॥इति ब्रह्मांडपुराणे भाद्रपदशुक्लपक्षे पद्मैकादशीमाहात्म्यं समाप्तं॥अस्यामेव श्रवणनक्षत्रयुक्तायां विजयैका
दशीव्रतं तदुक्तं हेमाद्रौ मदनरत्ने भविष्योत्तरे॥द्वादश्यास्तु विधिः प्रोक्तः श्रवणेन युधिष्ठिर॥सर्वपापप्रशमनः सौख्यमोक्षप्रदायकः॥एकादशी
यदा शुक्ला श्रवणेन समन्विता॥विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा॥अभीष्टा देवदेवस्य सर्वदा विजया तिथिः॥एषैव फाल्गुने मासि पुष्ये
ण सहिता नृप॥विजया प्रोच्यते सद्भिः कोटिकोटिगुणोत्तरा॥एषैवेति शुक्लपक्षैकादशी परा नृपते॥एकादश्यां सोपवासो राज्ञो संपूजयेद्धरिं॥
सौवर्णे रौप्यपात्रे वा दारुवंशमयेपि वा॥सौवर्णं वामनं कुर्यात्स्वस्ववित्तानुसारतः॥शुभाननं धारयंतं मत्स्यसूत्रं कमंडलुं॥शिखीकमंडलुधरः छत्रीप

जय·क्रम· ज्ञोपवीतवासनाः॥ एवं संपूजयेद्देवं वामनं सर्वलक्षणं॥ आच्छाद्य पात्रं वासोभिरहतैः संयुतं फलैः॥ मार्गेणा वर्मणा वापि भक्त्या वा शक्त्यपेक्षया॥ तिलोदकेन संपूर्णं

३७० 370 मत्स्येन कुंडवेनवा॥ अलाभे तिलगोधूमैः फलं पुष्पं तिलैर्भवेत॥ पुष्पैर्गंधैः फलैर्धूपैः कालोत्थैरर्चयेद्धरिं॥ नानाविधैश्च नैवेद्यैर्भक्ष्यभोज्यगुडोदनैः॥ मंत्रवत्तेष्व

नुपूर्णं भक्त्या कोटिगुणोत्तरं॥ पूजामंत्रान्प्रवक्ष्यामि ताञ्छृणुष्व युधिष्ठिर॥ पादौ मत्स्याय च नमो नमः कूर्माय जानुनी॥ वराहाय नमो गुह्यं नरसिंहायेति

नाभितः॥ उरस्तु वामनायेति भुजौ रामाय वै नमः॥ मुखं रामाय च नमः॥ कृष्णाय च नमः शिरः॥ मत्स्यः कूर्मो वराहश्च नारसिंहो थ वामनः॥ रामो रामश्च रामश्च अ

र्वपाभिनमो नमः॥ अर्चनमंत्रः॥ गंधपुष्पफलैश्चैव नैवेद्यैर्विविधैर्नावपेत्॥ एवं स्वधर्म्यं विधिवद्देकादश्यां समं त्रकी॥ जागरं तत्र कुर्वीत गेयवादित्रनर्त

नैः॥ एवं सनियमं स्थित्वा प्रभाते विमले सति॥ पूर्वोक्तविधिना तद्वदर्चयेद्वामनं हरिं॥ प्रदेयः शास्त्रविदुषे ब्राह्मणो मंत्रतो नृप॥ वामनो बुद्धिदो दाता द्रव्यस्थो वा

मनः स्वयं॥ वामनः प्रतिग्राही वामनाय नमस्कृतिः तेन ब्राह्मणश्चापि मंत्रेण प्रतिगृह्णीत मंत्रवित्॥ वामनः प्रतिगृह्णाति वामनो वै ददाति च॥ वाम

नस्कारकोद्धाभ्यां वामनाय नमस्कृतः॥ प्रतिग्रहमंत्रः॥ एवं दत्त्वा ततः प्रातर्भोजनं षड्रसात्मकं॥ पूर्वं दत्त्वा ब्राह्मणेभ्यः पश्चात् भुंजीत च स्वयं॥ भूयो यथेच्छया राम·

राजन्सर्वं नैषविधिः स्मृतः॥ एवं कृते व्रते ब्रह्मन्पतत्पुराणं तान्निबोध मे॥ यावत्कल्पशतं स्वर्गे एकसप्ततिसंख्यया॥ प्राप्य विष्णुपुरं राजन्क्रीडते कालमक्ष ३७०

370A

यं॥ इहागत्य मम वेद्मा जागर्ति पक्षक्षयंकरः। हतपाप्मा यदानानां दाता मोक्षाविमत्सरी॥ रूपसौभाग्यसंपन्नो दीर्घायुर्नश्च जो भवेत्॥ सुतपौत्रैः परिवृतो जी
वेच्छरदां शतं॥ एषा सुष्टिः समाख्याता एकादश्यामयातव॥ सुष्टिः फलं प्रघोषं वस्त्रमाख्याता द्वादशी श्रवणान्विता॥ उपोष्यैकादशीं पश्चाद्द्वादशीमप्यु
पोषयेत्॥ न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिरिति। इदं च व्रतमुत्तरदिने श्रवणायुक्तैकादश्यलाभे दशमीविद्धायामपि श्रवणयुक्तायामेकादश्यां
कर्त्तव्यं। दशम्येकादशी यत्रेत्येतत्प्रकरणस्थवक्ष्यमाणवह्निपुराणवचनात्॥ विशेषस्तु द्वादशीप्रकरणे वक्ष्यते॥ एतत्पारणं तु परेह्नि श्रवणा
पेक्षया द्वादश्यां विद्धेपि श्रवणमतिवाह्य द्वादश्यां कर्त्तव्यं। श्रवणस्याप्राप्तौ विद्धेपि तु श्रवणमतिवाह्य त्रयोदश्यामेव कर्त्तव्यं॥ पारणान्ते थि वृद्धौ तु द्वाद
श्यामुद्वृत्य स्यात्॥ वृद्धौ कुर्यात्त्रयोदश्यां न च दोषो न विद्यत इत्येतत्प्रकरणस्थवह्निपुराणवचनात्। इति विजयैकादशीव्रतं॥ श्रवणैकादश्यां मध्याह्ने
वामनावतारः इति निर्णयामृते निर्णयसिंधौ च भविष्योत्तरे। भागवतेऽष्टमस्कंधे भाद्रशुक्लद्वादश्यां वामनोत्पत्तिरुक्ता॥ श्रोणायां श्रवणद्वादश्यां मुहूर्ते
ऽभिजिति प्रभुः॥ सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणं। द्वादश्यां सविताऽतिष्ठन्मध्यंदिनगतो नृप॥ विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः। अस्यार्थः
श्रोणायां श्रवणस्य वै देवताऽपि श्रवणांशे अभिजिति नक्षत्रे तच्च स्फुटं दर्शितं॥ अभिजिन्नाम नक्षत्रं। उपरिष्टादाषाढायाः अवमा श्रोणायाः इत्येवं विशिष्टे

ज.य.कम. मुहूर्त्तेमाद्र्मेचवेत्यर्थः ॥ पक्षयोर्द्वादश्यां हरेर्जन्म न नमस्तामेव विदुः ॥ तद्दावध्यंदिनगतः तविनातिष्ठन्याव द्वादशी विजयानामेति प्रोक्तेत्यन्वय इति श्रीधरस्वामिनः ॥ अत्र क

३७१ ल्पभेदाद्यवस्थेति कश्चित् ॥ वस्तुतस्तु द्वादशीशब्देनैकादश्या एवाभिधानात् ॥ भविष्योत्तरभागवतयो राजस्येनैव संगतिः ॥ संप्रवक्ष्ये पिरजामि नत्याज्यं द्वादशीव्र

371 तमित्यादिषु द्वादशीशब्देन एकादश्या एव गृहीतत्वात् ॥ अथ भविष्योत्तरोक्त वामनपूजाप्रयोगः ॥ तत्र प्रातःस्नानादि निर्वर्त्य मध्याह्ने कलशस्थापनं कृ

त्वा तदुपरि पीठकादि परिमिततिलयवादिपूर्णं स्वर्णादिपात्रे सौवर्णं वामनं निधाय शुभाननं धारयं तमित्यादिना ध्यात्वा वामनायनमः इत्यनेन आवाहनादि

पुष्पदानान्तं पूजयित्वा मत्स्यादिनामभिः पादादिपूजां विधाय गंधादिनमस्कारांतमभ्यर्च्य दध्यक्षतफलयुक्तमर्घ्यं गृहीत्वा नमस्ते पद्मनाभाय नमस्ते

जलशायिने ॥ तुभ्यमर्घ्यं प्रयच्छामि बालवामनरूपिणे ॥ इत्यर्घ्यं समर्प्य पुष्पांजलिं दत्वा रात्रौ जागरणं विधाय प्रभाते पुनः संपूज्य वामनो बुद्धिदाता इत्यादि

मंत्रेणामूर्त्तिं दद्यादिति वामनपूजाविधिः ॥ अथाग्निपुराणोक्तं विजयद्वादशीव्रतं ॥ मैत्रेय उवाच ॥ विधानं श्रावणे राजेंद्र यथा दृष्टं मनीषिभिः ॥ यथोक्तं

नियमं कुर्यादेकादश्यामुपोषितः ॥ दंतकाष्ठं प्रगृह्यादौ वाग्यतो विजितेंद्रियः ॥ श्रवणाद्वादशीयोगे सम्यगुपोष्य जनार्दनं ॥ अर्चयित्वा विधानेन अहं मोक्ष्ये परे राम.

हनि ॥ नदीनां संगमे स्नायाद्दर्शये तत्र वामनं ॥ सौवर्णं रलसंयुक्तं द्वादशांगुलमुच्छ्रितं ॥ पीतवस्त्रैः शुभैर्वेष्ट्य भृंगारे निर्व्रणे नवे ॥ हिरण्मयेन पात्रेण अर्घ ३७२

पात्रं प्रकल्पयेत्॥ दध्यक्षतफलैश्चैव सहिरण्यं सदक्षिणं॥ नमस्ते पद्मनाभाय नमस्ते जलशायिने॥ तुभ्यमर्घ्यं प्रयच्छामि बालवामनरूपिणे॥ नमः कमलकिंजल्कपी
तनिर्मलवाससे॥ महाहवरिपुस्कंधघृष्टचक्राय चक्रिणे॥ नमः शार्ङ्गासिशंखाब्जपाणये वामनाय वा॥ यज्ञभुक्फलदात्रे च वामनाय नमो नमः॥ देवेश्वराय देवाय
देवसंभूतिकारिणे॥ प्रभवे सर्वदेवानां वामनाय नमो नमः॥ मत्स्यकूर्मवराहाय नरसिंहस्वरूपिणे॥ रामराम त्रिरामाय वामनाय नमो नमः॥ श्रीधराय नमस्तु
भ्यं नमस्ते गरुडध्वज॥ चतुर्बाहो नमस्तेस्तु नमस्ते गरुडध्वज॥ संपूज्यैवं विधानेन नरः स्वकवंदनादिभिः॥ रात्रौ जागरणं कुर्यात्सुरतो जलशायिनः॥ ध्यात्वा ज
लमयं रूपं देवदेवस्य चक्रिणः॥ ब्रह्मांडमुदरे यमहत्वमर्त्यैस्तु षितं॥ मायावी वामनः श्रीमान्त्रैर्यत्तु जगत्यस्ति॥ एवं संपूज्य विधिवद्द्वादश्यामुदये रवे
ः॥ भृंगारं देवमहितं सर्वं च संप्रपूजयेत्॥ वामनः प्रतिगृह्णातु वामनो वै ददाति तं॥ वामनं सर्वतोभद्रं द्विजायाथ निवेदयेत्॥ जलधेनुं तथा दद्यात् छत्रं चैव तु
पादुके॥ सहिरण्यानि वस्त्राणि धेनुं वानडुहं नृप॥ यत्किंचित्दीयते तत्र तदानंत्याय कल्पयेत्॥ श्रवणाद्वादशी योगे संपूज्य गरुडध्वजं॥ दत्त्वा दानं द्विजाति
भ्यो वियोगे पारणं चरेत्॥ सिंहास्थिते तु मार्तंडे श्रवणास्थे निशाकरे॥ माघे तु द्वादशी ज्ञेया नृणां साक्षयपदा दते॥ दशम्येकादशी यत्र सा नो पोष्या भवेत्तिथिः॥ श्र
वणेन तु संयुक्ता मासाश्च भासा सर्वकामदा॥ इत्येषा कथिता राजन् द्वादशी श्रवणेन वा॥ कर्तव्या सा प्रयत्नेन इहामुत्र फलप्रदा॥ इत्याग्निपुराणे विजयद्वाद

371A

शीव्रती।अथानन्तसिंहपरिवर्याउमारेणा विजयाव्रतानुष्ठानपद्धतिः॥विजयाव्रतंसंगमेतुश्रेष्ठं।नद्यादिसंगमालाभेमार्कंडेयोदिष्टेसंगमेव्रतमनुष्ठेयं॥शालग्रा
मशिलावारिन्धुलसीजलमेवच॥सम्यमेवोद्धरेत्तच्चविजयाव्रतमाचरेदितिस्मृतेः॥तत्रादौगुरुंप्रणम्यसंकल्पंविदध्यात्॥तत्रमंत्रः।द्वादश्यांतुनिराहारःस्थि
त्वाहमपरेहनि॥भोक्ष्येकिंचिक्रमानंतशरणंमेभवाच्युतेतिसशार्ङ्गःशरायुधंसौवर्णंदेवंकृत्वाताम्रकलशेवैणवपात्रेपंचामृतस्नापितंसवस्त्रमुपवेश्य
सितचंदनेनालिप्यासितवस्त्रद्वयच्छत्रोपानहंसपर्याचपवपूजांकुर्यात्॥शिरसिवासुदेवायनमः।मुखेश्रीधरायनमः।कंठेकृष्णायनमः।वक्षसिश्रीपतयेन
मः।बाहोश्चशस्त्रास्त्रधारिणेनमः।पादयोःसर्वात्मनेनमः।ततोविशेषार्घ्यंदद्यात्।तत्रमंत्रः।शंखचक्रगदापद्मसशार्ङ्गशरपूजित॥गृहाणार्घ्यंम
यादत्तंशार्ङ्गपाणेनमोस्तुतइति।ततोधूपदीपौदत्वाघृतपक्वनैवेद्यंफलतांबूलादीनिवसमर्प्यचजागरंचकृत्वाप्रभातेस्नात्वादेवंसंपूज्यपुष्पांजलिं
दत्वानेनमंत्रेणप्रार्थयेत्॥नमस्तेअच्युतगोविंदबुधश्रवणसंज्ञक।अघौघंवाक्षयंकृत्वासर्वसौख्यप्रदोभवेतिततःसर्वमाचार्यायदत्वापारणांकुर्यादिति॥
दुर्वासाउवाच॥नक्षत्रभाद्रपदेमासिशुक्लपक्षेतुद्वादशी॥संकल्पविधिनादेवमर्चयेत्परमेश्वरमिति॥नमोस्तुकल्किनेपादौहृषीकेशायवैकटिं।म्लेच्छ राम॰
प्रध्वंसनायोरूजगन्मूर्तेतथोदरं॥श्रीकंठायेतिवैकंठंखड्गपाणीतिवैभुजौ॥स्वनाम्नाशंखचक्रेतुविश्वमूर्तेतथाशिरः॥सितवस्त्रयुगच्छन्नंगंधपुष्पो ३७२

372A

पशोभितं ॥ कृत्वा प्रभाते विप्राय प्रदेयं शास्त्रविदतमे । प्रीयतां मे हृषीकेशः कल्किरूपीति मंत्रः ॥ पूर्वं राजा विशालोऽभूत्काशिपुर्यां महाबलः ॥ द्वादशीं व्रत
वान्व्रत्वा वृत्तिं वभूव ह ॥ यज्ञैः च विविधैरिष्ट्वा परं निर्वाणमाप्तवान् ॥ पूज्यते मत्स्यरूपेणास्सर्वज्ञत्वमभीप्सुभिः । स्ववंशोद्धारणार्थाय कूर्मरूपीति पूज्यते ॥
मूर्तौ हविर्निमग्नेन वराहः पूज्यते हरिः ॥ नरसिंहस्वरूपेणास्सर्वपापक्षपात्तुरैः ॥ वामनो मोहनाशाय वित्तार्थे जमदग्निजः ॥ क्रूरशत्रुविनाशाय यजेद्दाशर
थिं बुधः ॥ बलभद्रं यजेद्धीमान्पुत्रकामो न संशयः ॥ रूपकामो यजेद्बुद्धं कल्किनं शत्रुघातने ॥ इति धरणीव्रते कल्किद्वादशीव्रतं ॥ द्वयोस्तन्द्वाना
दिकं तु द्वादशीप्रकारो द्रष्टव्यो ॥ अथ भाद्रपद शुक्लैकादश्यां कटिपरिवर्त्तनोत्सवः ॥ तथा च भविष्योत्तरे ॥ प्राप्ते भाद्रपदे मासि एकादश्यां सिते हरेः ॥ कटि
दानं भवेद्विष्णोर्महापातकनाशनं । कटिदानं पार्श्वपरिवर्त्तनं ॥ रामार्चनं चंद्रिकायां । शयनोत्सवं च बौद्धं देवं नीत्वा जलाशयं । कटिदानोत्सवं कुर्व इति संक
ल्पं पूजयेत् । देवदेव जगन्नाथ योगिगम्य निरंजन । कटिदानं करोम्यघ प्राप्ते भाद्रपदे शुभे ॥ अनेन कटिपरिवर्त्तिं दक्षिणांगे प्रकल्पयेत् । महापूजां तत
ः कृत्वा पूर्ववत्स्वगृहं व्रजेत् इति । निर्णयसिंधौ तु ॥ अस्य चव्रत्तस्य भाद्रपद श्रवणयोगे फलातिशयो वगम्यत इति नृसिंहपरिचर्याकाराः । विष्णोः परिवर्त्त
न कृत्यमेवमुक्तं । संध्यायां विष्णुं संपूज्य प्रार्थयेत् ॥ मंत्रस्तु तिथितत्त्व उक्तः । वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव । पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि मा

जप-क्रम
३७२
373

धवेति॥ इति भाद्रपदशुक्लैकादशी कथा॥ अथ ब्रह्मवैवर्तपुराणोक्तं आश्विनकृष्णैकादशीमाहात्म्यं॥ युधिष्ठिर उवाच। कथयस्व प्रसादेन ममाग्रे मधुसूदन। आश्वि
ने कृष्णपक्षे तु किंनामैकादशी भवेत्॥ श्रीकृष्ण उवाच॥ आश्विने कृष्णपक्षे तु इंदिरा नाम नामतः। तस्या व्रतप्रभावेन महापापं प्रणश्यति॥ अधोयोनि
गतानां च पितॄणां गतिदायिनी॥ शृणु राजन्नवहितो एजनकथां पापहरां परां। यस्याः श्रवणमात्रेण वाजपेयफलं लभेत्॥ पुरा कृतयुगे राजन् बभूव रिपु
मर्दनः। इंद्रसेन इति ख्यातो पुरी माहिष्मतीपतिः॥ स राज्यं पालयामास धर्मेण यशसान्वितः। पुत्रपौत्रसमायुक्तो धनधान्यसमन्वितः। माहिष्मत्यधि
पो राजा विष्णुभक्तिपरायणः। जपन् गोविंदनामानि मुक्तिदानि नराधिपः। कालं नयति विधिवदध्यात्मध्यानतत्परः॥ एकस्मिन् दिवसे राज्ञि सुखासीने
सदोगते। अवतीर्य गमद्धीमान्नारदो गगनान्मुनिः॥ तमागतं मुनिं प्रेक्ष्य प्रत्युत्थाय कृतांजलिः॥ पूजयित्वार्घ्यविधिनासने संन्यवेशयत्॥ सुखो
पविष्टः स मुनिः प्रत्युवाच नृपोत्तमं॥ कुशलं तव राजेंद्र सप्तस्वंगेषु वर्तते॥ धर्मे मतिः प्रवर्तेत विष्णुभक्तिरतिः सदा॥ राजोवाच॥ त्वत्प्रसादान्मुनिश्रेष्ठ स
र्वत्र कुशलं मम॥ अद्य क्रतुक्रियाः सर्वाः सफलास्तव दर्शनात्॥ प्रसादं कुरु विप्रर्षे ब्रूह्यागमनकारणं॥ नारद उवाच॥ श्रूयतां राजशार्दूल मद्वचो वि राम
स्मयप्रदं॥ ब्रह्मलोकादहं प्राप्तः यमलोकं नृपोत्तम॥ शमनेनार्चितो भक्त्या उपविष्टो वरासने॥ धर्मशीलाः सत्यवंतो भास्करिं समुपासते॥ बहुपुण्यप्र ३७२

373A

कर्तव्यं व्रतमेवैतत् कल्मषदोषतः ॥ समायां स्माद्ध देवसमया दृष्टः पिता तव ॥ कथितस्तेन संदेशस्तं निबोध जनेश्वर ॥ इंद्रसेन इति ख्यातो राजा माहिष्मतीपतिः ॥ तस्याग्रे
कथय ब्रह्मन्नास्ति तं मां यमसं निबोध ॥ केनापि चांतरायेन पूर्वजन्मोद्भवेन वा ॥ स्वर्गं प्रेषय मां पुत्र इंदिराव्रतदानतः ॥ इत्युक्तोऽहं समायातः समीपे तव पार्थि
व ॥ पितुः स्वर्गतये राजन्निंदिराव्रतमाचर ॥ राजोवाच ॥ कथयस्व प्रसादेन भगवन्निंदिराव्रतं ॥ विधिना केन कर्तव्यं कस्मिन्पक्षे तिथौ तथा ॥ नारद उवाच
॥ शृणु राजन्नहं वच्मि व्रतस्यास्य विधिं शुभं ॥ आश्विनस्यासिते पक्षे दशमीदिवसे शुभे ॥ प्रातः स्नानं प्रकुर्वीत श्रद्धायुक्तेन चेतसा ॥ ततो मध्याह्नस
मये स्नानं कृत्वा बहिर्जले ॥ पितृणां प्रीतये श्राद्धं कुर्याच्छ्रद्धासमन्वितः ॥ एकभक्तं ततः कृत्वा रात्रौ भूमौ शयीत च ॥ प्रभाते विमले जाते प्राप्ते चैकादशी
दिने ॥ मुखप्रक्षालनं कुर्यात्कुर्याद्दंतधावनं ॥ उपवासस्य नियमं गृह्णीयाद्भक्तिभावतः ॥ अद्य स्थित्वा निराहारः सर्वभोगविवर्जितः ॥ श्वो भोक्ष्ये पुंड
रीकाक्ष शरणं मे भवाच्युत ॥ इत्येवं नियमं कृत्वा मध्याह्नसमये तथा ॥ शालग्रामशिलाग्रे तु श्राद्धं कृत्वा यथाविधि ॥ भोजयित्वा द्विजवरान् दक्षिणाभिः
प्रपूजयेत् ॥ पित्र्यमन्नं समाघ्राय गवे दद्याद्विचक्षणः ॥ पूजयित्वा हृषीकेशं गंधधूपादिभिस्तथा ॥ रात्रौ जागरणं कृत्वा केशवस्य समीपतः ॥ ततः प्रभात
समये संप्राप्ते द्वादशीदिने ॥ अर्चयित्वा हरिं भक्त्या भोजयित्वा द्विजोत्तमान् ॥ बंधुदौहित्रपुत्राद्यैः स्वयं भुंजीत वाग्यतः ॥ अनेन विधिना राजन् कुरु व्रतमतं

जय.कम. दितः॥ विष्णुलोकं मया सांति पितरस्तव भूपते॥ इत्युक्त्वा नृपतिं राजा मुनिरंतरधीयत॥ यथोक्तविधिना राजा चकार व्रतमुत्तमं॥ अंतःपुरेण सहितः सपुत्र
३७४
374 भृत्यसमन्वितः॥ कृते व्रते तु कौंतेय पुष्पवृष्टिरभूद्दिवः॥ तत्पिता गरुडारूढो जगाम हरिमंदिरं॥ इंद्रसेनोपि राजर्षिः कृत्वा राज्यमकंटकं॥ राज्ये निवेश्य
तनयं जगाम त्रिदिवं स्वयं॥ इंदिराव्रतमाहात्म्यं तवाग्रे कथितं मया॥ पठनाच्छ्रवणाद्राजन्सर्वपापैः प्रमुच्यते॥ इति श्रीब्रह्मवैवर्तपुराणे आश्विन
कृष्णैकादश्यां इंदिरानाम्न्या माहात्म्यं समाप्तं॥ अथ पद्मपुराणोक्तं आश्विनशुक्लैकादशीमाहात्म्यं॥ युधिष्ठिर उवाच॥ कथयस्व प्रसादेन भगवन्मधु
सूदन॥ इषस्य शुक्लपक्षे तु किंनामैकादशी भवेत्॥ श्रीकृष्ण उवाच॥ शृणु राजेंद्र वक्ष्यामि माहात्म्यं पापनाशनं॥ शुक्लपक्षे चाश्वयुजि भवेदेकादशी त
था॥ पापांकुशेति विख्याता सर्वपापहरा परा॥ पद्मनाभाभिधानं च पूजयेत्तत्र केशवं॥ सर्वाभीष्टफलप्राप्त्यै सर्वमोक्षप्रदं नृणां॥ तपस्तप्त्वा नरस्तीव्रं चि
रं नियतमानसः॥ तत्फलं समवाप्नोति तं नत्वा गरुडध्वजं॥ कृत्वापि बहुशः पापं नरो मोहसमन्वितः॥ न याति नरकं नत्वा सर्वपापहरं हरिं॥ पृथि
व्यां यानि तीर्थानि पुण्यान्यायतनानि च॥ तानि सर्वाण्यवाप्नोति विष्णुनामानुकीर्तनात्॥ देवं शार्ङ्गधरं विष्णुं ये प्रपन्ना जनार्दनं॥ न तेषां यमलोकस्य याम
यातना जायते क्वचित्॥ उपोष्यैकादशीं चैकां प्रसंगेनापि मानवः॥ न याति यातनां यामं पापं कृत्वापि दारुणं॥ वैष्णवः पुरुषो भूत्वा शिवनिंदां करोति यः॥ ३७५

374A न विंध्याद्वै क्षवं लोकं सयाति नरकं ध्रुवं। नेदृशं पावनं किंचित्त्रिषु लोकेषु विद्यते॥ यादृशं पद्मनाभस्य दिनं पातकहानिदं॥ तावत्पापानि देहेस्मिन् तिष्ठंति मनुजाधिप॥ याव
न्नोपवसेत् जंतुः पद्मनाभदिनं शुभं॥ अश्वमेधसहस्राणि राजसूयशतानि च॥ एकादश्युपवासस्य कलां नार्हंति षोडशीं॥ एकादशीसमं किंचित् पुण्यं लोके न विद्यते॥ व्याजेना
पि कृता राजन् न दर्शयति भास्करिं॥ स्वर्गमोक्षप्रदा ह्येषा शरीरारोग्यदायिनी॥ सुकलत्रप्रदा ह्येषा जीवत्पुत्रप्रदायिनी॥ न गंगा न गया राजन् न काशी न च पुष्करं॥ न चापि कौ
रवं क्षेत्रं पन्नपुण्यं तद्धरेर्दिनात्॥ रात्रौ जागरणं कृत्वा समुपोष्य हरेर्दिने॥ अनायासेन भूपाल प्राप्यते वैष्णवं पदं॥ दशैव मातृके पक्षे दश राजेंद्र पैतृके॥ प्रियाया दश पक्षे तु
पुरुषानुद्धरेन्नरः॥ चतुर्भुजा दिव्यरूपा नागारिकृतकेतनाः॥ स्रग्विणः पीतवस्त्राश्च प्रयांति हरिमंदिरं॥ बालत्वे यौवनत्वे च वृद्धत्वे च नृपोत्तम॥ उपोष्यैकादशीं नूनं नैति पा
पोपि दुर्गतिं। पापांकुशामुपोष्यैव आश्विने सासिते नरे॥ सर्वपापविनिर्मुक्तो हरिलोकं स गच्छति॥ दत्वा हेमतिलान् भूमिं गामन्नमुदकं तथा॥ उपानद्वस्त्रछत्रादि न पश्यंति य
मं नरः॥ यस्य पुण्यविहीनानि दिनान्यायांति यांति च॥ स लोहकारभस्त्रेव श्वसन्नपि न जीवति॥ अवंध्यं दिवसं कुर्यात् दरिद्रोपि नरोत्तम॥ समाचरन् यथाशक्त्या स्नानदानादिकां
क्रियां॥ तडागारामसौधानि पुष्पवाटीप्रपाकर्माणि॥ कर्तारो नैव पश्यंति घोरं तं यमयातनां॥ दीर्घायुषो धनाढ्याश्च कुलीना रोगवर्जिताः॥ दृश्यंते मानवा एते व्रतकर्त्तार ईदृशा
थ किमत्र बहुनोक्तेन यात्ना धर्मेण दुर्गतिं॥ आरोहंति दिवं धर्मेणात्र कार्या विचारणा॥ इति ते कथितं राजन् यत्पृष्टोहं त्वयानघ॥ पापांकुशाया माहात्म्यं किमन्यत् श्रोतुमिच्छ

जय॰ कृ॰ म॰ सि॥ ॥इति श्रीपद्मपुराणे आश्विनशुक्लपक्षे पापांकुशामाहात्म्यं समाप्तं॥ अथ पद्मनाभद्वादशीव्रतं॥ हेमाद्रौ॥ युधिष्ठिर उवाच॥ तद्वदाश्वयुजे मासि द्वादशीं सितपक्षिणीं॥ संकल्प्या
३२५ मर्चयेद्देवं पद्मनाभं सनातनं॥ पद्मनाभाय पादौ तु कटिं वै पद्मयोनये॥ उदरं सर्वदेवाय पुष्कराक्षाय वा उरः॥ अव्यग्राय तथा बाहू शार्ङ्गवक्षस्थलादि सूजयेत्॥ प्रभवाय शिरः पू
375 ज्यप्राग्वदर्घ्यघटं समसेत्॥ तस्मिन्हेममयं देवं पद्मनाभं तु विन्यसेत्॥ तमेव देवं संपूज्य गंधपुष्पादिभिः क्रमात्॥ प्रभातायां तु शर्वर्यां ब्राह्मणाय निवेदयेत्॥ प्रीयतां पद्म
नाभः पद्मनाभरूपी इति मंत्रः॥ आसीत्कृतयुगे राजन्भद्राश्वो नाम वीर्यवान्॥ तस्य नाम्ना भवद्वर्षं पद्मनाभं च नामतः॥ तस्यागस्त्यः कदाचित्तु गृहमागत्य भूपतेः॥ उवा
व पंचरात्रं तु वसतामिभवतो गृहे॥ तं राजा शिरसा नत्वा स्थापितासिप्रभाषत॥ तस्य कांतिमती नाम्ना भार्या परमशोभना॥ तामगस्त्यस्तथा दृष्ट्वा रूपतेजोन्वितां शुभां॥ प्र
पलास्वमृयात्तस्याः कुर्वंसः कर्मशोभनां॥ ताङ्कसाञ्जगन्नाथस्त्रीशूद्राः साधुसाध्विति॥ एवमुक्त्वा ननर्त्तो वै रागस्पो राजसंनिधौ॥ राजोवाच॥ किं हर्षकारणं ब्रह्मन्ये
नैवं नृत्यते भवान्॥ अगस्त्य उवाच॥ इयं राज्ञी तदीया भूद्दासी वैश्यस्य वैदिशे॥ नगरे हरिदत्तस्य तमस्याः पतिरेव च॥ तं सेवकर्मकारो भूद्वद्रोविंध्योति नामतः॥ सर्वे श्या
श्वयुजे मासि द्वादश्यां नियतः शुचिः॥ स्वयं विष्णवालयं गत्वा गंधपुष्पादिभिर्हरिं॥ अभ्यर्च्य सलसंगत्वा याज्ञवंतो रक्षपालकौ॥ स्थाप्य द्वावपि दीपानां ज्वालनर्थं महामते एम॰
गते तस्मिन्भवंतौ तं दीपप्रज्वलनेस्थितौ॥ यावच्च भाता रजनी निःशष्येन नरोत्तम॥ ततः कालेन महता मृतौ द्वावपि दंपती॥ तेन पुण्यप्रभावेन जन्म जातं प्रियव्रते॥ इयं ३२५

375A

व पत्नी ते जाता वैश्य दास्य ममवत्सप्रया।। पारणा स्मापि दीपस्तु ज्वालितस्य गृहे हरेः।। इयं सुपुष्टिः सुराज्ञा नामक्तिसुक्त सतेपुरा।। स्वेन यः पुनरर्थेन विष्णुसमभ्यर्च्य दीपकं
।। ज्वालयेत्तस्य पस्तु पुण्यं न संख्यातुं न शक्यते।। इति धरणीव्रते पद्मनाभद्वादशीव्रतं।। असामेवैकादश्यां भविष्योत्तरोक्तं पुत्रप्राप्तिव्रतं।। युधिष्ठिर उवाच।। कर्णो
क्वचिन्नि॰ उपरि ब्द्वत॰ पुरुषो जायते किल।। कारणं च यानं पम्मुच्येत पुरुषः पुत्रदर्शनात्।। पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः।। तस्मात्पुत्र इति प्रोक्तः स्व
यमेव स्वयंभुवा।। हिरण्यगर्भ बीजं उजरिलं भूलिक्ष्मां। पुत्रस्य हीना न पश्यन्ति गंगाधरमिवात्मजं।। तस्मात्पुत्रलाभाय यत्नं तदुदीरय।। श्रीकृष्ण उवाच
।। एकादश्यां वा भ्रसुजे स्नातो यो व्यापयेद्धरिं गां रात्रौ पृथयेद्धात्तवस्त्रां यागवाहिकीं।। अपरे न्हि मन्याभ्यर्च्य निशि भुंजीत वाग्यतः।। मासे मासे थ वैतानि हरि
नामानि कीर्तयेत्।। अपराजितो जातशत्रुर्घुरा कृतपुरंदरः॥ वर्धमान॰ सुरेशश्च महाबाहु॰ प्रभुर्विभु॰।। स्वभूतिः स्वमना शौवश्च सुप्रवेता इतीरयेत्।। एवं द्वा
दश प्रभिर्वै मासे वर्षपारयेद्व्रती।। व्रतान्ते जुहुयाद्देवि नाममिर्घृतपायसं।। ब्राह्मणान्भोजयेत्पश्चाद्द्वादशैनेमासमसंख्यपा।। मासे मासे यथाशक्ति दानं प्रार्थनमेव
च।। यथाहितेभेवास्तु पुत्रः शाश्वतश्चाक्षयोऽस्तुतः।। तथाभवतु मे देव पुत्रो जन्मनि जन्मनि।। वैष्णवी सुरभी माता ब्रह्मण्या देवपूजिता।। गृहाण मे मया दत्तं
पिंडं सत्त्वगामक्लकी।। वस्त्राभरणगोदानैर्ब्राह्मणान्भोजयेद्गुरुं।। इतिश्रीभविष्योत्तरोक्तं पुत्रप्राप्तिव्रतं।। आश्विनशुक्लैकादश्यां उपवासजागरणादिकं कु

जय·राम·
३७६
376

त्याद्वादशपादिषु विष्णुउर्ध्वजनादिकीं कुर्यात॥ तदुक्तं ब्रह्मपुराणे॥ आश्विनतिथिप्रक्रमेसोपवासे श्वकार्त्तिके चएकादश्यांप्रजागरः॥ द्वादश्यां नामदेवश्च उर्ध्वजनीपस्त
सर्वदा॥ यात्रो समवश्चकार्त्तिकस्त्वयोर्दश्यां तु वेङ्कवैः॥ उपवासश्च तु दर्श्यां पौर्णमास्यां हरिं यजेदित्यर्थः॥ अस्यामेवैकादश्यां कार्त्तिकस्नानारंभउक्तः पाद्मे॥ आ
श्विनस्यतु मासस्य याशुक्लैकादशीभवेत्॥ कार्त्तिकस्यव्रतानीह तस्यां वै मासमेक तु चीरिति॥ विष्णुनाथः॥ तुलासंक्रांतिमारभ्यकार्तिकमित्यर्थः॥ तुलामकरमेषे
षु प्रातःस्नायीभवेत्सदा॥ हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति॥ शर्वरीमाश्वयुजे मासि पौर्णमास्यां समाहितः स्नात्वा मासं समग्रं प्रयात्वभक्त्यासमाप्य तेका
र्त्तिकपौर्णमास्यामिति हेमाद्रिलिखितं नारदीयपुराणे शर्वरीमारंभेपमार्गां॥ कार्त्तिकव्रतग्रहणाप्रकारादिकं त्वग्रेवक्ष्यामः॥ इत्याश्विनशुक्लैकादशीकृत्यं॥ अथब्र
ह्मवैवर्त्तपुराणोक्तं कार्त्तिककृष्णैकादशी माहात्म्यं॥ युधिष्ठिरउवाच॥ कथयस्वप्रसादेनममस्नेहाज्जनार्दन। कार्त्तिकस्यासितेपक्षे किंनामैकादशीभवेत्
॥ श्रीकृष्णउवाच॥ शृणुपार्थ राजशार्दूल कथयामि तवाग्रतः। कार्त्तिके कृष्णपक्षे तु रमानाम सुशोभना॥ एकादशीसमाख्याता महापापहरा परा॥ अस्याः प्र
संगतोराजन्माहात्म्यं प्रवदामिते॥ मुचुकुंद इति ख्यातो बभूव नृपतिः पुरा॥ देवेंद्रेण समं यस्य मित्रत्वमभवन्नृप॥ यमेन वरुणेनैव कुवेरेण समं तथा॥ विभीष
णेन यस्यैव सखित्वमभवत्सह॥ विष्णुभक्तः सत्यसंधो बभूव नृपतिस्तदा॥ तस्यैवं शासतोराज्यं राजान्निहतकंटकं॥ बभूव दुहितागेहे चंद्रभागा सरिद्वरा॥ शोभना

राम·
३७६

376A

यत्नमाहृत्य वै चंद्रसेनसुतायवै ॥ सकदाचित्समायातं श्वशुरस्य गृहे तत्र ॥ एकादशीव्रतदिने समायातं तु शोभनं ॥ समागते व्रतदिने ॥ चंद्रभागा व्यचिंतयत् ॥ किं भविष्यति देवेश
मम भर्त्ता तिदुर्बलः ॥ क्षुधां न सहते तोदुं षितावै बोधशोभनः ॥ पटहस्ताड्यते पत्युः संप्राप्ते दशमीदिने ॥ न भोक्तव्यं न भोक्तव्यं न भोक्तव्यं हरेर्दिने ॥ श्रुत्वा पटहनिर्घो
षं शोभनस्त्वब्रवीत्प्रियां ॥ किं कर्त्तव्यं मया कांते देहि शिक्षां शुभानने ॥ चंद्रभागोवाच ॥ मत्पितुर्वेश्मनि विभो भोक्तव्यं नाद्य केनचित् ॥ गजैरश्वैश्च करभैरन्यैः पशुभिरेव च
॥ तृणमन्नं तथा वारि न भोक्तव्यं हरेर्दिने ॥ मानवैश्च कुतः कांत भुज्यते हरिवासरे ॥ यदि त्वं भोक्ष्यसे कांत ततो गर्हां प्रयास्यसि ॥ एवं विचार्य मनसा सुदृढं मानसं कुरु ॥ शो
भन उवाच ॥ सत्यमेतत्प्रिये वाक्यं करिष्येऽहमुपोषणं ॥ दैवेन विहितं यद्धि तत्तथैव भविष्यति ॥ इति बुद्धिं दृढां कृत्वा चकार नियमं व्रते ॥ क्षुत्तृष्णापीडिततनुः स बभूवाति
दुःखितः ॥ इति चिंतयतस्तस्य आदित्योस्तमगाद्गिरिं ॥ वैष्णवानां नराणां मानिसंहर्षविवर्द्धिनी ॥ हरिपूजारतानां च जागरासक्तचेतसां ॥ बभूव नृपशार्दूल शोभन
स्यातिदुःखिता ॥ रवेरुदयवेलायां शोभनः पंचतां गतः ॥ दाहयामास राजा तं राजयोग्यैश्च दारुभिः ॥ चंद्रभागा नात्मदेहं ददाह पतिना सह ॥ कृत्वौर्ध्वदेहिकं तस्य तस्थौ जन
कवेश्मनि ॥ शोभनेन नृपश्रेष्ठ रमाव्रतप्रभावतः ॥ प्राप्तं देवपुरं रम्यं मंदराचलसानुनि ॥ अनुपममनाधृष्यमसंख्येयगुणान्वितं ॥ हेमस्तंभमयैर्नद्धं रत्नवैडूर्यमंडितैः ॥
स्फटिकैर्विविधाकारैर्विचित्रैरुपशोभितं ॥ सिंहासने समारूढः श्वेतछत्रसमंयुतः ॥ केयूरकुंडलयुतो हारकेयूरभूषितः ॥ स्तूयमानश्च गंधर्वैरप्सरोगणसेवितः ॥ शोभ

नः शोभते तत्र देवरा ऊपरो यथा ॥ सोमशर्मेति विख्यातो मुकुंदपुरे वसन् ॥ तीर्थयात्राप्रसंगेन भ्रमन्निमोददर्शनं ॥ नृपजामातरं ज्ञात्वा तत्समीपे जगाम सः ॥ शोभनो
पितरा तात सोमशर्मागमागते ॥ आसनादुत्थितः शीघ्रं नमश्चक्रे द्विजोत्तमं ॥ चकार कुशलप्रश्नं श्वशुरस्य तु पश्यतां ॥ कांता यावदिंदुमाभाग्या यास्ता थैव नगरस्य च ॥ सोम
शर्मोवाच ॥ कुशलं वर्त्तते राजन् श्वशुरस्य गृहे तव ॥ चंद्रभागा कुशलिनी सर्वेषां कुशलं पुरे ॥ स्वप्नं कथं तत्तां राजन् न वाश्चर्यपरं मम ॥ दृष्टं वि विचित्रं हाविरं न दृष्टं केनचि
त्क्वचित् ॥ सुतहा वल्लभन्दपते कृतः शाममिदं तथा ॥ शोभन उवाच ॥ कार्त्तिकस्यासिते पक्षे परमैकादशी मता ॥ तामुपोष्य मया प्राप्तं द्विजेंद्र पदमुत्तमं ॥ ध्रुवं भवति येन
तन्न त्कुरुष द्विजोत्तम ॥ सोमशर्मोवाच ॥ मयैतद् द्विहितं विप्रश्चद्वा तीनं व्रतोत्तमं ॥ जेनाहम ध्रुवं मन्ये ध्रुवं भवति तत् छु गा ॥ सुमुकुंदस्य दुहिता चंद्रभागा सुशोभना ॥ त
स्यै कथय वृत्तांतं ध्रुवमेतद्भविष्यति ॥ इति श्रुत्वा च वत्सस्य गतो विप्रः स वेश्मनि ॥ कथयामास वृत्तांतं राजकन्याय तो नृपः ॥ श्रुत्वाथ सा द्विज वचो विस्मयोत्फुल्ललोच
नः ॥ सत्यं स्वप्नमथ वास्तम स्वयैतत्कथ्यते द्विज ॥ सोमशर्मोवाच ॥ प्रत्यक्षं दृ पितः कांतस्त्वव दृष्टो मया शुभे ॥ दैवकुलमनाधृष्यं दृष्टं तत्सदुरं मया ॥ अध्रुवं तेन तत्प्रोक्तं
ध्रुवं भवति तत्कुरु ॥ चंद्रभागोवाच ॥ तत्र मां नय विप्रर्षे पतिदर्शनलालसा ॥ आत्मनो व्रतपुण्येन करिष्येहं पुरं ध्रुवं ॥ आवयोर्द्विज संयोगो यथा भवति तत्कुरु ॥ मा सुहि राम॰
तं महत्पुण्यं कन्या योगं विमुक्तये ॥ इति श्रुत्वा सह तया सोमशर्मा जगाम ह ॥ आश्रमं वामदेवस्य मंदराचलसंनिधौ ॥ वामदेवोश्शरोतान्स र्वेवृत्तांतं कथितं तयोः ॥ अभ्यषिं ३७७

377A

चचंद्रभागां वेश्मं चैरं थोर्जितैः॥ ऋषिमंत्रप्रभावेन हरिसेवा सुनसेवनात॥ दिव्यदेहाबभूवासौ दिव्यांगातिमवापच॥ पत्युः समीपमागमत् सहर्षोत्फुल्ललोचना॥ जहर्षशो
भनोतीवदृष्ट्वा कांतां समागतां॥ समागतपत्नकेनाम पार्श्वेतां समन्वेशयत॥ अथोवाच प्रियाहर्षात् चंद्रभागाशुभं वचः॥ शृणु कांत हितं वाक्यं यस्तु राणं विघ्नेमपि॥ अष्टवर्षी
यिकाजाता तदाहं पितृवेश्मनि॥ मयातत्तः प्रभृत्येवकृतमेकादशीव्रतं॥ यथोक्तविधिनायुक्तं श्रद्धापूतेन चेतसा॥ तेन पुण्यप्रभावेन पुरं त्वं भवति ध्रुवं॥ सर्वकामसमृद्धिं च
यावदाभूत संप्लवं॥ एवं स नृपशार्दूल रमते पतिना सह॥ दिव्यभोगा दिव्यरूपा दिव्याभरणभूषिता॥ शोभनोपि तया सार्द्धं रमते दिव्यविग्रहः॥ रमाव्रतप्रभावेन मंदराग्र
सानुनि॥ चिंतामणि समा ह्येषा कामधेनुसमाथवा॥ रमाभिधाना नृपते तवाग्रे कथिता मया॥ एकादशीव्रतानां च पक्षयोरुभयोरपि॥ यथा शुक्ला तथा कृष्णा विभेदं नैव
कारयेत्॥ सेवितैकादशी नृणां भुक्तिमुक्तिप्रदायिनी॥ धेनुः श्वेता तथा कृष्णा उभयोः सदृशं पयः॥ तथैव तुल्यफलदं स्मृतमेकादशीद्वयी॥ एकादशीव्रतानां च माहा
त्म्यं शृणुते नरः॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते॥ इति श्रीब्रह्मवैवर्तपुराणे कार्तिककृष्णपक्षे रमैकादशीमाहात्म्यं समाप्तं॥ अथ कार्तिकशुक्लैकादशीकथा
॥ब्रह्मोवाच॥ बोधिन्याश्चैव माहात्म्यं पापघ्नं पुण्यवर्द्धनं॥ मुक्तिप्रदं सुबुद्धीनां शृणुष्व मुनिसत्तम॥ तावद्गर्जंति तीर्थानि। आसमुद्रसरांसि च॥ यावत् प्रबोधिनी विष्णो
स्तिथिर्नायाति कार्तिके॥ तावद्गर्जंति विप्रेंद्र गंगा भागीरथी क्षितौ॥ यावन्नायाति पापघ्नी कार्तिके हरिबोधिनी॥ अश्वमेधसहस्राणि राजसूयशतानि च॥ एकेनैवोपवासेन बोधिन्याः ऊ

जय·कल्प
३७८
378

कृतेनर४॥यदुर्लभंमवदुःप्राप्यंत्रैलोक्यमनगोचरं४॥तदप्यप्रार्थितंपुत्रंददातिहरिबोधिनी॥मेरुमंदरमात्राणिपापान्युग्राणियानितु॥एकेनैवोपवासेनदहतेपापहारिणी॥पू
र्वजन्मसहस्रेषुपापंचदुःकर्मचार्जितं॥जागरेणप्रबोधिन्यादह्यतेतूलराशिवत्॥यथोक्तंकुरुतेयस्तुविधिवत्सुकृतंनर४॥स्वल्पंमुनिवरश्रेष्ठमेरुतुल्यंभवेत्फलं॥उपवासंप
बोधिन्यायःकरोतिस्वभावतः४॥विधिवन्मुनिशार्दूलयथोक्तंलभतेफलं॥विधिहीनंतुयःकुर्यान्नकृतंमेरुमात्रकं॥अणुमात्रंचनाप्नोतिफलंधर्मस्यनारद॥योध्यायति
मनोयस्याकरिष्यामिप्रबोधिनीं॥वसंतिपितरोहृष्टाविष्णुलोकेमहीयते॥विमुक्तानारकैर्दुःखैर्यांतिविष्णोःपरंपदं॥कृत्वातुपातकंघोरंब्रह्महत्यादिकंनर४॥कृत्वातुजा
गरंविष्णोर्धौतपापोभवेन्नर४॥दुःप्राप्यंयत्फलंविप्रअश्वमेधादिभिर्मखै४॥प्राप्यतेतत्सुखेनैवप्रबोधिन्यांतुजागरे॥आप्लुत्यसर्वतीर्थेषुदत्वागाःकांचनंमही॥नरस्तत्फ
लमाप्नोतियत्कृत्वाजागरंहरेः॥जात४सएवसुकृतीकुलंतेनैवपालितं॥कार्तिकेमुनिशार्दूलकृतायेनप्रबोधिनी॥यथाध्रुवंनगाणांमन्त्रार्थंननाशस्तथाध्रुवं॥इतिज्ञा
त्वामुनिश्रेष्ठकर्तव्यंवैष्णवंहितं॥यानिकानिचतीर्थानित्रैलोक्येसंभवंतिच॥तानितस्यगृहेसम्यक्यःकरोतिप्रबोधिनीं॥सर्वकृत्यंपरित्यज्यतुष्ट्यर्थंचक्रपाणिन४॥
उपोष्यैकादशीसम्यक्कार्तिकेहरिबोधिनी॥किंतस्यबहुभिःपुण्यैःकृतायेनप्रबोधिनी।परलोकप्रदास्येषाकार्तिकेहरिबोधिनी॥सज्ञानीसचयोगीचतपस्वी स्मः
सजितेंद्रियः॥भोगोमोक्षश्चतस्यास्तिउपास्तेहरिबोधिनी॥विष्णोःप्रियतरास्वेषाधर्मसारसहायिनी॥यःकरोतिनरोतिनरोभक्त्यामुक्तिभाक्सभवेन्नर४॥प्रबोधिनीमु ३७८

378A

पोषितं प्राग्जन्मविंशतेनरः॥ सर्वे धर्मान्यरित्यज्यतस्मात्कुर्वीत जनार्दन॥ कर्मणा मनसा वाचा यापं यत्समुपार्जितं॥ तत्क्षालयति गोविंदः प्रबोधिन्यां प्रजागरे॥ स्नानं दानं जपो हो
मः समुद्दिश्य जनार्दनं॥ नरैर्यत्क्रियते तस्मिन्प्रबोधिन्यां तदक्षयं॥ ये व्रतं तिन राक्षस्यां भक्त्या रे वै माधवं॥ समुपोष्य प्रमुच्यंते पापैस्ते शतजन्मजैः॥ महाव्रतमिदं पुत्र म
हापापौघनाशनं॥ प्रबोधवासरं विष्णोर्विधिवत्समुपोषयेत्॥ अनेनानेन देवेश परितोष्य जनार्दनं॥ विराजयन्दिशः सर्वाः प्रयाति हरिमंदिरं॥ कृते येषा प्रयत्नेन न
रैः कीर्तिमराश्चिमिः॥ बाल्ये यत्नार्जितं पापं यौवने वार्द्धके तथा॥ शतजन्मकृतं पापं स्वल्पं वा यदि वा बहु॥ तत्क्षालयति गोविंदस्तस्यामभ्यर्चितः खलु॥ धनधाम
महापुण्या सर्वपापहरा शुभा॥ तामुपोष्य हरेर्भक्त्या दुर्लभं न भवेत्क्वचित्॥ चंद्रसूर्योपरागे च यत्फलं परिकीर्तितं॥ तस्मात्सहस्रगुणं प्रोक्तं प्रबोधिन्यां प्रजागरे॥ स्नानं
दानं जपो होमः स्वाध्यायोऽर्चनं हरेः॥ तत्सर्वं कोटिगुणितं प्रबोधिन्यां तु यत्कृतं॥ जन्मप्रभृति यत्पुण्यं नरेणा वर्जितं भवेत्॥ वृथा भवति तत्सर्वमकृत्वा कार्तिके व्र
तं॥ अकृत्वा नियमं विष्णोः कार्तिके यः क्षिपेन्नरः॥ जन्मार्जितस्य धर्मस्य फलं नाप्नोति नारद॥ परान्नं वर्जयेद्यस्तु कार्तिके विष्णुतत्परः॥ परान्नवर्जनाद्विप्र चांद्रायण
फलं लभेत्॥ न तत्याज्यं तु पापेन तैर्न दानैर्वा गजादिभिः॥ यथा शास्त्रकथालापैः कार्तिके मधुसूदनः॥ कुर्वंति ये कथां विष्णोर्ये शृण्वंति समाहिताः॥ श्लोकार्द्धं श्लो
कपादं वा कार्तिके गोशतं फलं॥ धर्मान्सर्वान्परित्यज्य कार्तिके केशवाग्रतः॥ शास्त्रावधारणं कार्यं श्रोतव्यं च महामुने॥ श्रेयसा लोभबुद्ध्या वा यः करोति हरेः कथां॥ का

र्त्तिके मुनिशार्दूल कुलानां तारयेच्छतं ॥ नियमेन नरो यस्तु शृणुते वैष्णवीं कथां ॥ कार्त्तिके तु विशेषेण गोसहस्रफलं लभेत् ॥ प्रबोधवासरे विष्णोः शृणुते यो हरेः कथां ॥ स
सद्वीपावनीदानफलं समलभते मुने ॥ कृत्वा विष्णुकथां विष्णोर्यान्ति यांति कथाविदः ॥ स्वशक्त्या मुनिशार्दूल तेषां लोकोक्षयः स्मृतः ॥ गीतवाद्यविनोदेन कार्त्तिके यो
न येन्नरः ॥ न तस्य पुनरावृत्तिर्मया दृष्टा हि नारद ॥ एकासीन्नृत्यनिपुणा वेश्या देवांगनोपमा ॥ गीतेन मोहिता स्तपाप्सु श्रुते विवेन सः ॥ विषयं वा नै
नेक्षी तेन त्या स्वक्षहंतं तया ॥ यद्यन्नस्याभवेद्राजा नृत्यस्य हरिसंनिधौ ॥ विशेषतः समायांति जनाः शृण्वंति भवेन्नपुरं ॥ धनं प्रलोभ्य सर्वेषां हृतं किमिति वार्यते
॥ पत्तप्रेमा रामा हृष्टः सत्यां दधार धरणीधरः ॥ कदाचित्कार्त्तिके मासि प्रबोधिन्याः प्रजागरे ॥ ननर्त्त स विशेषं सा पश्यंती प्रतिमां हरेः ॥ तत्र कृष्णस्य मां निधे रूप
शृंगारमोहिता ॥ कृष्णप्रीत्या ह्यवृत्त विज्ञा विते चैतद्य चिंतयत् ॥ अयं नारायणः साक्षादनंताद्भुत मो भगवान् ॥ मया सहैव नृत्येन तकथं संभाष्यते लिहा ॥ असरा
गगहा स्यकी दृशः संविभाव्यते ॥ रूपे तौ वहिपस्या हं सुष्ट वित्ता स्मिरागिणी ॥ वहीष मास्तु नारीषमध्ये वा विकृपीतिमान् ॥ न त्येतासौ मया सार्धं कंठाश्लेषादिभाव कृत
॥ इत्थं मनोरथं वाला कुर्वती नृत्यमुत्सुका ॥ हरिप्रीत्या वसर्वोतां रात्रिमेवा स्वाहयत् ॥ ततः प्रातश्च तत्तु राणं जागरस्य न्यपोजयत् ॥ तस्मिन्मनोरथे वाला यन्त्र वका राम॰
रातिन्नृत्सकं ॥ ततः सा कृतिभिर्वर्षैस्तत्र त्यक्त्वा कलेवरं ॥ वित्तं हि त्वाखिलं स्वर्गं गत्वा देवांगनाभवत् ॥ तत्रापि गीतनिपुणा नृत्सा भिनयकोविदा ॥ रेमे रम्ये विमा ३७९

379A

नाग्रेरूपयौवनशालिनी॥ कदाचित्स्फाटिकेकुंजे स्वरूपं ददृशेंगना॥ चिंतयामासमेरूपं अमोघो यं न कस्यचित्॥ इत्युदीरितमात्रेणापूर्वजन्म मनोरथं॥ स्मारस्मातितन्वंगी कृष्णेन सत्वनर्त्तनं॥
नपतिंकाम येत्कंचित्तब्रह्मचर्ये स्थितासदा॥ तामेव मूर्त्तिं ध्यायंती चंद्रकांतिवरानना॥ श्रीकृष्णगाथांगायंती रोमांचोद्भेदलक्षणां॥ अस्मिन्मन्वंतरे प्रीता श्रीकृष्णप्रियवार्तया॥ एतद्दृष्ट्वा तरस
वासौ स्मरिमोरप्रपीडिता॥ तदर्थं वासुदेवश्चावतीतीर्थे स्म दिह॥ कृष्णक्रीडार्थमादिष्टा ब्रह्मणा स्वयोषितः॥ राघवावतरेतस्य हे कमार्पावतं महत्॥ आसीज्जथावततस्रीत्वैसंभवं तु स्त
रास्त्रियः॥ कैशोरे गोपकन्यास्तायोवनेराजकन्यका॥ कृत्वा देवांगनास्त्वमवीजनयं तु हरेर्मुदं॥ इत्यात्मसाकृतास्तेषा चंद्रकांतिरुवावतं॥ पूर्वजन्म मनोऽस्तेषम मस्येकोमनोरथः॥
श्रमोगता याः स्वर्ये तत्र तस्माद्रापितामह॥ सतीषन्यापुनारीसुजगन्मोहनरूपधृक्॥ मथ्येवातिप्रीतिमांश्च न त्यजामि गवामया॥ इमं मनोरथं तस्या अनुमोद्यपितामह
॥ देवांशा न वनारायस्तुरानम्यांसृष्टादिशत॥ वृषभानुरितिख्यातो गोपो नंदस्य जेवसत्॥ तस्य कन्यावरारोहा राधानाम्नाभवत्सुरा॥ यावंद्रकांतिरित्याभीद्दित्येतत्कथितमया॥ प्रवोधि
नीजागरणस्य वैभवात्प्रसन्नईशोविविनासमस्य कृत॥ वकाररागोत्सवनर्त्तनं सर्वं दानन्नेभ्याभिरपीहराधया॥ सानृत्समानाद्भुतगोपरूपिणा कृष्णेन जन्मांतरवांछितेन॥ ए
वामहाप्रेमभराकुलेंद्रियाविमेमलोकं कथयाकृताथैतां॥ तस्मात्कृत्वोधिनी कल्लारारात्रौकलाकृजागरं॥ कृष्णोत्थितंहरिंदृष्ट्वाकामाः संसारजा द्विजाः॥ मधुरायां तु संवासेजागरे
हरिवासरे॥ कार्तिके बोधिनीप्राप्य ततः श्रेयः परं नहि॥ गीतं नृत्यं स्तवावाद्यं स्वनाद्यं विष्णुकथां मुने॥ यः करोति स पुण्यात्मा त्रैलोक्योपरि संस्थितः॥ वहुपुष्पैर्वहुफलै कर्पूरागरुकुं

३९०
380

कुसुमैः सुहोः पूजा सिद्धा तस्या कार्त्तिके बोधवासरे ॥ वितताघं नकर्त्तव्यं संप्राप्ते हरिवासरे ॥ यस्मात्तु प्राप्यमसौख्यांतं प्राप्यते मुनिसत्तम ॥ पुष्पैर्नानाविधैर्दिव्यैः प्रबोधिन्यां तु जागरे ॥ शंखेनार्घ्यं समादा
पञ्चार्घ्यो देयो जनार्दने ॥ यत्फलं सर्वतीर्थेषु सर्वदानेषु यत्फलं ॥ तत्फलं कोटिगुणितं दत्वार्घ्यं बोधवासरे ॥ गुरुः पूज्यात नः कार्यो भोजनाच्छादनादिभिः ॥ दक्षिणाभिश्च देवर्षे तुष्ट्यर्थं चक्रपाणि
नः ॥ भगवंतमभिध्यायन् प्रणामांश्च पठेन्नरः ॥ सत्यप्रश्नं भवेत्तस्य कपिलादानजं फलं ॥ कार्त्तिके मुनिशार्दूल मद्भक्तो वैष्णवं व्रतं ॥ यः करोति यथोक्तं तु मुक्तिस्तस्य निश्चया ॥ केत
काग्रकपत्रेण पूजितो गरुडध्वजः ॥ समाः सहस्रं सुप्रीतो भवते मधुसूदनः ॥ अगस्त्यकुसुमैर्देवं पूजयेद्यो जनार्दनं ॥ दर्शनात्तस्य देवर्षे नरकाग्निः प्रणश्यति ॥ मुनिपु
ष्पार्चितो विष्णुः कार्त्तिके पुरुषोत्तमः ॥ ददात्यभिमतान्कामान्शशी सूर्ये स्थितो यथा ॥ विहाय सर्वपुष्पाणि मुनिपुष्पेण केशवं ॥ कार्त्तिके योर्चयेद्भक्त्या वाजिमेधफलं लभेत् ॥ तु
लसीदलपुष्पाणि यो प्रदद्यति जनार्दने ॥ कार्त्तिके सकलं वत्स पापं जन्मायुतं दहेत् ॥ दृष्टा स्पृष्टाथवा ध्याता कीर्तिता नमिता स्तुता ॥ रोपिता सिंचिता नित्यं पूजिता तुलसी शुभा ॥
नवधा तुलसी भक्तिं ये कुर्वंति दिने दिने ॥ युगकोटिसहस्राणि तन्वंति सुकृतं मुने ॥ यावच्छाखाप्रशाखाभिर्बीजपुष्पफलैर्मुने ॥ रोपिता तुलसी पुंभिर्वर्द्धते वसुधातले ॥ तेषां वं
